1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The ... her with ... ufficient

THE

VÊDÂNTA VÂDÂVALÎ SERIES

THE WORKS OF

SRI U. VIDWÂN ANANDÂLWAR.

VOL. II.

द्वितीयसम्पुट—विषयसूची.

॥ श्रीः ॥

सिद्धान्तसिद्धाञ्जनम्

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितम् ।

विद्वद्वरैः परिशोध्य

म. अ. अनन्तार्येण
प्र. भ. तो. नरसिंहार्येण च
कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतम् ॥

१८९९

मूल्यं रू. १—०—०

॥ श्रीः ॥

सिद्धान्तसिद्धाञ्जनम्.

श्रीयादवाद्रिनिलयं श्रितकल्पवृक्षं
नारायणं निखिललोकनिदानभूतम्।
निस्सीमनिर्मलगुणं निरवद्यरूपं
नित्यं नमामि शिरसा सकलार्थसिद्ध्यै ॥

जयन्तु श्रीमन्तः श्रुतिशिखरसारस्यमधुराः
सुधासध्रीचीनाः कुटिलमतकोलाहलमुषः।
स्फुरद्युक्त्यासक्त्या द्रुहिणरमणश्लाघ्यविभवाः
यतिक्षोणीभर्तुर्निरुपमवचोगुम्भविसराः ॥

शेषार्यवंशाम्बुधिशीतरश्मिस्सुधीरनन्तार्य इति प्रतीतः।
सिद्धान्तसिद्धाञ्जननामधेयं प्रबन्धमेनं प्रकटीकरोति ॥

येऽर्था दुर्बोधतां प्राप्ता गम्भीराचार्यसूक्तिषु।
तादृशार्थप्रकटनात्सफलोऽयं श्रमो मम ॥

चिदचिदीश्वरतत्त्वज्ञानसहकृतभगवदुपासनस्य मोक्षहेतुतया तादृशतत्त्वज्ञानार्थं प्रमेयं निरूप्यते ॥

ज्ञेयत्वं प्रमेयसामान्यलक्षणम्। ज्ञेयत्वं च विषयतासम्बन्धेन ज्ञानमेव; तेन विषयत्वमात्रस्यैव लक्षणत्वसम्भवात्तत्र ज्ञाननिरूपितत्वं व्यर्थमिति शङ्काऽनवकाशः॥ यद्यपि—सिद्धान्ते ज्ञानस्य द्रव्यतया विष-

यत्तयाश्च संयोगरूपतया संयोगेन ज्ञानवत्त्वं लक्षणं पर्यवसन्नमित्यद्रव्येऽव्याप्तिः। तथाऽपि—संयोगसंयुक्तापृथक्सिद्ध्योर्द्वयोरेव विषयतात्वस्य वक्ष्यमाणतया अद्रव्ये संयुक्तापृथक्सिद्धिरूपविषयतासम्बन्धेन ज्ञानस्य सत्त्वान्नाव्याप्तिः॥

तच्च प्रमेयं द्विविधं—द्रव्याद्रव्यभेदात्। तत्रावस्थावत्त्वं द्रव्यलक्षणं, तदन्यत्वं चाद्रव्यलक्षणं बोध्यम्। ईश्वरादावपि 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्'—इत्यादिश्रुत्या सर्वसंयुक्तत्वरूपसर्वगतत्वप्रतिपादनेनानवरतपरिस्पन्दमानाणुसंयोगरूपावस्थावत्त्वस्य सत्त्वान्नाव्याप्तिः; आगन्तुकापृथक्सिद्धधर्मस्यैवावस्थाशब्दार्थत्वात्। न चैवं—निर्विकारत्वश्रुतिविरोधः, स्वभिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन परिमाणविशिष्टपरिमाणरूपस्य सङ्कोचविकासादिरूपावस्थाद्वयवत्त्वस्यैव निर्विकारत्वश्रुतिघटकविकारशब्दार्थत्वेनाविरोधात्॥ अत एव—**न च पर्यायादप्यविरोधो विकारादिभ्यः**—इति सूत्रे सङ्कोचविकासवत्त्वरूपावस्थाद्वयाङ्गीकार एव विकारित्वमापादितं, न तु शरीरसंयोगादिरूपावस्थावत्त्व इति स्फुटीभविष्यतिचेदमुपरिष्टात्॥

द्रव्यं द्विविधं—जडमजडं चेति। जडत्वं चास्वप्रकाशत्वं, स्वनिरूपितविषयतावत्त्वतादात्म्योभयसम्बन्धेन किञ्चिद्विशिष्टान्यत्वम्। उक्तोभयसम्बन्धेन किञ्चिद्विशिष्टत्वरूपस्वप्रकाशत्वं चाजडत्वम्। तत्र जडं प्रकृतिकालभेदाद्विविधम्, अजडं तु जीवेश्वरनित्यविभूतिधर्मभूतज्ञानभेदाच्चतुर्विधमिति—द्रव्याणि षट्॥

ननु—तत्तद्विषयकव्यवहारनिर्वाहार्थं तत्तद्विषयकज्ञानस्य स्वीकर्तव्यतया ज्ञानगोचरव्यवहारस्य ज्ञानान्तरेण निर्वाहे चानवस्थापत्त्या धर्मभूतज्ञानस्य स्वप्रकाशत्वाङ्गीकारस्य युक्तत्वेऽपि जीवादीनां स्वप्रकाशत्वमयुक्तम्। तथा हि—जीवानां स्वस्वगोचरव्यवहारस्य स्वविषयकस्वापृथक्सिद्धसाक्षात्काररूपधर्मभूतज्ञानेनैव निर्वाहात् जीवान्तर-

विषयकव्यवहारस्य च तद्विषयकप्रवृत्त्यादिलिङ्गकानुमित्यादिरूपज्ञानेनैव निर्वाहात्स्वप्रकाशत्वाङ्गीकारो व्यर्थः। तदङ्गीकारेऽपि जीवस्य स्वगोचरधर्मभूतज्ञानेन विना स्वव्यवहारानिर्वाहाच्च। स्वानुकूलकृतिमत्त्वसम्बन्धेन बुबोधयिषापूर्वकतत्तद्विषयकव्यवहारं प्रति तत्तद्विषयकज्ञानस्य अपृथक्सिद्धिसम्बन्धेन हेतुत्वेन स्वस्य स्वविषयकत्वेऽप्यात्मन्यपृथक्सिद्धिसम्बन्धेन अभावेन तद्व्यवहारहेतुत्वासम्भवात्। शुकादिव्यवहारे व्यभिचारवारणाय, बुबोधयिषापूर्वकेति। एवमीश्वरगोचरास्मदादिकर्तृकव्यवहारे शास्त्रादिजन्येश्वरज्ञानस्य हेतुतया ईश्वरकर्तृकस्वगोचरव्यवहारे तद्गतधर्मभूतज्ञानस्यैव हेतुत्वात्स्वप्रकाशत्वकल्पनमफलम्; स्वस्य स्वस्मिन्नपृथक्सिद्धिसम्बन्धेनाभावाच्च। एवं नित्यविभूतेरपि तत्कल्पनमफलं, नित्यमुक्तादिकर्तृकतद्गोचरव्यवहारस्य तदीयधर्मभूतज्ञानेनैव निर्वाहात्, बद्धकर्तृकव्यवहारस्य च शास्त्रजन्यज्ञानेन निर्वाहात्—इति चेन्न ॥ घटचाक्षुषादौ रूपादिशून्यस्यात्मनो भानासम्भवेन तद्दशायामपि स्वगोचरव्यवहारस्य अनुभवसिद्धस्य निर्वाहायात्मनस्स्वविषयकत्वस्य स्वानुकूलकृतिमत्त्वसम्बन्धेन तद्विषयकव्यवहारं प्रति तादात्म्यापृथक्सिद्ध्यन्यतरसम्बन्धेन कारणत्वस्य च कल्पनात्। अनुमितौ परामर्शाविषयस्य शाब्दबोधे पदानुपस्थितस्य च भानासम्भवेन तद्दशायामपि तद्व्यवहारनिर्वाहार्थं स्वप्रकाशत्वावश्यकत्वात्। एवं सुखमहमस्वाप्समिति सुषुप्त्युत्तरकालीनप्रत्यभिज्ञानिर्वाहाय सुषुप्तिकाले आत्मानुभवस्य वक्तव्यतया तद्दशायां च धर्मभूतज्ञानस्य इतरविषयकत्वासम्भवेन स्वप्रकाशात्मकानुभवस्यैव तादृशप्रत्यभिज्ञाहेतुभूतसंस्कारजनकताया अङ्गीकार्यत्वात्, आत्मनः स्वप्रकाशत्वावश्यकत्वात्। समानविषयकसंस्कारं प्रति तादात्म्यापृथक्सिद्ध्यन्यतरसम्बन्धेन अनुभवस्य कारणत्वेन स्वरूपात्मकानुभवस्यापि संस्कारजनकतासम्भवात्। व्यवस्थापयिष्यते चेदमग्रे ॥

ईश्वरनित्यविभूत्योश्च प्रमाणबलात्स्वप्रकाशत्वमङ्गीक्रियते। ईश्वरस्वरूपात्मकानुभवस्येश्वरकर्तृकव्यवहारे तादात्म्येन हेतुत्वसम्भवात्, नित्यविभूतेरपि नित्यमुक्तादिकर्तृके स्वगोचरव्यवहारे अपृथक्सिद्धिसम्बन्धेन हेतुतासम्भवात्, शरीरात्मना परिणतायास्तस्या नित्यमुक्तादिष्वपृथक्सिद्धिसम्बन्धेन सत्त्वात्। प्रपञ्चयिष्यते चेदं यथावसरमिति दिक् ॥

एवं जीवेश्वरयोः प्रत्यक्त्वं नित्यविभूतिधर्मभूतज्ञानयोश्च पराक्त्वं साधारणधर्मः। तत्र प्रत्यक्त्वं स्वस्मै स्वेनावभासमानत्वम् ॥

ननु—अत्र स्वस्मा इति चतुर्थ्यन्तार्थः स्वकर्तृकव्यवहारजनकतावच्छेदकत्वं यदि, तदा अहमेक इत्यादिस्वकर्तृकव्यवहारजनकतावच्छेदिकाया एकत्वप्रकारतानिरूपिताहन्त्वावच्छिन्नविशेष्यतायाः स्वनिरूपितायाः मानुषादिशरीरावच्छिन्नात्मनि सत्त्वेऽपि पश्वादिशरीरावच्छिन्नात्मन्यव्याप्तिः। यदि स्वनिष्ठसंशयप्रतिबन्धकतावच्छेदकत्वं, तदा असम्भवः; अहमेको न वेत्यादिसंशयं प्रत्यपृथक्सिद्धिसम्बन्धेन तत्समानाधिकरणनिश्चयस्यैव प्रतिबन्धकत्वात्। अपृथक्सिद्धितादात्म्यान्यतरसम्बन्धेन तत्समानाधिकरणनिश्चयस्य प्रतिबन्धकत्वाङ्गीकारेऽप्यसम्भवः; स्वनिष्ठस्य स्वविशेष्यकैकत्वादिसंशयस्याप्रसिद्धेः। स्वनिष्ठो यस्संशयानुत्पादः तत्प्रयोजकत्वं चतुर्थ्यन्तार्थ इत्यपि न युक्तम्, संशयानुत्पादस्य तादृशसंशयप्रागभावरूपस्य स्वनिष्ठत्वासम्भवात्, यत्र तादृशसंशयो जायते तत्रैव तत्प्रागभावाभ्युपगमात्—इति चेन्न॥ स्वकर्तृकव्यवहारजनकतावच्छेदकत्वस्य तदर्थत्वेऽपि पश्वाद्यवच्छिन्नात्मन्यव्याप्त्यसम्भवात्, तादृशात्मन एव मनुष्यादिशरीरावच्छिन्नत्वसम्भवेन स्वकर्तृकव्यवहारप्रसिद्धेः। स्वनिष्ठसंशयाभावप्रयोजकत्वस्य तदर्थत्वेऽप्यदोषात्; संशयप्रागभावस्य स्वनिष्ठत्वासम्भवेऽपि तदत्यन्ताभावस्य तन्निष्ठत्वसम्भवात्॥ न चैवं—धर्मभूतज्ञानस्य

प्रत्यक्त्वापत्तिः, अधिकरणभेदेनाभावभेदानुपगमे तादृशज्ञाननिष्ठस्व-निरूपितविषयत्वस्यात्मनिष्ठसंशयाभावप्रयोजकस्य स्वनिष्ठसंशयाभा-वप्रयोजकत्वानपायात्—इति वाच्यम्। स्वनिष्ठसंशयाभावाधिकरणता-प्रयोजकत्वस्य निवेशात्, आधेयाभेदेऽपि अधिकरणभेदेन अधिकरण-ताया भेदात्, सिद्धान्ते अभावस्याधिकरणवृत्तिधर्मरूपत्वेनाधिकरण-भेदेन भेदाच्च । स्वसामानाधिकरण्यस्वप्रयोजकत्वोभयसम्बन्धेन संशयाभावविशिष्टस्वनिरूपितविषयतावत्त्वं प्रत्यक्त्वमिति निष्कर्षः। प्रथमस्वपदद्वयं संशयाभावपरम्। चरमस्वपदं च यत्र प्रत्यक्त्वं स्थाप्यं तत्परम्॥ एतदन्यत्वे सति स्वप्रकाशत्वम् पराक्त्वमवसेयम्॥

अद्रव्यं तु दशधा—सत्त्वरजस्तमोरूपरसगन्धस्पर्शशब्दसंयोगशक्ति-भेदात्॥

द्रव्याद्रव्यभेदभिन्नं प्रमेयं स्थिरमेव, क्षणभङ्गे प्रमाणाभावात्। न च—जगत्क्षणिकं सत्त्वादित्यनुमानेन तत्सिद्धिरिति—वाच्यम्; क्षणिकत्वस्य स्वाधिकरणक्षणध्वंसाधिकरणक्षणवृत्तिध्वंसप्रतियोगित्व-रूपत्वे सिद्धसाधनस्यार्थान्तरस्य वा प्रसङ्गात्। स्ववृत्तित्वस्वभिन्नक्षणा-वृत्तित्वोभयसम्बन्धेन क्षणविशिष्टत्वरूपत्वे च साध्याप्रसिद्धिः, एक-क्षणमात्रवृत्तिवस्तुनोऽस्माभिरनङ्गीकारात्, क्षणोपाधेः क्रियारूपत्वे कालद्रव्यपरिणामरूपत्वेऽपि वा क्षणमात्रवृत्तित्वानभ्युपगमात्॥ न च—क्षेत्रस्थबीजादङ्कुरोत्पत्तिः कुसूलस्थबीजान्नेत्यङ्कुरजननसामर्थ्यासामर्थ्य-रूपविरुद्धधर्माध्यासेन तादृशबीजयोर्भेदसिद्धौ तत्रैव क्षणिकत्वरूप-साध्यप्रसिद्धिरिति--वाच्यम्। तावताप्यङ्कुरमकुर्वाणस्य कुसूलस्थबीजस्य क्षणिकत्वासिद्धेः, तादृशस्याङ्कुरजन्मपूर्वतृतीयक्षणपर्यन्तावस्थाने बाधकाभावात्॥ न च—अङ्कुरकारिबीजजननसमर्थात् तृतीयक्षणस्थबीजा त्तदसमर्थचतुर्थक्षणस्थबीजस्य भेदः, एवं तृतीयक्षणस्थबीजजननसमर्था-च्चतुर्थक्षणस्थबीजात्तदसमर्थपञ्चमक्षणस्थबीजस्य भेद इत्यादिरीत्या

कुसूलस्थबीजपर्यन्तं भेदसिद्ध्या क्षणिकत्वसिद्धिरिति–वाच्यम्। सामर्थ्यासामर्थ्यशब्देन स्वरूपयोग्यत्वतदभावयोर्विवक्षणे कुसूलस्थबीजे असामर्थ्यासिद्धिः, तस्यापि बीजत्वेनाङ्कुरोत्पत्तिस्वरूपयोग्यत्वात्, सहकारिसमवधानासमवधानयोर्विवक्षणे च तयोरेकस्मिन्नपि कालभेदेन समावेशसम्भवेन तयोर्विरोधासिद्ध्या स्वाश्रयभेदकत्वासम्भवात् ॥

न च–उक्तोभयसम्बन्धेन क्षणविशिष्टत्वस्य साध्यता न स्वीक्रियते येनोक्तदोषः स्यात्, किन्तु स्वाधिकरणसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वे सति कादाचित्कत्वमेव साध्यम्, तच्च प्रागभावे प्रसिद्धमिति न साध्याप्रसिद्धिः। अत्र कादाचित्कत्वानिवेशे उत्पत्तिरहितनित्यवस्तुन्यात्मादौ अंशतस्सिद्धसाधनं स्यात्। अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया तस्यादोषत्वेऽप्यर्थान्तरम्। आत्मादेर्नित्यत्वेऽप्युत्पत्तिविरहेणैवोक्तसाध्यनिर्वाहात्। अतः कादाचित्कत्वरूपविशेष्यदलम्–इति वाच्यम्॥ तन्मते अभावमात्रस्य तुच्छत्वेन कालसम्बन्धित्वासम्भवेन स्वाधिकरणक्षणप्रागभावाधिकरणक्षणाप्रसिद्ध्या साध्याप्रसिद्धेरेवमपि दुर्वारत्वात्॥ न च–सौगतमते अभावस्य तुच्छत्वेऽपि तस्य कालसम्बन्धोऽस्त्येव। किन्त्वर्थक्रियाकारित्वरूपसत्त्वमेव नेति न साध्याप्रसिद्धिरिति–वाच्यम्। एवमप्यर्थान्तरस्य दुर्वारत्वात्, आत्मादेर्महाप्रलयमात्रासत्त्वाङ्गीकारेणैव तस्य कादाचित्कत्वनिर्वाहात्॥ न च कादाचित्कत्वस्थाने उत्पत्तिमत्त्वनिवेशान्नोक्तार्थान्तरम्, साध्यप्रसिद्धिस्तु नैयायिकादिमते महाप्रलयात्मकचरमध्वंस एव, तत्र चरमध्वंसाधिकरणक्षणश्चरमध्वंसात्मक एवेति तत्प्रागभावाधिकरणक्षणानुत्पत्तिकत्वस्य तादृशचरमध्वंसात्मकैक्षणोत्पत्तिकत्वस्य च सत्त्वात्; चरमध्वंससाधारणं क्षणत्वं च स्वाधेयपदार्थप्रागभावानधिकरणत्वमिति–वाच्यम्। तथापि साध्याप्रसिद्धेः, स्वाधिकरणसमय-

(टि.) स्ववृत्तित्वस्वभिन्नक्षणावृत्तित्वोभयेत्यर्थः ॥

ध्वंसानधिकरणसमयसम्बन्धरूपोत्पत्तिमत्त्वस्य चरमध्वंसे अभावात्, स्वाधिकरणसमयस्य महाकालरूपस्य ध्वंसरूपस्य वा ध्वंसाप्रसिद्धेः॥ न च—स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षणसम्बन्ध एवोत्पत्तिरिति महाप्रलयेऽपि तादृशोत्पत्तिसत्त्वान्नाप्रसिद्धिरिति—वाच्यम् । उक्तरीत्या नैयायिकमते कथञ्चित्साध्यप्रसिद्धावपि सत्त्वरूपसाधनवति दृष्टान्ते साध्यस्याप्रसिद्ध्या व्याप्तिग्रहासम्भवात्, केवलव्यतिरेकिणश्चाग्रे निरसिष्यमाणत्वात्। सिद्धान्ते त्वनादेः प्रागभावस्य नैयायिकाद्यभिमतमहाप्रलयस्य चानङ्गीकारेण साध्याप्रसिद्धिर्दुष्परिहरैव। सोऽयं घट इत्यादिप्रत्यभिज्ञाबाधितश्चेदमनुमानमित्यन्यत्र विस्तरः॥

इदानीमुद्देशक्रमानुसारेण प्रकृतिर्निरूप्यते॥ कालभिन्नत्वे सति जडत्वं प्रकृतेर्लक्षणम्। कालेऽतिव्याप्तिवारणाय सत्यन्तम्, जीवादिवारणाय विशेष्यम्॥ रजोगुणवत्त्वं तमोगुणवत्त्वं च तल्लक्षणम्; सत्त्ववत्त्वं तु न लक्षणम्, शुद्धसत्त्वाश्रयनित्यविभूतावतिव्याप्तेः॥ एवं नित्यविभूतित्वसमानाधिकरणभेदप्रतियोगितानिरूपितसंयोगसम्बन्धावच्छिन्नावच्छेदकताश्रयत्वे सति तद्भिन्नद्रव्यत्वसमानाधिकरणभेदप्रतियोगितानिरूपितसंयोगसम्बन्धावच्छिन्नावच्छेदकताशून्यत्वमपि तल्लक्षणम्॥ तदनन्तमसङ्ख्यातमप्रमाणञ्च—इति वचनेन प्रकृतेरधःप्रदेशेषु अपरिच्छिन्नत्वस्य नित्यविभूतेः तमःपरत्वश्रुत्या तद्देशे परिच्छिन्नत्वस्य च प्रमितत्वाल्लक्षणसङ्गतिः॥ कालादिरूपविभुद्रव्यवारणाय सत्यन्तम्, जीवादिरूपाणुवारणाय विशेष्यम्॥ तद्भिन्नद्रव्ये तदनवच्छिन्नत्वमपि निवेश्यम्, तेन नित्यविभूतिस्थजीवादिषु संयोगेन प्रकृतिमद्भेदसत्त्वेऽपि न क्षतिः॥ न च—प्रकृतेस्सर्वत्रावस्थाने गतिमतां गतिनिरोधापत्तिरिति गतियोग्यप्रदेशेष्वनवस्थानं स्वीकर्तव्यमित्युक्तलक्षणाव्याप्तिरिति—वाच्यम् । प्रकृतेः स्पर्शरहितत्वेन गतिनिरोधकताविरहेणाधोदेशे सर्वत्रावस्थाने बाधकाभावात्॥ सा च प्रकृतिस्सृष्टिकाले गुणवैषम्य-

युक्तप्रदेशविशेषे महदादीन्विषमविकारानारभते ; गुणसाम्ययुक्ते च समान्विकारानारभते; प्रकृतिस्वरूपस्य सततविकारलक्षणत्वात् प्रलयकाले च सर्वत्र समा एव विकारा भवन्ति ॥ न च—प्रलयत्वव्याघातः; विषमविकाररहित्यस्यैव प्रलयपदार्थत्वात् ॥

पूर्वावस्थोपमर्दकावस्थाभेदात्सा चतुर्विंशतिधा—मूलप्रकृतिर्महानहङ्कार इन्द्रियाण्येकादश पञ्च तन्मात्राणि पञ्च भूतानि चेति ॥

ननु—एषा प्रकृतिर्निरंशा सांशा वा ?

आद्ये—अनेकतत्त्वात्मना परिणामानुपपत्तिः, निरंशस्यैकस्यानेकरूपेण परिणामासम्भवात्, मृत्पिण्डादेस्सावयवस्यैव घटशरावादिरूपेण बहुधा परिणामदर्शनात् ॥ न च—स्वभावतो निरंशस्यापि प्रधानस्यौपाधिकांशसम्भवाद्विविधकार्योत्पादकत्वसम्भवः; नैयायिकनये स्वभावतो निरंशस्यापि गगनस्य भेर्यवच्छिन्नांशे तीव्रशब्दजनकत्वं, मृदङ्गाद्यवच्छिन्नांशे मृदुशब्दजनकत्वमित्यौपाधिकांशभेदस्यापि कार्यवैलक्षण्यनिर्वाहकत्वदर्शनादिति—वाच्यम् । तीव्रमन्दशब्दोत्पादकतावच्छेदकभेरीमृदङ्गादिवत् महदहङ्काराद्युत्पादकतावच्छेदकानांत्रयोविंशत्युपाधीनामदर्शनात् औपाधिकांशासम्भवात्, प्रधानस्य स्वभावतो निरंशत्वे पृथिवीत्वाद्यवस्थापन्नस्यापि तस्य छेदनाद्यनुपपत्तेः । औपाधिकभेदाभेदवादिनं प्रति भाष्ये उपाधिसंसर्गादपि निरंशस्य ब्रह्मणः छेदनाद्यनुपपत्तेरुक्तत्वात् ॥

द्वितीये तु—महदादिकार्याणामेकोपादानवादभङ्गः; तत्तदंशानामेव तत्तत्कार्योत्पादकत्वेन बहूनामेव बहुकार्योत्पादकत्वात् । तादृशांशेषु प्रधानत्वरूपैकधर्माङ्गीकारस्य विफलत्वात् । परमाणुकारणवादादविशेषप्रसङ्गश्च ॥ तथा च तादृशांशानां परस्परसंयुक्तानामेव महदाद्युत्पादकत्वस्य वाच्यतया तादृशांशानां कृत्स्नसंयोगे स्वाधिकपरिमाणद्रव्यारम्भकत्वासम्भवः, एकदेशसंयोगे चांशस्याप्येकदेशाङ्गीकारेणा-

नवस्थेत्यादिरूपस्य 'महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्' इति सूत्रोक्तस्य परमाणुकारणवाददूषणस्य स्वमतेऽपि दुर्वारता ॥

—इति चेन्न ॥

अत्र महानुत्पद्यतां, अत्राहङ्कार उत्पद्यतां—इत्यादिरूपाणां त्रयोविंशतिभगवत्सङ्कल्पानामेव त्रयोविंशतितत्त्वोत्पादकतावच्छेदकत्वसम्भवेनैकाधिकांशवादे दोषाभावात्; भेर्यादिवद्भगवत्सङ्कल्पस्यापि द्रव्यत्वेन प्रधानसंयुक्ततया प्रधानप्रदेशावच्छेदकत्वसम्भवात् ॥ न च—भगवत्सङ्कल्पसंयोगोऽपि प्रधाने किमेकदेशावच्छेदेन कृत्स्नावच्छेदेन वेति विकल्पो दुर्निवार इति—वाच्यम् । भेरीसंयोगेऽपि तादृशविकल्पसाम्यात् । न च—भेरीसंयोगः स्वावयवावच्छेदेन गगने सम्भवतीति—वाच्यम्; तथाऽपि परमाणुगगनसंयोगे उक्तविकल्पस्य दुर्वारत्वात् ॥ न च—अणुसंयोगावच्छिन्नगगन एवाणुसंयोगो जायते, आत्माश्रयस्त्वगत्या स्वीक्रियते; अत एव **बौद्धाधिकारे शिरोमणिना** घटाभावस्य स्ववृत्तित्वस्वीकारे आत्माश्रये इष्टापत्तिरभिहितेति—वाच्यम् । प्रकृतेऽपि तत्तद्भगवत्सङ्कल्पसंयुक्तप्रधान एव तत्तद्भगवत्सङ्कल्पसंयोगोत्पत्तिस्वीकारसम्भवादगत्या आत्माश्रयस्यादोषत्वात् ॥

उक्तं च **न्यायसिद्धाञ्जने**—

"प्रदेशवृत्तिसंयोगाद्याधाराणुविभुक्रमात् ।
निरंशस्यापि घटते प्रादेशिकविकारिता ॥" —इति ॥

यथा अव्याप्यवृत्तिसंयोगादिर्गगनादौ निरंशेऽपि प्रदेशभेदेनोत्पद्यते, तथा महदादिकमपि निरंशे प्रधाने उत्पद्यत इत्यर्थः । न च छेदनाद्यनुपपत्तिः, पृथिवीत्वाद्यवस्थापन्नस्य तस्य छेदनाद्यङ्गीकारे बाधकाभावात् । न च भाष्यविरोधः, ब्रह्मस्वरूपस्य निष्कलत्वाच्छेद्यत्वादिवचनविरोधेन छेदनाद्यसम्भवे तद्भाष्यतात्पर्यात्; अन्यथा ब्रह्मस्वरूप एव सविकारत्वापत्तौ निर्विकारत्वश्रुतेर्निरवकाशत्वप्रसङ्गात्;

ब्रह्मणस्सर्वज्ञत्वेन सर्वांशगतसुखदुःखादिप्रतिसन्धानप्रसङ्गस्यापि दुष्परिहरत्वात् । प्रधानस्य च पृथिवीत्वाद्यवस्थापन्नस्य छेदनाद्यङ्गीकारे प्रमाणविरोधस्य बाधकयुक्तेश्चाभावात् ॥

अत एव तत्त्वमुक्ताकलापे अव्यक्तप्रतिबन्दीं पुरस्कृत्य प्रवृत्ते ब्रह्मपरिणामवादे ब्रह्मणस्स्वस्मिन् जीवभावेन दुर्विषहदुःखाद्युत्पादनानुपपत्तिरेव दोष उक्तः ॥

"अव्यक्तं त्वन्मतेऽपि ह्यनवयवमथाप्येतदंशा विकाराः
ते चान्योन्यं विचित्राः पुनरपि विलयं तत्र तत्त्वेन यान्ति ।
इत्थं ब्रह्मापि जीवः परिणमति विहृत्यर्थमित्यप्यसारं
स्वानर्थैकप्रवृत्तेः प्रसजति च तदा सर्वशास्त्रोपघातः ॥"—इति ॥

प्रधानस्य स्वाभाविकानन्तांशाङ्गीकारपक्षोऽपि निर्दुष्टः । न च—तत्कल्पे तदंशैरेव कार्यारम्भनिर्वाहात्तावदंशेषु प्रधानत्वरूपैकावस्थाङ्गीकारो विफल इति—वाच्यम् । 'तद्धेदं तर्ह्यव्याकृतमासीत्', 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं', 'तदैक्षत बहु स्याम्'--इत्यादिकारणबोधकश्रुतावेकत्वावस्थायाः प्रतिपन्नत्वेन तन्निर्वाहाय प्रधानत्वरूपैकावस्थाङ्गीकारस्य युक्तत्वात् । न चैवं—प्रधानस्य परमाणुपुञ्जमात्रत्वे पर्यवसानेन नैयायिकमतप्रवेश इति—वाच्यम् । गन्धरसरूपस्पर्शादिरहितपरस्पराप्रतिघातकसत्त्वरजस्तमोरूपगुणत्रयाश्रयपरस्परसंयुक्तपञ्चभूतसूक्ष्मतमद्रव्यरूपत्वेन "शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतम् । त्रिगुणं तज्जगद्योनिः"—इत्यादिप्रमाणसिद्धे प्रधाने परमाणुस्वभावगन्धाभावात्, जालकरन्ध्रनिर्गतसौरालोकदृश्यमानत्रसरेणुशब्दवाच्यद्रव्यातिरिक्तपरमाणुकल्पने प्रमाणाभावाच्च ॥ न चैतत्कल्पे महद्दीर्घवद्वेत्यादिसूत्रोक्तदोषप्रसङ्गः, अनुमानादिभिः कल्पितार्थ एव तादृशदोषस्योक्तत्वात् ; श्रुतिप्रतिपन्नार्थे तादृशदोषस्याप्रसरात्, अन्यथा माध्यमिकातिरिक्तमतसामान्ये तादृशदोषप्रसङ्गात्, अणुसंयोगे विभुसंयोगे ज्ञानज्ञेयसम्बन्धे जातिव्यक्तिसम्बन्धे कृत्स्नैकदेशविकल्पस्य

दुर्वारत्वात् ॥ विभुरीश्वरो घटादिभिरेकदेशेन संयुज्यते, सर्वात्मना वा? एकदेशेन संयोगे तस्य सावयवत्वप्रसङ्गः। सर्वात्मना संयोगे च घटासंयुक्तप्रदेशस्यैवाभावेनेश्वरस्य मटादिसंयोगानुपपत्त्या विभुत्वानुपपत्तिरित्यादिदोषाणां तत्तत्पक्षेषु सम्भवात् । तस्मात् श्रुतिप्रतिपन्नार्थे नोक्तरीत्या दोषसम्भवः। अत एव—बहु स्यामिति सङ्कल्पानुरोधेनाकाशवाय्वादिरूपेण ब्रह्मणः कार्यत्वाभ्युपगमे कृत्स्नस्य ब्रह्मणः कार्यत्वापत्तिः, एकदेशतः कार्यत्वाभ्युपगमे च ब्रह्मणो निरवयवत्वश्रुतिविरोधः- इत्याशङ्कां **कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा** -इत्यनेनोपन्यस्य श्रुतिप्रतिपन्नार्थे ईदृशशङ्का न युक्तेत्यभिप्रायकं **श्रुतेस्तु शब्दमूलत्वात्** इति परिहारसूत्रमारचितम् ॥ तथा च—प्रधानस्यौपाधिकांशवत्त्वे स्वाभाविकांशवत्त्वे वा बाधकविरहान्महदादिविचित्रपरिणामहेतुत्वं तस्य सम्भवतीति दिक् ॥

तत्र गुणत्रयसाम्यावस्थापन्नत्वं मूलप्रकृतेर्लक्षणम्। तच्च तद्वैषम्यप्रयोज्यकार्याभाववत्त्वं, स्वजन्यत्वकालिकविशेषणत्वोभयसम्बन्धेन धर्मविशिष्टधर्माभाववत्त्वपर्यवसितम् । अव्यक्तत्वाश्रयानन्तांशेषु सत्स्वेव कतिपयांशेष्वव्यक्तत्वनाशपूर्वकमहत्त्वावस्थायाः महत्त्वाद्याश्रयानन्तांशेषु सत्स्वेव तन्नाशपूर्वकं कतिपयांशेष्वहङ्कारत्वाद्यवस्थाया उत्पत्तिस्वीकारेण पूर्वावस्थाकालीनत्वतज्जन्यत्वयोरुत्तरावस्थासु सत्त्वेन निरुक्तोभयसम्बन्धेन धर्मविशिष्टधर्माः अव्यक्तत्वविशिष्टमहत्त्वतद्विशिष्टाहङ्कारत्वादय इति तच्छून्यत्वस्य मूलप्रकृतौ सत्त्वाल्लक्षणसङ्गतिः॥

न च—

"वारिवह्न्यनिलाकाशैस्ततो भूतादिना बहिः।
वृतं दशगुणैरण्डं भूतादिर्महता तथा ॥
अव्यक्तेनावृतो ब्रह्मन् तैस्सर्वैस्सहितो महान्।
एभिरावरणैरण्डं सप्तभिः प्राकृतैर्वृतम् ॥"

इत्यादिना जलतेजोवाय्वाकाशाहङ्कारमहन्मूलप्रकृतीनामण्डावरणतयाऽवस्थानस्य सिद्धतया तथाऽवस्थाननिर्वाहाय, 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च' इत्यनेन अष्टद्रव्याणां शरीरारम्भकतयाऽवस्थानस्य भगवद्गीतादिसिद्धत्वेन तन्निर्वाहाय च प्रकृत्यादीनामेकदेशपरिणामो युक्तः। अन्यथा पृथिव्येकशेषप्रसङ्गेन प्रत्यक्षादिबाधापत्तेः। तन्मात्राणां त्वावारकत्वशरीरारम्भकत्वयोरश्रवणेन निश्शेषपरिणामाङ्गीकारेऽपि बाधकाभाव इत्युक्तलक्षणस्याकाशादावतिव्याप्तिः, आकाशत्वस्य शब्दतन्मात्रत्वजन्यत्वेऽपि तत्समानकालीनत्वाभावादिति—**वाच्यम्**॥ तन्मात्राणामावारकत्वाद्यश्रवणेऽपि 'अष्टौ प्रकृतयष्षोडश विकाराश्शरीरे तस्य देहिनः' इत्यादिना शरीरस्य चतुर्विंशतितत्त्वमयत्वप्रतिपादनेन तेषां भूतैस्सहावस्थानसिद्ध्या तेषामप्येकदेशपरिणामस्यैव युक्तत्वात्॥ न चैवं—**गीताभाष्ये** 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च' इति क्षेत्रारम्भकद्रव्याणीत्युक्तत्वाच्छरीरस्याष्टद्रव्योपादानकत्वाभ्युपगमाद्भाष्यकृतां तन्मात्राणां निश्शेषपरिणामपक्ष एवेष्ट इति—वाच्यम्; गीतातद्भाष्ययोरुपलक्षणपरत्वात्। अन्यथा—शरीरे एकादशेन्द्रियाणामप्यवस्थानासिद्ध्यापत्तेः॥

न च—उक्तोभयसम्बन्धेन प्रकृतित्वविशिष्टाक्षरत्वाद्यवस्थायाः प्रकृतौ सत्त्वात्तच्छून्यत्वलक्षणस्यासम्भवः—इति वाच्यम्। अक्षरत्वावस्थायास्तमस्त्वावस्थानाशरूपत्वेन तज्जन्यत्वेऽपि प्रकृतित्वावस्थानाशरूपत्वाभावेन तज्जन्यत्वासम्भवात्, तन्नाशरूपत्वावस्थाया एव तज्जन्यत्वात्, प्रकृतित्वातिरिक्तत्वेन प्राथमिकधर्मविशेषणेनाक्षरत्वादीनां प्रकृतित्वजन्यत्वेऽपि क्षत्यभावाच्च। अविभक्ततमसः कृत्स्नत एव विभक्ततमोरूपेण विभक्ततमसः कृत्स्नत एवाक्षररूपेणाक्षरस्य च कृत्स्नत एवाव्यक्तरूपेण परिणामादुक्तधर्मचतुष्टये एकैकस्य जन्यतासम्बन्धेन अपरधर्मविशिष्टत्वेऽपि कालिकसम्बन्धेन तद्विशिष्टत्वा-

भावादसम्भवविरहात्; अव्यक्तत्वप्रागभावासमानकालीनत्वेन प्राथमिकधर्मविशेषणेन अक्षरादीनां सुबालश्रुतावण्डावरणतयाऽवस्थानस्योक्त्या तमःप्रभृतीनां निर्विशेषपरिणामासम्भवेऽपि न क्षतिः॥ अव्यक्तत्वनाशप्रागभाववत्त्वं तस्या लघु लक्षणं बोध्यम्॥

सा च मूलप्रकृतिश्चतुर्धा—अव्यक्तमक्षरं विभक्ततमोऽविभक्ततमश्चेति। तत्र महत्तत्त्वादिरूपफलोन्मुखावस्था अव्यक्तावस्था, तत्पूर्वावस्था चाक्षरत्वम्-इति रीत्या बोध्यम्॥

"भूतलनिहितबीजस्थानीयमविभक्तं तमः, मृन्निस्सृतबीजवद्विभक्तं तमः, सलिलसंसृष्टार्द्रपृथ्व्यवयवबीजतुल्यमक्षरं, उच्छूनबीजसमानमव्यक्तं, अङ्कुरस्थानीयो महान्—इति विवेकः॥"

इति **व्यासार्यैः सुबालोपनिषद्व्याख्याने** प्रपञ्चितम्। मूलप्रकृतावुक्तावस्थाचतुष्टयं च—

"महानव्यक्ते लीयते, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परे देव एकीभवति॥"

इति सुबालश्रुतिसिद्धम्। तमः परे देव एकीभवतीत्यनेन अविभक्ततमोऽवस्थाभिधानात्॥

ननु—उक्तसुबालश्रुतेर्मूलप्रकृतिगतावस्थाचतुष्टयपरत्वं न सम्भवति; **सा च प्रशासनादिति** सूत्रावतरणभाष्यादिषु—'अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते', 'यस्याव्यक्तं शरीरं यस्याक्षरं शरीरम्' इत्यादिश्रुतिगताव्यक्तसहचरिताक्षरशब्दस्य जीवपरतया व्याख्यानात्—इति चेत्॥

---

१. (पा.) तन्मात्राणां निर्विशेषपरिणामाभ्युपगमे तु स्वजन्यत्वस्थाने स्वप्रयोज्यत्वं निवेश्यम्। तन्मात्रत्वस्य नाशेऽपि तज्जनकीभूताहंकारत्वादेरनाशेन तद्विशिष्टाकाशत्वादेः आकाशादौ सत्त्वान्नातिव्याप्तिः। महत्त्वावस्थाप्रागभाववत्त्वं वा तल्लक्षणमवसेयम्॥

अत्राहुः—

उक्ताक्षरशब्दव्याख्यानस्य परव्याख्यानानुरोधेन प्रवृत्तत्वान्न तत्र तात्पर्यम् । यद्वा—जीवे धर्मभूतज्ञानगतसङ्कोचविकासादिरूपविकारस्य परम्परया सत्त्वेऽपि साक्षात्सम्बन्धावच्छिन्नविकाराभाववाचकाक्षरशब्दस्य प्रवृत्तिर्यथा न विरुध्यते, तथा महत्त्वाहङ्कारत्वादिरूपविकारविशेषाभावपरत्वे मूलप्रकृतावपि तच्छब्दप्रवृत्तिरुपपद्यत इति दृष्टान्तविधया जीवपरताप्रतिपादनपरत्वान्न विरोधः ॥ अथवा—मूलप्रकृतौ विकारसामान्याभावस्य बाधेन तद्वाचकाक्षरशब्दस्य मुख्यत्वासम्भवात् अक्षरब्रह्मसम्बन्धित्वेन वा तादृशजीवसम्बन्धित्वेन वा लक्षणा वाच्या, तत्र ब्रह्मसम्बन्धित्वेन लक्षणोक्तौ विशेषणे लयान्वयासम्भवात् विशेष्यमात्रे लयान्वयस्य विशिष्टे लयान्वयप्रकरणविरोधेनासम्भवात्, जीवसम्बन्धित्वावच्छिन्न एवाजहल्लक्षणेत्यभिप्रायेण तद्भाष्यस्य प्रवृत्तत्वान्न विरोधः ॥ —इति ॥

तत्र अव्यक्तत्वावस्थानाशरूपत्वे सत्यहङ्कारत्वावस्थाप्रागभावरूपत्वं—**महत्त्वावस्थाया लक्षणम्**; अव्यक्तत्वावस्थानाशत्वस्याहङ्कारत्वतन्मात्रत्वादिसाधारणत्वात्तद्वारणाय विशेष्यम्; तावन्मात्रस्याव्यक्तत्वाक्षरत्वादिसाधारण्यात्तद्वारणाय सत्यन्तम् ॥ यद्वा—अव्यक्तत्वावस्थाध्वंसत्वावच्छिन्नविषयताकसङ्कल्पजन्यावस्थात्वं—तल्लक्षणम् ; अव्यक्तत्वावस्थाश्रयेष्वनन्तांशेषु मध्ये केषु चिदंशेषु अव्यक्तत्वावस्थाध्वंसरूपमहत्त्वावस्थोत्पद्यतामिति—सङ्कल्पेन तादृशावस्थोत्पत्तेर्लक्षणसङ्गतिः । अत्र सङ्कल्पनिष्ठजनकता विषयतासम्बन्धावच्छिन्ना ग्राह्या, तेन तादृशसङ्कल्पगतोत्तरावस्थायां नातिव्याप्तिः । अव्यक्तत्वावस्थान्यूनवृत्तित्वे सत्यहङ्कारत्वावस्थाव्यापकप्रकृतिविभाजकोपाधिमत्त्वं वा तल्लक्षणम् ; अव्यक्तत्वाक्षरत्वादिवारणाय सत्यन्तम्, अहङ्कारत्वादिवारणाय विशेष्यम् । व्यापकत्वं च तत्समानाधि-

करणभेदप्रतियोगितानवच्छेदकत्वे सति तदभाववद्वृत्तित्वम्; तेनाहङ्कारत्वादेस्तद्व्यापकत्वेऽपि न तद्दोषतादवस्थ्यम्। प्रकृतिविभाजकोपाधित्वनिवेशादव्यक्तत्वन्यूनवृत्त्यहङ्कारत्वव्यापकान्यतमत्वादौ नातिव्याप्तिः ॥

सोऽयं महांस्त्रिविधः—सात्त्विकराजसतामसभेदात्। सत्त्वगुणोन्मेषवान् सात्त्विक इत्यादिबोध्यम् ॥

महत्त्वावस्थानाशरूपत्वे सति तन्मात्रत्वावस्थाप्राक्कालीनत्वं—**अहङ्कारत्वस्य लक्षणम्**। अत्र तन्मात्रत्वावस्थाप्रागभावत्वस्य तामसाहङ्कारत्व एव सत्त्वात्सात्त्विकराजससाधारणाहङ्कारत्वे तदभावादसम्भवः प्राप्नोतीति न तथा निवेशः। तन्मात्रत्वपूर्वकालीनत्वं चाहङ्कारत्वे अक्षतमेव। व्यावृत्तिः पूर्ववत्। महत्त्वावस्थानाशत्वावच्छिन्नविषयताकसङ्कल्पप्रयोज्यावस्थात्वं वा तल्लक्षणं; महत्त्वावस्थान्यूनवृत्तित्वे सति तन्मात्रत्वावस्थाव्यापकप्रकृतिविभाजकोपाधित्वमपि तल्लक्षणमवसेयम् ॥

सोऽयमहङ्कारास्त्रिविधः—सात्त्विकराजसतामसभेदात्। तत्र सात्त्विकादिन्द्रियाणि जायन्ते, तामसाच्च शब्दतन्मात्रं, राजस उभयानुग्राहकः ॥

तत्र शब्दाश्रयान्यत्वे सति आत्मप्रयत्नजन्यव्यापारवत्त्वरूपजीवात्मोपकरणत्वं—**इन्द्रियसामान्यलक्षणम्**। शरीरप्राणयोरतिव्याप्तिवारणाय सत्यन्तम्। महदहङ्कारवारणाय विशेष्यम् ॥

न च—अप्राकृतद्रव्ये अव्यक्तमहदहङ्कारविभागाभावेन अप्राकृतेन्द्रियाणामप्राकृतभूतपरिणामत्वस्यैव वाच्यतया तेषु शब्दाश्रयान्यत्वघटितोक्तलक्षणाव्याप्तिरिति—वाच्यम्। अप्राकृतद्रव्येऽप्यव्यक्तमहदहङ्कारविभागस्य कैश्चिदाचार्यैरङ्गीकारादप्राकृतेन्द्रियाणां तत्परिणामत्वसम्भवात्, प्राकृतशब्दाश्रयान्यत्वस्य सत्यन्तार्थत्वे तद्दोषा·

प्रसक्तेश्च । प्राकृतत्वं च–रजस्समानाधिकरणत्वं तमस्समानाधिकरणत्वं वा ॥

न च–**श्रीमद्गीताभाष्ये** "महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च" इति श्लोकव्याख्याने 'अव्यक्तमहदहङ्कारपञ्चमहाभूतारब्धं शरीरम्' इत्युक्तत्वेन अतिरिक्तावयविनमनङ्गीकुर्वाणानां वेदान्तिनां मते शरीरस्योक्ताष्टद्रव्यसमुदायरूपत्वे पर्यवसानात्तादृशशरीरघटकाव्यक्तमहदहङ्कारेष्वतिव्याप्तिः ; तेषां शब्दाश्रयान्यत्वे सत्यात्मप्रयत्नजन्यव्यापारवत्त्वादिति–वाच्यम् । तेषां शरीरघटकत्वेऽप्यात्मप्रयत्नजन्यव्यापारवत्त्वानभ्युपगमात्, पञ्चमहाभूतात्मकभागेष्वेव तत्स्वीकारात्; शब्दाश्रयान्यत्वं परित्यज्य प्राणशरीरान्यत्वनिवेशे तादृशभागेष्वतिव्याप्त्यप्रसक्तेश्च, तेषां शरीरान्यत्वाभावात् ॥ एतेन मुक्तादिशरीरे उक्तलक्षणस्यातिव्याप्तिरिति निरस्तम् ॥

इन्द्रियं द्विविधं–प्राकृतमप्राकृतं चेति । रजोरहितत्वे सति तमोरहितत्वे सति वा इन्द्रियत्वमप्राकृतेन्द्रियलक्षणम् । सात्त्विकाहङ्कारोपादानकत्वं प्राकृतेन्द्रियस्य लक्षणं ; जीवगमनव्यापकगमनवद्दिन्द्रियत्वं वा प्राकृतेन्द्रियलक्षणम् , यदा जीवगमनं तदेन्द्रियगमनमिति व्याप्तेः ॥

यद्यपि–मुक्तिकाले जीवगमनेऽपि नेन्द्रियगमनमिति न व्यापकत्वसम्भवः । **तथाऽपि** बद्धजीवगमनव्यापकगमनवत्त्वस्य लक्षणत्वान्न दोषः ॥ न च–कर्मेन्द्रियाणां हस्तपादादीनां शरीरेण सह विनाशदर्शनाज्जीवेन सह गमनासम्भवादुक्तलक्षणस्य तत्राव्याप्तिरिति–वाच्यम् । इन्द्रियाधिष्ठानभूतस्य भौतिकहस्तपादादेर्नाशेऽपि तदधिष्ठानकस्याहङ्कारिकस्येन्द्रियस्य शरीरनाशकाले नाशानुपलम्भेन जीवेन सह गमनोपपत्तेः ; तेषां शरीरेण सह नाश इति यादवप्रकाशपक्षस्यायुक्तत्वात् । हस्तादीनां प्रतिशरीरमुत्पत्तिविनाशाभ्युपगमे 'अष्टौ प्रकृतयष्षोडश विकाराः', 'चतुर्विंशतिसङ्ख्यातमव्यक्तं व्यक्तमुच्यते'–इत्यादिश्रुत्यभि-

हिततत्त्वसङ्ख्याया विकारसङ्ख्यायाश्च विरोधप्रसङ्गात्, पृथिव्युत्पत्तिप्रतियोगिकध्वंसपूर्वकालीनोत्पत्तिकानामेव तत्त्वरूपत्वात् । अन्यथा घटपटादीनामपि तत्त्वरूपतापत्त्या तत्त्वसङ्ख्याधिक्यप्रसङ्गात् । "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति श्रुतौ सर्वपदेनेन्द्रियत्वव्यापकोत्क्रमणप्रतीतेश्च ॥

यद्यपि–'सर्वेभ्यो दर्शपूर्णमासौ' इत्यादौ सर्वपदस्य प्रक्रान्तकतिपयवस्तुपरत्वं दृश्यते । **तथाऽपि**–अभेदसम्बन्धेन किञ्चिद्धर्मावच्छिन्नविशेषणतापन्नसर्वशब्दस्योद्देश्यतावच्छेदकव्यापकविधेयव्याप्यसर्वत्वावच्छिन्नबोधकत्वस्य व्युत्पत्तिसिद्धत्वान्न प्रकृते सर्वशब्दस्य सङ्कुचितवृत्तिकत्वं युक्तम् ॥ स्पष्टं चेदं **प्रतिज्ञालक्षणगादाधर्याम्**॥ किञ्च **अग्न्यादिश्रुतेरिति चेन्न भाक्तत्वादिति** सूत्रे 'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वायुं प्राणश्चक्षुरादित्यम्' इत्यादिना प्राणानां जीवमरणकाले अग्न्यादिष्वप्ययश्रवणान्न तेषां जीवेन सह गमनमित्याशङ्क्याप्ययश्रवणस्य देवतापक्रमणपरत्वान्न दोष इति समाधानेन कर्मेन्द्रियस्य वाचो जीवेन सह गमनस्य स्थापितत्वात् तन्न्यायेन सर्वेषामपि गमनाङ्गीकारस्य युक्तत्वात् ॥

न च–वेदान्तदीपे **हस्तादयस्तु स्थितेऽतो नैवमिति सूत्रे**—

"तत्र श्रोत्रादीनि जीवेन सह शरीरान्तरगमनेऽपि गच्छन्ति ।
वाग्घस्तादीनि कर्मेन्द्रियाणि तु स्थिते शरीरे तेनैव सहोत्पत्तिविनाशयोगीन्युपकारकाणि ॥"

इत्युक्तं विरुध्येतेति–वाच्यम् । उदाहृतवेदान्तदीपवाक्यस्य परमतवद्धस्तादीनां प्रतिशरीरमुत्पादविनाशाभ्युपगमेऽपि तेषामिन्द्रियत्वं सिध्यतीत्यत्र तात्पर्यात्तेषां शरीरेण सहोत्पादविनाशवत्त्वे तात्पर्यविरहात् । अत एव **सारे** तत्सूत्रमन्यथा व्याख्यातं—"हस्तादयोऽपीन्द्रियाणि, जीवे देहान्तरवस्थिते उपकारकत्वाविशेषात्"—इति ॥

एवमेव **भाष्येऽपि** व्याख्यातं "न सप्तैवेन्द्रियाणि अपित्वेकादश– हस्तादीनामपि शरीरे स्थिते जीवे तस्य भोगोपकरणत्वात्॥"–इति॥

न च–सूत्रघटकस्थित इत्यस्य दीपोक्तरीत्या शरीरे स्थित इत्यर्थ-कत्वे शरीरेण सहोत्पत्तिविनाशवत्त्वं हस्तादीनां प्रतीयते, सारभाष्यो-भयरीत्या शरीरान्तरवस्थिते जीवे हस्तादीन्युपकारकाणीत्यर्थकत्वे च स्थित इत्यस्य वैयर्थ्यं; चक्षुरादीनामपि शरीरे जीवावस्थानदशा-यामेवोपकरणत्वेन तद्व्यावर्तकत्वासम्भवात्; तथा च दीपोक्तयोजनाया एव युक्तत्वाद्धस्तादीनां शरीरेण सहोत्पत्तिविनाशवत्त्वेऽपि सूत्रादि-तात्पर्यमस्तीति–वाच्यम्। सारभाष्योक्तयोजनायामपि दोषाभावात्। शरीरान्तरवस्थिते जीवे हस्तादीन्युपकारकाणीत्यत्र जीव इत्यस्य कर्त-रीत्यर्थकत्वेनेच्छाविषयकार्यजनकत्वरूपोपकारकत्वघटककार्ये जीव-कृतिजन्यत्वलाभाद्धस्तादिजन्यादानादिरूपकार्ये जीवकृतिजन्यत्वं चक्षु-रादिजन्यसाक्षात्कारे च तदजन्यत्वमिति वैलक्षण्यसूचकतया स्थित-इत्यस्य सार्थकत्वात्। पाथसि पीते तृष्णा शाम्यतीत्यादाविव सति सप्तम्या जन्यजनकभावलाभात्। यद्वा–शरीरान्तरवस्थिते जीवे उप-कारकाणीत्यस्य जीवाधिकरणीभूतशरीरावच्छेदेनादानादिकार्यजनका-नीत्यर्थः; चक्षुरादीनि तु वृत्त्या शरीरानवच्छिन्ने घटादिदेशेऽपि चाक्षुषादिरूपकार्यजनकानीति चक्षुरादीनां वृत्त्या कार्यजनकत्वं, हस्तादीनां तन्निरपेक्षकार्यजनकत्वमिति वैलक्षण्यसूचकतया स्थित इत्यस्य सार्थकत्वात्॥

यद्यपि–'सप्तगतेर्विशेषितत्वाच्च' इति पूर्वपक्षसूत्रे सप्तानां गति-श्रवणात्सप्तैवेन्द्रियाणीत्यर्थके गतेरित्यस्य प्रतिकोटितया **हस्तादय** इति सिद्धान्तसूत्रे स्थित इत्यस्योपादानात्; हस्तादीनां गतिर्नास्तीति स्वरसतः प्रतीयते। **तथाऽपि**–भौतिकेन्द्रियवादे दोषस्योक्तत्वा-

दाहङ्कारिकेन्द्रियपक्षे च तादृशार्थासम्भवादुक्तार्थ एव युक्त इति बोध्यम् ॥

न चैवमपि—जीवस्य परकायप्रवेशदशायामिन्द्रियादीनामगमनादव्याप्तिरिति—वाच्यम् । जीवस्य स्वेन्द्रियैस्सहैव परकाये प्रवेशात् ; अन्यथा तच्छरीरावच्छेदेनेन्द्रियकार्याणामनुत्पत्तेः । मृतशरीरे प्रवेशस्थले तदीयेन्द्रियाणामभावात्तन्न्यायेन जीवविशिष्टशरीरप्रवेशस्थलेऽपीन्द्रियैस्सह प्रवेशाङ्गीकारस्य युक्तत्वात् अन्यदीयेन्द्रियाणामन्यादृष्टोपार्जितानामेतदुपकारकत्वासम्भवात् ;

"शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥"

इति स्मृतेश्च ॥ तथा च—पूर्वपरित्यक्ते स्वशरीरे मृतकायप्रवेशवत् पुनरिन्द्रियैस्सह प्रवेशः ॥

न च—**प्रदीपवदावेशस्तथा हि दर्शयतीति सूत्रे** योगिनां एकदा अनेकशरीरेषु प्रवेशो ज्ञानव्याप्त्येत्युक्तम् , तत्रेन्द्रियाणामभावात् कथं तत्कार्यनिर्वाहः—इति वाच्यम् । तत्रानेकशरीरेष्विन्द्रियाणामपि प्रतिशरीरं विविक्ताभिर्वृत्तिभिरीश्वरसङ्कल्पेन प्रसृताभिः कार्यनिर्वाहाङ्गीकारात् ॥ उक्तञ्च **न्यायसिद्धाञ्जने**—

"प्रतिदेहं विविक्तानि मनःप्रभृतिकान्यपि ।
इन्द्रियाणीश्वरेच्छाद्यैः प्रवर्तन्ते तु योगिनः ॥" —इति ॥

एवमेव स्वप्ने भगवता सृष्टेष्वपि देहेष्विन्द्रियकार्यनिर्वाहो वृत्तिभिरेव बोध्यः ॥

पुनरिन्द्रियं द्विविधं— ज्ञानेन्द्रियकर्मेन्द्रियभेदात् ॥

ज्ञानप्रसरणहेतुत्वे सतीन्द्रियत्वं—**ज्ञानेन्द्रियत्वम्**। इन्द्रियसंयोगेऽतिव्याप्तिवारणायेन्द्रियत्वनिवेशः। न च—अप्राकृतज्ञानेन्द्रियेष्वव्याप्तिः, नित्यमुक्तेश्वराणां ज्ञानस्येन्द्रियाधीनप्रसरणवत्त्वाभावादिति—वाच्यम्;

ज्ञानप्रसरणहेतुतावच्छेदकधर्मवत्त्वस्य विवक्षितत्वात्, अप्राकृतेन्द्रियेष्वपि तादृशहेतुतावच्छेदकचक्षुष्ट्वादिमत्त्वस्याक्षतत्वात्॥ तच्च षड्विधम्--मनश्श्रोत्रस्पर्शननयनरसनघ्राणभेदात्। तत्र मनस्स्पर्शननयनानां द्रव्यग्राहकेन्द्रियत्वम्, अन्येषां तदग्राहकेन्द्रियत्वं लक्षणम्। यद्यपि—सर्वेषामेवेन्द्रियाणां तत्तत्कालविशिष्टवस्तुग्राहकत्वाद्द्रव्यग्राहकत्वमविशिष्टं; तथाऽपि—द्रव्यपदेन कालातिरिक्तद्रव्यमेव विवक्षितमिति न दोषः। कालस्य षडिन्द्रियवेद्यत्वं च वक्ष्यते ॥

तत्र श्रावणस्पार्शनोभयजनकेन्द्रियत्वं—**मनसो लक्षणम्**। श्रावणजनकत्वमात्रोक्तौ श्रोत्रे, स्पार्शनजनकत्वमात्रोक्तौ त्वगिन्द्रियेऽतिव्याप्तिः; अत उभयनिवेशः। तावन्मात्रोक्तौ चात्मादावतिव्याप्तिः; अत इन्द्रियत्वनिवेशः। एवं स्पार्शनचाक्षुषोभयादिघटितमपि लक्षणान्तरमूह्यम् ॥ न चोक्तलक्षणस्याप्राकृतमनस्यव्याप्तिः; नित्यमुक्तादिज्ञानस्येन्द्रियान्तराधीनप्रसरणवत्त्वाभावेऽपि मनोऽधीनप्रसरणस्याङ्गीकारात्; 'मनसैतान्कामान् पश्यन् रमते' इति श्रुत्या मुक्तादिज्ञानेऽपि मनोधीनप्रसरणबोधनात्, श्रावणस्पार्शनोभयजनकतावच्छेदकधर्मघटितलक्षणसम्भवाच्च ॥ स्मृतिजनकतावच्छेदकधर्मवदिन्द्रियत्वं वा **मनोलक्षणम्**, हृत्प्रदेशमात्रवृत्तित्वं वा **तल्लक्षणम्**। न च—'अनवस्थितेरसम्भवाच्च नेतरः' इति सूत्रभाष्ये जीवस्यापि सर्वेन्द्रियव्यापारानुगुणत्वाय सर्वेन्द्रियकन्दभूते स्थानविशेषे वृत्तिरिति चक्षुषि नावस्थानमित्युक्तत्वाज्जीवेऽतिव्याप्तिरिति—वाच्यम्। इन्द्रियत्वस्यापि निवेशात्, चक्षुरादीनां च स्वस्वाधिष्ठाने हृत्प्रदेशे च वर्तमानत्वेऽपि न तन्मात्रवृत्तित्वमिति नातिव्याप्तिः ॥

तदेकमेव मनः वृत्तिभेदात् बुद्ध्यहङ्कारचित्तसंज्ञां लभते, न तु बुद्ध्यादिकमिन्द्रियान्तरम्। न च—**सुबालोपनिषदि** 'चक्षुश्च द्रष्टव्यं च नारायणः' इत्यादिना पञ्च ज्ञानेन्द्रियाण्युक्त्वा—

"मनश्च मन्तव्यं च नारायणः, बुद्धिश्च बोद्धव्यं च नारायणः,
अहङ्कारोऽहङ्कर्तव्यं च नारायणः ॥"

इत्याम्नानात्, अनन्तरं च कर्मेन्द्रियाणां गणनात्, बुद्ध्यादीनामपीन्द्रियान्तरत्वं प्रतीयत इति—वाच्यम् । वृत्तिभेदादेव पृथग्घोषनोपपत्तेः ; प्राणस्य वृत्तिभेदात्प्राणापानादिरूपेण पृथक्परिगणनवन्मनसोऽपि वृत्तिभेदात् पृथगभिधानोपपत्तेः । कामसङ्कल्पविचिकित्सादयोऽपि मनोवृत्तिविशेषाः—'कामस्सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति श्रुतेः, **पञ्चवृत्तिर्मनोवद्व्यपदिश्यते** इति सूत्रभाष्ये कामादीनां मनोवृत्तित्वाभिधानाच्च । "कामादयोऽध्यवसायादयश्च पुरुषधर्मा एव । उक्तश्रुतौ कामादिपदस्य आयुर्घृतमित्या दाविव तज्जनके लाक्षणिकत्वात्" इत्युक्तं **सर्वार्थसिद्धौ** ॥

नचैवं—पञ्चवृत्तिर्मनोवद्व्यपदिश्यते इति सूत्रभाष्यविरोधः, तत्र कामादीनां मनोवृत्तिविशेषत्वाभिधानात् ; एवं सप्तगतेरित्यधिकरण—भाष्यविरोधश्च, तत्राध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यत इत्युक्तत्वादिति—वाच्यम् । कामत्वाध्यवसायत्वाद्यवस्थाश्रयज्ञानजनकत्वादिरूपतत्तदवस्थाविशिष्टस्य मनस एव कामसङ्कल्पादिशब्दैर्बुद्ध्यहङ्कारादिशब्दैश्च व्यपदेशस्योदाहृतभाष्याभिप्रेततया **श्रुतप्रकाशिकान्यायसिद्धाञ्जनयोः** प्रतिपादितत्वात् ॥

अन्ये तु—'पञ्चवृत्तिर्मनोवद्व्यपदिश्यते' इति सूत्रे श्रुतौ च मनःपदं धर्मभूतज्ञानपरम् । नचैवं लक्षणाप्रसङ्गः, "मनश्चैतत्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा ज्योतिस्स्मृतिस्सङ्कल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति" इति **ऐतरेयश्रुत्या** मनःपदस्य ज्ञाने शक्त्यभिधानात् । तथा च—धर्मभूतज्ञानस्य यथा कामादिवृत्तिमत्त्वं, तथा प्राणस्य प्राणापानादिवृत्तिमत्त्वमिति दृष्टान्तसामञ्जस्यम्—इत्याहुः ॥

स्पर्शाविषयकसाक्षात्काराजनकत्वे सति शब्दविषयकसाक्षात्कार-जनकेन्द्रियत्वं–श्रोत्रस्य लक्षणम्। मनस्यतिव्याप्तिवारणाय सत्यन्तं, चक्षुष्यतिव्याप्तिवारणाय शब्दविषयकसाक्षात्कारजनकेति, श्रोत्र-संयोगेऽतिव्याप्तिवारणायेन्द्रियत्वमिति। तच्च मनुष्यादीनां कर्णशष्कुल्य-वच्छिन्नप्रदेशवृत्तिः द्विजिह्वादीनां नयनवृत्तीति ज्ञेयम् ॥

ननु–एकादशेन्द्रियाणामपि अणवश्चेति सूत्रेणाणुत्वाभिधानात् श्रोत्र-स्याणुरूपस्य कथं दूरस्थशब्दग्राहकत्वम्। न च–गगने वीचीतरङ्ग-न्यायेन शब्दधाराया उत्पत्त्यङ्गीकारात् श्रोत्रसम्बद्धस्य शब्दस्य तेन ग्रहणं युज्यत इति–वाच्यम्। तथा सत्यनन्तशब्दकल्पनाप्रसङ्गेन गौरवात्; श्रोत्रदेशोत्पन्नस्यैव ग्रहणे प्राच्यां शब्दः, प्रतीच्यां शब्दः, दूरे शब्दः, समीपे शब्द इत्यादिप्रतीत्यनुपपत्तिश्च–इति चेत् ॥

अत्र केचित्–श्रोत्रस्याणुत्वेऽपि शब्दोत्पत्तिदेशपर्यन्तं प्रसृतया तद्वृत्त्या शब्दस्य सम्बन्धात् दूरस्थशब्दग्रहोपपत्तिः, प्राच्यां शब्दो दूरे शब्द इत्यादिप्रतीत्युपपत्तिश्च। वीणायाः शब्दं शृणोमीत्यादि-व्यवहारस्याप्युपपत्तिः; वीचीतरङ्गन्यायेन शब्दोत्पत्तिपक्षे वीणा-जन्यशब्दस्याश्रवणात्तदनुपपत्तिः–इत्याहुः ॥

वस्तुतस्तु–'शब्दगन्धसूर्यालोकरत्नप्रभादयो धर्म्यतिवर्तिनो गति-मन्तश्च' इति आत्मसिद्धिवाक्यानुरोधात्, शब्दाश्रयस्य वाय्वादि-भूतस्य श्रोत्रदेशागमनात् शब्दस्य सन्निकृष्टत्वात् शब्दप्रत्यक्षोपपत्तिः। उक्तात्मसिद्धिवाक्ये गन्धपदं शब्दपदं च तत्तदाश्रयद्रव्यपरं; यथा गन्धाश्रयपार्थिवभागानां वायुना समानीतत्वाद्दूरस्थचम्पकादेर्गन्धो घ्राणेन गृह्यते, तद्वत् शब्दोपीति भावः। अत एवानुकूलवातदशायां दूरस्थस्यापि शब्दस्य ग्रहणं, प्रतिकूलवाते च समीपस्थस्याप्यग्रहण-मित्युपपद्यते। एवं भेर्यां ताड्यमानायां प्रथमं समीपस्थानां पुरुषाणां शब्दप्रत्यक्षं, अनन्तरं च विप्रकृष्टानां प्रत्यक्षं, गृहान्तर्गतानामस्फुटं

दूरस्थशब्दग्रहणं, बहिर्निर्गतानां च स्फुटं तद्ग्रहणमित्यादिकं चोपपद्यते। न च—प्रतिकूलवातेन श्रोत्रवृत्तेर्निरोधान्न तदा शब्दग्रहणं, समीपस्थानां च झडिति वृत्तिप्रसरणादविलम्बेन शब्दग्रहणं, ग्रहान्तर्गतानां तु श्रोत्रवृत्तौ कतिपयांशस्य कुड्यादिना निरोधादल्पांशानां प्रसरणादस्फुटग्रहणमिति रीत्या वृत्तिगमनपक्षेऽप्युपपत्तिरिति—वाच्यम्। भेर्यादिशब्देन गुहासौधादौ प्रतिशब्दोत्पादस्य चलनस्य च तादृशशब्दाश्रयद्रव्याभिघातमन्तरेणानुपपत्तेश्शब्दाश्रयद्रव्यागमनपक्षस्यैव युक्तत्वात् ॥

उक्तं च सर्वार्थसिद्धौ—

"गुहासौधादिसङ्क्षोभः प्रतिशब्दश्च जृम्भते।
निस्साणादिप्रणादेन तदेतत्पक्षसङ्गतम् ॥" —इति ॥

न चैतत्पक्षे प्राच्यां शब्द इत्यादिप्रतीत्यनुपपत्तिः। प्राच्यास्समागतवायुना शब्दोपलम्भेन शब्दे प्राच्यादित्वप्रतीतेरानुमानिकत्वात्। एतदप्युक्तं तत्रैव—

"यथा मयूरवीणादेश्शब्दोऽयमिति गृह्यते।
तथा प्राच्यादिशब्दोयमिति लिङ्गात्तथा विधात् ॥"—इति ॥

तस्मात् शब्दाश्रयद्रव्यागमनपक्षे न कोऽपि दोष इति दिक् ॥

रूपाग्राहकत्वे सति स्पर्शग्राहकेन्द्रियत्वं—त्वगिन्द्रियलक्षणम्। मनस्यतिव्याप्तिवारणाय सत्यन्तं, श्रोत्रेऽतिव्याप्तिवारणाय स्पर्शग्राहकेति, त्वगिन्द्रियसंयोगवारणायेन्द्रियत्वमिति। त्वगिन्द्रियं च सर्वशरीरवृत्ति, अणुत्वेऽपि तस्य विकासशक्त्या वृत्तिद्वारेण वा तस्य शरीरव्यापकत्वसम्भवात्। अत एव पिपीलिकादिशरीरस्थस्य स्पर्शनस्य विकासावस्थयैव गजादिशरीरप्रवेशे तादृशशरीरव्यापकत्वं, गजादिशरीरस्थस्य च तस्य सङ्कोचावस्थया पिपीलिकादिशरीरव्यापकत्वमुपपद्यते। नखदन्तकेशादिषु प्राणमान्द्यतारतम्यात् स्पर्शानुपलम्भः ॥

स्पर्शाग्राहकत्वे सति रूपग्राहकेन्द्रियत्वं—**चक्षुषो लक्षणम्**। तच्च नयनवृत्ति, एतस्य च वृत्तिप्रसरणेन विषयदेशप्राप्त्या दूरस्थपदार्थग्राहकत्वं 'दिवीव चक्षुराततम्' इति श्रुतिव्यवहार-स्वारस्याच्चक्षुषो वृत्त्यङ्गीकारस्य युक्तत्वात्। कुड्यादिव्यवधानस्थले कुड्यादिना अञ्जनाद्यसंस्कृतनेत्रवृत्तेः प्रतिरोधान्न व्यवहितार्थग्राह-कत्वम्। अञ्जनादिसंस्कृतनेत्रवृत्तेः कुड्यादावपि प्रवेशादञ्जनसंस्कृत-चक्षुषां व्यवहितार्थग्रहोपपत्तिः। काचजलाद्यच्छद्रव्याणां च वृत्ति-निरोधकत्वाभावात्तद्व्यवहितानामपि चक्षुषा ग्रहणमुपपन्नम्। ज्ञानेन्द्रि-येषु चक्षुष एकस्यैव विषयदेशं गत्वा तद्ग्राहकत्वं, अन्येषां तु स्वदेश-प्राप्तविषयग्राहकत्वमिति—विवेकः। पिपीलिकादीनां रसनं पश्वादीनां घ्राणमपि वृत्त्या विषयदेशं गत्वा तद्ग्राहकमित्यनुभवानुसारात् कल्पयन्ति ॥

रूपाग्राहकत्वे सति रसग्राहकेन्द्रियत्वं—**रसनेन्द्रियलक्षणम्**। तच्च जिह्वाग्रवर्ति ॥

रसाग्राहकत्वे सति गन्धग्राहकेन्द्रियं—**घ्राणं**, तच्च नासाग्रवर्ति ॥

उक्तानामिन्द्रियाणां द्रव्यप्रत्यक्षे संयोगः। द्रव्याश्रितानां रूपा-दीनां प्रत्यक्षे संयुक्तापृथक्सिद्धत्वं सन्निकर्ष इति बोध्यम् ॥

उच्चारणाद्यन्यतमजनकेन्द्रियत्वं—**कर्मेन्द्रियसामान्यलक्षणम्**। तच्च वाक्पाणिपादपायूपस्थभेदात् **पञ्चधा**। तत्र वर्णोद्देश्यककृति-जन्यव्यापारवदिन्द्रियं **वाक्**। अत्र जिह्वादावतिव्याप्तिवारणायेन्द्रिय-त्वनिवेशः। सा च हृत्कण्ठजिह्वामूलतालुदन्तोष्ठनासामूर्धरूपस्थानाष्टक-वृत्तिः। शुकादिव्यतिरिक्तविहङ्गादीनामुक्तेन्द्रियसत्त्वेऽप्यदृष्टसंस्था-नादिसहकारिविरहाद्वर्णाद्यनुत्पत्तिः। शुकादीनामपि किञ्चित्तादृश-संस्थानवैषम्यादुच्चारणवैषम्यम् ॥

आस्यकबलसंयोगोद्देश्यककृतिप्रयोज्यव्यापारवदिन्द्रियं—**पाणिः**। भौतिकहस्तादावतिव्याप्तिवारणायेन्द्रियमिति। विलेखनसाधनेन्द्रियं वा सः; विलेखनं च पत्रादिगतावयवविभागमष्यादिसंयोगान्यतरानुकूलव्यापारः। तथा चावयवविभागमष्यादिसंयोगान्यतरोद्देश्यककृतिजन्यव्यापारवदिन्द्रियं पाणिरिति फलितम्। स च मनुष्यादीनां अङ्गुल्यग्रवृत्तिः, गजादीनां नासाग्रवृत्तिः। न च—अभ्यासपाटवात्पादादिभिरपि केषांचिद्विलेखनस्य जायमानत्वात्पादादावतिव्याप्तिरिति—वाच्यम्। तत्राप्यल्पीयस्याः हस्तादिवृत्तेः प्रसरणाङ्गीकारेण तादृशवृत्त्यैव लेखनाद्युत्पत्तेः ॥

उत्तरदेशसंयोगोद्देश्यककृतिजन्यव्यापारवदिन्द्रियं—**पादः**। भौतिकपादवारणायेन्द्रियमिति। स च मनुष्यादीनां चरणवृत्तिः भुजगपतगादीनां उरःपक्षादिवृत्तिः ॥

मलादिपतनोद्देश्यककृतिजन्यव्यापारवदिन्द्रियं—**पायुः**। स च तत्तदवयवविशेषवृत्तिः ॥

आनन्दविशेषोद्देश्यककृतिजन्यव्यापारवदिन्द्रियं—**उपस्थः**। स च मेहनादिवृत्तिः ॥

उक्तानामिन्द्रियाणां मुक्तिदशायामप्राकृतदेशगमनासम्भवादिहैव यावत्प्रलयं स्थितिः करणविधुरैरन्यैः परिग्रहो वा बोध्यः ॥

अत्र नैयायिकाः—

कर्मेन्द्रियाणामिन्द्रियत्वमेवासिद्धं, प्रमाणाभावात्। ज्ञानेन्द्रियेषु च श्रोत्रस्याकाशत्वं, स्पर्शनस्य वायुत्वं, नयनस्य तेजस्त्वं, रसनस्य जलत्वं, घ्राणस्य च पृथिवीत्वं युक्तम्। तथा हि—श्रोत्रं स्वग्राह्यगुणसजातीयगुणवत्, बाह्येन्द्रियत्वात्, चक्षुरादिवत्; स्पर्शनं वायवीयं, रूपाग्राहकत्वे सति स्पर्शग्राहकत्वात्, अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत्; चक्षुस्तैजसं, स्पर्शाग्राहकत्वे सति रूपग्राहकत्वात्,

प्रदीपप्रभावत् ; रसनं जलीयं, रूपाग्राहकत्वे सति रसग्राहकत्वात्, सक्तुरसाभिव्यञ्जकनवशरावोदकवत् ; घ्राणं पार्थिवं, रसाग्राहकत्वे सति गन्धग्राहकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत्—इत्याद्यनुमानैश्श्रोत्रादीनामाकाशत्वादिकं सिध्यति—इत्याहुः ॥

तन्न । 'एका कन्या दशेन्द्रियाणि दशेमे पुरुषे प्राणा आत्मैकादशः' इति श्रुत्या, 'इन्द्रियाणि दशैकं च देवा वैकारिका दश । एकादशं मनश्च' इत्यादिस्मृत्या च हस्तादीनामपीन्द्रियत्वावगमात् । श्रुतौ कन्यापदमात्मपदं च मनःपरं, श्रुतौ प्राणपदं स्मृतौ देवपदं चेन्द्रियपरं बोध्यम् । श्रोत्रादीनामनुमानैराकाशत्वादिसाधनमप्ययुक्तम् । तत्र श्रोत्रादिशब्दैः प्रत्यक्षग्राह्यकर्णशष्कुल्यादिरूपाधिष्ठानानां ग्रहणे बाधः । स्वमते तेषामाकाशत्ववायुत्वादेरनङ्गीकारात् तत्तदधिष्ठानकेन्द्रियाणां चाकाशादिरूपाणामनुमानात्पूर्वमसिद्ध्या उक्तानुमानेषु पक्षत्वासम्भवात् । न च—शब्दग्राहकेन्द्रियत्वस्पर्शग्राहकेन्द्रियत्वादिना पक्षीकरणात् न दोष इति—वाच्यम् । प्रथमानुमाने स्वग्राह्यगुणसजातीयगुणाभाववति हस्तादौ बाह्येन्द्रियत्वस्य हेतोर्व्यभिचारात्, मनोभिन्नज्ञानेन्द्रियत्वस्य हेतुत्वेऽपि दृष्टान्तस्य साध्यविकलत्वात्, चक्षुरादौ स्वग्राह्यरूपादिमत्त्वस्यास्माभिरनङ्गीकारात् । द्वितीयतृतीयानुमानयोरपि दृष्टान्तस्साधनविकलः, व्यजनपवनस्य वेगेन शरीरोपरि निपततस्तत्संयुक्तसूक्ष्मसलिलकणानां शरीरान्तःप्रवेशहेतुत्वेऽपि स्पर्शग्राहकत्वाभावात्, प्रविष्टानां च सलिलानां शैत्यस्यान्तर्गतत्वगिन्द्रियप्रदेशेन स्फुटमवगमात्; विषयतासम्बन्धेन चाक्षुषं प्रति संयोगादिसम्बन्धेन तमसःप्रतिबन्धकतया दीपप्रभायास्तादृशतमोनिवर्तकत्वेन चाक्षुषप्रयोजकत्वेऽप्यालोकसंयोगत्वादिना चाक्षुषहेतुत्वे मानाभावात्, प्रभायाः रूपग्राहकत्वाभावात् । किञ्च द्रव्यचाक्षुषे आलोकप्रतियोगिकसंयोगो न हेतुः ; मणि-

प्रभादौ तदभावेऽपि चाक्षुषोत्पत्तेः ; नाप्यालोकानुयोगिकः, घटादौ तदभावात् ; नाप्यालोकप्रतियोगिकत्वतदनुयोगिकत्वान्यतरविशिष्टस्संयोगः, आलोकप्रतियोगिकत्वतदनुयोगिकत्वादीनां विशेषणविशेष्यभावे विनिगमनाविरहेण तदवच्छिन्नस्य कारणताबाहुल्यापत्तेः ॥ न च—अन्यदेशावच्छिन्नादप्यालोकसंयोगाच्चाक्षुषोत्पत्त्यभावाज्जातिविशेषस्यैव द्रव्यादिचाक्षुषजनकतायामालोकसंयोगनिष्ठायामवच्छेदकत्वं स्वीकार्यम् ; सा च—जातिरालोकनिष्ठे वाय्वादिसंयोगेऽपि सम्भवति । अत एव प्रभादि चाक्षुषमिति—वाच्यम्। तादृशजातिरालोकसंयोगे तत्समानाधिकरणतत्समानकालीनवायुसंयोगादौ वेत्यत्र विनिगमकाभावात्। किन्तु तमस्त्वेन प्रतिबन्धकत्वमेव द्रव्यचाक्षुषे कल्प्यते, तदभावादेवोक्तप्रभादौ चाक्षुषोपपत्तिः ॥ न च—तमोऽभावत्वेन हेतुत्वेऽपि तमःप्रतियोगिकत्वाभावत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण कारणताद्वयापत्तिरिति—वाच्यम् । स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तमस्त्वविशिष्टत्वेनैव कारणतास्वीकारेण कारणतावच्छेदके अभावत्वानिवेशात् ॥ न च—अत्रापि प्रतियोगितासम्बन्धेनालोकविशिष्टत्वेनहेतुतास्वीकारान्न विनिगमनाविरह इति—वाच्यम् ; मणिप्रभादौ व्यभिचारावारणात्॥ **एतेन**—संयोगेनालोकस्य हेतुत्वमित्यपि—**निरस्तम्** ॥

उक्तं च **प्रथमसूत्रभाष्ये**—

"प्रदीपप्रभायास्तु चक्षुरिन्द्रियस्य ज्ञानमुत्पादयतो विरोधितमोनिरसनद्वारेणोपकारकत्वमात्रमेव ॥" —इति ॥

न च—यथाकथञ्चिच्चाक्षुषप्रयोजकत्वस्य हेतुत्वात्तस्य प्रभायां सत्त्वान्न साधनवैकल्यमिति—वाच्यम्; तादृशप्रयोजकत्वस्योन्मीलनादिहेतुभूतपक्ष्मादिसाधारण्येन व्यभिचारात् । एवमुक्तानुमानानां—इन्द्रियाण्यभौतिकानि, इन्द्रियत्वात्, मनोवत्—इत्यादिभिस्सत्प्रतिपक्षितत्वा-

दाहङ्कारिकत्वप्रतिपादकश्रुत्यादिबाधितत्वाच्च न भौतिकत्वमिन्द्रियाणामिति। न च—'अकाशमिन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ लीयन्ते' इतिश्रुत्या इन्द्रियाणां तन्मात्रेषु लयप्रतिपादनात्तन्निष्ठलयप्रतियोगित्वस्य तदुपादानकत्वव्याप्यत्वात्तन्मात्रोपादानकत्वसिद्ध्या भौतिकत्वं सिध्यतीति—वाच्यम्; इन्द्रियपर्याये आकाशपर्याये च लीयन्त इति पदाश्रवणेन तत्पर्यायद्वयस्याकाशेन्द्रिययोः इन्द्रियतन्मात्रयोश्च परस्परसंयोगप्रतिपादनपरत्वात्॥ न चेन्द्रियपर्याये लीयन्त इति पदानुषङ्गः, सति गत्यन्तरे अध्याहारवत्तस्याप्ययोगात्; अन्यथा आकाशपर्यायेऽप्यवैरूप्यायानुषङ्गापत्त्या सर्वोपबृंहणविरोधापत्तेः। इन्द्रियाणामाकाशोपादानत्वस्य कुत्राप्यकथनात्॥ अस्याश्चोपनिषदि भूतादेराकाशमाकाशाद्वायुरिति सृष्टिक्रमेण भूतादेरेवाकाशोपादानत्वाभिधानात्॥ न च—उक्तपर्यायद्वयस्याकाशेन्द्रिययोस्संसर्गप्रतिपादनपरत्वमपि न सम्भवति, तादृशसंसर्गस्येदानीमपि सत्त्वेन तत्प्रतिपादने प्रयोजनाभावादिति—वाच्यम्; स्पर्शनचक्षुरादिष्विन्द्रियेष्वाप्यायकानां वायुतेजःप्रभृतिभागानां सत्त्वात् तत्तदिन्द्रियाप्यायकत्वस्य तत्तदिन्द्रियेणैकसङ्घाततापत्तिरूपत्वात्तादृशभूतांशानां सर्वेषामपि तद्दशायामाकाशतापत्त्या इन्द्रियत्वावच्छेदेनाकाशत्वावच्छिन्नप्रतियोगिकविलक्षणसंयोगस्य प्रलयदशायामेव सम्भवात्। ततस्तादृशाकाशस्य शब्दतन्मात्ररूपताप्राप्तौ तन्मात्रत्वावच्छिन्ने इन्द्रियसंयोगस्योपपत्तेः॥ शब्दतन्मात्रस्यैकत्वेऽप्यंशभेदविवक्षया बहुवचनोपपत्तेः। तन्मात्राणि भूतादौ लीयन्त इत्यनेन शब्दतन्मात्रस्य तामसाहङ्कारे भूतादिपदवाच्ये लयप्रतिपादनेन विरोधाभावादिति॥

अथ तन्मात्रादिकं निरूप्यते। तन्मात्रभूतोभयसाधारणं लक्षणं तु शब्दवत्त्वम्, शब्दतन्मात्रादिपञ्चतन्मात्रेषु पञ्चमहाभूतेषु च तत्सत्त्वाल्लक्षणसङ्गतिः। स्वसमानाधिकरणस्वसजातीयगुणध्वंसासमानकालीन-

गुणवत्त्वं पञ्चतन्मात्राणां लक्षणम्। साजात्यं चाद्रव्यविभाजकशब्दत्व-स्पर्शत्वादिना। शब्दतन्मात्रे पूर्वं शब्दविरहेऽपि भगवत्सङ्कल्पेन शब्दोत्पत्त्या तादृशशब्दस्य स्वसमानाधिकरणशब्दध्वंसासमानकालीनत्वाल्लक्षणसमन्वयः॥ एवं स्पर्शतन्मात्रे स्पर्शं रूपतन्मात्रादौ रूपादिकं चादाय लक्षणसमन्वयो बोध्यः। अत्र शब्दादिमत्त्वस्याकाशादिभूतसत्त्वादतिव्याप्तिवारणायासमानकालीनान्तगुणविशेषणं, आकाशादौ तन्मात्रादिनिष्ठसूक्ष्मशब्दादिनाशपूर्वकं स्थूलशब्दाद्युत्पत्तेस्तादृशस्थूलशब्दस्य च स्वसमानाधिकरणस्वसजातीयसूक्ष्मशब्दध्वंससमानकालीनत्वान्नातिव्याप्तिः। स्थूलसूक्ष्मगुणभेदादेव भूततन्मात्रयोर्भेदात्॥

उक्तं च **तत्त्वमुक्ताकलापे**—

"सूक्ष्मस्थूलस्वभावस्वगुणसमुदयप्रक्रियातारतम्यात्
तन्मात्राभूतभेदः कलिलदधिनयात्कल्पितस्तत्त्वविद्भिः।"
—इति॥

स्वगुणाः—शब्दादयः, तेषां, समुदयः—उत्पत्तिः। अत्र शब्दादौ स्थूलत्वसूक्ष्मत्वे उद्भूतत्वानुद्भूतत्वरूपे॥

उक्तं च **सर्वार्थसिद्धौ**—

"आगमेन विना सिद्धिस्तन्मात्राणां च दुर्वचा।
उद्भवानुद्भवाद्यैस्तु लोके सूक्ष्मादिकल्पना॥" —इति॥

स्पर्शतन्मात्रादिषु स्पर्शादेरपि घटादिनिष्ठस्पर्शध्वंससमानकालीनत्वादसम्भव इति तद्वारणाय स्वसमानाधिकरणत्वं गुणविशेषणम्। तादृशस्पर्शादेः स्वसमानाधिकरणसंयोगादिध्वंससमानकालीनत्वात्तद्दोषतादवस्थ्यवारणाय स्वसजातीयेति॥ न च—शब्दतन्मात्रेऽव्याप्तिः, तत्र शब्दस्य यावद्द्रव्यभाविन एकस्यासम्भवात् द्वितीयादिशब्दानां प्रथमशब्दध्वंससमानकालीनत्वेन तदसमानकालीनशब्दवत्त्वाभावादिति—

वाच्यम्। सोऽयं ककार इत्यादिप्रत्यभिज्ञाबलेन सिद्धान्तिभिरपि शब्दस्य यावद्द्रव्यभावित्वाभ्युपगमात् । उक्तं च **न्यायसिद्धाञ्जने**—

"आकाशनिष्ठस्य शब्दस्याकाशेन सहोत्पत्तिविनाशौ, वाय्वादिनिष्ठस्यापि तत्तद्भूतैस्सह.॥" —इति ॥

स्वसमानाधिकरणस्वसजातीयगुणे स्वपूर्वप्रलयपूर्वत्वाभाववत्त्वं विशेषणं देयम् । तेन पूर्वसृष्टौ तादृशतन्मात्रत्वाद्याश्रयप्रकृत्यंशेषु स्पर्शादेस्सत्त्वेन तद्ध्वंससमानकालीनत्वस्यैतत्सृष्टिघटकतन्मात्रनिष्ठस्पर्शादिषु सत्त्वेऽपि न क्षतिः ॥

स्वपूर्वावस्थापूर्वत्वाभाववत्त्वस्वपूर्वत्वोभयसम्बन्धेन भूतत्वावस्थाविशिष्टावस्थावत्त्वं वा तल्लक्षणं, भूतत्वविशिष्टघटत्वावस्थामादाय घटादावतिव्याप्तिवारणाय स्वपूर्वत्वनिवेशः। भूतत्वविशिष्टाहङ्कारत्वादिकमादाय तत्रातिव्याप्तिवारणाय स्वपूर्वावस्थापूर्वत्वाभावनिवेशः ॥ तत्र प्राकृताप्राकृतविभागः पूर्ववत् ॥

तानि च तन्मात्राणि पञ्च—शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगन्धतन्मात्रभेदात् ॥

तत्र स्पर्शशून्यत्वे सति तन्मात्रत्वं—**शब्दतन्मात्रलक्षणं**। स्पर्शतन्मात्रादिवारणाय सत्यन्तं, अव्यक्तादिवारणाय विशेष्यम् ॥ रूपशून्यत्वे सति स्पर्शवत्तन्मात्रत्वं—**स्पर्शतन्मात्रलक्षणम्**। रूपतन्मात्रादिवारणाय सत्यन्तं, शब्दतन्मात्रवारणाय स्पर्शवदिति, वायुवारणाय तन्मात्रत्वमिति॥ रसशून्यत्वे सति रूपवत्तन्मात्रत्वं—**रूपतन्मात्रलक्षणं** । रसतन्मात्रादिवारणाय सत्यन्तं, शब्दतन्मात्रादिवारणाय रूपवदिति, तेजस्यतिव्याप्तिवारणाय तन्मात्रत्वनिवेशः ॥ एवं गन्धशून्यत्वे सति रसवत्तन्मात्रत्वं—**रसतन्मात्रस्य लक्षणं**, व्यावृत्तिः पूर्ववत् ॥ गन्धवत्तन्मात्रत्वं च **गन्धतन्मात्रलक्षणमिति** बोध्यम् ॥

यद्वा—तामसाहङ्कारत्वावस्थाध्वंसरूपाकाशत्वावस्थाप्रागभावरूपावस्थावत्त्वं—शब्दतन्मात्रलक्षणं, आकाशत्वावस्थाध्वंसरूपवायुत्वावस्थाप्रागभावरूपावस्थावत्त्वं स्पर्शतन्मात्रलक्षणं, वायुत्वध्वंसरूपतेजस्त्वप्रागभावरूपावस्थावत्त्वं रूपतन्मात्रलक्षणं—इत्यदिरीत्या ज्ञेयम् । तामासाहङ्कारात् शब्दतन्मात्रस्य तस्मादाकाशस्य, आकाशात् स्पर्शतन्मत्रस्य तस्माद्वायोः, वायोश्च रूपतन्मात्रस्य तस्मात्तेजसः, तेजसो रसतन्मात्रस्य तस्माज्जलस्य, जलाद्गन्धतन्मात्रस्य तस्मात्पृथिव्याश्चोत्पत्तेरुक्तलक्षणानां सङ्गतिः ॥

यत्तु—तामसाहङ्कारात्पञ्चतन्मात्राणामुत्पत्तिः, तेभ्यश्चाकाशादिपञ्चभूतोत्पत्तिः । अत एव तन्मात्राणि भूतादौ लीयन्त इति बहुवचनं स्वरसतस्सङ्गच्छते—इति । **तन्न** । तथा सति 'आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी' इति श्रुति विरोधापत्तेः । तन्मात्राणि भूतादाविति श्रुतेः शब्दतन्मात्रमात्रलयप्रतिपादकत्वेन सकलतन्मात्राणां भूतादौ लयप्रतिपादकत्वविरहात् ; अदितिः पाशानितिवद्बहुवचनोपपत्तेः । अन्यथा—'पृथिव्यप्सु प्रलीयते, आपस्तेजसि लीयन्ते', इत्यादिपूर्ववाक्यविरोधापत्तेः ॥ **न च**—आकाशसहकृतस्पर्शतन्मात्रस्य वायुजनकत्वमितिरीत्या पूर्वपूर्वभूतसहकृतस्य तन्मात्रस्योत्तरोत्तरभूतजनकत्वस्वीकारादाकाशस्य वायुं प्रति निमित्तत्वात्तत्परा आकाशाद्वायुरित्यादिश्रुतिः । अन्यथा 'अष्टौ प्रकृतयष्षोडश विकाराः' इति आथर्वणश्रुतिविरोधापत्तेः । तच्छ्रुतौ प्रकृतिमहदहङ्कारतन्मात्राणां प्रकृतित्वस्यैकादशेन्द्रियपञ्चभूतानां च विकृतित्वस्याभिधानात् ; आकाशादीनां चतुर्णां तन्मात्रद्वारेण तत्त्वान्तरोत्पादकत्वे तेषामपि प्रकृतित्वापत्त्या द्वादशप्रकृतीनां द्वादशविकृतीनां चापत्तेः—इति वाच्यम् । तथा सति पृथिव्यप्सु प्रलीयत इत्यादिश्रुतिविरोधापत्तेः ।

आकाशाद्वायुरित्यादेरुपादानपरत्वस्य 'पृथिव्या ओषधयः ओषधीभ्योऽन्नम्' इत्याद्युत्तरवाक्यानुरोधेनाङ्गीकार्यत्वात् ॥

"भूतादिस्तु विकुर्वाणश्शब्दमात्रं ससर्ज ह ।
ततस्ससर्ज तन्मात्रमाकाशं शब्दलक्षणम् ॥
आकाशस्तु विकुर्वाणः स्पर्शमात्रं ससर्ज ह ।
बलवानभवद्वायुस्तस्य स्पर्शो गुणो मतः ॥
ततो वायुर्विकुर्वाणो रूपमात्रं ससर्ज ह ॥"

इत्यादि विष्णुपुराणवचनेष्वप्युपादानताया उक्तत्वाच्च । अष्टौ प्रकृतयष्षोडशविकाराश्शरीर इत्यादिश्रुतिर्न हि चतुर्विंशतितत्त्वानां प्रकृतिभावेन भेदप्रतिपादनपरा ; किन्तु अव्यक्तमहदहङ्कारपञ्चमहाभूतरूपाष्टद्रव्याणां शरीरारम्भकत्वेन प्रकृतित्वं, शब्दादिपञ्चविषयैकादशेन्द्रियाणां शरीराश्रितत्वेन विकारत्वमित्येवम्परा। स्फुटं चेदं श्रीगीताभाष्ये॥ अष्टौ प्रकृतय इत्यत्र प्रकृतित्वं च न तावद्यत्किञ्चित्कार्योपादनत्वं, पृथिव्या अपि घटाद्युपादानत्वादिन्द्रियाणामपि वृत्त्युपादानत्वात् प्रकृतित्वापत्तेः। नापि प्रकृतिविभाजकोपाधिरूपेण स्वविजातीयकार्योपादानत्वं तत्, आकाशत्वादीनां भूतविभाजकत्वेन प्रकृतिविभाजकत्वाभावेन तेन रूपेण विजातीयकार्यजनकत्वस्य तन्मात्रेष्वभावेन तेषां प्रकृतित्वानापत्तेः ; किन्तु—भूतविभाजकोपाधिमहदहङ्कारशब्दतन्मात्रत्वान्यतमरूपेण विजातीयकार्यजनकत्वं तथेतिवाच्यम्। तदस्माकमपि तन्मात्रसाधारणमाकाशादिव्यावृत्तं चेति नोक्तश्रुतिविरोधः ॥

तत्र स्पर्शरहितत्वे सति उद्भूतशब्दवान्—**आकाशः**। वाय्वादिवारणाय सत्यन्तं; अव्यक्तादिवारणाय विशेष्यं; शब्दतन्मात्रवारणायोद्भूतेति- श्रोत्राप्यायकत्वं वा तल्लक्षणम्। श्रोत्राप्यायकत्वं च श्रोत्रेण सहैकसङ्घातनापन्नत्वम्। न च -श्रोत्रानाप्यायकभागेष्वव्याप्तिः; श्रोत्राप्यायक

स्वसमानाधिकरणभूतविभाजकोपाधिमत्त्वस्य तदर्थत्वात् ॥ न च—स्पर्शवद्द्रव्याद्यप्रतिबन्धरूपावकाशात्मककार्यसिद्ध्यर्थमेवाकाशोऽङ्गीकार्यः, तथा शास्त्रसिद्धत्वात्; तथाचाकाशरूपपरिणामरहितप्रकृतिप्रदेशेऽपि गतिनिरोधप्रसङ्गः, स्पर्शशून्यद्रव्यत्वेनैवावकाशहेतुत्वस्वीकारात्प्रकृत्यादीनामपि तथात्वे चाकाशकल्पनं व्यर्थमिति—वाच्यम् । यत आकाशस्यावकाशरूपकार्यनिर्वाहार्थमेव न स्वीकारः, किन्तु श्रुतिसिद्धत्वात्प्रत्यक्षसिद्धत्वाच्च; आकाशोऽयं, कूपोऽयं, रन्ध्रमिदम्, इह पतङ्गः पतति—इत्यादिचाक्षुषप्रत्यक्षस्याकाशेऽपि सत्त्वात् । न च—इह पतङ्ग इति प्रत्यक्षे आलोकस्याधिकरणतया भानं; नाकाशस्येति—वाच्यम्; इहालोक इति प्रत्यक्षे तदसम्भवात्, आलोकावयवस्य तदधिकरणतया भानोपगमेऽपि त्र्यणुकाद्यात्मकालोकविषयकतादृशप्रत्यक्षे तदवयवस्य द्व्यणुकस्याप्रत्यक्षत्वेनाधिकरणतया भानासम्भवात् ॥ न च—सभायां ब्राह्मणा इतिवदिह त्र्यणुकमिति प्रत्यक्षे त्र्यणुकसमुदायस्याधिकरणतया भानसम्भव इति—वाच्यम्; एवमपि—नभसि त्र्यणुकं, व्योम्न्यातप इत्यादिप्रत्यक्षे त्र्यणुकसमुदायस्याधिकरणतया भानासम्भवात्, तस्य नभोव्योमादिशब्दार्थत्वासम्भवात्, आकाशस्याप्रत्यक्षत्वे नीलं नभ इति प्रत्यक्षानुपपत्तेश्च ॥ न च—उपनीतस्य नीलादेरुपनीते आकाशे आरोपः आकाशस्याप्रत्यक्षत्वेऽप्युपपद्यत इति—वाच्यम् । उपनीतं विशेषणतयैव भासत इति नियमेन चाक्षुषे नीलं नभ इति प्रत्यक्षे आकाशस्य विशेष्यतया भानासम्भवात्, स्वायोग्यविशेष्यकज्ञानजनने इन्द्रियाणामसामर्थ्यात् । स्पष्टञ्चेदं पक्षतायां ॥

मानसत्वं तु तादृशप्रतीतेर्वक्तुमशक्यं; निमीलितनयनस्यापि तदापत्तेः, नीलं नभश्चक्षुषा साक्षात्करोमीत्यादिप्रतीत्यनुपपत्तेश्च । न च—द्रव्यनिष्ठविषयतासम्बन्धेन चाक्षुषप्रत्यक्षं प्रति समवायेन रूपस्य कारणतया आकाशे च रूपाभावान्न चाक्षुषसम्भव इति—वाच्यम्;

कालस्य षडिन्द्रियवेद्यताया वक्ष्यमाणत्वेन तच्चाक्षुषे व्यभिचारेण उक्त-कारणत्वासम्भवात्। न चैवं—प्रकृतिमहदहङ्काराणां वाय्वीश्वरयोश्च चाक्षुषप्रसङ्ग इति—वाच्यम्; सामानाधिकरण्येन कालाकाशान्यत्व-विशिष्टो य उद्भूतरूपाभावस्तदभाावत्वेन द्रव्यचाक्षुषं प्रति हेतुतास्वी-कारात्, कालाकाशयोर्विशेषणाभावेन पृथिव्यादौ च विशेष्याभावेनोक्त-विशिष्टान्यत्वसम्भवात्, प्रकृत्यादौ चोक्तयोर्विशेषणविशेष्ययोर्द्वयोरेव सत्त्वेन विशिष्टाभावविरहात् ॥

वस्तुतस्तु—चाक्षुषं प्रत्युद्भूतरूपस्य नोद्भूतरूपत्वेन कारणता, किन्तु शक्तिमत्त्वेन; तत्रोद्भूतरूपे कालाकाशत्वयोश्चैकस्या एव शक्तिस्वी-कारात् कालाकाशयोश्चाक्षुषोपपत्तिः; प्रकृत्यादौ तदनापत्तिश्च। अद्रव्येपि शक्तिसद्भावो वक्ष्यते ॥

यत्तु—भाष्ये पञ्चीकरणप्रक्रियया रूपवत्त्वादाकाशस्य चाक्षुषत्वमुप-पद्यत इत्युक्तम्। तत्तु—वैभववादमात्रमित्युक्तं **सर्वार्थसिद्धौ**। तथा रूपा-ङ्गीकारे आकाशस्याष्टमांश एव रूपसत्त्वेन तादृशभागस्य चाक्षुषोपपा-दनेऽपि भागान्तरे तदुपपादनासम्भवात्, कालस्य सुतरां तदसम्भवात्॥ यदपि—न चक्षुषा सन्मात्रं गृह्यते, तस्य रूपरूपिरूपैकार्थसमवेतपदार्थ-ग्राहित्वादिति भाष्यम्, तदपि—न चाक्षुषसामान्ये रूपकारणताप्रद-र्शनपरं, किन्तु द्रव्यचाक्षुषस्य रूपप्रकारकत्वनियमपरमिति बोध्यम्॥

अत्र नैयायिकाः—आकाशं नित्यं, निरवयवद्रव्यत्वात्, महाकाल-वत्—इत्याद्यनुमानेनाकाशस्य नित्यत्वं सिध्यतीति। तन्न; 'आत्मन आकाशस्सम्भूतः' इति श्रुतिबाधितत्वात्तदनुमानस्य। किञ्च—नित्यत्वं ध्वंसाप्रतियोगित्वं प्रागभावाप्रतियोगित्वं, कालनिष्ठभेदप्रतियोगितानव च्छेदकत्वं वा? सर्वत्र सिद्धसाधनं दुर्वारम्। आकाशत्वरूपावस्थायां ध्वंसप्रतियोगित्वादिसत्त्वेऽपि तदाश्रयद्रव्ये तदभावस्याक्षतत्वात्, द्रव्यस्य कालनिष्ठभेदप्रतियोगितानवच्छेदकत्वाच्च। न च—आकाश-

लयोक्त्या आकाशो नष्ट इत्यादिप्रतीतेर्भवन्मते प्रमात्वात् आकाशत्वविशिष्टेऽपि ध्वंसप्रतियोगित्वादिकं स्वीकार्यमिति—वाच्यम्; तादृशप्रतियोगिताया विशिष्ट एव पर्याप्ततया द्रव्यस्वरूपे तदपर्याप्तेस्तस्य नित्यत्वानपायात्। न च—आकाशत्वं कालनिष्ठभेदप्रतियोगितावच्छेदकतानवच्छेदकं, निरवयवद्रव्यवृत्तित्वादित्यत्र तात्पर्यान्न सिद्धसाधनता, आकाशत्वावच्छिन्नावच्छेदकताभेदस्य प्रलये सिद्धान्तिभिरुपगमादिति—वाच्यम्। तथाऽपि निरवयवद्रव्यवृत्तित्वस्यासमवेतद्रव्यवृत्तित्वरूपत्वे घटत्वादौ व्यभिचारात् घटादेरपि सिद्धान्ते असमवेतत्वात्, समवायानङ्गीकारेण हेत्वप्रसिद्धेश्चेति ॥

आकाशात् स्पर्शतन्मात्रं, ततो वायुः। रूपशून्यत्वे सत्युद्भूतस्पर्शवत्त्वं तल्लक्षणं। तेजोजलादिवारणाय सत्यन्तम्, आकाशवारणाय विशेष्यं, स्पर्शतन्मात्रवारणायोद्भूतेति। गन्धशून्यत्वे सत्यनुष्णाशीतस्पर्शवत्त्वं च तल्लक्षणं; पृथिवीवारणाय सत्यन्तं, जलतेजसोर्वारणायानुष्णाशीतेति। तन्मात्रवारणायोद्भूतत्वमपि निवेश्यम् ॥ न च—सुरभिर्वायुरिति प्रतीतेर्गन्धशून्यत्वं वायावसिद्धम्, एवं शीतो वायुरुष्णो वायुरिति प्रतीतेश्चानुष्णाशीतस्पर्शवत्त्वमप्यसिद्धमिति—वाच्यम्; कुसुमादिगन्धस्य स्वाश्रयसंयोगादिसम्बन्धेन वायुसम्बद्धस्य तत्र साक्षात्सम्बन्धेनारोपात् जलातपगतयोरेव शीतोष्णस्पर्शयोस्तत्रारोपात्, चाक्षुषाविषयत्वे सति स्पार्शनप्रत्यक्षविषयद्रव्यत्वं च लक्षणम्। रूपशून्यत्वेऽपि वायोः स्पार्शनं सम्भवत्येव; द्रव्यनिष्ठविषयतासम्बन्धेन स्पार्शनं प्रति स्पर्शस्यैव हेतुत्वात् ॥ बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति रूपस्य कारणत्वमिति तु न युक्तं; मानाभावात्। उक्तं च **श्रीभाष्ये**—"स्पार्शनमपि न सन्मात्रविषयं, स्पर्शतद्विषयत्वात्" इति। कालान्यत्वविशिष्टोद्भूतस्पर्शाभावाभावत्वेन हेतुत्वात् कालत्वस्पर्शयोरेकशक्तिमत्त्वेन हेतुत्वाद्वा कालस्य

स्पार्शनोपपत्तिः। अयं च समीपस्थेन स्पर्शनेन्द्रियग्राह्यः ; दूरस्थितेन तु तृणरजःप्रभृतीनां भ्रमणोर्ध्वगमनादिभिरनुमेयः। अस्य चादृष्टात्मकेश्वरसङ्कल्पात्तिर्यग्गमनं स्वाभाविकं, पार्थिवादिद्रव्येण वाय्वन्तरेण वाऽभिघातादिवशात् भ्रमणोर्ध्वगमनादयः॥

स चायं वायुः—इन्द्रियाप्यायकप्राणशरीरविषयभेदाच्चतुर्धा। तत्र त्वगिन्द्रियेणैकसङ्घाततापन्ना वाय्वंशा इन्द्रियाप्यायकाः ; शरीरधारणादिहेतुर्वायुविशेषः प्राणः। स चैकोऽपि प्राणापानव्यानोदानसमानात्मकवृत्तिभेदात्पञ्चधा, नागकूर्मकृकरदेवदत्तधनञ्जयभेदैस्सह दशधा चोच्यते।

"प्राणोऽपानस्समानश्च उदानो व्यान एव च।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः॥
चरन्ति दशनाडीषु दश प्राणादिवायवः॥"

इत्यारभ्य,

"उद्गारादीनथो नागः कूर्मोऽक्ष्यादिनिमीलनम्।
कृकरश्चक्षुषः कर्ता दत्तो निद्रादिकर्मकृत्॥"

इत्यादि प्रमाणात्। जङ्गमशरीरवत् स्थावरशरीरेऽप्यसावस्त्येव। भग्नशाखादीनां संरोहणेन क्षतभागानां वृद्ध्या च वृक्षादौ प्राणसद्भावोन्नयनात्। परं तु स्थावरशरीरेष्वेकधैव वर्तते, न पञ्चधा॥ उक्तं च **भाष्ये**—

"स्थावरेषु हि प्राणसद्भावेऽपि हि तस्य पञ्चधाऽवस्थाय शरीर धारणत्वेनावस्थानं नास्ति॥" —इति॥

शरीरोपादानभूताद्वायोरन्य एव प्राणाख्यो वायुः, वायवीयं च शरीरं मारुतादीनां प्रसिद्धं, चण्डानिलतालवृन्तपवनादिर्विषयः॥

वायो रूपतन्मात्रं, ततस्तेजः; 'वायोरग्निः' इति श्रुतेः, अग्निशब्दस्य तेजस्सामान्यपरत्वात्॥ ननु—वायुपरिणामत्वरूपवायूपादान-

कत्वं तेजसो न सम्भवति, तृणपर्णकाष्ठादीनामेवपार्थिवानामग्न्यादि-रूपेण परिणामदर्शनात् ॥ न च—तत्राप्यदृष्टाद्युपनीतैस्तेजोऽवयवैरेवा-ग्न्यारम्भ इति—वाच्यम्; कल्पनागौरवात्। एवं च वायोरग्निरिति श्रुति-र्निमित्तकारणत्वमात्रेणाप्युपपद्यते—इति चेन्न ॥ तृणपर्णादौवपि पञ्ची-करणादिना तेजोभागसत्त्वेन तस्यैव सजातीयावयवयोगेनोद्भूताग्न्या-दिरूपेण परिणामोपपत्तेर्गौरवविरहात्, श्रुतेरनन्यथासिद्धोपादान-प्रकरणपठिताया निमित्तकारणत्वपरत्वासम्भवात्। अन्यथा काष्ठादि-जन्याग्न्यादौ पार्थिवोपादानकत्वं, अबिन्धनाग्नौ च तदसम्भवाज्जलो-पादानकत्वमिति कल्पने भवतामेवानेकोपादानकल्पनागौरवात्। काष्ठादावनुद्भूताग्निसत्त्वं च महर्षिभिरेवोक्तं—"काष्ठेऽग्निरिव शेरते।

दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि ॥" —इति ॥

तथा च—समष्टिसृष्टिदशायां वायोरेवोपादानभूताद्वह्नेरुत्पत्तिः, व्यष्टिदशायां तु सूक्ष्मात्तेजस एव स्थूलतेजस उत्पत्तिरिति ॥

उष्णस्पर्शवत्त्वं भास्वररूपवत्त्वं च तेजसो लक्षणं ; रसशून्यत्वे सति रूपवत्त्वं च तल्लक्षणम्। तच्चतुर्धा—आप्यायकवैश्वानरशरीर-विषयभेदात्। वाक्चक्षुषोराप्यायकं तेज इन्द्रियाप्यायकं ; 'तेजोमयी वाक्', 'आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्, रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः' इति श्रुतेः। भुक्तान्नादेः परिणामहेतुस्तेजोविशेषो वैश्वानरः। आदित्यादिशरीरं तैजसशरीरं, 'सुकृतां वा एतानि ज्योतींषि यन्नक्ष-त्राणि' इत्यादिश्रुतिसिद्धम्। चन्द्रिकातपादिर्विषयः ॥

तेजः पुनस्सामान्यतो द्विधा—प्रभा प्रभावांश्चेति। स्वापृथ-क्सिद्धत्वस्वाधिकपरिमाणवत्त्वोभयसम्बन्धेन तेजोविशिष्टं तेजः—प्रभा। अपृथक्सिद्धत्वं च—अपृथक्सिद्ध्यात्मैकसंयोगप्रतियोगित्वं, गुणगुणि-नोस्स्वरूपसम्बन्ध इव प्रभाप्रभावतोस्संयोगेऽप्यपृथक्सिद्धत्वस्य स्वा-

कारात्। 'सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद', 'न तदस्ति विना यत्स्यान्मया भूतं चराचरम्' इत्यादिना जगद्ब्रह्मणोस्संयोगे अपृथक्सिद्धित्वस्य प्रतिपन्नत्वेन तादृशधर्मस्य संयोगत्वविरुद्धत्वाभावात्। यद्वा–स्वापृथक्सिद्धत्वं स्वसंयोगाभावनिरूपितकालविशेषावच्छिन्नाधिकरणताशून्यत्वे सति स्वसंयोगवत्त्वम्। स्वापृथक्सिद्धत्वसम्बन्धेन प्रभाविशिष्टदीपकलिकादिवारणाय स्वाधिकपरिमाणवत्त्वनिवेशः। अल्पदीपविशिष्टमहादीपवारणाय स्वापृथक्सिद्धत्वनिवेशः। स्वाधिकपरिमाणवत्त्वं च स्वासंयुक्तानेकदेशसंयुक्तत्वम्। तेन परिमाणानङ्गीकारेऽपि न क्षतिः। न च–आतपतप्तसलिलादौ रात्रावप्यौष्ण्योपलम्भादादित्यमुक्ताः किरणास्सलिलान्तःप्रविष्टास्सन्तीत्यभ्युपगन्तव्यं; तथा चादित्यापृथक्सिद्धत्वं किरणेषु नास्तीत्यव्याप्तिरिति–वाच्यम्। रविकिरणोपात्तमुक्तानां तुहिनाकरणानां संक्रमाच्छैत्योपलम्भवत्तत्किरणोपात्तमुक्तानामग्न्यवयवानां संक्रमात्सलिलादौ औष्ण्योपलम्भोपपत्तेः; तत्र किरणानां सद्भावस्याकल्पनात्। उक्तं च **मात्स्ये**—

"वसन्ते ग्रीष्मके रश्मिशतैस्सन्तपति त्रिभिः।
शरद्यपि च वर्षासु चतुर्भिस्सम्प्रवर्षति ॥
हेमन्ते शिशिरे चैव हिममुत्सृजति त्रिभिः।" —इति ॥

अत्र सन्तपतीत्यस्याग्न्यवयवानुत्सृजतीत्यर्थः। स्पष्टं चैतच्छ्रुतप्रकाशिकायां ॥

यत्तु–विशीर्णदीपावयवसमुदाय एव प्रभेति। **तन्न**; ऊर्ध्वगमनस्वभावानां दीपावयवानां वाताद्यभिघातादर्शने युगपद्दिक्ष्वग्विशरणादिकल्पनस्य गुरुत्वात्, प्रभाया द्रव्यान्तरत्वे तु प्रत्यक्षाद्यनुरोधेन तथाऽभ्युपगमोपपत्तेः, मण्यादिप्रभाया विशीर्णतदवयवसमुदायत्वासम्भवाच्च। न च–मण्यादौ पार्थिवांशस्य स्थिरत्वेऽपि तदन्तर्गततेजोंशस्य विशरणप्रसरणादिकमुपपन्नमिति–वाच्यम्, कल्पनागौरवात् ॥

तदतिरिक्तं तेजः प्रभावत्, तच्च मणिद्युमणिप्रदीपादि। सुवर्णं तु पार्थिवमेव, पीतरूपवत्त्वात्, गुरुत्ववत्त्वात्, काठिन्यवत्त्वाच्च; 'काठिन्यवान्यो बिभर्ति' इत्यनेन पृथिव्या एव काठिन्योक्तेः। न च—सुवर्णं तैजसम्, अत्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात्, यन्नैवं तन्नैवमिति व्यतिरेक्यनुमानेन सुवर्णस्य तैजसत्वसिद्धिरिति—वाच्यम्। व्यतिरेक्यनुमानस्य निरसिष्यमाणत्वात्, द्रुतं द्रुततरं द्रुततममिति प्रतीत्या उच्छिद्यमानद्रवत्ववत्त्वेनानुच्छिद्यमानद्रवत्वासिद्धेः, पीतं द्रुतमिति प्रतीत्या पार्थिवभागेऽपि तादृशद्रवत्वदर्शनेन व्यभिचाराच्चेति। अत्र रक्तभास्वरमेव रूपं, रूपान्तरोपलम्भस्तु पृथिवीजलांशसंसर्गवशात्। एतच्च "यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य" इत्यादि श्रुतिसिद्धम्। एवमुष्ण एव स्पर्शः, चन्द्रिकादौ शीतस्पर्शशुक्लरूपयोस्तदन्तर्गतजलांशसम्बन्धित्वात्, मरकतप्रभादावनुष्णाशीतनीलरूपयोश्च पार्थिवत्वादिति ॥

तेजसो रसतन्मात्रं, **तस्माज्जलम्**। शीतस्पर्शवत्त्वं, निर्गन्धत्वे सति रसवत्त्वं, अपाकजशुक्लरूपवत्त्वं, सांसिद्धिकद्रवत्ववत्त्वमित्यादि--**तल्लक्षणम्** ॥ न च—उष्णोदके शीतस्पर्शवत्त्वस्याव्याप्तिरिति—वाच्यम्; तत्रापि शीतस्पर्शसत्त्वात्, तेजस्स्पर्शेनाभिभवेन तदनुपलब्धेः। प्रथमं पृथिव्याः कृष्णाया एवोत्पत्तावपि पाकवशात्तत्र शुक्लरूपोत्पत्तेस्तत्रातिव्याप्तिवारणायापाकजेति ॥ न च—सांसिद्धिकद्रवत्वस्य हिमकरकयोः अव्याप्तिरिति—वाच्यम्; तत्रापि द्रवत्वसत्त्वादुपष्टम्भकपार्थिवभागगतकाठिन्येनाभिभूतत्वादनुपलम्भोपपत्तेः। तच्चाप्यायकशरीरविषयभेदात्त्रिधा। तत्र रसनघ्राणयोराप्यायका अंशा आप्यायकाः। शरीरं वरुणलोके। सरित्समुद्रादिर्विषयः—इति ॥

जलाद्गन्धतन्मात्रं, **तस्मात्पृथिवी**। गन्धवत्त्वं **तल्लक्षणम्**। न च—तन्मात्रेऽतिव्याप्तिः, उद्भूतत्वनिवेशे च पाषाणेऽव्याप्तिरिति—वाच्यम्।

गन्धत्वंसमानाधिकरणगन्धवत्त्वस्य विवक्षितत्वात्। रसवत्त्वे सत्य-नुष्णाशीतस्पर्शवत्त्वं, पाकजरूपवत्त्वमित्यादिकमपि तल्लक्षणम्। सा प्रथमं सुरभिमधुरकृष्णानुष्णाशीतस्पर्शा जाता। तत्रानुष्णाशीतस्पर्शो याव-द्द्रव्यभावी; तेजस्सलिलसम्पर्कादौष्ण्याद्युपलम्भः। कृष्णरूपं स्वा-भाविकमिति च 'यत्कृष्णं तदन्नस्य' इति श्रुतिसिद्धम्। पाकवशाच्च रूपान्तरोत्पत्तिः। सा त्रिधा—आप्यायकशरीरविषयभेदात्। मनो-घ्राणयोराप्यायकाः पार्थिवभागाः आप्यायकाः; अस्मदादिशरीरं पार्थिवं; विषयो मृत्पाषाणादिरिति ॥

तमो द्रव्यं, सङ्कोचविकासरूपावस्थावत्त्वात् क्रियावत्त्वाच्च; पार्थिवं चाबाधितनीलादिप्रत्ययविषयत्वादिति—**वेदान्ताचार्याः** ॥ न च—तेजोऽभाव एव तमः, द्रव्यान्तरकल्पने गौरवादिति—वाच्यम्; तथा सत्यबाधितनीलादिप्रत्ययानुपपत्तेः, 'तमस्ससर्ज-भगवान्' इति तत्त्वान्तरवत्सृष्टिश्रवणानुपपत्तेः, 'नासीत्तमो ज्योतिरभून्न चान्यत्' इति तेजस्तमसोर्द्वयोरपि निषेधानुपपत्तेश्च, तयोर्भावाभावरूप-त्वे एकदा निषेधासम्भवात्; अन्तर्यामिब्राह्मणे यस्य तमश्श-रीरमिति तमसश्शरीरत्वानुपपत्तेश्च शरीरत्वस्य वक्ष्यमाणरीत्या द्रव्यत्वघटितत्वात्। न च—तमसः पार्थिवत्वे पृथिवीतः पृथगेव सृष्ट्याद्यभिधानमनुपपन्नमिति—वाच्यम्; पृथक्सृष्टिवचनस्य स्वर्गान्त-रिक्षसृष्ट्यादिवदुपपत्तेः। न च—तमसो द्रव्यत्वे तमस्संयुक्तस्य तमसः चाक्षुषानुपपत्तिः; द्रव्यनिष्ठलौकिकविषयतासम्बन्धेन चाक्षुषं प्रति संयोगेन तमसः प्रतिबन्धकत्वादिति—वाच्यम्; तमो भिन्नद्रव्यनिष्ठवि-षयतासम्बन्धेन चाक्षुषं प्रत्येव तत्प्रतिबन्धकतास्वीकारात् ॥

व्यासाचार्यानुयायिनस्तु—तम आकाशं, गतिनिरोधकत्वाभावे सति चाक्षुषप्रत्यक्षविषयद्रव्यत्वात्, प्रसिद्धाकाशवत्; पृथिव्यां व्यभि-चारवारणाय सत्यन्तम्, आत्मनि व्यभिचारवारणाय चाक्षुषेति।

प्रत्यक्षाविषयता च—मुख्यविशेष्यतारूपा ग्राह्या ; तेन काले न व्यभिचारः। उक्तं च **श्रुतप्रकाशिकायां**—'स्वच्छद्रव्यत्वादाकाशकार्यं तमः' —इति॥ गतिनिरोधकत्वाभावे सति चाक्षुषविषयद्रव्यत्वमेव स्वच्छद्रव्यत्वं; यद्वा—स्पर्शशून्यत्वे सति चाक्षुषविषयद्रव्यत्वं तत्; तेन प्रभादौ न व्यभिचारः। न च तमस आकाशत्वे रूपवत्त्वानुपपत्तिः; पञ्चीकरणवशात्तदुपपत्तेः। अथवा तमस्तैजसं, रसशून्यत्वे सति रूपवत्त्वात्, वह्न्यादिवत्। न चैवमुष्णस्पर्शप्रत्यक्षापत्तिः; नीलमणिप्रभादाविव स्पर्शस्यानुद्भूतत्वकल्पनात्॥ उक्तं च श्रुतप्रकाशिकायां—"यद्वा तेजःकार्यं तमः, रूपवत्त्वात्; स्पर्शानुपलम्भस्तु स्वच्छद्रव्यत्वात्"—इति॥ स्वच्छत्वादित्यस्यानुद्भूतत्वादित्यर्थः॥ —इत्याहुः॥

अपरे तु—प्रकृतेरवस्थान्तरमेव तमः, न तावद्वायुपर्यन्तेषु तस्यान्तर्भावः, रूपवत्त्वात्; नापि जलतेजसोः, नीलरूपवत्त्वात्; नापि पृथिव्यां, गन्धरसादिराहितत्वात्। अत एवोक्तं **न्यायसिद्धाञ्जने**—

"अस्तु वा किञ्चिदभिनवघनाघनावलीमलीमसमनाघ्रातस्पर्शरसगन्धमन्धकाराभिधानमवस्थान्तरं प्रकृतेः॥" —इति॥

तत्त्वरत्नाकरेऽपि—

"अत्र तत्त्वविदः प्राहुस्स्थूलसूक्ष्मात्मना स्थिता।
दैवी गुणमयी माया बाह्यान्तरतमो मता॥" —इति॥

अत एव भाष्येऽप्यस्य द्रव्यत्वमेवोक्तं, पृथिव्यादिष्वन्तर्भावो नाभिहितः॥ —इत्याहुः॥

एवं चतुर्विंशतिविधा प्रकृतिर्निरूपिता॥

इदमत्र बोध्यम्—

न तावदव्यक्तादेः कारणत्वं, महदादेः कार्यत्वं ; किन्तु तत्तच्छरीरकपरमात्मन एव कारणत्वं कार्यत्वं च। तथा च—आकाशाद्वायुरित्यादावाकाशशरीरकाद्वायुशरीरकपरमात्मोत्पन्न इत्यर्थः। अत एव

'तत्तेज ऐक्षत, बहुस्यां प्रजायेयेति, तदपोऽसृजत, ता आप ऐक्षन्त, बह्व्यः स्याम प्रजायेमहि'–इत्यादिच्छान्दोग्यश्रुतौ तेजश्शब्दवाच्ये अप्शब्दवाच्ये च बहुभवनसङ्कल्पादिकमुपपद्यते; तेज आदिशब्दस्याचेतनमात्रपरत्वे तादृशेक्षणानुपपत्तेः । ईक्षतिधातोर्गौणत्वं तु–**गौणश्चेन्नात्मशब्दात्** इत्यत्रैव निराकृतम् । न चैवं–'आत्मन आकाशस्सम्भूतः' इति श्रुतौ सम्भूतशब्दस्य गौण्यसम्भवादिति पूर्वपक्षसूत्रोक्तन्यायेन गौणत्वापत्तिः, आकशस्योत्पत्तिमत्त्वेऽपि तच्छरीरकपरमात्मनस्तदसम्भवादिति–वाच्यम्; स्वाधिकरणक्षणध्वंसानधिकरणक्षणसम्बन्धरूपोत्पत्तेः, विशेषण इव विशिष्टेऽप्यक्षतत्वात् । स्वाधिकरणक्षणध्वंसानधिकरणक्षणाप्रसिद्ध्या स्वपदेन केवलपरमात्मोपादानासम्भवेऽपि आकाशादिशरीरकत्वविशिष्टपरमात्मन उपादानसम्भवात्, विशिष्टनिरूपिताधिकरणतावत्क्षणध्वंसानधिकरणत्वस्याकाशोत्पत्तिक्षणे प्रसिद्धेः । अत एवोक्तं **बौद्धाधिकारे शिरोमणिना**—

> "आत्मनामुत्पत्त्यभावेऽपि विशेषणस्य शरीरस्य तथात्वाद्विशिष्टस्य तथात्वव्यपदेशः, अपूर्वशरीरादिसम्बन्धरूपं तु न मुख्यो जन्यर्थः ॥" —इति ॥

व्याख्यातं चात्र **गदाधरेण**—"विशेषणोत्पत्तिक्षणस्य विशेष्याधिकरणसमयध्वंसाधिकरणत्वेऽपि विशिष्टाधिकरणसमयध्वंसानधिकरणत्वरूपाद्यत्वाक्षतेः, तत्सम्बन्धरूपजननस्य विशिष्टेऽपि निर्वाहाच्चैत्रो जात इत्यगौणः प्रयोग उपपन्नः; जात इत्यस्याद्यशरीरसम्बन्धवानित्याद्यर्थकत्वे च जात इत्यस्य लाक्षणिकत्वापत्तिः ॥" —इति ॥

तथा च 'आत्मन आकाशस्सम्भूतः' इत्यादौ न गौणताप्रसङ्गः । अत्र पृथिव्यप्तेजसां त्रिवृत्करणं छान्दोग्येऽभिहितं 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इति । तच्च–स्वस्वजातीयधर्मद्वयविशिष्टधर्मान्तरम् । साजात्यं च–पृथिवीत्वजलत्वतेजस्त्वान्यतमत्वेन । धर्मद्वय-

वैशिष्ट्यं च—स्वाश्रयचतुर्थांशसंयुक्तार्धभागवृत्तित्वसम्बन्धेन। तथा च स्वपदेन पृथिवीत्वोपादाने उक्तान्यतमत्वरूपेण स्वसजातीयधर्मद्वयं जलत्वं तेजस्त्वं च, तदाश्रयजलचतुर्थांशतेजश्चतुर्थांशयोस्संयोगस्य पृथिव्यर्धभागे सत्त्वादुक्तसम्बन्धेन जलत्वतेजस्त्वोभयविशिष्टपृथिवीत्ववत्त्वं पृथिव्यामुपपन्नम् । त्रिवृत्करणपक्षे भूते भूतान्तरचतुर्थांशमेलनस्याभिमतत्वात्। चतुर्थांशसंयोगश्चाण्डोत्पत्त्यभावप्रयोजकीभूताभावप्रतियोगित्वेन विशेषणीयः; तेन न यथाकथञ्चित्संयोगस्य त्रिवृत्करणरूपतापत्तिः, परस्परानुप्रवेशात्मकसंयोगस्यैव अण्डोत्पत्तिप्रयोजकत्वेनोक्तविशेषणेन तादृशसंयोगस्यैव लाभात् ।

"नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः ॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
एकसङ्घातलक्ष्यास्तु संप्राप्यैक्यमशेषतः ॥
महदादयो विशेषान्ता ह्यण्डमुत्पादयन्ति ते ।"

इति भगवत्पराशरवचनाद्विलक्षणसंयोगाभावस्यैवाण्डोत्पत्त्यभावप्रयोजकत्वाभिधानात्। "संहतत्वं समागतत्वं चेत्यवस्थाद्वयमस्ति। तत्र संहतत्वं नाम—पृथक्स्थित्यर्हसंयोगमात्रं, समागतत्वं च—पृथक्स्थित्यनर्हसंयोगविशेषः"—इति व्यासार्यैर्व्याख्यातम् ॥

पञ्चीकरणं सप्तीकरणं च पुराणप्रसिद्धम्। स्वसजातीयधर्मचतुष्टयविशिष्टधर्मवत्त्वं—पञ्चीकरणं ; साजात्यं च—पृथिवीत्वजलत्वतेजस्त्ववायुत्वाकाशत्वान्यतमत्वेन। धर्मचतुष्टयवैशिष्ट्यं च—स्वाश्रयाष्टमांशसंयुक्तार्धभागवृत्तित्वसम्बन्धेन । पञ्चीकरणपक्षे भूतानि प्रत्येकं द्विधा विभज्य पृथिव्याद्येकैकार्धेषु जलादीनामष्टमांशचतुष्टयसंयोगस्य स्वीकारात् ।

"एवं जातेषु भूतानि प्रत्येकं स्युर्द्विधा ततः ।
चतुर्धा भिन्नमेकैकमर्धमर्धं तथा स्थितम् ॥
व्योम्नोऽर्धभागश्चत्वारो वायुतेजःपयोभुवाम् ।
अर्धानि यानि वायोस्तु व्योमतेजःपयोभुवाम् ॥"

इत्यादिपुराणवचनात् ॥

एतेन—पृथिव्यादिकं द्वेधा विभज्य तदर्धं पञ्चधा विभज्य पञ्चस्वर्धान्तरेषु योजनं पञ्चीकरणम् ; तथा चोक्तलक्षणे स्वाश्रयाष्टमांशसंयुक्तेत्यपहाय दशमांशसंयुक्तेति वक्तव्यमिति—**निरस्तम्** । उक्तपुराणवचनविरोधात् ॥

सप्तीकरणं तु—स्वसजातीयधर्मषट्कविशिष्टधर्मवत्त्वं; साजात्यं च महत्त्वाहङ्कारत्वपृथिवीत्वादिपञ्चकान्यतमत्वेन । धर्मषट्कवैशिष्ट्यं च स्वाश्रयद्वादशांशसंयुक्तार्धभागवृत्तित्वसम्बन्धेन । सप्तीकरणपक्षे पृथिव्याद्येकैकार्धं षोढा विभज्य षट्स्वर्धान्तरेषु संयोगस्याभिप्रेतत्वात् ॥

यद्यपि—पृथिव्याद्यर्धेषु जलादिचतुर्थांशसंयोगरूपत्रिवृत्करणस्य श्रुत्यभिप्रेतत्वे तदष्टमांशद्वादशांशसंयोगप्रतिपादनपराणामुदाहृतपुराणवचनानामप्रामाण्यं प्राप्नोति; पञ्चीकरणपक्षे चतुर्थांशसंयोगासम्भवात्, वस्तुनि विकल्पासम्भवेनैकतराप्रामाण्यावश्यकत्वे 'विरोधे त्वनपेक्षं स्यात्' इति न्यायेन श्रुतिविरुद्धार्थे पुराणादेः प्रामाण्यासम्भवात् । **तथाऽपि**—तासां त्रिवृतं त्रिवृतमित्यादेरेकैकं तेजःप्रभृति भूतं स्वार्धेनेतरार्धयोर्भागद्वयेन च त्रिभागं करवाणीत्यर्थः ॥ तथा च—तादृशश्रुतौ चतुर्थांशसंयोगाप्रतीतेरष्टमांशसंयोगपरताया एवोपबृंहणानुरोधेनाङ्गीकारेण विरोधाभावात्, स्वाश्रयाष्टमांशसंयुक्तार्धभागवृत्तित्वसम्बन्धेन स्वसजातीयधर्मद्वयविशिष्टधर्मवत्त्वमेव त्रिवृत्करणं; न तु चतुर्थांशघटितपूर्वोक्तलक्षणं; उक्तदोषात् । सप्तीकरणपक्षे तु—त्रिवृत्करणं पञ्चीकरणं च द्वादशांशघटितं, न त्वष्टमांशघटितं ; तथा सति विरोधापत्तेः ।

इत्थं च सप्तीकरणैकदेशः पञ्चीकरणं, तदेकदेशस्त्रिवृत्करणमिति न परस्परविरोध इति बोध्यम् ॥

एतेन—चतुर्थांशघटितत्रिवृत्करणप्रतिपादकश्रुतिविरुद्धत्वात्पुराणमप्रमाणं, वाचस्पत्युक्तं त्रिवृत्करणमेव युक्तम्; तदुक्तं कल्पतरौ—

"सम्प्रदायाध्वना पञ्चीकरणं यद्यपि स्थितम् ।
तथाऽपि श्रुतियुक्तिभ्यां वाचस्पतिमतं शुभम् ॥"

इत्यादिकं—निरस्तम् । उक्तरीत्या श्रुतिविरोधाभावात् ॥—इति ॥

इत्थं—पञ्चीकृतैस्सप्तीकृतैर्वा तत्त्वैरण्डाद्यारम्भो देहाद्युत्पत्तिश्च । न च—देहादेरनेकभूतोपादानकत्वे पृथिवीत्वादिजातीनां देहे सङ्करस्स्यादिति—वाच्यम् । अवयवातिरिक्तावयविनोऽस्माभिरनङ्गीकाराज्जातिसङ्कराप्रसक्तेः; कार्यकारणयोरनन्यत्वात् ॥ न च—पटतन्त्वादिरूपकार्यकारणयोरनन्यत्वं न सम्भवति; एकत्वानेकत्वस्थूलत्वसूक्ष्मत्वादिरूपविरुद्धधर्माध्यासात्, कारकव्यापारवैयर्थ्यापत्तेश्चेति—वाच्यम्; असमवायिकारणत्वेन भवदभिमतसंयोगविशेषविशिष्टतन्तूनामेव पटत्वेन तादृशसंयोगसम्पादनार्थमेव कारकव्यापारसार्थक्यात्; एकत्वस्थूलत्वादीनां राशिवनसेनादिष्विवोपपत्तेः; संयोगविशेषविशिष्टधान्यादीनामेव राशित्वेऽपि तद्गतापेक्षाबुद्धिविशेषविषयत्वरूपसमुदायस्यैकत्वेन एकत्वव्यवहारात् । अन्यथा पत्रताटङ्कादावपि पत्रात्ताटङ्कारम्भकल्पनाप्रसङ्गात् । तत्रावयवद्वयसंयोगरूपासमवायिकारणविरहेण तत्र द्रव्यारम्भस्य भवद्भिरप्यस्वीकारात्; इतरथा—आकुंचनप्रसरणादावपि द्रव्यान्तरकल्पनाप्रसङ्गात् । किञ्च—अवयवातिरिक्तावयविस्वीकारे अनेकावयवारब्धकनकशृङ्खलादाववयवगतगुरुत्वैरवयविगुरुत्वोत्पत्त्यापातात्तोलने अधिकगुरुत्वोपलम्भप्रसङ्गः । न च—अवयविनि गुरुत्वोत्पत्त्यनन्तरमवयवगुरुत्वनाशान्नाधिक्यमिति—वाच्यम्; अवयवानां गुरुत्वशून्यत्वे शाखादीनां पतनाभावप्रसङ्गात्, समावयेन पतनं प्रति समवायेन

गुरुत्वस्यासमवायिकारणत्वात्, अवयविनि गुरुत्वानुत्पत्तौ च अवयविनः पतनानुपपत्तेः । एवं तन्तुसमुदायातिरिक्तस्य पटादिपदार्थत्वे दीर्घैकतन्तुभ्रमणारब्धे पटे पट इत्यादिव्यवहारानुपपत्तिः, असमवायिकारणरूपतन्तुद्वयसंयोगाभावेन तत्र पटानुत्पत्तेः ॥ अपि च–सहस्रतन्तुकपटस्थले द्वितीयतन्तुसंयोगमारभ्य प्रतितन्तुसंयोगं द्वितन्तुकादिपटपङ्क्तिरुत्पद्यते वा, न वा ? ॥ **आद्ये**–अनेकपटोपलम्भप्रसङ्गः। न च त्रितन्तुकपटोत्पत्तिदशायां द्वितन्तुकपटस्य नाशान्नापत्तिरिति वाच्यम्; नाशकाभावादहेतुकविनाशस्यायुक्तत्वात् । ततश्च पटपङ्क्तेरुपलम्भप्रसङ्गः । तदुक्तं **सर्वार्थसिद्धौ**—

> "पूर्वसिद्धपटैस्सार्धं तन्तुभिः पटसम्भवे ।
> पटपङ्क्तिस्समीक्ष्येत क्रमादाधिक्यशालिनी ॥
> प्राक्सिद्धानां पटादीनामुत्तरोत्तरजन्मनि ।
> अहेतुको विनाशश्च स्थिरपक्षे न युज्यते ॥"—इति ॥

द्वितीये–अन्त्यतन्तुसंयोगात्पूर्वमुत्पद्यमानानां पटप्रतीतीनां भ्रमत्वप्रसङ्गात्। न चेष्टापत्तिः; एकद्वितन्त्वाद्यपगमेऽपि जायमानायाः पटप्रतीतेर्भ्रमत्वप्रसङ्गात्। न च तत्रापीष्टापत्तिः; भवद्भिरपि तत्र खण्डपटोत्पत्तेरभ्युपगमेन भ्रमत्वानङ्गीकारात् ॥

अथ–पूर्वतन्त्रे नवमे "अग्निधर्मः प्रतीष्टकं सङ्घातात्पूर्णमासीवत्" इत्यधिकरणे 'हिरण्यशकलैरग्निं प्रोक्षति, मण्डूकेनाग्निं विकर्षति' इति विहितमग्निपदलक्षिताग्न्यधिकरणस्थण्डिलकर्मकं प्रोक्षणं विकर्षणं च अवयवातिरिक्तावयव्यभावात् प्रतीष्टकं कर्तव्यमिति पूर्वपक्षं प्रापय्य अवयवातिरिक्तावयविसद्भावात्सकृदेव कर्तव्यमिति सिद्धान्तितम्; तथा चावयवातिरिक्तावयव्यनङ्गीकारे तद्विरोधः–**इति चेन्न** ॥ व्रीह्यादिष्वातिरिक्तावयव्यभावेऽपि प्रतिव्यक्तिप्रोक्षणवदुपपत्तेः, पूर्वोत्तरपक्षयो-

रेकत्वावस्थानारम्भतदारम्भाभ्यां उपपत्तावेकत्वाश्रयातिरिक्तावय-व्यारम्भानारम्भपरत्वे प्रमाणाभावात् ॥

अथ कालो निरूप्यते ॥ अतीतादिव्यवहारहेतुः कालः, कालिक-सम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धाव-च्छिन्नकारणताश्रयत्वं–तल्लक्षणम्; ईश्वरवारणाय कालिकसम्बन्धाव-च्छिन्नेति; तस्यापृथक्सिद्धिसम्बन्धेन कार्यसामान्यं प्रति तादात्म्येन हेतुत्वेऽपि कालिकेन कार्यसामान्यं प्रत्यहेतुत्वात्, कालिकेन सर्वा-धारत्वं च तल्लक्षणम् ॥

अथ–कालसद्भावे प्रमाणाभावः। न च–अतीतादिव्यवहारनिर्वा-हार्थं तस्यावश्यकतेति–वाच्यम्; प्रकृतशब्दप्रागभावावच्छिन्नाकाशा-दिभिरतीतव्यवहारस्य, प्रकृतशब्दावच्छिन्नाकाशादिभिर्वर्तमानव्यवहा रस्य, प्रकृतशब्दध्वंसावच्छिन्नाकाशादिभिर्भविष्यद्व्यवहारस्य च निर्वाह-सम्भवेनातिरिक्तकालकल्पनानावश्यकत्वात्—**इति चेन्न** ॥ 'सदेव सोम्येदमग्र आसीत्' इत्यादिश्रुत्या आकाशोत्पत्तेः पूर्वमपि कालबो-धनात्तत्तदुपाध्यवच्छिन्नाकाशस्य कालरूपत्वासम्भवादतिरिक्तकाल-कल्पनस्यावश्यकत्वात् ॥ न चैवमपि–'अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते', 'कालोऽस्मि लोकक्षयकृत्प्रवृद्धः' इत्याद्यनुरोधा-द्भगवत एव कालत्वमस्तु; तत्तदुपाध्यवच्छिन्नस्य तस्य प्रलयेऽपि सत्त्वेन सर्वव्यवहारनिर्वाहकत्वसम्भवादिति–वाच्यम्। तथा सति 'विष्णोस्स्वरूपात्परतोदिते द्वे' इत्यारभ्य, 'रूपान्तरं तद्द्विज काल संज्ञं' इत्यादिविष्णुपुराणविरोधापत्तेः; स्वस्य स्वापेक्षया रूपान्तरत्वा-योगात्, 'ब्रह्मा दक्षादयः कालः' इति कालस्य भगवद्विभूतित्वाभिधा-नविरोधाच्च। 'विष्णुर्मन्वादयः कालः' इत्यत्र विष्णुशब्दस्यावतार-विष्णुपरत्वेन तस्यापि विभूतित्वाविरोधात्, 'अनादिर्भगवान् कालः' इत्यादिसामानाधिकरण्यस्य शरीरशरीरिभावेन निर्वाहात् ॥ न चैवं–

जैनमतनिराकरणपरभाष्ये 'कालस्य पदार्थविशेषणतयैव प्रतीतेस्तस्य पृथगास्तित्वनास्तित्वादयो न वक्तव्याः, न च परिहर्तव्याः' इत्यादिना कालनिराकरणं प्रतीयमानं विरुध्यत इति–वाच्यम्। सर्वप्रतीतिषु विशेषणतया सर्वलोकानुभवसिद्धस्य कालस्य नास्तित्वशङ्काया बौद्धादिभिरपि कर्तुमशक्यतया जैनानां कालास्तित्वसाधनस्य विफलत्वादित्यत्र तद्भाष्यतात्पर्यात्, तन्निराकरणे तात्पर्यविरहात्; एवमेव श्रुतप्रकाशिकासर्वार्थसिद्ध्योस्तद्भाष्याशयवर्णनात्। अत एव वेदार्थसङ्ग्रहे–

"निमेषकाष्ठाकलामुहूर्तादिपरार्धपर्यन्तापरिमितावच्छेदसर्वोत्पत्तिस्थितिविनाशादिसर्वपरिणामनिमित्तभूतकालकृतपरिणामास्पृष्टानन्तमहाविभूति"

इत्यादिना कालाभ्युपगमो भाष्यकृतां सङ्गच्छते। अन्यथा भाष्यवेदार्थसङ्ग्रहयोर्विरोधापत्तेः। निमेषकाष्ठाकलामुहूर्ताद्याः परार्धपर्यन्ता अपरिमिता अवच्छेदाः कालविभागाः स्वरूपमसाधारणधर्मो यस्य कालस्य, स तथोक्तः। तादृश एव सन्महदादिसर्वोत्पत्तिस्थितिविनाशादिसर्वपरिणामनिमित्तभूतो यः कालस्तत्कृतपरिणामास्पृष्टानन्तमहाविभूतियुक्तं ब्रह्मेति तदर्थात्॥

न च–नित्यविभूतेः कालकृतपरिणामास्पर्शे कार्यसामान्ये कालस्य कारणत्वानुपपत्तिः, प्राकृतकार्यसामान्यं प्रति कारणत्वमिति स्वीकारे च धर्मभूतज्ञानपरिणामादेः कार्यतावच्छेदकानाक्रान्ततया कालकार्यत्वानुपपत्तिरिति–वाच्यम्। नित्यविभूतिभिन्नकार्यसामान्यं प्रत्येव तस्य हेतुतास्वीकारात् पूर्वोक्तलक्षणेऽपि नित्यविभूतिभिन्नकार्यत्वावच्छिन्नकार्यताया एव निवेशात्। 'कालं स पचते तत्र न कालस्तत्र वै प्रभुः', 'कलामुहूर्तादिमयश्च कालो न यद्विभूतेः परिणामहेतुः' इत्यादिवचनात्। सर्वाधारत्वलक्षणे च नित्यविभूतिभिन्नत्वं न निवेश्यम्, नित्यविभूतेरपि कालवृत्तित्वाङ्गीकारात्। अन्यथा

नित्यविभूतेः स्वपरिणामं प्रति हेतुत्वानुपपत्तेः, हेतुतायाः पूर्वकालवृत्तित्वघटितत्वात् । एवं नित्यविभूतेः कालासम्बन्धित्वे तदवच्छेदेन जायमानकार्यस्यापि कालासम्बन्धित्वापत्त्या 'सदा पश्यन्ति सूरयः' इति श्रुतिविरोधाच्च। नित्यसूरिनिष्ठदर्शनस्यापि कालवृत्तित्वात्॥

अयं च कालो नित्यो विभुरेक एव ; क्षणादिव्यवहारस्तु एकस्याप्युपाधिभेदादुपपद्यते । यद्वा कालस्यैकस्यैव क्षणलवादिरूपेण परिणामाङ्गीकारात् विभिन्नव्यवहारोपपत्तिः । 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि, कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः', 'कालं स पचते तत्र', 'कलामुहूर्तादिमयश्च कालः'—इत्यादिस्मृतेश्च । क्षणादयः परिणामा अपि सर्वगता एव; एकैकक्षणादिसम्बन्धस्य सर्वपदार्थेषु प्रतीतेः ॥

"एकेनैव क्षणेनास्य विश्वस्यापि विशेषणात् ।
कालवत्तत्क्षणानां च व्यापित्वमवसीयते ॥" —इत्युक्तेः ॥

न च—कालिकसम्बन्धे न देशनैरन्तर्यं नियामकं, किं तु कालनैरन्तर्यमेव ; तथा च क्षणादेरणुत्वेऽपि सर्वाधारतासम्भवः—इति वाच्यम् । देशतो व्यवहितयोरसम्बन्धकल्पनस्यानुभवविरुद्धत्वात् , तत्तत्कालसंयोगातिरिक्तकालिकसम्बन्धे मानाभावाच्च; अद्रव्ये च संयुक्तापृथक्सिद्धेरेव कालिकसम्बन्धत्वेन रूपादेरपि कालवृत्तितानिर्वाहात् । न च—कालतत्परिणामयोर्द्वयोरेव विभुत्वाङ्गीकारे परिणामपरिणामिभावानुपपत्तिः, विभोर्विकारित्वस्य विकारत्वस्य चादर्शनादिति—वाच्यम् । ईश्वरज्ञानतत्परिणामयोर्विभुत्वेऽपि विकारविकारिभावोपलब्धेः । एतेन—कालो न विकारी, विभुत्वात् ; क्षणादिर्न विकारः, विभुत्वात् ; ईश्वरवत्—इत्यनुमानं निरस्तम् । ईश्वरज्ञाने व्यभिचारात् ॥ न च—कालस्य क्षणरूपेण परिणाम एव युक्तः, न तु दिवसादिरूपेण परिणामः ; तादृशक्षणकूटादेव दिवसादिव्यवहारनिर्वाहादिति—वाच्यम् ;

तथा सति 'अमावास्यायां पितृभ्यो दद्यात्' इत्यादौ लिङः प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वार्थकतया अमावास्यानिष्ठस्य श्राद्धकरणाभावस्य प्रत्यवायप्रयोजकत्वबोधनेन श्राद्धकर्तुरपि प्रत्यवायप्रसङ्गात्, कृतेऽपि श्राद्धे अमावास्याघटकेषु केषुचित्क्षणेषु श्राद्धकरणाभावस्य निरवच्छिन्नविशेषणतासम्बन्धेनापि सत्त्वात् । दिवसस्याखण्डातिरिक्तपरिणामात्मकत्वे च श्राद्धकरणस्थले तत्र निरवच्छिन्नविशेषणतया तदभावविरहान्न प्रत्यवायापत्तिः । एवं पक्षमासादिपरिणामस्वीकारेऽपि युक्तिर्बोध्या ॥

अयं च कालष्षडिन्द्रियवेद्यः ; घटस्सन्निति चाक्षुषादिप्रतीतेस्सर्वसिद्धत्वात्, तत्र सत्त्वस्य कालसम्बन्धित्वरूपत्वात् । न च—तादृशप्रत्यक्षे सत्ताजातिरेव विषय इति—वाच्यम् ; सामान्यं सदित्यादिप्रत्यक्षानुपपत्तेः । न च—तादृशप्रतीतौ सामानाधिकरण्यसम्बन्धेन सत्ताया भानमिति—वाच्यम् ; घटस्सन्, सामान्यं सदिति—प्रतीत्योरविलक्षणाकारतया क्वचित्समवायेन सत्ताया विषयत्वं, क्वचित्सामानाधिकरण्येन तस्या विषयत्वमिति कल्पनाया अनुपपन्नत्वात् । कालसम्बन्धस्यैव सत्त्वरूपत्वे चोभयत्रैकाकारतानिर्वाहः ॥ **मीमांसकैस्तु** कालस्य सर्वज्ञानविषत्वमुक्तम्—

"न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते ॥" —इति ॥

तत्र प्रत्यक्षं स्वाधिकरणक्षणावच्छिन्नमेव स्वविषयमवगाहत इत्युत्सर्गः । अत एव धारावाहिज्ञानस्थले तत्तत्क्षणविशिष्टघटादेर्भानात् द्वितीयादिज्ञानानामप्यज्ञातज्ञापकत्वात्प्रामाण्यमिति मीमांसकाः ॥

परत्वापरत्वे च बहुकालसंयुक्तत्वाल्पकालसंयुक्तत्वरूपे, न तु गुणान्तरमिति वक्ष्यते ॥

दिग्द्रव्यं तु नातिरिक्तं, तत्तन्मूर्तात्मकोपाध्यवच्छिन्नाकाशादिभिस्तत्तन्मूर्तैर्वा प्राच्यादिव्यवहारनिर्वाहात् । चैत्रादिनिष्ठोदय-

गिरिसंयुक्तसंयोगापेक्षया अल्पतरोदयगिरिसंयुक्तसंयोगवन्मूर्तं चैत्रस्य प्राची, चैत्रनिष्ठोदयगिरिसंयुक्तसंयोगापेक्षया अधिकतरोदयगिरिसंयुक्तसंयोगवन्मूर्तं चैत्रस्य प्रतीची ; एवं सुमेरुसंयुक्तसंयोगाल्पत्वभूयस्त्वाभ्यामुदीचीत्वदक्षिणात्वे बोध्ये । न च—'पद्भ्यां भूमिर्दिशश्श्रोत्रात्' इति दिशः पृथक्सृष्टेः, 'दिशःश्रोत्रम्' इति पृथग्लयस्य च श्रुतिसिद्धत्वादाकाशाद्यतिरिक्तं कार्यभूतं दिग्द्रव्यमभ्युपगन्तव्यमिति—वाच्यम्; तथा सति 'नाभ्या आसीदन्तरिक्षं, शीर्ष्णो द्यौस्समवर्तत' इति पूर्ववाक्ये स्वर्गान्तरिक्षयोरपि पृथक्सृष्टिश्रुत्या तयोरप्यतिरिक्तद्रव्यत्वापत्तेः, पूर्ववाक्यस्याभिमानिदेवतासृष्टिपरत्वे चोत्तरवाक्यस्यापि तत्परताया एवोचितत्वात् ; 'चन्द्रमा मनसो जातः, चक्षोस्सूर्यो अजायत' इति देवतासृष्टेरेव प्रक्रान्तत्वात् । किञ्च 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च', 'खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' इति श्रुतौ वाय्वपेक्षया प्राणस्य पृथक्सृष्टिश्रवणेऽपि वायुविशेषत्वमेव 'न **वायुक्रिये पृथगुपदेशात्** इत्यधिकरणे निर्णीतम् । तच्च पृथक्सृष्टिमतां दिगादीनामपि प्रदर्शनार्थं मन्तव्यम् । एवं दिशो व्यष्टिदशायां सृष्टेः श्रूयमाणतया तदनुरोधेन सृष्टिकल्पने तत्सृष्टेः पूर्वं तन्नाशानन्तरं च विद्यमानानां प्रकृतिमहदहङ्कारादितत्त्वानामावरणावार्यभावानुपपत्तेः ; अहङ्काराद्यपेक्षया सर्वदिग्व्यापकत्वरूपस्याहङ्कारावरणत्वस्य दिग्घटितत्वात्, तद्दशायां दूरासन्नत्वादिव्यवस्थानुपपत्तेश्च ; दिशः प्रकृतिकार्यत्वे नित्यविभूतौ प्राच्यादिव्यवस्थानुपपत्तेश्च । न च—समष्टिदशायां प्रकृतिप्रदेशात्मकोपाधिभिर्नित्यविभूतौ च तत्प्रदेशरूपोपाधिभिरेव प्राच्यादिव्यवहारनिर्वाहः—इति वाच्यम् ; तथा सति सर्वत्रोपाधिभिरेव प्राच्यादिव्यवहारनिर्वाहाद्दिशो द्रव्यान्तरत्वे मानाभावादिति ॥

इत्यनन्तार्यकृतौ सिद्धान्तसिद्धाञ्जने
जडपरिच्छेदः प्रथमः ॥

अथ जीवो निरूप्यते ॥

अणुत्वे सति ज्ञानाश्रयत्वं, स्वव्यधिकरणसङ्कल्पजन्यकृतिमत्त्वं च-तल्लक्षणं। लक्षणद्वयेऽपीश्वरवारणाय सत्यन्तं जन्यान्तं च। जीवकृतिसामान्यस्य स्वव्यधिकरणेश्वरसङ्कल्पजन्यत्वाल्लक्षणसङ्गतिः। न च-'नित्यस्सर्वगतः' इति श्रुत्या जीवस्य विभुत्वबोधनाच्छरीरस्य देशान्तरगमनेऽपि ज्ञानसुखाद्युत्पत्तिदर्शनात्तन्निर्वाहायात्मनोऽपि गमनागमनादिकल्पने गौरवाच्च विभुत्वकल्पनमेवोचितमित्यणुत्वघटितलक्षणासम्भव इति-वाच्यम्।

"एषोऽणुरात्मा चेतसा वेदितव्यो बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः",

"वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवस्स विज्ञेयः"—

इत्यादिश्रुतिभिर्जीवस्याणुत्वसिद्धौ सर्वगतत्वश्रुतेः 'अग्निर्यथैको भुवनं प्रविष्टः', 'वायुस्सर्वगतो महान्'—इत्यादिवदेकजातीयानां सर्वत्रानुप्रवेशपरत्वेन जीवस्सर्वगत इत्यस्य द्रव्यत्वसमानाधिकरणभेदप्रतियोगितानिरूपितसंयोगसम्बन्धावच्छिन्नावच्छेदकतानवच्छेदकजीवत्वाश्रय इत्यर्थात्, द्रव्ये तत्तद्व्यक्तित्वावच्छिन्नजीवनिष्ठावच्छेदकताकभेदसत्त्वेऽपि जीवत्वावच्छिन्नसंयोगावच्छिन्नावच्छेदकताकभेदाभावात्॥ न च-एषोऽणुरात्मेति परमात्मन एवेन्द्रियजन्यज्ञानाविषयत्वात्मकदुर्दर्शत्वरूपमणुत्वं प्रतिपाद्यते; न चक्षुषा गृह्यत इत्यादिना तस्याव्यवहितपूर्ववाक्ये प्रकृतत्वात् चेतसावेदितव्य इति विशुद्धमनोग्राह्यत्वलिङ्गाच्चेति-वाच्यम्; 'यस्मिन् प्राणः पञ्चधा संविवेश' इति यच्छब्दयोगेनैतच्छब्दस्य वक्ष्यमाणपरामर्शित्वात्। न च-तत्रापि परमात्मैव प्रतिपाद्यते, 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः प्राणैश्च सर्वैः' इत्यादाविव

प्राणाधारत्वस्य परमात्मन्यपि सम्भावादिति वाच्यम्; यस्मिन् द्यौरित्यादेरिवास्य वाक्यस्य सर्वाधारताप्रतिपादनपरत्वाभावात् जीवासाधारणप्राणचित्तेन्द्रियाधारत्वमात्रप्रतिपादपरत्वात् जीवपरताया एव युक्तत्वात्। न च वेदितव्यत्वलिङ्गविरोधः; नियन्तृनियाम्यवैलक्षण्यज्ञानस्य अमृतत्वसाधनत्वादविरोधात्, इहापि पूर्वत्र 'बृहच्च तद्दिव्यमचिन्त्यरूपम्' इति परमात्मनो महत्त्वमुक्त्वा एषोऽणुरात्मेति जीवे तद्वैलक्षण्यप्रतिपादनात् ॥

न च—अत्र वाक्ये चेतसाणुरित्यन्तःकरणौपाधिकमणुत्वं प्रतिपाद्यत इति—वाच्यम्। चेतसेत्यस्य वेदितव्य इत्यनेनैव अन्वयस्य स्वरसतः प्रतीतेः। बुद्धेर्गुणेनेत्यत्र च—बुद्धेर्गुणेनाराग्रमात्रः आत्मगुणेन महानिति नार्थः; व्यवहितान्वयप्रसङ्गादध्याहारप्रसङ्गात्, समुच्चयार्थनिपातानन्वयाच्च। किं तु अपरो जीवस्संसारदशायां बुद्धेर्गुणेनात्मगुणेन चाराग्रमात्रः; आरा—चर्मसूची, बुद्धेर्विभुत्वयोग्यत्वेऽपि कर्मणा सङ्कुचितत्वान्मलरुद्धमणिप्रभावदाश्रयतुल्यपरिमाणोपपत्तेः। बुद्ध्या सह पूर्वमणुत्वस्य कीर्तनात्तद्वत्कादाचित्कताशङ्काव्यावृत्त्यर्थं पुनस्स्वरूपमाह—वालाग्रेत्यादि। पुनःकीर्तनात्स्वाभाविकतासिद्धेः आत्मा न विभुः, क्रियावत्त्वात्, घटादिवत्—इत्यनुमानेन विभुत्वस्य बाधाच्च। न च क्रियावत्त्वमसिद्धम्; 'तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः' इति श्रुत्या विभागानुकूलव्यापाररूपनिष्क्रमणस्य, 'ये वै के चास्माल्लोकात्प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ति' इति श्रुत्या संयोगानुकूलव्यापाररूपगमनस्य, 'तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे' इति श्रुत्या स्वसजातीयसंयोगध्वंससमानाधिकरणसंयोगानुकूलव्यापाररूपपुनरागमनस्य च जीवे सिद्धत्वात्। स्वपदं धात्वर्थतावच्छेदकसंयोगत्वावच्छिन्नपरं; साजात्यं च स्वप्रतियोगिप्रतियोगिकसंयोगत्वेन ॥

यद्यपि–निष्क्रामति गच्छतीत्यादौ शरीरनिष्ठं यन्निष्क्रमणगमनादिकं तदनुकूलकृतिमत्त्वमेव जीवे प्रतीयते, न तु क्रियावत्त्वं; आख्यातस्य यत्नार्थकत्वात्। तथाऽपि शरीराविरहदशायामेवोक्तश्रुतिषूत्क्रान्त्यादीनां श्रूयमाणत्वेन रथो गच्छतीत्यादाविव आख्यातस्य आश्रयत्वार्थकताया एव वक्तव्यत्वादुक्तश्रुतिभिरात्मनः क्रियावत्त्वं सिध्यति ॥ न च–निष्क्रामतीत्यस्य प्राणविभागाश्रय इत्यर्थाङ्गीकाराद्विभुत्वपक्षेऽपि नानुपपत्तिरिति–वाच्यम्। **तथाऽपि**–'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्यादौ जीवोत्क्रमणजन्योत्क्रमणाश्रयत्वस्य प्राणेषु प्रतीत्या जीवस्य क्रियावत्त्वावश्यकत्वात्; यज्ञमनुप्रावर्षीदित्यादाविव अनुशब्दस्य जन्यत्वार्थकत्वात्, द्वितीयायाश्च निरूपितत्वार्थकत्वात्, उत्क्रमणविशिष्टजीवजन्यत्वस्य जीवोत्क्रमणजन्यत्वे पर्यवसानात्, **'अनुर्लक्षणे'** इत्यनेन जन्यत्वरूपलक्षणार्थकानुशब्दयोगे द्वितीयाविधानात्, गत्यागतिश्रुतेरनिर्वाहाच्च। एतदभिप्रेत्यैव सूत्रितम् **'उत्क्रान्तिगत्यागतीनां', 'स्वात्मना चोत्तरयोः'**–इति। किञ्चात्मनो विभुत्वे अन्यदीयमनसा अन्यात्मनः प्रत्यक्षापत्तिः; आत्ममनस्संयोगे परात्मसंयोगव्यावृत्तं वैजात्यं कल्पयित्वा तेन रूपेणात्ममानसं प्रति हेतुतास्वीकारे च गौरवात् ॥

न च–जीवस्याणुत्वे प्रत्यक्षानुपपत्तिः, प्रत्यक्षसामान्ये महत्त्वस्य कारणत्वात्; अन्यथा परमाणोरपि प्रत्यक्षत्वापत्तिरिति–वाच्यम्। जालसूर्यमरीचिकास्थस्य त्रसरेणुशब्दवाच्यस्यैव परमाणुत्वेन तदतिरिक्तपरमाणोरस्वीकारात्, तस्य च प्रत्यक्षाङ्गीकारेण प्रत्यक्षे महत्त्वस्य हेतुत्वानभ्युपगमात् ॥

अथ–जीवस्याणुत्वे एकस्य जीवस्यानेकशरीरावच्छेदेन सुखदुःखादिप्रतिसन्धानानुपपत्तिः; न चेष्टापत्तिः, सौभरिप्रभृतीनामेकदा

अनेकशरीरावच्छेदेन सुखदुःखादिसाक्षात्कारस्य पुराणादिसिद्धत्वात्। न च—जीवस्य तत्र तत्र गमनवशादनेकशरीरावच्छेदेनापि सुखाद्युपलम्भोपपत्तिः, वेगातिशयाच्च क्रमेण जायमानानामपि सुखदुःखाद्यनुभवानां यौगपद्यभ्रमः शतपत्रच्छेदनयौगपद्यभ्रमवदिति—वाच्यम्। योगिनां भ्रमासम्भवात्, प्रयत्नवदात्मसंयोगस्यैव शरीरपतनप्रतिबन्धकत्वेनानेकदेशविद्यमानानामनेकशरीराणां युगपद्धारणानुपपत्तेश्च, एकशरीरे तादृशात्मसंयोगदशायामन्यशरीरे संयोगनाशात्—इति चेन्न॥ प्रयत्नवदात्मसंयोगत्वेन पतनप्रतिबन्धकत्वे गौरवात्संयोगेन प्रयत्नत्वावस्थापन्नधर्मभूतज्ञानस्यैव शरीरपतने प्रतिबन्धकत्वात्, आत्मन एकशरीरस्थत्वेऽपि धर्मभूतज्ञानस्य मणिप्रभान्यायेन अनेकशरीरेषु प्रसरणोपपत्तेः, निरात्मकेषु शरीरेषु धर्मभूतज्ञानव्याप्त्यैव सुखदुःखाद्यनुभवोपपत्तेः, जीवस्य सुखाद्यनुभवार्थं तत्र तत्र गमनाकल्पनात्, **'गुणाद्वाऽऽलोकवत्', 'प्रदीपवदावेशस्तथा हि दर्शयति'** इति सूत्राभ्यां तथा प्रतिपादनात्॥ न च—सुषुप्त्यवस्थायां शरीरधारणानुपपत्तिः, निरात्मकशरीरस्य धर्मभूतज्ञानसंयोगेनैव धारणस्य वक्तव्यत्वात्तद्दशायां धर्मभूतज्ञानप्रसरणाभावादिति—वाच्यम्; तद्दशायामपि निरात्मकशरीरेषु धर्मभूतज्ञानसंयोगाभ्युपगमात्; विषयतारूपविजातीयसंयोगस्यैव तदानीमस्वीकारात्॥ न च—'अस्य सोम्य महतो वृक्षस्य यदेकां शाखां जीवो जहाति, अथ सा शुष्यति' इति श्रुत्या जीवस्य सङ्कोचविकासप्रतीत्या अणुत्वानुपपत्तिरिति—वाच्यम्; तादृशश्रुत्या धर्मभूतज्ञानसङ्कोचविकासयोरेव शरीरशोषणाशोषणप्रयोजकत्वावगमात्, शाखादौ भोगावच्छेदकताप्रयोजकादृष्टनाशाधीनधर्मभूतज्ञानविभागानुकूलव्यापारस्यैव जहात्यर्थत्वात्॥

उक्तं चाधिकरणसारावल्याम्—

"मैवं शाखादिभोगायतननियतिकरोपाधिनाशात्प्रहाणं
क्षेत्रादिन्यायतोऽसावभिमतिविरहात्स्याद्धीतो जहातिः॥"—इति॥

न चैवं—निरात्मकशरीरेषु स्वापार्थं प्रवृत्त्यनुपपत्तिः, सौषुप्तिकात्मस्वरूपात्मकसुखानुभवार्थमेव प्रवृत्तेर्वक्तव्यत्वात्तत्रात्मस्वरूपाभावात्तत्स्वरूपात्मकसुखानुभवासम्भवादिति—वाच्यम् ; जाग्रदवस्थाकालीनशरीरायासजनितदुःखोपशान्त्यर्थमेव तत्र प्रवृत्त्युपपत्तेः—

"स्वापे सुखत्वाभिज्ञानात्तद्विच्छिदे च रोषतः ।
तदर्थमन्यत्यागाच्च श्रुतिस्मृतिशतैरपि ॥"

इति विष्णुचित्तवचनस्य स्वापार्थप्रवृत्तेस्सुखानुभवार्थत्वपरस्य च सात्मकशरीरविषयत्वेन तद्विरोधाभावात् ॥ न च—बजिगताङ्कुरत्वावस्थायाश्चैत्रभोगजानिकायास्तददृष्टजन्यत्वादङ्कुरत्वावस्थां प्रत्यात्मगतादृष्टस्य स्वाश्रयसंयोगेन कारणत्वं वाच्यम्, आत्मनोऽणुत्वे च तन्न सम्भवतीति—वाच्यम् । कार्यसामान्ये अदृष्टस्य स्वाश्रयसंयोगेन हेतुत्वे शब्दादावदृष्टस्य कारणत्वानुपपत्तेः, विभोरात्मनः विभावाकाशे संयोगासम्भवात् नैयायिकैर्विभुद्वयसंयोगानुपगमात् ; स्वाश्रयसंयुक्तसंयोगेन अदृष्टस्य हेतुत्वे चाणुत्वपक्षेऽप्यनुपपत्तिविरहात्स्वाश्रयजीवसंयुक्तेश्वरसंयोगस्य बीजेऽपि सत्त्वात् । अदृष्टस्य भगवत्सङ्कल्परूपताया वक्ष्यमाणत्वेन भगवदात्मनश्च विभुत्वेन जीवस्याणुत्वेऽपि स्वाश्रयसंयोगेनैवादृष्टस्य हेतुत्वसम्भवाच्च, विभुद्वयसंयोगाङ्गीकारेण कालगतपरिणामेऽपि तत्सम्बन्धेन हेतुताया अबाधात् ॥

स चायमात्मा ज्ञानाश्रयो ज्ञानस्वरूपश्च । 'विज्ञातारमरे केन विजानीयात्', 'जानात्येवायं पुरुषः' इत्यादिश्रुत्या ज्ञानाश्रयत्वस्य 'विज्ञानं यज्ञं तनुते', 'यो विज्ञाने तिष्ठन्' इत्यादिश्रुत्या ज्ञानस्वरूपत्वस्य च प्रतिपन्नत्वात् ॥ यद्यपि—'विज्ञानं यज्ञं तनुते' इत्यादौ विज्ञानपदं तद्गुणसारत्वादितिसूत्रे ज्ञानाश्रयपरं व्याख्यातम् । तथाऽपि 'एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' इति—श्रुतौ द्रष्टा श्रोतेति विशेषतो बोद्धेति सामान्यतश्च ज्ञानाश्रयत्वस्यो-

क्त्वेन विज्ञानात्मेत्यस्य ज्ञानाश्रयत्वपरत्वे पौनरुक्त्यापत्त्या ज्ञानस्वरूपत्वपरत्वावश्यकतया ज्ञानस्वरूपत्वसिद्धिः ॥

अथ—आत्मनो ज्ञानत्वं न सम्भवति, तस्य सविषयकत्वव्याप्यत्वात्, आत्मनश्च सविषयकत्वासम्भवात्। न तावदात्मनस्स्वभिन्नविषयकत्वं, अनङ्गीकारात्; अङ्गीकारे च धर्मभूतज्ञानवैयर्थ्यापत्तेः। नापि स्वमात्रविषयकत्वं, भाष्ये निष्प्रकारकज्ञाननिराकरणेन तद्विरोधात्॥ न च—आत्मस्वरूपज्ञानस्याहमित्याकारकस्य प्रत्यक्त्वैकत्वप्रकारकत्वाङ्गीकारान्न निष्प्रकारकत्वमिति—वाच्यम्; प्रत्यक्त्वस्यात्मविशेषणत्वेनात्मस्वरूपत्वासम्भवेन आत्मस्वरूपज्ञानस्य तत्प्रकारकत्वासम्भवात्, प्रत्यक्त्वात्मनोरभेदे आधाराधेयभावासम्भवात्। अन्यथा 'भेदव्यपदेशाच्चान्यः' 'उभयेऽपि हि भेदेनैनमधीयते' इत्यादौ च 'आदित्ये तिष्ठन् य आत्मनि तिष्ठन्' इत्यादेराधाराधेयभावप्रतिपादकस्य भेदप्रतिपादकत्वेनोपन्यासासङ्गत्यापत्तेः। एकत्वस्य सङ्ख्यारूपतया आत्मस्वरूपत्वासम्भवाच्च—इति ॥ मैवम्। प्रत्यक्त्वैकत्वयोरात्मस्वरूपातिरिक्तत्वेऽपि तन्मात्रप्रकारकत्वस्य स्वरूपात्मकानुभवे अभ्युपगमेन विरोधाभावात्। अनतिरिक्ततापक्षेऽपि न दोषः, अभेदेऽप्याधाराधेयभावोपगमात् ॥ न चोक्तसूत्रविरोधः 'य आदित्यमन्तरो यमयति', 'य आत्मानमन्तरो यमयति' इति नियाम्यनियामकभावोक्त्या तत्सहिताधाराधेयभावस्य भेदव्याप्यत्वेऽपि शुद्धाधाराधेयभावस्य अभेदेऽपि सम्भवात्। एवमनुकूलत्वस्यापि तत्र प्रकारतया भानमनुमतम्; अहमर्थः प्रत्यक्त्वेनानुकूलत्वेनैकत्वेन च स्वतो भातीति श्रुतप्रकाशिकायामभिधानात्। अत एव सुखमहमस्वाप्समिति प्रत्यभिज्ञोपपत्तिः; अन्यथा सुषुप्तिकाले आत्मगतानुकूलत्वस्य अननुभूतत्वे तत्प्रतिसन्धानासम्भवात्, तद्दशायां धर्मभूतज्ञानस्यात्यन्तसङ्कुचितत्वेन तेनानुकूलत्वस्य दुर्ग्रहत्वात् ॥ न च—

स्तोकं पचतीत्यादौ पाकस्य स्तोकत्वमिव सुखमहमस्वाप्समिति प्रतीतौ स्वापस्यैव सुखरूपत्वं भासते, न त्वात्मनः; तथा च स्वगतानुकूलत्वस्य आत्मग्राह्यत्वेऽपि स्वापगतानुकूलत्वस्य तेन ग्रहणासम्भवात्प्रतिसन्धानानुपपत्तिः तदवस्थैवेति—वाच्यम् । ज्ञानसामान्याभावरूपस्यात्मगतस्वापस्याधिकरणस्वरूपत्वेन तद्गतानुकूल्यस्यात्मगतानुकूल्यादनतिरिक्तत्वात् ॥

ननु—सुखमहमस्वाप्समिति ज्ञानस्य प्रत्यभिज्ञानरूपत्वं न सम्भवति; पूर्वाननुभूतयोरतीतकालस्वापयोरपि तत्र भानात्, प्रत्यभिज्ञायामसन्निकृष्टार्थस्य पूर्वानुभूतस्यैव भाननियमात् ॥ अथ—स्वापकालांशेऽनुमितिरूपमेकं ज्ञानं, सुखविशिष्टात्मांशे च प्रत्यभिज्ञारूपमपरं ज्ञानमिति ज्ञानद्वयात्मकमेव सुखमहमस्वाप्समिति ज्ञानम् । जागराद्यः क्षणः कालपूर्वकः, कालत्वात्, द्वितीयादिक्षणवत्—इत्यनुमानेन पूर्वकालमनुमाय; तत्कालावच्छिन्नोऽहं ज्ञानाभाववान्, ज्ञानसामग्रीविरहवत्त्वात्, तुल्ययोगक्षेमे आत्मादौ स्मर्यमाणेऽपि तद्वृत्तया नियमेन अस्मर्यमाणत्वाद्वेति प्रयोगासम्भवात् । उक्तं च **न्यायसिद्धाञ्जने**—

"प्रत्यक्स्वयंप्रभसुखे नित्ये पुंसि व्यवस्थिते ।
अस्वाप्सं सुखमित्यादौ कालाद्यंशेऽनुमास्थितिः ॥"

—इति चेन्न ॥ ज्ञानद्वयकल्पनापेक्षया आत्मसुखांशयोरप्यनुमितिरूपत्वकल्पने लाघवात् ॥ —**इति चेत्** ॥

अत्र व्यासाचार्याः—सुखमस्वाप्समिति ज्ञानस्य प्रत्यभिज्ञारूपत्वं स्वरसतः प्रतीयते, स्वापकालांशे च प्रत्यभिज्ञारूपत्वासम्भवेऽपि सुखविशिष्टात्मांशे तत्स्वरूपतासम्भवात्प्रतीतिस्वारस्यानुरोधेन ज्ञानद्वयरूपताकल्पनं युक्तम् । यथा—प्रातश्चत्वरे गजो नासीदिति ज्ञानं ज्ञानद्वयात्मकं; तत्र हि प्रातश्चत्वरमात्रमनुभूतं, न गजाभावः; प्रतियोगिभूतगजास्मरणात् । पश्चात्तु गजः किं स्थित इति पृष्टे योग्यार्था-

स्मरणलिङ्गेन गजाभावोऽनुमीयते । पूर्वोक्तरीत्या कालोऽपि तद्वत् ॥
—इत्याहुः ॥

न च—उक्तज्ञानस्यात्मांशेऽपि प्रत्यभिज्ञारूपत्वं न सम्भवति, संस्कारजन्यप्रत्यक्षस्यैव प्रत्यभिज्ञारूपत्वादात्मस्वरूपात्मकानुभवस्य नित्यत्वेन तस्य संस्कारजनकत्वाकल्पनात् चिरातीतस्य अनुभवस्य कालान्तरभाविस्मरणजनकतानिर्वाहार्थमेव द्वारतया संस्कारस्यानित्यानुभवस्थले कल्पनीयत्वान्नित्यानुभवस्थले च तत्कल्पनस्य विफलत्वादिति—वाच्यम् ; स्वजन्यसंस्कारवत्तासम्बन्धेनानुभवस्य नित्यानित्यसाधारण्येनैकहेतुतानिर्वाहाय नित्यानुभवस्थलेऽपि संस्कारकल्पनस्यावश्यकत्वात् ; अन्यथा नित्यानुभवस्य साक्षादनित्यानुभवस्य च परम्परया हेतुत्वमिति कार्यकारणभावद्वयापत्तेः ॥

अयं चात्मा कर्ता ; भोक्तृत्वात्, चेतनोऽहं करोमीति प्रतीत्या आत्मनि कृत्याश्रयत्वरूपकर्तृत्वस्य प्रत्यक्षसिद्धत्वाच्च । न च—जपाकुसुमस्थं लौहित्यं स्फटिक इवान्तःकरणगतं कर्तृत्वमात्मन्यध्यस्यते, न तु तात्त्विकं ; निर्विकारत्वश्रुतिविरोधात्, सुषुप्तौ बुद्ध्यभावे कर्तृत्वादर्शनाच्चेति—वाच्यम् ; तथा सति रक्तं कुसुममितिवत्कदाचित् मनः कर्त्रिति प्रमा, लोहितस्स्फटिक इतिवच्चैतन्यं कर्त्रिति भ्रमश्च स्यात् ; सुषुप्तावन्तःकरणाभावेऽप्यात्मनि श्वासादिकर्तृत्वदर्शनात् सुषुप्तौ भूर्भुवरित्येव श्वसितीति श्रुतेश्च, आत्मनि कर्तृत्वस्याप्यौपाधिकत्वासम्भवात् । किञ्च—आत्मनोऽकर्तृत्वे बुद्धिरेव श्रवणादिकर्त्रीति तस्या एव तत्फलं मोक्षोऽपि स्यात् ; शास्त्रफलं प्रयोक्तरीतिन्यायात्, अन्यथाऽतिप्रसङ्गात् । न च—जातेष्टिपितृयज्ञयोर्व्यभिचारान्न कर्तुरेव फलभाक्त्वनियम इति—वाच्यम्, तत्रापि पूतपुत्रकत्वस्वर्गभागिपितृकत्वयोः कर्तृगतयोरेव फलत्वात् । एवं तन्मनोऽकुरुतेति श्रुतौ मनसः कृतिकर्मत्वस्य ‘शृण्वन्तश्श्रोत्रेण विद्वांसो मनसा’ इत्यादिश्रुतौ ‘शरीरवाङ्मनोभिर्य-

त्कर्म प्रारभते नरः ।' इति स्मृतौ च करणत्वस्य प्रतिपन्नत्वेन कर्तृत्वासम्भवात्; कर्तृत्वकर्मत्वयोरेकत्रासम्भवस्य 'कर्तृकर्मव्यपदेशाच्च" इति सूत्रसिद्धत्वात् । 'मनृ उदक्रामन् मिलित इवाश्नन्पिबन्नास्ते वा' इत्यादिश्रुतौ मनस उत्क्रमणेऽप्यात्मनः कर्तृत्वस्य, तथा—

"परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते, स तत्र पर्येति जक्षन्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ॥"

इत्यादिस्वरूपाविर्भावरूपमुक्तावपि कर्तृत्वस्य प्रतिपन्नत्वेन नास्यौपाधिकतासम्भवः । तच्च कर्तृत्वं परमपुरुषहेतुकमिति—**कर्ता शास्त्रार्थवत्त्वात्, परात्तु तच्छ्रुतेः**—इत्यधिकरणयोः प्रपञ्चितम् ॥

न च—जीवकृतिसामान्यस्येश्वरकृतिजन्यत्वे कलञ्जभक्षणादिकर्तुरपि पापाद्यनुपपत्तिः, आश्रयतासम्बन्धेन पापं प्रति स्वानुकूलकृतिमत्त्वसम्बन्धेन कलञ्जभक्षणादेर्हेतुत्वे बलात्कलञ्जभक्षणं कारिते पुरुषे पापापत्तिवारणाय स्वानुकूलकृतावितरकृत्यजन्यत्वनिवेशस्यावश्यकत्वादितरकृत्यजन्यस्वानुकूलकृतिमत्त्वसम्बन्धेन कलञ्जभक्षणादेस्तादृशकर्तर्यभावादिति—वाच्यम्; जीवकृतिसामान्यस्येश्वरसङ्कल्पजन्यत्वेन तत्कृतिजन्यत्वानङ्गीकारात्, तदङ्गीकारेऽपीतरकृतिनिष्ठासाधारणकारणताकान्यत्वस्यैव निवेशादीश्वरकृतेश्च साधारणकारणत्वेनादोषात् ॥ न च—

'एष ह्येव साधु कर्म कारयति, तं यमेभ्यो लोकेभ्य उन्निनीषति । एष एवासाधुकर्म कारयति, तं यमधो निनीषति ॥'

इति श्रुत्या,

"अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ॥"

इति स्मृत्या च जीवनिष्ठसाधुकर्मानुकूलकृतिं प्रति उन्निनीषाजन्यभगवद्यत्नस्य, असाधुकर्मानुकूलकृतिं प्रति चाधोनिनीषाजन्यभगवद्यत्नस्य

हेतुताबोधनात्, भगवत्कृतिनिष्ठासाधारणकारणताकत्वमेव जीवकृतावस्तीति–वाच्यम्; साधुकर्मकारयितृत्वश्रुतेरतिमात्रभगवदानुकूल्यप्रसक्तपुरुषविशेषविषयत्वेनासाधुकर्मकारयितृत्वश्रुतेश्चातिमात्रप्रातिकूल्यप्रसक्तपुरुषविशेषविषयत्वेन सर्वविषयत्वाभावात्तदतिरिक्तपुरुषकृतौ भगवत्सङ्कल्पादेस्साधारणकारणतयैव निर्वाहे असाधारणकारणत्वाकल्पनात्। न चैवमप्यतिमात्रप्रातिकूल्यप्रसक्तपुरुषे पापोत्पत्त्यनुपपत्तिरिति वाच्यम्; ईश्वरभिन्नेतरकृत्यजन्यत्वस्यैव स्वानुकूलकृतौ निवेशेन तादृशपुरुषेऽपि निषिद्धानुष्ठानस्य पापजनकत्वोपपत्तेः। न च–सिद्धान्ते पुण्यपापयोर्भगवदनुग्रहनिग्रहरूपतया निषिद्धानुष्ठातरि भगवन्निग्रहानुपपत्तिस्तदवस्थैव; विषयतासम्बन्धेन तत्पुरुषीयनिग्रहं प्रति तत्पुरुषानभिमतकरणस्य हेतुत्वे अयमस्मदनभिमतं कुर्यादितीच्छादशायां तस्य निग्रहजनकत्वादर्शनेन, तत्पुरुषीयेच्छाविरहविशिष्टतत्पुरुषानभिमतकरणस्य तत्पुरुषीयनिग्रहजनकत्वस्य वाच्यत्वात्, कलञ्जभक्षणादेर्भगवदनभिमतत्वेऽपि तदनुकूलकृतेर्भगवदिच्छाविरहविशिष्टत्वाभावाद्भगवतस्सङ्कल्पात्मकतादृशेच्छाविरहे तादृशकृतेरेवोत्पत्त्यनुपपत्तेरिति–वाच्यम्; अयं यत्किञ्चित्कार्यं कुर्यादित्यादीच्छासत्त्वे राजाद्यनभिमतकरणस्य राजनिग्रहजनकत्वदर्शनेन तत्तत्कार्यं कुर्यादित्यादिरूपविशेषाकारेच्छाविरहस्यैव निग्रहजनकतावच्छेदकगर्भे निवेश्यत्वात्। प्रकृते चायं कलञ्जं भक्षयेदिति विशेषाकाराया भगवदिच्छाया अभावादयं स्वेष्टं कुर्यादिति सामान्यसङ्कल्पेनैव तादृशकृत्युपपत्तेः, तदर्थं विशेषसङ्कल्पानावश्यकत्वादिति दिक्॥

जीवो द्विविधः–संसार्यसंसारिभेदात्। पुण्यपापान्यतरवत्त्वं **संसारिणो लक्षणम्॥**

संसार्यपि द्विविधः–नित्यानित्यसंसारिभेदात्। पुण्यपापान्यतरत्वावच्छिन्नाभाववदन्यत्वं–**नित्यसंसारिलक्षणम्।** स्वपूर्वकालीनत्व-

स्वसामानाधिकरण्योभयसम्बन्धेन तादृशान्यतरत्वावच्छिन्नाभाव-विशिष्टतादृशान्यतरवत्त्वं—**अनित्यसंसारिलक्षणम्** । नित्यसंसारि-सद्भावे प्रमाणं तु 'अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमाः ।' इत्यादिरूपा लीलाविभूतिनित्यतोक्तिः । 'क्षिपाम्यजस्रमशुभाना-सुरीष्वेव योनिषु' 'न क्षामामि कदाचन'—इत्यादिकं च ॥

परे तु—क्षिपाम्यजस्रमित्यादेर्विलम्बातिरेकपरत्वान्नित्यसंसारिसद्भावे प्रमाणाभाव एव । विमतो जीवो मोक्षसाधनज्ञानवान्, जीवत्वात्, सम्प्रतिपन्नजीववत्—इत्यनुमानेन जीवत्वावच्छेदेन मुक्तियोग्यतासिद्धौ नित्यसंसार्यसम्भवात् । अन्यथा सर्वेषां स्वस्मिन् नित्यसंसारित्वसन्देह-सम्भवेन मोक्षसाधनानुष्ठाने कस्यापि प्रवृत्तिर्नस्यादिति श्रवणादि-विधिवैयर्थ्यापत्तिः ; संसारिणामनन्तत्वाच्च सर्वेषां मुक्तियोग्यत्वेऽपि लीलाविभूतिनित्यतोपपत्तिः ॥ न च—संसारिणामनन्तत्वे 'पादोऽस्य विश्वा भूतानि, त्रिपादस्यामृतं दिवि' इति संसार्यसंसारिजीवानां एकपादत्वत्रिपादत्वतारतम्यकथनं नोपपद्यत इति—वाच्यम् ; मुहूर्तयामाहोरात्रकल्पादीनामानन्त्यस्य समानत्वेऽपि—यथा कल्पा-पेक्षयाऽहोरात्रादीनामाधिक्यं तदपेक्षया च मुहूर्ताधिक्यं, यथा वा सतां द्रव्याणां च आनन्त्येऽपि द्रव्यानन्त्यापेक्षाया सदानन्त्याधिक्यं तद्वदुपपत्तेः ॥ —इत्याहुः ॥

असंसारी द्विविधः—नित्यमुक्तभेदात् । पुण्यपापान्यतर-वद्भिन्नत्वे सत्यणुत्वं **नित्यानां लक्षणम्** । ईश्वरवारणायाणुत्वनिवेशः, ते चानन्तगरुडविष्वक्सेनादयः । 'सदा पश्यन्ति सूरयः' इत्या-दिभिस्सदापश्यदनेकद्रष्टृविशिष्टस्थानविधानान्नित्यसूरिसद्भावसिद्धिः । न चोक्तश्रुतेर्मुक्तप्रवाहविषयत्वमीश्वरविषयत्वं वाऽस्त्विति वाच्यम्; सदापदार्थस्य कालत्वव्यापकत्वस्य मुक्तदर्शने बाधाद्भगवति बहु-वचनार्थबहुत्वानुपपत्तेः । स्वसामानाधिकरण्यस्वसमानकालीनत्वोभय-

सम्बन्धेन कर्मप्रागभावविशिष्टान्यकर्मध्वंससमानाधिकरणपरमात्मानुभवरूपो यो मोक्षस्तद्वत्त्वं—**मुक्तलक्षणम्** ॥

मोक्षहेतुश्च परविद्या; परविद्यात्वं च ब्रह्मविषयकविद्यात्वं, विद्यात्वं च वेदविहितभक्तित्वम्। वेदविहितत्वनिवेशादुदासीनस्मृतिसन्ततौ नातिव्याप्तिः। वेदविहितत्वं च वेदतात्पर्यविषयीभूतकृतिसाध्यत्वादिप्रकारकबोधविषयत्वं ; 'स आत्मानमुपासीत मनोमयं प्राणशरीरम्' इत्यादौ लिङः कृतिसाध्यत्वार्थकत्वात्, **वेदार्थसङ्ग्रहे** 'लिङः कोऽर्थः परिगृहीतः' इति प्रश्नपूर्वकं 'यज देवपूजायामिति देवताराधनभूतयागादेः कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां लिङादयोऽभिदधति' इत्युक्तेः ; वेदतात्पर्यविषयीभूतकृतिसाध्यत्वप्रकारकबोधविषयत्वं शाण्डिल्यविद्यादावस्तीति लक्षणसङ्गतिः, मनोमयत्वादिप्रकारकात्मविशेष्यकं यत्कृतिसाध्यमुपासनं तत्कुर्यादिति बोधस्य तद्वाक्यादुत्पत्तेः ; कर्त्रधिकरणदीपादावाख्यातार्थमुख्यविशेष्यकबोधस्योक्तत्वात्, लिङो लिङ्त्वेन कृतिसाध्यत्वार्थकत्वस्य आख्यातत्वेन कर्त्रर्थकतायाश्च सम्भवात्। बोधे वेदजन्यत्वमनिवेश्य वेदतात्पर्यविषयत्वनिवेशात्सद्विद्यादौ नाव्याप्तिः ; तत्र सदुपासीतेति विध्यभावेऽपि 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ सम्पत्स्ये' इति मोक्षसाधनत्वश्रवणेन विधिकल्पनस्यावश्यकतया सदुपासनविशेष्यककृतिसाध्यत्वप्रकारकबोधस्यापि सद्विद्यातात्पर्यविषयत्वात् । अत एवोद्गीथविद्याविचारे भाष्ये उक्तं—

"वेदनविषयविधिप्रत्ययाश्रवणेऽपि फलसाधनत्वश्रवणाद्वेदनविषये विधिः कल्प्यते ॥" —इति ॥

वेदतात्पर्यं च वेदोच्चारणप्रयोजकेच्छा, न तु वेदकर्मकाद्योच्चारणप्रयोजकेच्छा ; वेदस्यापौरुषेयत्वेन तत्कर्मकाद्योच्चारणस्यैवाप्रसिद्धेः। सा चेच्छा क्वचिदीश्वरसमवेता, क्वचिदध्यापकसमवेता च प्रसिध्यतीति

नाप्रसिद्धिः। भक्तित्वं च प्रीतिरूपतापन्नदर्शनसमानाकारध्रुवानुस्मृतिरूपध्यानत्वम्; प्रीतित्वं चानुकूलत्वप्रकारकत्वं; अनुकूलत्वं च—यद्धर्मावच्छिन्नविषयता इतरेच्छानधीनेच्छाजनकतावच्छेदिका, तादृशधर्मरूपं वैजात्यं। इच्छायामितरेच्छानधीनस्वनिवेशादिष्टसाधनत्वव्युदासः। दर्शनसमानाकारत्वं च—साक्षात्कारत्वव्यञ्जकविषयितावत्त्वम्। अनवरतभावनावशात् स्मृतावपि तादृशविषयिता जायते, 'वृक्षे वृक्षे च पश्यामि चीरकृष्णाजिनाम्बरौ' इत्यादौ तथा दर्शनात्॥ यद्यपि—इदं रजतमित्यादाविव वृक्षविशेष्यकं रामादिप्रकारकं ज्ञानं भ्रमात्मकसाक्षात्कार एव; तथाऽपि—सिद्धान्ते असन्निकृष्टभ्रमस्थले ग्रहणस्मरणात्मकज्ञानद्वयस्य तदीयविषयतयोर्निरूप्यनिरूपकभावस्य च स्वीकारात्स्मरणस्यैव लौकिकविषयितावत्त्वमभ्युपगन्तव्यं; अन्यथा पश्यामीत्यस्यानुपपत्तेः। स्पष्टं चेदं **ज्ञानयाथार्थ्यवादार्थे**॥

न च—एवमपि कामातुरपरिभावितकामिनीसाक्षात्कारवत् ब्रह्मध्यानस्यापि भ्रमत्वापत्तिः, भावनारूपदोषजन्यत्वात्, उक्तस्थले भावनाया दोषत्वेन क्लृप्तत्वादिति—वाच्यम्; न हि भावनाजन्यत्वमुक्तकामिनीसाक्षात्कारे अप्रामाण्यप्रयोजकं, किं तु बाधितविषयत्वं; भावनानपेक्षेऽपि शुक्तिरजतादिभ्रमे बाधादेवाप्रामाण्यस्वीकारात्, ब्रह्मणश्च सर्वव्याप्तस्य सर्वप्रमाणाबाधितत्वात्तद्भावनाजन्यज्ञानस्यापि प्रामाण्याविधानात्, भावनायाश्च व्यवहितकामिनीसाक्षात्कारे दोषत्वेऽपि ब्रह्मध्याने दोषत्वासम्भवात्; अन्यथा शङ्खपीतत्वभ्रमकारणीभूतस्य पित्तद्रव्यस्य स्वविषयकज्ञानेऽप्यप्रामाण्यप्रयोजकत्वापत्तेः, क्वचिदेव कस्य चिद्दोषत्वमित्येवाङ्गीकार्यत्वात्॥ ध्रुवानुस्मृतित्वं च—घटिकाद्यात्मककालनिष्ठावान्तरकालावच्छिन्नाभावाप्रतियोगित्वं, धारावाहिकप्रत्यक्षस्थल इव तावत्पर्यन्तमेकस्या एव स्मृतिव्यक्तेस्स्वीकारात्॥

उक्तं च **प्रज्ञापरित्राणे वरदनारायणभट्टारकैः**—

"स्तम्भस्स्तम्भस्स्तम्भ इति धीर्धारावाहिका मता ।
धारावाहिकविज्ञानमेकं ज्ञानं मतं हि नः ॥" —इति ॥

यदि च—धारावाहिकज्ञानस्थले नैका व्यक्तिः, किं तु सजातीयज्ञानधारैव । उक्तं च श्रीमति भाष्ये—"ध्यानं च तैलधारावदविच्छिन्नस्मृतिसन्तानरूपा ध्रुवानुस्मृतिः" इति—इत्युच्यते ; **तदा**—घटिकाद्यात्मककालनिष्ठावान्तरकालावच्छिन्नो यस्स्वाश्रयत्वस्वसमानविषयकस्वसमानाधिकरणस्मृत्याश्रयत्वैतदन्यतरसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावस्तादृशाभावाप्रतियोगित्वं ध्रुवानुस्मृतित्वमिति बोध्यम् । ब्रह्मविषयकत्वं च सत्यत्वज्ञानत्वानन्दत्वामलत्वनिष्ठप्रकारतानिरूपितब्रह्मनिष्ठविशेष्यताकत्वम् । तेन मनो ब्रह्मेत्युपासीतेत्यादिनाभिहितेषु प्रतीकोपासनेषु नातिव्याप्तिः । परविद्यासामान्ये सत्यत्वादिप्रकारकत्वं च—**आनन्दादयः प्रधानस्य, इतरे त्वर्थसामान्यादिति** सूत्रसिद्धम् ॥

सा च विद्या—सदानन्दमयान्तरादित्यशाण्डिल्यदहरमधुभूमवैश्वानरपञ्चाग्न्यादिविद्याभेदाद्बहुविधा ॥ तत्र—जगदुपादानत्व-जगन्निमित्तत्व-सत्यसङ्कल्पत्व-तेजःप्रभृतिस्रष्टृत्व-तत्तच्छरीरकत्व-तत्तदनुप्रवेष्टृत्व-नामरूपव्याकर्तृत्व-जगज्जन्मस्थितिलयहेतुत्वादिगुणप्रकारकसच्छब्दवाच्यपरब्रह्मविशेष्यकोपासनं—**सद्विद्या** । सा च—सदेव सोम्येदमग्र आसीदित्यादिना छान्दोग्ये प्रतिपादिता ॥ विपश्चित्त्व-जगत्कारणत्वानन्दैकतानत्वेतरानन्दयितृत्व-स्वसङ्कल्पप्रयोज्यचिदचिदात्मकप्रपञ्चस्रष्टृत्व-सृज्यवर्गानुप्रवेशकृततदात्मकत्व-भयाभयहेतुत्व-वाय्वादित्यादिप्रशासितृत्व निरतिशयानन्दाश्रयत्वादिप्रकारकानन्दमयविशेष्यकभक्तिः—**आनन्दमयविद्या** । सा च तैत्तिरीयकगता ॥ मनोमयत्व-प्राणशरीरकत्व-भारूपत्व-सत्यसङ्कल्पत्वाकाशशरीरकत्व—सर्वगन्धत्व-सर्वरसत्वावाप्तसमस्तकामत्वावाकित्वानादरत्व-हृदयोपाधिकाणु-

त्वादिप्रकारकात्मविशेष्यकोपासनं—शाण्डिल्यविद्या । सा च छान्दोग्ये बृहदारण्यकेऽग्निरहस्ये चाम्नाता ॥

अथ—बृहदारण्यके सत्यसङ्कल्पत्वाद्यप्रतिपादनात्तत्प्रकारकत्वघटितोक्तलक्षणस्य तदुक्तशाण्डिल्यविद्यायामव्याप्तिः । न च—सत्यसङ्कल्पत्वादिप्रकारकत्वमनिवेश्य मनोमयत्वभारूपत्वहृदयोपाधिकाणुत्वैतत्त्रितयप्रकारकत्वमेव लक्षणे निवेश्यत इति नाव्याप्तिः, उक्तगुणत्रयस्य छान्दोग्येऽग्निरहस्ये बृहदारण्यके च सत्त्वादिति—वाच्यम् । शाण्डिल्यविद्यायां उक्तगुणत्रयप्रकारकत्वेनैव कारणत्वे छान्दोग्याग्निरहस्ययोः प्राणशरीरकत्वसत्यसङ्कल्पत्वादीनां प्रतिपादनस्य वैयर्थ्यप्रसङ्गेन प्राणशरीरकत्वादिप्रकारकत्वस्यापि कारणतावच्छेदकत्वावश्यकत्वात् बृहदारण्यकोक्तशाण्डिल्यविद्यायास्तत्प्रकारकत्वाभावे मोक्षजनकत्वानुपपत्तेः । न च—सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् इत्यादिना रूपैक्यस्य विद्यैक्यप्रयोजकतया गुणोपसंहारप्रयोजकत्वाभिधानात् प्रकृते मनोमयत्वभारूपत्वविशिष्टात्मन एव बृहदारण्यकेऽप्युपास्यत्वोक्त्या रूपैक्याद्गुणोपसंहारावश्यकत्वेन तद्विद्याया अपि प्राणशरीरकत्वादिप्रकारकत्वान्मोक्षजनकतासम्भव इति—वाच्यम् । विद्यैक्यस्य तत्प्रयोजकरूपैक्यस्य च बृहदारण्यकोक्तविद्यायामसम्भवात् । तथा हि—विद्यैक्यं च न तावदभिन्नत्वं; पुरुषभेदेन कालभेदेन च भिन्नानां मनोमयत्वादिप्रकारकोपासनरूपशाण्डिल्यविद्यानामभेदायोगात्; किन्त्वभिन्नकारणताश्रयत्वं, शाण्डिल्यविद्यानां सर्वासामेकरूपेण कारणत्वात्; एकविषयतावत्त्वं वा, समानाकारज्ञानेषु विषयताया ऐक्यात् । तत्प्रयोजकं रूपैक्यमपि न तावदेकविशेष्यकत्वम्, उद्गीथविद्यानां सर्वासामप्युद्गीथात्मैकविशेष्यकत्वेनैक्यापत्तेः । किं तु तदनिवर्त्यसंशयनिवर्तकतावच्छेदकविषयताशून्यत्वरूपं तदनतिरिक्तविषयकत्वमेव तदैक्यप्रयोजकं रूपैक्यम् ।

तथा च–"तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्" इति तैत्तिरीयकगता दहरविद्या छान्दोग्यगतदहरविद्यानिष्ठकारणतावती तन्निष्ठविषयितावती वा, तादृशविद्यानिष्ठप्रतिबन्धकताकान्यसंशयनिवर्तकतावच्छेदकविषयिताशून्यत्वात्, छान्दोग्यगतदहरविद्यावत् इत्याद्यनुमानेन भिन्नभिन्नशाखागतविद्यानामैक्यं साधनीयमिति सर्ववेदान्तप्रत्ययन्यायाभिप्रेतम् । तथा च–बृहदारण्यकगतशाण्डिल्यविद्याया अग्निरहस्याद्युक्तशाण्डिल्यविद्यैक्यं न सम्भवति, तादृशोपासनाप्रतिबध्यवशित्वेशानत्वादिकोटिकसंशयनिवर्तकतावच्छेदकविषयितावत्त्वेन तच्छून्यत्वात्मकरूपैक्याभावात् ॥ —इति चेत् ॥

मैवम्–सर्वस्थितिप्रयोजकसङ्कल्पवत्त्वरूपवशित्वस्य सर्वोत्पत्तिप्रयोजकसङ्कल्पवत्त्वरूपसर्वेशानत्वस्य सर्वचेष्टाप्रयोजकसङ्कल्पवत्त्वरूपसर्वप्रशासितृत्वस्य च बृहदारण्यकोक्तस्य अग्निरहस्यच्छान्दोग्ययोस्सत्यसङ्कल्पपदेनोक्तत्वात् सत्यपदस्य सर्वस्थितिप्रयोजकत्व–सर्वोत्पत्तिप्रयोजकत्व-सर्वचेष्टाप्रयोजकत्वपरत्वात् । सर्वनिष्ठस्वत्वनिरूपकत्वरूपसर्वाधिपतित्वस्य च सर्वं स्वामितया प्राप्तवानित्यर्थकेन सर्वमिदमभ्यात्त इत्यनेनोक्तत्वेन बृहदारण्यकोक्तविद्यायां रूपैक्यनिर्वाहात् । स्पष्टं चेदं **'समान एवं चाभेदात्'** इत्यत्र **भाष्ये** ॥

अथ–एवमपि छान्दोग्यादौ ज्यायान्पृथिव्या इत्यादिना ज्यायस्त्वस्योक्त्या तत्प्रकारकत्वस्यापि हेतुतावच्छेदकत्वमावश्यकं, अन्यथा तत्प्रतिपादनवैयर्थ्यात् । तच्च–न सम्भवति, हृदयावच्छिन्नपरमात्मनि पृथिव्याद्यवधिकज्यायस्त्वासम्भवात् ॥ न च–तादृशज्यायस्त्वस्यावच्छिन्ने असम्भवेऽपि स्वरूपे सम्भवान्नानुपपत्तिः ; एवं चानन्दादय इत्यस्यापि न विरोधः, हृदयावच्छिन्नपरमात्मन्यपि स्वरूपे अपरिच्छिन्नत्वरूपानन्त्यस्य सम्भवेन तत्प्रकारकत्वनिर्वाहादिति–वाच्यम् । तथा सति "सम्भृतिद्युव्याप्त्यपि चातः" इत्यधिकरणविरोधापत्तेः, तत्र

हृदयादिरूपाल्पस्थानगोचरासु विद्यासु द्युव्याप्तिप्रकारकत्वासम्भवस्य प्रतिपादनात्, उक्तरीत्या द्युव्याप्तेर्हृदयावच्छिन्ने असम्भवेऽपि स्वरूपे सम्भवात् ॥ न च—द्युव्याप्तिराकाशावधिकमहत्त्वं ; तच्च स्वरूपे न सम्भवति, स्वरूपगतपरममहत्त्वस्य निरवधिकत्वेनाकाशाद्यवधिकत्वाभावात्; मध्यमपरिमाण एवान्यापेक्षयाऽल्पत्वरूपत्वस्येतरापेक्षया महत्त्वरूपत्वस्य चोपपत्त्यर्थं सावधिकत्वकल्पनादिति—वाच्यम् । तथा सति पृथिव्याद्यवधिकज्यायस्त्वस्यापि शाण्डिल्यविद्याप्रकारत्वासम्भवतादवस्थ्यात्, आनन्दादय इतिसूत्रोक्तानन्त्यस्यैव स्वरूपांशे प्रकारतया भानसम्भवात्—इति चेन्न ॥ ज्यायान्पृथिव्या इत्यादेरुपास्यमाहात्म्यप्रतिपादनपरत्वेन शाण्डिल्यविद्यावेद्यत्वानुपगमात्, सम्भृत्यधिकरणभाष्ये तथा प्रतिपादनादिति दिक् । उक्तरीत्यैव विद्यान्तराणां लक्षणान्यूह्यानि ॥

तासां च विद्यानां तृणारणिमणिन्यायेन पृथगेव हेतुत्वं, न तु दण्डचक्रादिन्यायेन मिलितानां हेतुत्वमिति **विकल्पोऽविशिष्टफलत्वा**दिति सूत्रसिद्धम् ; दहरादिविद्यागतमोक्षोत्पादप्रयोजकतावच्छेदकसमुदायत्वशून्यत्वे सति मोक्षोत्पादप्रयोजकतावच्छेदकसमुदायाश्रयत्वरूपभिन्नसामग्रीप्रविष्टत्वस्यैव विकल्पशब्दार्थत्वात्, अव्यवहितोत्तरत्वनिवेशाच्च—न परस्परं व्यभिचार इति बोध्यम् । अत्र अविशिष्टफलत्वादिति सूत्रयता मुक्तावानन्दतारतम्यं निरस्तं; ब्रह्मविद्यासामान्यस्यैकजातीयफलजनकत्वाभिधानात्, भोगमात्रसाम्यलिङ्गाच्चेति सूत्रोक्तस्य भोगसाम्यस्य सम्भवाच्च । तथा हि—अनुकूलत्वप्रकारकसाक्षात्कारो भोगः, तत्साम्यं च समानविषयकत्वम् । तथा च प्रमेयत्वव्यापकानुकूलत्वनिष्ठप्रकारतानिरूपितविशेष्यताकसाक्षात्कारवत्त्वमेव समानभोगवत्त्वम्, 'सदा पश्यन्ति सूरयः' इत्यनेन नित्यानां, 'सर्वं ह पश्यः पश्यति' इत्यनेन मुक्तानां चेश्वरस्येव सर्वसाक्षात्कारवत्त्व-

बोधनात्तदंशे वैलक्षण्याभावात् परस्परमीश्वरेण च भोगसाम्यमुपपन्नम्॥ उक्तं च **तत्त्वमुक्ताकलापे**—

"शेषाणां शेषिणश्च स्फुरति सुखतया सर्वदा सर्वतत्त्वे
नित्यानां मुक्तिभाजामपि भुवनकृतं भोगमात्रं समानम् ॥"
—इति ॥

न च—मुक्तानां दुःखादिसाक्षात्कर्तृत्वे दुःखित्वापत्त्या न सर्वसाक्षात्कारसम्भवः ; 'न पश्यो मृत्युं पश्यति, न रोगं नोत दुःखताम्' इति श्रुत्या दुःखादिसाक्षात्कारनिषेधाच्च, 'सर्वं ह पश्यः पश्यति' इत्यस्य सङ्कोचावश्यकत्वादिति—वाच्यम् । स्वतोऽनुकूलभूतभगवद्विभूतित्वेन सर्वस्याप्यनुकूलत्वेन दुःखादेरपि मुक्तान्प्रति प्रतिकूलत्वाभावेनानुकूलतया दुःखादिसाक्षात्कर्तृत्वसम्भवात्तस्य दुःखित्वानापादकत्वात् प्रतिकूलतया तत्साक्षात्कर्तृत्वस्यैव तथात्वात्, स्वतोऽनुकूलभूते वस्तुनि प्रातिकूल्यस्य कर्मकृतत्वेन कर्मनाशे तत्कृतप्रातिकूल्यस्यासम्भवात्, नोतदुःखतामित्यस्य प्रातिकूल्यप्रकारकसाक्षात्कारनिषेधपरत्वेन दुःखसाक्षात्कारनिषेधपरत्वाभावाच्च ॥ न च—पूर्वानुभूतनरकादौ प्रातिकूल्यस्य पूर्वं स्थितत्वादतीतादिसाक्षात्कर्तुर्मुक्तस्य तत्साक्षात्कर्तृत्वमावश्यकमिति—वाच्यम् । प्रतिकूलतया अनुभूतं नरकादिकमपि भगवद्विभूतित्वादनुकूलमेवेति साक्षात्कारस्य मुक्तिदशायां स्वीकारेऽपि तस्य दुःखित्वानापादकत्वात्, प्रत्युतानन्दावहत्वात् ॥

अत्र माध्वाः—देवमनुष्यादीनां मुक्तानां परस्परमानन्दे तारतम्यमावश्यकम्; साधनतारतम्यस्य साध्यतारतम्यप्रयोजकत्वात्, मनुष्योपासनापेक्षया देवोपासनस्य कालतो विषयतश्च प्रकृष्टत्वात्, अन्यथा प्रयत्नाधिक्यवैफल्यापत्तेः, प्रकृष्टाप्रकृष्टसाधनवतामेकजातीयफलप्रदत्वे भगवतो वैषम्यापत्तेश्च । श्रुतिसिद्धश्चायमर्थः—

"अक्षण्वन्तः कर्णवन्तस्सखायो मनोजवेष्वसमा बभूवुः ॥"–इति ॥ अत्र हि मनोजवशब्दिते ज्ञाने साम्याभावप्रतिपादनात्तारतम्यमवगम्यते, तेन च फलतारतम्यमर्थसिद्धम्। तथा 'सैषानन्दस्य मीमांसा भवति'– इत्यारभ्य मनुष्यादिचतुर्मुखपर्यन्तानां मुक्तानामानन्दतारतम्यं प्रतिपाद्य 'श्रोत्रियस्य चाकामहतस्य' इति तत्तन्मुक्तेष्वपि तत्तदानन्दतारतम्यातिदेशात्, परमसाम्यश्रुतेश्च भवन्मतेऽपि नासङ्कुचितार्थत्वं; जगत्कारणत्वलक्ष्मीपतित्वादेर्मुक्तेष्वसम्भवाच्छेषित्वशेषत्वाणुत्वविभुत्वादिकृततारतम्यस्य दुरपह्नवत्वाच्च । अतो निर्दोषत्वमात्रेण तत्साम्यमुपपन्नमिति न तेनानन्दसाम्यसिद्धिः—इति वदन्ति ॥

अत्रोच्यते—मुक्तानामानन्दतारतम्यं सङ्ख्याकृतं परिमाणकृतं विषयकृतं स्वरूपकृतं वा न सम्भवति ॥ **सङ्ख्याकृततारतम्यं हि**– एकतरकृतमुक्तानन्दपर्याप्तसङ्ख्याव्याप्यत्वव्यापकत्वान्यतरावच्छेदकसङ्ख्याविभाजकधर्मवत्सङ्ख्यापर्याप्त्यधिकरणत्वमपरमुक्तानन्देषु। यथा अष्टवस्वपेक्षया सप्तर्षिषु द्वादशादित्येषु च वसुपर्याप्ताष्टत्वसङ्ख्याव्याप्यतावच्छेदकसप्तत्वत्वरूपसङ्ख्याविभाजकधर्मवत्सङ्ख्यापर्याप्त्यधिकरणत्वस्य सप्तर्षिषु तादृशसङ्ख्याव्यापकतावच्छेदकद्वादशत्वत्वरूपतादृशधर्मवत्सङ्ख्यापर्याप्त्यधिकरणत्वस्य द्वादशादित्येषु च सत्त्वात्। एतादृशं च तारतम्यं मुक्तानन्देष्वसम्भवि ; आनन्दस्य भवन्मते जीवस्वरूपत्वेन प्रत्येकमेकत्वेन सङ्ख्याकृतवैषम्याभावात् ॥ **नापि परिमाणकृतं**, परिमाणकृततारतम्यं ह्यामलकापेक्षया बिल्वबदरयोस्तत्संयुक्तयावत्प्रदेशसंयोगयोग्यत्वसमानाधिकरणतदसंयुक्तप्रदेशसंयोगयोग्यत्वतत्संयुक्तयत्किञ्चित्प्रदेशसंयोगयोग्यत्वान्यतररूपं प्रसिद्धं ; तादृशस्याणुरूपजीवस्वरूपानन्देष्वसम्भवात् ॥ **नापि विषयकृतं** ; तद्धि तद्विषययत्किञ्चिदविषयकत्वतदविषयविषयकत्वान्यतररूपं ; यथा–घटपटोभयविषयकज्ञानापेक्षया एकविषयकज्ञानात्रितयविषयकज्ञानयोः ;

ताद्दशानन्दतारतम्यस्य, 'सर्वं ह पश्यः पश्यति' इत्यादिश्रुत्युक्तसर्वज्ञत्वेन समानेषु मुक्तेष्वसम्भवात् ॥ नापि स्वरूपकृतं; तद्धि-मधुरमधुरतररसयोरिव परस्परासमानाधिकरणवैजात्यवत्त्वं, ताद्दशवैजात्यस्य मुक्तस्वरूपानन्देष्वप्रामाणिकत्वात्॥

यदपि—ताद्दशवैजात्यसाधनायोक्तं—प्रकृता बन्धनिवृत्तिः स्वसजातीयबन्धनिवृत्त्याश्रयप्रतियोगिकतारतम्यवन्निष्ठा, बन्धनिवृत्तित्वात् , निगलबन्धनिवृत्तिवत्—इति । तदपि न—तारतम्यस्य गुणगतवैजात्यरूपस्य बन्धनिवृत्त्याश्रयात्मनिष्ठत्वाभावात्, तद्वृत्तिधर्मस्यैतत्प्रतियोगितारतम्यशब्देनाभिधाने मुक्तानन्दयोरेकजातीयत्वेऽपि स्वस्वमात्रविषयकधीविषयत्वमादायार्थान्तरात्। न च—गुणगुणिनोरभेदाङ्गीकाराद्गुणगतवैजात्यस्य आत्मनिष्ठत्वमिति—वाच्यम् ; स्वरूपातिरिक्तताद्दशवैजात्यस्यापसिद्धान्तपराहतत्वेन भवद्भिरङ्गीकर्तुमशक्यत्वात्। न च—जीवस्वरूपानन्दानामनादितारतम्यस्वभावत्वमिति—वाच्यम् ; जीवस्वरूपाणां तारतम्यस्वरूपत्वे भेदमात्रे पर्यवसानेन परिभाषामात्रापत्तेः, पूर्वोक्तभोगसाम्याविघातात्। साधनतारतम्यात्साध्यतारतम्यमित्यपि न सत्; धूमालोकादिलिङ्गकपरामर्शरूपसाधनतारतम्येऽप्यनुमितौ तारतम्यादर्शनेन व्यभिचारात्, मोक्षसाधनज्ञाने तारतम्यासिद्धेश्च अक्षण्वन्तइत्यादिश्रुतेस्सर्वसाक्षात्कर्तृत्वेन समान्तरराहित्यपरत्वादक्षण्वन्तःकर्णवन्तइत्याभ्यां सर्वसाक्षात्कर्तृचक्षुष्मत्त्वस्य ताद्दशश्रोत्रवत्त्वस्य च बोधनात्, प्रशंसायां मतुष्प्रत्ययात्; 'कीर्तिमानसमो राजा निस्समास्तत्र पण्डिताः' इत्यादौ कीर्तिपाण्डित्याभ्यां सद्दशान्तरराहित्यस्येव ताद्दशसाक्षात्कर्तृत्वेन सद्दशान्तरनिषेधबोधनस्य युक्तत्वात्, सैषानन्दस्येत्यादिश्रुतेरपि शते पञ्चाशन्न्यायेन मुक्तानन्दे सर्वानन्दान्तर्भावपरत्वेन तारतम्यपरत्वाभावात् । तच्छ्रुतावानन्दपदं अनुकूलत्वेन ज्ञायमानविषयपरं, न तु ताद्दशज्ञानपरं; तथा सति

तादृशज्ञानस्य पुरुषभेदेन भिन्नतया मानुषानन्दे मनुष्यगन्धर्वसम्बन्धित्वोत्कीर्तनासङ्गतेः 'ते ये शतं मानुषा आनन्दास्स एकः' इत्यस्य मनुष्यानन्दशतसजातीय एको मनुष्यगन्धर्वानन्द इत्यर्थाङ्गीकारे त्वानन्दपदं तादृशज्ञानपरमेव । समानविषयकत्वेन साजात्यस्य विवक्षितत्वेन मानुषशतज्ञानविषयविषयकत्वस्य मनुष्यगन्धर्वगतैकज्ञाने लाभात्तादृशमनुष्यगन्धर्वगतविभिन्नविषयकशतज्ञानविषयविषयकत्वस्य च देवगतैकज्ञाने लाभान्नानुपपत्तिः; मुक्तानां सर्वविशेष्यकानुकूलत्वप्रकारकसाक्षात्कारवत्तया मानुषशतज्ञानविषयविषयकत्वस्य मनुष्यगन्धर्वादिगतशतज्ञानविषयविषयकत्वस्य च सत्त्वात्प्रतिपर्यायं श्रोत्रियस्य चाकामहतस्य इत्यस्योपपत्तिरित्यन्यत्र विस्तरः ॥

इत्यनन्तार्यकृतौ सिद्धान्तसिद्धाञ्जने

जीवनिरूपणं नाम द्वितीयः परिच्छेदः ॥

अथेश्वरो निरूप्यते ॥

विभुत्वे सति चेतनत्वं तल्लक्षणम् । जीववारणाय सत्यन्तं, कालवारणाय विशेष्यम् । प्रमेयत्वव्यापकस्वत्वनिरूपकत्वरूपं सर्वस्वामित्वं, सर्वकर्मजन्यप्रीत्याश्रयत्वरूपं सर्वकर्मसमाराध्यत्वं, सर्वकर्मफलोत्पादकसङ्कल्पवत्त्वरूपं सर्वफलप्रदत्वं, सर्वद्रव्यपतनप्रतिबन्धकसङ्कल्पवत्त्वरूपसर्वाधारत्वं च—तल्लक्षणम् । न च—ईश्वरस्य विभुत्वे 'अनुप्रविश्य नामरूपे व्याकरवाणि' इत्यादिश्रुत्युक्तमनुप्रवेशादिकं नोपपद्यत इति—वाच्यम्; विलक्षणसंयोगस्यैवानुप्रवेशशब्दार्थत्वात् । न च—भगवन्निरूपितस्वत्वस्य सर्वत्र सिद्धत्वे अग्नये स्वाहेत्यादावग्निपदस्याग्न्यन्तर्यामिपरत्वानुपपत्तिः, हविर्निष्ठस्वत्वरूपफलावच्छिन्नस्वस्वत्वध्वंसानुकूलव्यापारस्यैव स्वाहापदार्थत्वात्तत्र स्वत्वरूपफलेऽन्त-

र्यामिनिरूपितत्वासम्भवादिति—वाच्यम्; तत्र विशेषणीभूताग्निनिरूपितत्वस्यैव स्वत्वरूपफलेऽन्वयाङ्गीकारात् । न चैवमपि—भगवते गां ददाति, आत्मानं समर्पयतीत्यादिव्यवहारानुपपत्तिरिति—वाच्यम्; तत्र स्वत्वप्रकारतानिरूपितविशेष्यत्वरूपफलावच्छिन्नस्वस्वत्वध्वंसानुकूलव्यापारस्यैव ददात्यर्थत्वात् भगवन्निरूपितस्वत्वस्य सर्वत्र सिद्धत्वेऽपि सर्वेषां तज्ज्ञानाभावेन तत्प्रकारकज्ञानीयविशेष्यतायाः फलत्वाविरोधात्। अत एव भगवति सर्वोत्कर्षस्य सिद्धत्वेऽपि भगवान् जयत्वित्यादिप्रयोगः । उत्कर्षनिष्ठप्रकारतानिरूपितविशेष्यताया एव तत्र जिधात्वर्थतया तस्या असिद्धत्वेन लोडर्थेच्छाविषयत्वस्य तत्रान्वयाबाधात् । न च—सर्वकर्मसमाराध्यत्वं भगवतो न सम्भवति अन्येषामेवान्यभक्ताराध्यत्वादिति—वाच्यम् ;

“येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयाऽन्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥”

इत्यादिभिरन्यदेवताभक्ताराध्यत्वस्यापि भगवत्यभिधानात् ॥ तत्र गौरवितप्रीतिहेतुव्यापाररूपयजिधात्वर्थतावच्छेदकप्रीतिरूपफले द्वितीयान्तार्थमद्वृत्तित्वान्वयात् क्षणध्वंसिक्रियायाः कालान्तरभाविस्वर्गादिजनकत्वासम्भवेन द्वारस्य वक्तव्यत्वे अत्यन्तापरिदृष्टापूर्वस्य द्वारत्वापेक्षया ‘स एवैनं भूतिं गमयति’, ‘तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति’ इत्यादिश्रुत्युक्तदेवताप्रसादस्यैव द्वारताया युक्तत्वेन निरुक्तसर्वफलप्रदत्वं भगवत उपपन्नम् । न च—तत्रेन्द्रादिप्रीतेरेव द्वारत्वं श्रूयते न भगवत्प्रीतेरिति—वाच्यम्; आराधितेन्द्रादिनाशे कल्पान्तरे फलोत्पादानुपपत्त्या तत्रेन्द्रादिपदस्य तदन्तर्यामिपरत्वावश्यकत्वात् । उपपादितं चेदं फलमत उपपत्तेरित्यत्र भाष्ये । निरुक्तसर्वाधारत्वं च ‘एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृतौ तिष्ठतः’ इत्यादिश्रुतिसिद्धम् । ‘पाथसि पीते तृष्णा

शाम्यति' इत्यादाविव सतिसप्तम्या जन्यजनकभावलाभात् जगदुपादानत्वमपि तल्लक्षणम् । भाव्यवस्थाविशेषवतः प्रागवस्थायोगित्वमुपादानत्वम् । स्वावच्छेदककालानवच्छिन्नत्व-स्वपूर्वत्वस्वसामानाधिकरण्यैतत्त्रितयसम्बन्धेन तद्धर्मविशिष्टधर्मवत्त्वं तद्धर्मावच्छिन्नं प्रत्युपादानत्वमिति फलितम् । मृत्पिण्डे निरुक्तसम्बन्धत्रयेण घटत्वावस्थाविशिष्टपिण्डत्वावस्थासत्त्वाद्घटत्वावच्छिन्नं प्रति पिण्डत्वावच्छिन्नस्योपादानत्वोपपत्तिः ; घटत्वावच्छिन्नं प्रति द्रव्यत्वावच्छिन्नस्योपादानतावारणाय प्रथमसम्बन्धनिवेशः, घटत्वावस्थाध्वंसविशिष्टस्यापि तदवच्छिन्नं प्रत्युपादानत्ववारणाय स्वपूर्वत्वनिवेशः । घटाव्यवहितपूर्वतन्त्वादेस्तदुपादानतावारणाय सामानाधिकरण्यनिवेशः । अन्यथासिद्धिनिरूपकतानवच्छेदकत्वस्यापि निवेशाच्च न घटत्वावस्थापूर्वकालीनवायुसंयोगादिविशिष्टस्य तदवच्छिन्नं प्रत्युपादानत्वापत्तिः । न चैवं—द्रव्यत्वाद्यवच्छिन्नस्य घटत्वाद्यवच्छिन्नं प्रत्यन्यथासिद्धत्वादेव वारणे प्रथमसम्बन्धनिवेशवैयर्थ्यमिति—वाच्यम् । अन्यथासिद्धत्वस्यैकस्याभावेन अन्यथासिद्धिनिरूपकतावच्छेदकत्वेन प्रामाणिकानां व्यवहारविषया ये ये धर्मास्तत्तद्व्यक्तित्वावच्छिन्नभेदकूटवत्त्वस्य निवेश्यतया विशेषणान्तरावार्याणामेव भेदकूटनिवेशेन वारणाङ्गीकारात् । सामानाधिकरण्यशरीरे च स्वाश्रयापृथक्सिद्धिसम्बन्धावच्छिन्ना स्वापृथक्सिद्धिसम्बन्धावच्छिन्ना चाधिकरणता अपृथक्सिद्धिसम्बन्धावच्छिन्नाधिकरणतात्वेन प्रवेश्या । 'बालोऽपि यः प्रजानाति तं देवाः स्थविरं विदुः,' 'काठिन्यवान्यो बिभर्ति' इत्यादिभिः स्वाश्रयापृथक्सिद्धेरपि वृत्तिनियामकत्वस्य सिद्धत्वात्तदवच्छिन्नाधिकरणताप्रसिद्धेः ॥ एवं च—सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणः स्थूलचिदचिद्विशिष्टं स्वं प्रत्युपादानत्वमुपपन्नम् ॥ उक्तसम्बन्धत्रयेण स्थूलत्वविशिष्टसूक्ष्मत्वस्य तत्र सत्त्वात्, तादात्म्येन स्थूल-

विशिष्टं प्रति तेन सम्बन्धेन सूक्ष्मविशिष्टब्रह्मणः कारणत्वात्, तादात्म्यसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणताश्रयत्वं चोपादानलक्षणं बोध्यं; उपादानोपादेययोरभेदाच्च **तदनन्यत्वमारम्भणशब्दादिभ्य** इत्यधिकरणोपपत्तिः ॥

अथैवं—न विलक्षणत्वादस्य तथात्वं च शब्दादित्यादिना विलक्षणयोरुपादानोपादेयभावासम्भवमाशङ्क्य, **दृश्यते**त्वित्यादिना तत्सम्भवसिद्धान्तकरणं नोपपद्यते, अभिन्नयोरेवोपादानोपादेयभावे केनापि रूपेण वैलक्षण्याप्रसक्तेः—इति चेन्न । विशिष्टयोरुपादानोपादेयभावाङ्गीकारेऽपि विशेषणांशयोरिव विशेषणांशं प्रति विशेष्यांशस्याप्युपादानताया अभिमतत्वात्तन्निर्वाहाय विलक्षणयोरप्युपादानोपादेयभावस्य व्यवस्थापनीयत्वात्, अवस्थां प्रति द्रव्यस्योपादानतानिर्वाहायोपादानत्वलक्षणस्य तादात्म्यापृथक्सिद्ध्यन्यतरसम्बन्धावच्छिन्नकार्यताघटितस्य परिष्कर्तव्यतया विशेषणांशनिष्ठापृथक्सिद्धिसम्बन्धावच्छिन्नकार्यतानिरूपितकारणत्वस्य विशेष्यांशे सत्त्वेन तत्रोपादानत्वव्यवस्थापनस्यावश्यकत्वात्, अन्यथोपादानत्वलक्षणातिव्याप्तेर्दुर्वारत्वात्। अत एव विशेषणांशं प्रति विशेष्यांशस्योपादानत्वपरा यतोवेत्यादिश्रुतिरुपपन्ना ; तत्र भूतानीत्यस्य तच्छरीरकपरमात्मपरत्वे बहुवचनस्य प्रत्यक्षविषयार्थकेदमर्थान्वयस्य 'यत्प्रयन्त्यभिसंविशन्ति' इत्यस्य च अस्वारस्यापत्तेः। क्वचिद्विशिष्टं प्रति विशिष्टस्योपादानत्वमुच्यते—यथा 'सदेव सोम्येदमग्र आसीत्', 'आकाशाद्वायुः'—इत्यादौ, तत्राकाशशरीरकाद्वायुशरीरक उत्पन्न इत्यर्थात् । **तदभिध्यानादेव तु तल्लिङ्गात्सः**—इत्यनेनाकाशादिशब्दस्य विशिष्टपरताप्रतिपादनात् पञ्चम्यन्ताकाशादिपदानां विशिष्टपरत्वे प्रथमान्तानामपि तेषां तत्परत्वावश्यकत्वात्। छान्दोग्यश्रुतौ 'तत्तेज ऐक्षत', 'ता आप ऐक्षन्त' इत्याद्वीक्षणरूपलिङ्गात्तेजोऽप्शब्दयोर्विशिष्टपरत्वा-

वश्यकतया तदनुरोधेन 'अग्नेरापः, अद्भ्यः पृथिवी' इत्यत्र—अप्पद-पर्यन्तं विशिष्टपरतायास्स्वीकारेऽपि पृथिवीपदस्य विशेषणमात्रपरत्व-मेव। ततश्च 'पृथिव्या ओषधयः, ओषधीभ्योऽन्नं, अन्नात्पुरुषः' इति च विशेषणानामेवोपादानोपादेयभावपरम् । अत एवानन्दमयाधिकरणे 'स वा एष पुरुषोऽन्नरसमयः' इत्यत्र पुरुषपदस्य शरीरपरतया व्याख्या-नं सङ्गच्छते; अन्यथा पुरुषपदस्यापि विशिष्टपरत्वे विकारार्थकमयट्-प्रत्ययानुपपत्तेः, उत्तरत्र 'तस्यैष एव शारीर आत्मा' इति प्रतिपादना-त्सर्वान्तरात्मत्वोपपादनायास्य प्रकरणस्य प्रवृत्तत्वेन तद्विरोधापत्तेश्च। विशेषणांशं प्रति विशेष्यांशस्योपादानत्वाभिप्रायेणैव श्रुतिप्रक्रियायां 'यत्र हि द्वैतमिव भवति' इत्यादिश्रुत्यर्थविचारे भाष्यम्—

"कृत्स्नस्य जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात्तत्प्रत्यनीकनानात्वं प्रतिषिध्यते ॥"

—इति ॥

अत्र जगत इति विशेषणमात्रपरं, विशिष्टपरत्वे तदन्तर्यामिकतये-त्यत्रान्वयानुपपत्तेः ॥ न च—जगत इत्यस्य विशिष्टपरत्वेऽपि तदन्त-र्यामिकतयेत्यस्य विशेषणांशेऽन्वयाद्विशेषणमात्रपरस्य जगत इति पदान्तरस्याध्याहारेण तत्रान्वयसम्भवाद्वा नानुपपत्तिरिति—वाच्यम्; अस्य वाक्यस्य विशिष्टोपादानतापरत्वे ब्रह्मकार्यतयेत्यत्र ब्रह्मपदस्य सूक्ष्मविशिष्टपरत्वावश्यकत्वेन तदन्तर्यामिकतयेति तच्छब्देन विशिष्ट-परामर्शे बाधात्, स्थितिदशायां सूक्ष्मावस्थानाशेन सूक्ष्मशरीर-कस्यान्तर्यामित्वासम्भवात्, विशिष्टस्य प्रक्रान्ततास्थले विशेष्यमात्रस्य तच्छब्देन परामर्शायोगात्; अन्यथा तत्त्वमसीत्यादौ परमते लक्षणा-भिधानासाङ्गत्यापत्तेः । न च—सन्मूला इत्यत्र सच्छब्दस्य विशिष्ट-परत्वेऽपि सदायतना इत्यत्र सच्छब्दस्य श्रुतप्रकाशिकोक्तरीत्या विशेष्यमात्रपरत्वात् विशिष्टस्य प्रक्रान्तत्वेऽप्यैतदात्म्यमित्यत्र विशेष्य-

मात्रस्यैतच्छब्देन परामर्शवत्प्रकृतेऽपि विशेष्यमात्रस्य तच्छब्देन परामर्शस्सम्भवतीति–वाच्यम् ; क्लिष्टकल्पनापत्तेः ॥

यदि च—सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यत्र विशिष्टोपादानत्वतात्पर्यानुरोधेन ब्रह्मपदस्य विशिष्टपरत्वे तत्पदस्यापि विशिष्टपरत्वं वाच्यम् ; तच्च न सम्भवति ; विशिष्टस्य जननेऽन्वयसम्भवेऽप्यनन्तपदार्थस्थितावन्वयासम्भवात्, सकृदुच्चरित इति न्यायविरोधेनैकस्य तच्छब्दस्योभयबोधकत्वासम्भवात् । अतो ब्रह्मपदस्य तत्पदस्य च विशेष्यपरत्वमेव वक्तव्यम् ; विशिष्टस्य कारणत्वे विशेष्यस्यापि तदनपायेन जननेऽपि तदन्वयाविरोधात् । तथा च प्रकृतेऽपि तादृशश्रुत्यनुसारेण ब्रह्मपदस्य तच्छब्दस्य च विशेष्यपरत्वान्नानुपपत्तिरिति **विभाव्यते ; तदाऽपि**–विशेषणांशं प्रतिविशेष्यस्योपादानत्वपरतयाऽपि तद्भाष्यस्य व्यासार्यैर्व्याख्यातत्वात्तदपि भाष्यटीकोभयाभिमतम् ॥

तत्रेयं **टीका**—

"यद्वा–कृत्स्नस्य जगत इति निष्कर्षकशब्दः, ब्रह्मशब्दो विशेष्यमात्रपरः, ब्रह्मकार्यतया तदन्तर्यामिकतया च जगत्तदात्मकं ; तदात्मकत्वं नाम जगतस्तत्प्रकारैकस्वभावतया प्रागवस्थानाभावात्तदन्तर्गतत्वं तेन प्रकारेणैक्यं, न तु स्वरूपैक्यं ; विशिष्टान्तर्भाव ऐक्यमित्यर्थः ॥" —इति ॥

'दृश्यते तु' इति सूत्रे **भावप्रकाशिका च**—

"**अत्र केचित्**—कारणकोटौ विशेष्यभूतस्य ब्रह्मणः कार्यकोटौ विशेषणभूतेष्वचेतनेष्वप्युपादानत्वमुपपादनीयम्, अन्यथा तस्य सर्वोपादानत्वासिद्धेः । अत एव श्रुतप्रकाशिकायां 'यद्वा जगत इति निष्कर्षकश्शब्दः, ब्रह्मशब्दो विशेष्यमात्रपरः' इत्यादिना कार्यकोटौ विशेषणभूतस्य जगतः कारणकोटौ विशेष्यभूतं ब्रह्म प्रत्युपादेयत्व-

शरीरत्वे स्तः—इत्याचार्यैः प्रतिपादितम् । ततश्च सालक्षण्याभावादुपादानत्वं न सम्भवतीत्याक्षेपस्य अचेतनांशे चेतनत्वानुवृत्तिरस्तीति परिहारासम्भवादेतत्सूत्रोक्तन्यायेन विलक्षणयोरप्युपादानोपादेयभावोऽस्तीत्येवं परिहर्तव्यम्—इति वदन्ति ॥" —इति ॥

तथा च—**न विलक्षणत्वा**दित्यादिकं विशेषणविशेष्ययोरुपादानोपादेयभावपरं, आरम्भणाधिकरणं च—विशिष्टयोरुपादानोपादेयभावपरम्; **चमसवदविशेषा**दिति च—विशेषणांशयोरेवोपादानोपादेयभावपरमिति न परस्परं विरोधः; चमसवदित्यत्र "विकारजननीमज्ञामष्टरूपामजां ध्रुवाम्" इत्यादिश्रुत्यनुरोधेन ब्रह्मशरीरभूताया अजाया उपादानत्वस्योक्तत्वात् ॥

नन्वेवं—'ईक्षतेर्नाशब्दं' 'आकाशस्तल्लिङ्गात्' इत्याद्यधिकरणानुत्थितिः; विशेषणभूतप्रकृत्याकाशादीनामेवोपादानत्वपरतया 'सदेव सोम्येदमग्र आसीत्' 'सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इत्यादिश्रुतेरुपपत्तेस्सदाकाशादिपदानां ब्रह्मपरताव्यवस्थापनस्यानावश्यकत्वात्; सच्छब्दस्य परमात्मशरीरभूतप्रधानपरत्वाङ्गीकारेण तत्र विशेष्ये ईक्षणाद्यन्वयासम्भवेऽपि विशेषणे तदन्वयसम्भवात्; ब्रह्मपरतापक्षेऽपि विशेषणद्वारैव परिणामस्य वक्तव्यत्वात् ॥ न च—सदादिपदस्य परमात्मशरीरभूतप्रधानपरत्वे लक्षणा स्यादिति—वाच्यम्; सूक्ष्मचिदचिद्विशिष्टब्रह्मपरत्वेऽपि लक्षणाया अवर्जनीयत्वात्, शतदूषण्यां सच्छब्दस्य विशिष्टपरत्वे लक्षणा दोष इत्याशङ्क्य; सर्वशब्दलक्षणापक्षादस्यैवोपादेयतमत्वाभिधानात् । एवं चाकाशादेवेत्यत्र न रूढित्यागोऽपि, तद्वाक्ये ईक्षणादेरश्रवणेन परमात्मशरीरत्वेन बोधनावश्यकत्वात्, ब्रह्मपरतापक्षे रूढित्यागस्य दुस्त्यजत्वात्, अर्थविरोधेन अपशूद्राधिकरणसूत्रोक्तं शूद्रशब्दरूढित्यागमुपजीव्यात्रापि रूढिं विहाय आसमन्तात्काशत इत्यादियोगा-

र्थस्य भाष्येऽङ्गीकारात्। यद्यप्याकाशाधिकरणटीकायामाकाशपदस्याकाशशरीरकत्वपरत्वाङ्गीकारेण रूढ्यपरित्याग उक्तः। तथाऽपि वैश्वानराधिकरणटीकायामग्निपदस्य "शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते" "साक्षादप्यविरोधं जैमिनिः" इति सूत्रद्वयानुरोधेन अग्निशरीरकपरताया अग्रनयनरूपगुणविशिष्टपरतायाश्च स्वीकारे रूढ्यर्थयोगार्थप्रकारकवैश्वानरविद्ययोर्भेदापत्तिरित्याशङ्क्य चिदचिदसाधारणलिङ्गवत्सु वाक्येषु चिदचिद्वाचिपदानां तच्छरीरकपरत्वं तादृशलिङ्गरहितेषु च योगार्थपरत्वमिति व्यवस्थाकरणादाकाशवाक्ये तादृशलिङ्गाभावेन योगार्थस्यैव युक्तत्वेन आकाशाधिकरणोक्तरूढ्यपरित्यागे व्यासार्याणां निर्भराभावात्। उक्तं च **न्यायसिद्धाञ्जने**—

"परविद्यासु जीवोक्तिर्निरुक्त्यादेः पराश्रया।
तल्लिङ्गानन्यथासिद्धौ तद्विशिष्टावलम्बिनी॥"

तथा च—आकाशादिपदानां योगेन ब्रह्मपरत्वव्यवस्थापनमफलम्—इति चेन्न॥ आदेशशब्दोदितप्रशासितृत्व-सत्यसङ्कल्पत्व-तेजःप्रभृतिस्रष्टृत्व—नामरूपव्याकर्तृत्वादीनां बहूनां विशेषणेऽन्वयाङ्गीकारस्यायुक्ततेत्यभिप्रायेणेक्षत्यधिकरणस्य प्रवृत्तेः; सच्छब्दस्य प्रधानपरत्वे गतिसामान्यन्यायविरोधाच्च। एवमाकाशशब्दस्य रूढिस्वीकारे ज्यायस्त्वपरायणत्वादीनामन्वयानुपपत्तेः परमात्मापृथक्सिद्धाकाशपरतां स्वीकृत्य विशेषणे तदन्वयाङ्गीकारे च रूढित्यागस्यावर्जनीयत्वात् योगार्थपरत्वमेव युक्तं; अन्यथा सर्वकारणत्वानुपपत्तेश्च। तथा च—विशेषणांशयोः परस्परमुपादानोपादेयभावेऽपि न विरोधगन्धः॥

ननु—सिद्धान्तेऽतिरिक्तावयव्यनभ्युपगमेन द्रव्यस्वरूपस्य नित्यतयाऽवस्थानामेवोत्पत्तिमत्त्वेन अवस्थां प्रति तदाश्रयद्रव्यस्योपादानत्वं,

पूर्वावस्थायाश्चासमवायित्वमित्येतदुचितं; न तु पूर्वावस्थाविशिष्टद्रव्यस्योत्तरावस्थाविशिष्टद्रव्यं प्रत्युपादानत्वं; द्रव्यस्य नित्यतयोपादेयत्वासम्भवात्। तथा महत्त्वादिरूपावस्थाविशिष्टद्रव्यं प्रति प्रकृतित्वरूपावस्थाविशिष्टद्रव्यस्योपादानत्वासम्भवात् सुतरामुत्तरावस्थाविशिष्टद्रव्यशरीरकब्रह्म प्रति पूर्वावस्थाविशिष्टद्रव्यशरीरकब्रह्मण उपादानत्वं न सम्भवति—इति चेत्॥ मैवम्। सिद्धान्ते कालसंयुक्तत्वरूपकालसम्बन्धित्वस्य द्रव्यमात्रनिष्ठत्वेनावस्थासाधारण्याभावेनाद्रव्ये कालसम्बन्धित्वव्यवहारस्य गौणत्वादाद्यक्षणसम्बन्धरूपोत्पत्तेः पूर्वकालवृत्तित्वरूपकारणत्वस्य च द्रव्य एव सम्भवादुत्तरावस्थां प्रति पूर्वावस्थायाः कारणत्वमित्यस्यापि उत्तरावस्थाविशिष्टद्रव्यनिरूपितपूर्वावस्थाविशिष्टद्रव्यगतकारणतायामेव पर्यवसानात्। अद्रव्यस्यापि कालसम्बन्धित्वस्वीकारे पूर्वमसत्त्या एवावस्थाया उत्पत्तिस्वीकारापत्त्या असत्कार्यवादस्य दुर्वारत्वात्। स्ववृत्तिध्वंसप्रतियोगिक्षणावृत्तित्वस्ववृत्तित्वोभयसम्बन्धेन क्षणविशिष्टत्वं हि असत्कार्यवादविषयः; अवस्थायाः कालसम्बन्धित्वे च उक्तोभयसम्बन्धेन क्षणविशिष्टत्वस्यावस्थायामक्षतत्वात्तदापत्तिर्दुर्वारा। तथा च 'कथमसतस्सज्जायेत' इति श्रुतिविरोधः। असत इति षष्ठ्यन्तं, सदिति भावप्रधानं; पूर्वं कालासम्बन्धिनः कालसम्बन्धित्वं न सम्भवतीत्युक्तासत्कार्यवादनिरासोऽभिप्रेतः। आद्यक्षणसम्बन्धरूपोत्पत्तिशरीरे च घटत्वाद्यवच्छिन्ननिरूपिताधिकरणतैव निवेश्या; तेन द्रव्यस्वरूपस्य नित्यतया स्वाधिकरणक्षणध्वंसानधिकरणक्षणाप्रसिद्ध्या स्वपदेन द्रव्योपादानासम्भवेऽपि न क्षतिः। स्वसमभिव्याहृतपदार्थतावच्छेदकधर्मावच्छिन्ननिरूपिताधिकरणतावत्क्षणध्वंसानधिकरणक्षणसम्बन्धस्यैवोत्पत्तिपदार्थत्वात्; घट उत्पद्यत इत्यादौ घटत्वावच्छिन्ननिरूपिताधिकरणतावत्क्षणध्वंसानधिकरणक्षणसम्बन्धी घट इति बोधात्॥

यद्यपि—स्वसमभिव्याहृतपदार्थतावच्छेदकेत्यनेन घटत्वादेरुपादानेऽपि तदवच्छिन्ननिरूपिताधिकरणतावत्क्षणध्वंसानधिकरणक्षणाप्रसिद्धिरस्त्येव; घटादेः प्रवाहानादितया सर्वस्यापि क्षणस्य यत्किञ्चिद्घटाधिकरणत्वेन तादृशक्षणध्वंसाधिकरणत्वात् । **तथाऽपि**—सिद्धान्ते घटत्वस्य प्रतिव्यक्तिभिन्नतया उत्पत्त्यन्वयितावच्छेदकं यद्घटत्वं तदवच्छिन्नाधिकरणक्षणस्य पूर्वमभावादेव प्रसिद्धिसम्भवः । अत्र यत्किञ्चिद्धर्ममनिवेश्य स्वसमभिव्याहृतपदार्थतावच्छेदकधर्मस्यैव विशिष्य निवेशाच्च आत्मा जायते मृज्जायत इत्यादिर्न व्यवहारः, आत्मत्वाद्यवच्छिन्नाधिकरणक्षणध्वंसानधिकरणक्षणाप्रसिद्धेः । एवं च—स्थूलसूक्ष्मशरीरकस्य ब्रह्मणः स्थूलत्वसूक्ष्मत्वाभ्यां कार्यकारणभावोपपत्तिः; स्थूलरूपस्य निरुक्तजनिघटकत्वसम्भवात् । तथा च तदनन्यत्वाधिकरणे **भाष्यम्**—

"संस्थानस्यासत उत्पत्तावसत्कार्यवादप्रसङ्ग इति चेदसत्कार्यवादिनोऽप्युत्पत्तेरनुत्पत्तिमत्त्वे सत्कार्यवादप्रसङ्गः, उत्पत्तिमत्त्वे चानवस्था; अस्माकं त्ववस्थानां पृथक्प्रतिपत्तिकार्ययोगानर्हत्वादवस्थावत एवोत्पत्त्यादिकं सर्वमिति निरवद्यम् ॥" —इति ॥

न च—उक्तरीत्या अवस्थायाः कालसम्बन्धित्वाभावेन पूर्वोत्तरावस्थद्रव्ययोरेवोपादानोपादेयभावसिद्धावपि तच्छरीरकब्रह्मणस्तदसिद्धितादवस्थ्यमिति—वाच्यम्; एवमप्युपादानोपादेयशरीरतया ब्रह्मण उपादानोपादेयशब्दयोर्ब्रह्मणि मुख्यत्वोपपत्तेः । अत एव **शतदूषण्यां**—विशिष्टस्योपादानत्वे प्राप्ताप्राप्तविवेकेन विशेषणयोरेवोपादानोपादेयभावपर्यवसानमित्याशङ्क्य, विशेष्यस्याप्युपादानादिशब्दवाच्यत्वप्रतिक्षेपस्त्वशक्य इति समाहितम् ॥ न च—अवस्थाया उत्पत्तिमत्त्वानङ्गीकारे उपादानलक्षणे अपृथक्सिद्धिसम्बन्धावच्छिन्नकार्यता-

निवेशनस्य व्यर्थतया ब्रह्मणो विशेषणांशं प्रति कारणत्वाभावेन 'न विलक्षणत्वात्' इत्यधिकरणस्यानुत्थितिरिति—वाच्यम्; यतो वेत्यादिश्रुत्युक्ताया विशेषणांशनिरूपितकारणताया निर्वाहार्थमेवापृथक्सिद्धिसम्बन्धावच्छिन्नकार्यतानिवेशावश्यकतयोक्ताधिकरणसङ्गतेः ॥

इदं तु बोध्यम् ॥ सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणः स्थूलचिदचिद्विशिष्टं प्रति कारणत्वं नास्तीत्यस्य कोऽर्थः? स्थूलचिदचिद्विशिष्टस्य कार्यत्वाभावात्तन्निरूपितोपादानत्वं सूक्ष्मचिदचिद्विशिष्टस्य न सम्भवतीति ; अथवा तस्य कार्यत्वेऽपि तं प्रत्येतस्योपादानत्वमप्रामाणिकमिति?

आद्येऽपि—स्थूलचिदचिद्विशिष्टस्य निषेध्यभूतं कार्यत्वमुत्पत्तिमत्त्वरूपं वा, प्रागभावप्रतियोगित्वरूपं वा? नाद्यः। विशिष्टाधिकरणताघटितोत्पत्तिमत्त्वस्य पूर्वमेवोपपादनात्। न च—स्ववृत्तिध्वंसप्रतियोगिक्षणावृत्तित्वरूपस्वपूर्वक्षणावृत्तित्वस्ववृत्तित्वोभयसम्बन्धेन क्षणविशिष्टत्वरूपोत्पत्तिमत्त्वमेव कार्यताप्रयोजकं, तच्च न स्थूलविशिष्टब्रह्मणि विशेष्यीभूतब्रह्मणः पूर्वक्षणवृत्तित्वेन विशिष्टे तस्मिन् तदभावासम्भवादिति—वाच्यम्; शुद्धवह्नित्वावच्छिन्नाभावप्रतियोगितावच्छेदकताया महानसीयत्वविशिष्टवह्नित्वापर्याप्तत्ववच्छुद्धब्रह्मपर्याप्ताधेयतायास्स्थूलविशिष्टापर्याप्ततया पूर्वक्षणनिरूपितवृत्तितायाः पर्याप्तिसम्बन्धावच्छिन्नाभावस्य तत्र सम्भवेन निरुक्तोत्पत्तिमत्त्वसम्भवात्॥ न द्वितीयः। घटत्वावस्था भविष्यति, घटो भविष्यतीति द्विविधव्यवहारनिर्वाहाय एकस्यैव प्रागभावस्य घटत्वावस्थापर्याप्ता तद्विशिष्टपर्याप्ता च प्रतियोगिता द्विविधा स्वीक्रियते। तथा स्थूलावस्था भविष्यति, स्थूलशरीरकं ब्रह्म भविष्यतीति द्विविधव्यवहारनिर्वाहाय प्रागभावनिरूपितप्रतियोगिताद्वयस्वीकारस्यावश्यकत्वात्, इच्छाविषयत्वस्य प्रागभावप्रतियोगित्वव्याप्यतया बहुस्यामितीच्छानुरोधेन बहुशरीरकब्रह्मणस्तदावश्यकत्वाच्च ॥

नापि द्वितीयकल्पो युक्तः। स्थूलविशिष्टस्य कार्यत्वे तादात्म्येन तत्सम्बन्धिनि पूर्वकालावच्छेदेन तादात्म्येन सम्बन्धित्वरूपोपादानत्वस्य सूक्ष्मविशिष्टे ब्रह्मणि सर्वसिद्धत्वेन तस्य कैरप्यपलपितुमशक्यत्वात् ॥ न च—तादात्म्येन कार्याधिकरणनिरूपितपूर्वकालावच्छिन्नतादात्म्यावच्छिन्नसम्बन्धितामात्रं नोपादानतारूपं, किं त्वनन्यथासिद्धत्वघटितं; तथा च स्थूलविशिष्टं प्रति सूक्ष्मविशिष्टस्यान्यथासिद्धत्वान्नोपादानत्वं, अन्यथा स्थूलविशिष्टाकाशादिकं प्रति सूक्ष्मविशिष्टस्य तस्योपादानताप्रसङ्गादिति—वाच्यम्; अन्यथासिद्धत्वस्यानुगतानतिप्रसक्तस्यैकस्य दुर्वचत्वेन यत्र यत्र प्रामाणिकानां न कारणत्वव्यवहारस्तत्तद्भेदकूटवत्त्वस्यैवानन्यथासिद्धत्वरूपतया 'यतो वा इमानि भूतानि जायन्ते' 'यद्भूतयोनिं परिपश्यन्ति धीराः' 'सदेव सोम्येदमग्र आसीत्' इत्यादिश्रुतिभिस्सूक्ष्मविशिष्टब्रह्मणः स्थूलविशिष्टं प्रति कारणत्वस्यैव व्यवहृतत्वेन तद्भेदस्योपादानताशरीरे अनिवेशात्, आकाशादेश्च तादृशव्यवहाराभावेन अन्यथासिद्धताया एव युक्तत्वात्तद्भेदस्योपादानतागर्भे प्रवेश्यत्वात्। एतेनावस्थानां कालसम्बन्धित्वस्य कार्यकारणभावस्य च सत्त्वेऽपि न क्षतिः, अवस्थानां कार्यकारणभावेऽपि तद्विशिष्टयोरपि तथात्वस्य दुरपह्नवत्वात्। ब्रह्मण उपादानत्वे निर्विकारत्वश्रुतिविरोधपरिहारः प्रागेव प्रतिपादितः। निरुक्तोपादानत्वं च "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इत्यधिकरणे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादिभिस्सूत्रकारैरेव स्थापितम्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा च 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं स्यात्' 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' इति श्रुतिसिद्धा ॥ श्रुतेश्चायमर्थः—'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातं भवति' इति मैत्रायणीयश्रुत्यनुसारादुपादानप्रकरणानुगुण्याच्च श्रुतेन मतेन विज्ञातेनेत्यध्याहारात्, येन श्रुते-

नाश्रुतं श्रुतं भवति, येन मतेनामतं मतं भवति, येन विज्ञातेनाविज्ञातं विज्ञातं भवतीत्यर्थः। श्रुतेन येनेति तृतीयार्थोऽभेदः श्रुतपदार्थे शाब्दबोधविशेषविषयेऽन्वेति; उक्तश्रुत्यनुरोधादेवेदं सर्वमित्यप्यध्याहार्यम्; परिदृश्यमानस्थूलचिदचिच्छरीरकमिति तदर्थः। अश्रुतमित्यस्य स्थूलरूपावच्छिन्नशाब्दबोधीयविषयताशून्यमित्यर्थः। तस्य सर्वपदार्थेऽन्वयात् स्थूलावस्थावच्छिन्नशाब्दज्ञानीयविषयताशून्याभिन्नं प्रत्यक्षविषयस्थूलचिदचिच्छरीरकं ब्रह्म शाब्दबोधीयविषयताविशिष्टजगन्निमित्ताभिन्नसूक्ष्मचिदचिद्वैशिष्ट्यावच्छिन्नशाब्दबोधीयविषयताश्रयो भवतीति वाक्यार्थः। अश्रुतं श्रुतमित्यस्य स्थूलशरीरकत्वेनाश्रुतं सूक्ष्मशरीरकत्वेन श्रुतमित्यर्थात्। पूर्वमश्रुतमिदानीं श्रुतमिति तु नार्थः; विशिष्टवैशिष्ट्यावगाहिबोधे विधेये उद्देश्यतावच्छेदकसमानकालीनत्वभाननियमस्य तिलकी कर्म कुर्वीतेत्यादाविवौत्सर्गिकत्वेन तद्बाधापत्तेः। तादृशनियमभङ्गभयादेव हि 'वर्षं जपन्निदं स्तोत्रमपुत्रः पुत्रवान् भवेत्' इत्यादावपुत्रपदं पुत्रविरोधिपुत्रेच्छापरं, नञः असुर इत्यादाविव विरोध्यर्थकत्वात्, सति पुत्रे तदिच्छाया असम्भवेन तद्विरोधित्वोपपत्तेः। एवं च स्थूलसूक्ष्मचिदचिद्विशिष्टब्रह्मरूपकार्यकारणयोरभेदलाभात् 'उत तमादेशमप्राक्ष्यः' इत्यादेशपदेन कारणत्वघटितनिमित्तत्वलाभेन कार्याभिन्नत्वे सति कारणत्वरूपमुपादानत्वमुक्तं भवति। न च—उक्तप्रतिज्ञाया अभेदमात्रलाभार्थत्वे येन सर्वमिदं भवतीत्यनेनैव कार्यकारणयोरभेदलाभात् अश्रुतं श्रुतमित्यादीनां वैयर्थ्यमिति—वाच्यम्; कार्याभिन्नत्वे सति कारणत्वरूपोपादानत्वस्य तावन्मात्रेण बोधनेऽपि सूक्ष्मचिदचिद्रूपकारणतावच्छेदकावच्छिन्नविषयतानवच्छेदकत्वरूपकारणतावच्छेदकभेदस्य कार्यतावच्छेदके बोधनायाश्रुतमित्यादीनां सार्थकत्वात्। तद्बोधश्च कार्यकारणयोरत्यन्ताभेदे कारकव्यापारवैयर्थ्यमिति नैयायिकाशङ्कापरिहाराय; कारणताव-

च्छेदककार्यतावच्छेदकयोरुक्तपारिभाषिकभेदबोधने च कार्यतावच्छेदकविशिष्टस्य पूर्वमभावे तन्निष्पत्तये कारकव्यापारसार्थक्यमिति समाधानसूचनात् । तयोर्वास्तवभेदस्तु श्रुत्या बोधयितुमशक्यः, सूक्ष्मस्थूलचिदचिद्रूपयोस्तयोरवस्थाभेदेऽपि स्वरूपैक्येन भेदाभावात्, आत्मनि खल्वर इत्यादिमैत्रायणीयश्रुतावपि सप्तम्याः दाने कर्णसम इत्यादाविवाभेदार्थकत्वात्पूर्वोक्तार्थ एव पर्यवसानम् । एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमित्यादिभाष्यस्याप्येकपदस्य सूक्ष्मचिदचिच्छरीरकब्रह्मपरतया, सर्वपदस्य स्थूलसर्वशरीरकपरतया, तृतीयाया अभेदार्थकतया च सूक्ष्मचिदचिच्छरीरकब्रह्मज्ञानाभिन्नस्थूलचिदचिच्छरीरकत्वोपलक्षितब्रह्मज्ञानं प्रतिज्ञातमित्यर्थः । तथा च स्वावच्छिन्नाभिन्नवृत्तित्वस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्व स्वावच्छिन्ननिरूपितकारणतावच्छेदकत्वैतत्त्रितयसम्बन्धेन धर्मविशिष्टधर्मवत्त्वं एकविज्ञानेन सर्वविज्ञानप्रतिज्ञार्थः। येनेत्यस्यादेशपदार्थनिमित्तकारणपरत्वेन कारणत्वस्यापि तद्घटकत्वात् । मृत्पिण्डादिदृष्टान्ते उक्तत्रितयसम्बन्धेन घटत्वविशिष्टमृत्पिण्डत्वमादायोक्तप्रतिज्ञानिर्वाहः, दार्ष्टान्तिके चेयं प्रतिज्ञा स्थूलसर्वशरीरकत्वविशिष्टसूक्ष्मशरीरकत्वमादायोपपादनीया । सा च सर्वस्य कार्यत्वमन्तरा न निर्वहतीति वियदादेः कार्यत्वोपपादकतया **प्रतिज्ञाहानिरव्यतिरेकादित्यादिकमुपपन्नम्** । वियदादेः कार्यत्वानङ्गीकारे प्रतिज्ञाया अनिर्वाहात् । न च–नित्यविभूत्यादीनां अकार्यत्वेऽपि प्रतिज्ञाया अहानिवदाकाशस्याप्यकार्यत्वेऽपि प्रतिज्ञाया अहानिः प्रसज्यत इति–वाच्यम्; येनाश्रुतं श्रुतमित्यादावश्रुतादिशब्दानां नित्यविभूत्यादिव्यतिरिक्तपरत्वादुत्तरत्र सदेव सोम्येदमग्र आसीदितीदंकारगोचरस्यैव जगतस्सन्मात्रतापत्तिप्रतिपादनात् ॥

एवं—स्वज्ञानातिरिक्तसर्वद्रव्यशरीरकत्वमपि तल्लक्षणं, शरीरपद-प्रवृत्तिनिमित्तभूतं तल्लक्षणं च; तन्निष्ठज्ञानावच्छिन्नानुयोगिताकापृथ-क्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वं तं प्रति शरीरत्वम्। एतज्जीवस्येदं शरीरमित्यादौ ज्ञानावच्छिन्नानुयोगिताका-पृथक्सिद्धिसम्बन्धनिरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वावच्छिन्नं शरीरपदार्थः; तदेकदेशज्ञानावच्छिन्नानुयोगितायां षष्ठ्यन्तार्थस्यैत-ज्जीववृत्तित्वस्यान्वयात् ज्ञानावच्छिन्नैतज्जीवनिष्ठानुयोगिताकापृथ-क्सिद्धि निरूपितद्रव्यत्वसमानाधिकरणप्रतियोगित्वावच्छिन्नमिदमिति बोधः॥ यस्यात्मा शरीरं, यस्य पृथिवी शरीरमित्यादावपि बोध ऊह्यः। ईश्वरस्य तज्ज्ञानं शरीरं, चैत्रस्य तज्ज्ञानं शरीरमित्यादिव्यवहारवारणा-यानुयोगितायां ज्ञानावच्छिन्नत्वस्य, परिमाणमेतस्य शरीरमित्या-दिव्यवहारवारणाय प्रतियोगित्वे द्रव्यत्वसामानाधिकरण्यस्य प्रवेशः। श्रीभाष्योक्तलक्षणत्रयफलितमिदमेव शरीरपदप्रवृत्तिनिमित्तं, यथाश्रुते लक्षणत्रयस्य प्रवृत्तिनिमित्तत्वे शरीरशब्दस्य शक्तित्रयापत्त्या नाना-र्थकत्वापत्तेः, अन्यतमस्य प्रवृत्तिनिमित्तत्वे चाधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तानीति भाष्यविरोधात्॥ उक्तं च **न्याय-सिद्धाञ्जने**—

> "अत्रेदं चतुर्थमपि भाष्यकाराभिप्रेतं लक्षणमुच्यते। यस्य चेत-नस्य यदवस्थमपृथक्सिद्धविशेषणं द्रव्यं तत्तस्य शरीरमित्या-धेयत्वविधेयत्वशेषत्वान्यपृथक्सिद्धेरेव अवान्तरभेदा इह विव-क्षिताः॥" —इति॥

तथा च—स्वज्ञानातिरिक्तद्रव्यत्वव्यापकप्रतियोगिताकापृथक्सिद्धि-सम्बन्धनिरूपितज्ञानावच्छिन्नानुयोगिताश्रयत्वं लक्षणं फलितं, सर्व-शरीरकत्वादेव तत्तद्वाचिपदेन ब्रह्मणस्सामानाधिकरण्योपपत्त्या 'सर्वं खल्विदं ब्रह्म', 'सदेव सोम्येदमग्र आसीत्', 'तत्त्वमसि' इत्यादि-

सामानाधिकरण्यनिर्वाहः। शरीरवाचिशब्दानां शरीरिणि शक्तेर्भाष्यादिसिद्धत्वात् ॥

अत्र वदन्ति—

सर्वं खल्विदं ब्रह्मेत्यादौ सर्वपदस्य तच्छरीरकत्वावच्छिन्ने शक्त्यङ्गीकारापेक्षया सर्वपदार्थस्य ब्रह्मण्यपृथक्सिद्धिसम्बन्धेनान्वयाङ्गीकार एव युक्तः; अभेदापृथक्सिद्ध्यन्यतरसम्बन्धावच्छिन्नप्रकारताकबोधजनकत्वस्यैव सामानाधिकरण्यरूपतया अपृथक्सिद्धिसम्बन्धेनान्वयेऽपि सामानाधिकरण्यनिर्वाहात्। एवं च नीलादिपदानां गुणमात्रवाचकत्वेऽपि न क्षतिः, अपृथक्सिद्धिसम्बन्धमादायैव नीलो घट इत्यादिसामानाधिकरण्योपपत्तेः। एवं तत्त्वमसीत्यत्र त्वंपदस्य श्वेतकेतुमात्रपरत्वेऽपि न क्षतिः; तत्पदार्थस्य ब्रह्मणस्तत्रापृथक्सिद्धिसम्बन्धेनान्वयसम्भवात्, सर्वं खल्विदं ब्रह्मेत्यत्र सर्वपदस्य तच्छरीरकपरमात्मपरत्वे इदंपदार्थस्य प्रत्यक्षविषयस्य तदेकदेशे सर्वस्मिन्नन्वयस्य वक्तव्यत्वेन व्युत्पत्तिविरोधात्। संयोगावच्छिन्नक्रियारूपगमनपदार्थैकदेशसंयोगे गुणाभेदान्वयतात्पर्येण गमनं गुण इत्यादिव्यवहारवारणायाभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति पदजन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वात्। एवं तत्त्वमसीत्यादौ त्वंपदस्य श्वेतकेतुशरीरकपरमात्मपरत्वे श्वेतकेतुपदस्य श्वेतकेतुमात्रपरत्वे सम्बोधनस्थलसिद्धस्य युष्मच्छब्दसम्बोध्यवाचकपदयोस्समानार्थकत्वनियमस्य व्याघातः। न च—चैत्र त्वत्पितेत्यादौ युष्मच्छब्दस्य सम्बन्धिनि लाक्षणिकत्वेन तत्र व्यभिचारात्तादृशनियम एवासिद्ध इति—वाच्यम्; समासस्थले तादृशनियमाभावेऽपि व्यासस्थले तादृशनियमे बाधकविरहात्। तत्र सम्बोध्यवाचकश्वेतकेतुपदस्यापि तच्छरीरकपरमात्मपरत्वे प्रकृतवाक्यजन्यशाब्दबोधाश्रयत्वेनेच्छाविषयरूपविभक्त्यर्थस्य प्रकृत्यर्थे परमात्मन्यन्वयो न सम्भवति;

वक्तुरुद्दालकस्य सर्वज्ञं परमात्मानं प्रति बुबोधयिषाविरहात्, भगवांस्त्वमेव तद्ब्रवीत्विति प्रष्टारं श्वेतकेतुं प्रत्येव बुबोधयिषोत्पत्तेः। परमात्मन एव प्रष्टृत्वे प्रश्नं प्रति जिज्ञासायास्तां प्रति चाज्ञानस्य कारणतया परमात्मनोऽज्ञत्वमवर्जनीयं स्यात्। श्वेतकेतुपदस्य तच्छरीरकपरमात्मपरत्वे तदेकदेशश्वेतकेतौ विभक्त्यर्थान्वयस्तु न सम्भवति, विभक्त्यर्थसम्बोध्यत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति प्रकृतिजन्योपस्थितेर्विशेष्यतासम्बन्धेन हेतुत्वात्। अन्यथा पुत्रीं प्रति त्वत्पतिस्सुन्दर इति वक्तव्ये जामातस्त्वं सुन्दरोऽसीति वाक्यप्रयोगापत्तेः; पुत्रीपतिरूपजामातृपदार्थैकदेशपुत्र्यां तदन्वयसम्भवात्। एवं प्रतर्दनविद्यायां 'त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छम्' इत्यारभ्य, 'प्राणोऽस्मि प्रज्ञात्मा, तं मामायुरमृतमित्युपास्व' इत्यस्यास्मच्छब्दार्थेन्द्रजीवविशेष्यकापृथक्सिद्धिसम्बन्धावच्छिन्नप्राणपदार्थपरमात्मप्रकारताकोपासनस्य विधानपरत्वाङ्गीकारान्नानुपपत्तिः; अन्यथा मामित्यस्य तच्छरीरकपरमात्मपरत्वे त्वाष्ट्रमहनमित्यादावध्याहृतस्याहंपदस्य जीवपरत्वावश्यकतया वैरूप्यापत्तेः। शरीरवाचकानां शरीरिपर्यन्तत्वमित्यादिभाष्यस्य शरीरिविशेष्यकबोधजनकत्वमित्यर्थाङ्गीकारात् शरीरशरीरिभावरूपापृथक्सिद्धेस्संसर्गत्वेऽपि न विरोधः; अन्विताभिधानपक्षे भाष्यकृतां निर्भरस्य वक्ष्यमाणत्वेन संसर्गांशेऽपि शक्तिरस्तीत्यभिप्रायाद्वा ॥

—इति ॥

वस्तुतस्तु—इतरपदार्थाभेदान्वयबोधे विभक्त्यसम्बोध्यत्वादिबोधे च मुख्यविशेष्यतासम्बन्धेन पदजन्योपस्थितेर्हेतुत्वमित्यत्रापृथक्सिद्धिसम्बन्धातिरिक्तसम्बन्धावच्छिन्नप्रकारताभिन्नत्वस्य मुख्यत्वरूपत्वात्सर्वं खल्विदं ब्रह्मेत्यादौ सर्वपदस्य तच्छरीरकपरत्वेऽपि इदंपदार्थस्य तदेकदेशे तत्त्वमसि श्वेतकेतावित्यत्र त्वंपदस्य विशिष्टपरत्वेऽपि

तदेकदेशे सम्बोध्यत्वस्य चान्वयो न विरुद्धः । एवं–राज्ञःपुरुष इत्यादौ यथा स्वत्वस्य संसर्गत्वापेक्षया षष्ठयास्तत्र शक्तिस्वीकारे लाघवं, यथा च जानातीत्यादावाश्रयत्वस्य संसर्गत्वापेक्षया आख्यातार्थतापक्षे लाघवं, तथाऽत्राप्यपृथक्सिद्धेस्संसर्गत्वापेक्षया प्रकारत्वे लाघवं सम्भवतीति शरीरवाचकानां शरीरिणि शक्तिरेव युक्तेति गुरुसामानाधिकरण्यवादे प्रपश्चितम् ॥

इत्यनन्तार्यकृतौ सिद्धान्तसिद्धाञ्जने

ईश्वरपरिच्छेदस्तृतीयः ॥

अथ नित्यविभूतिर्निरूप्यते ॥

रजोरहितत्वे सति तमोरहितत्वे सति वा सत्त्ववत्त्वं, स्वयंप्रकाशत्वे सति सत्त्ववत्त्वं वा, चेतनधर्मभूतज्ञानान्यत्वे सति स्वयं प्रकाशत्वं, धर्मभूतज्ञानान्यत्वे सति पराक्त्वं वा तल्लक्षणम् । लक्षणत्रयेऽपि प्रकृतिवारणाय सत्यन्तं, जीवादिवारणाय विशेष्यम्; चतुर्थलक्षणे जीवेश्वरधर्मभूतज्ञानवारणाय सत्यन्तं, कालवारणाय विशेष्यम्। व्यावृत्तिः पञ्चमेऽप्यूह्या। न्यायसिद्धाञ्जने तु–निश्शेषाविद्यानिवृत्तिदेशविजातीयान्यत्वमपि तल्लक्षणमुक्तम्। निश्शेषाविद्याध्वंसोत्पत्तिं प्रत्याधेयतासम्बन्धेनावच्छेदकीभूतो यो देशस्तदवृत्तिद्रव्यविभाजकोपाधिमद्भिन्नत्वे सति द्रव्यत्वं नित्यविभूतिलक्षणमिति तदर्थः। न च–तादृशदेशवृत्तिद्रव्यविभाजकोपाधिमत्त्वमेव लक्षणं युक्तं, द्रव्यविभाजकोपाधिनिवेशाच्च न भगवद्विग्रहादावव्याप्तिरित्यभावद्वयनिवेशो व्यर्थ इति–वाच्यम्। तदवृत्तिद्रव्यविभाजकोपाधिशून्यत्वघटितलक्षणे तद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वस्यानिविष्टत्वेन वैयर्थ्या-

भावात्, प्रकृतित्वकालत्वाद्युपाधिपञ्चकविषयकमेकं ज्ञानं तद्व्यक्तित्वेन निवेश्य ताद्दशज्ञानव्यक्त्यवच्छिन्नावच्छेदकताकभेदानिवेशवैयर्थ्यशङ्काया एवाप्रसक्तेश्च । न च—रजोरहितत्वं तमोरहितत्वं च नित्यविभूतावसिद्धमिति तद्घटितलक्षणयोरव्याप्तिरिति—वाच्यम् ; 'आदित्यवर्णं तमसः परस्तात्', 'ते ह नाकं महिमानस्सचन्ते', 'क्षयन्तमस्य रजसः पराके' इत्यादिभिस्तयोस्सिद्धेः ; तमस इत्यस्य तमोगुणविशिष्टपरतया परस्तादित्यस्य भिन्नदेशवृत्तित्वपरतया आदित्यवर्णे भगवद्विग्रहे तमोगुणवद्भिन्नवृत्तित्वबोधनेन तदधिकरणीभूतनित्यविभूतेस्तमोगुणवद्भिन्नत्वस्यावश्यकत्वात् । न च—ब्रह्मस्वरूपस्य तमोगुणवद्भिन्नत्वपरा उक्तश्रुतिः, आदित्यवर्णमित्यस्य स्वप्रकाशमित्यर्थादिति—वाच्यम्; तथा सत्यादित्यवर्णमित्यस्यास्वारस्यापत्तेः, अस्तातिप्रत्ययस्य वृत्तित्वपरतया ताद्दशगुणवद्भिन्नत्वमात्रबोधासम्भवाच्च ॥

यद्यपि—"दिक्छब्देभ्यस्सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः" इत्यस्तातिप्रत्ययस्य प्रथमान्तादपि विधानसत्त्वान्निरर्थकत्वमावश्यकमेव । पुरस्ताद्वसतिः पुरस्तादागतः पुरस्ताद्रमणीय इति तदुदाहरणात्, 'स एवाधस्तात्स उपरिष्टात्स पश्चात्सपुरस्तात्स दक्षिणतस्स उत्तरतस्स एवेदं सर्वम्' इति **भूमविद्यायां** स एवेदं सर्वमित्युपसंहारानुरोधेन स एवाधस्तादित्यादेरधोदेशस्स एवेत्यर्थाङ्गीकारावश्यकत्वात् । तथा च प्रकृतेऽपि तमसः परत्वं ब्रह्मण एव बुध्यते । **तथाऽपि**—अधश्शब्दस्यार्थान्तरेऽनुशासनप्रयोगयोस्सत्त्वेऽप्यर्थान्तरापेक्षया आनन्तर्यरूपार्थे स्वारस्यवदस्तातिप्रत्ययान्तस्य किञ्चिद्देशवृत्तित्वपरत्व एव स्वारस्यात्, गवादिशब्दस्यानेकार्थत्वेऽपि बाधकविरहे सास्नावद्व्यक्तेः परित्यागादर्शनात्तमसः परस्तादित्यस्य तद्देशवृत्तित्वपरत्वमेव युक्तम् । एवं क्षयन्तमस्येत्यादेः रजोगुणवद्भिन्नदेशे वसन्तमित्यर्थः । न च—जापकोपाख्याने मुक्तप्राप्यस्थानस्य 'द्वाभ्यां

मुक्तं, त्रिभिर्मुक्तम्' इति गुणत्रयविरहबोधनात्तत्र सत्त्ववत्त्वमपि न सम्भवतीति—वाच्यम् ;

"शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् ।
अथातो ब्रह्मणो लोकः शुद्धसत्त्वस्सनातनः ॥"—

इत्यादि **पाद्मपुराण**वचनैस्तादृशलोके सत्त्वसिद्धौ उक्तवचनस्य त्रित्वावच्छिन्नावच्छेदकताकभेदपरतया घटवति घटपटोभयत्वावच्छिन्नावच्छेदकताकभेदवद्विरोधात्, 'स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणम्' इति प्रधानगतसत्त्वस्य विजातीयत्वेन तद्भेदस्याबाधाच्च ॥

यत्तु—'तदक्षरे परमे व्योमन्' इत्यक्षरशब्दप्रयोगात्, 'आदित्यवर्णं तमसः परस्तात्' इति तमःपरत्वोक्त्या चाव्यक्ततमसोरन्तरालेऽधीतः प्रकृतिपरिणामविशेष एव मुक्तानामीश्वरस्य च भोगस्थानतया आम्नायते; शुद्धसत्त्वव्यपदेशस्य च रजस्तमसोरभिभूततयोपपत्तेरतिरिक्ताप्राकृतस्थानकल्पने गौरवात् । तत्रापि पृथिव्यादिभेदाभ्युपगमेन प्राकृतत्वज्ञानाच्च, अन्यथा तत्त्वसङ्ख्याधिक्यप्रसङ्गात्; 'तं षड्विंशकमित्याहुस्सप्तविंशमथापरे' इति श्रुत्या कालस्यान्तर्भावानन्तर्भावाभिप्रायेण षड्विंशत्वसप्तविंशत्वयोः प्रतिपादनेन नित्यविभूतेरतिरिक्तत्वे तादृशश्रुतिविरोधात्। एवं 'सदेव सोम्येदमग्र आसीत्', 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्', 'नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत्' इत्यादि श्रुतिविरोधश्च; तत्रैकपदस्य समानकालीनविभिन्नव्यवहारजनकजन्यधर्माभावरूपनामरूपविभागाभावपरत्वात्, स्वाप्रयोज्यव्यवहारप्रयोजकत्वकालिकविशेषणत्वैतदुभयसम्बन्धेन जन्यधर्मविशिष्टजन्यधर्माभावस्यैकपदनिष्कृष्टार्थत्वात् । महत्त्वादिविशिष्टप्रकृतिगतसततपरिणामरूपाविशदावस्थामादायासम्भववारणाय कालिकसम्बन्धनिवेशः; चित्त्वाचित्त्वा दि

वारणाय जन्यत्वनिवेशः; अभावश्च स्वाश्रयापृथक्सिद्धिसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन सम्बन्धान्तरावच्छिन्नताद्दशधर्माभावस्येदानीमपि सत्त्वेऽपि न क्षतिः, 'नित्यविभूतेरतिरिक्तद्रव्यात्मिकायास्तद्दशायामपि सत्त्वे च तद्गतानन्तधर्माणामुक्तसम्बन्धेन प्रलयकालेऽपि ब्रह्मणि सत्त्वेनैकत्वव्याघातात् । लीलाविभूत्यपेक्षयानित्यविभूतेस्त्रिगुणत्वेन तत्सत्तादशायां लीलाविभूत्यभावादेकत्वव्यवहारसमर्थनस्य मन्दत्वात् । वियदादेरेकैकस्याकार्यत्वे प्रतिज्ञाहानिमुद्भावयतां सूत्रकृतां ताद्दशानेकतत्त्वात्मिकाया अतिरिक्ताया नित्यविभूतेस्सत्त्वे तत्र प्रतिज्ञाहानेरवारणस्यानुचितत्वात् । एवं–'एतस्मादात्मनस्सर्वे लोकास्सर्वे देवास्सर्वाणि भूतानि व्युच्चरन्ति' इति श्रुतेस्सर्वलोकोत्पत्तिप्रतिपादिकाया विरोधश्च । तस्मात्प्रकृतेरक्षरत्वावस्थापन्नाया एव नित्यविभूतिरूपेण परिणामः; 'तदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात्' इत्यादावव्यक्तशब्दोऽपि तद्धेतुभूताक्षरपर एव, तमसः परस्तादित्युक्तेरतो न विरोधः—**इति यादवप्रकाशमतम्** ॥

तन्न–'अपुनर्भवाय कोशं भिनत्ति', 'कोशं भित्वा शीर्षकपालं भिनत्ति' इत्युपक्रम्य, 'पृथिवी भिनत्त्यापो भिनत्त्यव्यक्तमक्षरं भिनत्ति मृत्युं भिनत्ति' इति **सुबालश्रुत्या** ब्रह्माण्डतदावरणाद्बहिर्भूतस्य तल्लोकस्य अक्षरभेदनानन्तरं प्राप्यत्वेनाभिहितस्याक्षरात्मकत्वासम्भवात्, शीर्षकपालं भिनत्तीत्यभिधाय पृथिव्यादिभेदनस्याभिहितत्वेन शरीरानुप्रविष्टानामेव पृथिव्यादीनामव्यक्ताक्षरतमसां च भेदनं तत्राभिधीयते; नावरणरूपाणामिति वक्तुमशक्यत्वात् । **पाद्मपुराणोत्तरखण्डे**—

"त्रिपाद्व्याप्तिः परं धाम पादोऽस्येहाभवात्पुनः ।
त्रिपाद्विभूतिर्नित्या स्यादनित्यं पादमैश्वरम् ॥
नित्यं तद्रूपमीशस्य परं धाम्नि स्थितं शिवम् ।
अमृतं शाश्वतं दिव्यं सदा यौवनमास्थितम् ॥"—

इत्यारभ्य, सप्तावरणावेष्टिताण्डकटाहादिवृत्तान्तं प्रकृत्यादिस्वरूपं च विस्तरशोऽभिधाय;

"प्रधानपरमव्योम्नोरन्तरे विरजा नदी ।
वेदाङ्गस्वेदजनिततोयैर्विस्राविता नदी ॥
तस्याः पारे परव्योम्नि त्रिपाद्भूतिस्सनातनी ।
अमृतं शाश्वतं नित्यमनन्तं परमं पदम् ॥
शुद्धसत्त्वमयं दिव्यमक्षरं ब्रह्मणः पदम् ।
अनेककोटिसाहस्राग्निवर्चं ध्रुवमव्ययम् ॥
सर्ववेदमयं शुभ्रं सर्गप्रलयवर्जितम् ॥"—

इत्यादिना वैकुण्ठलोकस्य नित्यत्वप्रकृत्युत्तीर्णत्वयोरभिधानेन तस्य प्रकृतिपरिणामत्वासम्भवात् । 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः' इति श्रुत्या, 'पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतम्' इत्यादौ च प्रलये भगवद्देहस्य साक्षात् स्थित्युक्त्या नित्यविग्रहावश्यकत्वेन तद्गताकुञ्चनप्रसारणादिजन्यधर्मद्वयमादाय निरुक्तैकत्वानुपपत्तिवारणाय शुद्धसत्त्वावृत्तिविभिन्नव्यवहारजनकानेकधर्माभावस्यैवैकत्वरूपत्वावश्यकतया एकमेवेत्यादिश्रुतेरविरोधात्, बहुस्यामित्युत्तरवाक्यगतबहुत्वविरोध्येकत्वस्यैव तत्र विवक्षितत्वात्, नित्यविभूतौ बहुत्वस्य सर्वदा सिद्धत्वेन इच्छाविषयत्वासम्भवेन प्रकृतिगतबहुत्वस्यैवेच्छाविषयताया वक्तव्यत्वेनैकत्वस्यापि तत्प्रतिकोटिभूतस्य प्रकृतिगतधर्ममादायैव वक्तुमुचितत्वात् ॥ न च—नित्यविभूतिमादाय बहुशरीरकत्वस्य सर्वदा सत्त्वे इच्छाविषयत्वानुपपत्त्या तद्दशायां तदपि नास्तीति निश्चीयत इति—वाच्यम्; तेजोऽप्सृष्ट्यनन्तरमपि 'बह्व्यः स्याम प्रजायेमहि' इति सङ्कल्पस्य श्रुतिसिद्धत्वेन स्रक्ष्यमाणगतबहुत्वस्यैवेच्छाविषयताया आवश्यकत्वेन नित्यविभूतिसत्त्वेऽप्यविरोधात् । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अपि न विरोधः, यथा सोम्यैकेन मृ-

त्पिण्डेनेति दृष्टान्ते सर्वं मृण्मयमित्यनेन यथैकमृत्पिण्डकार्याणामेव ग्रहणं, तथा ब्रह्मकार्याणामेव तत्र ग्रहणेऽपि नित्यत्वेन सिद्धायाः नित्यविभूतेरग्रहणे तद्विरोधाप्रसक्त्या सूत्रकारैस्तच्छङ्कापरिहारयोरकरणोपपत्तेः ॥ **महाभारते**—

"अभयं चानिमित्तं च न च क्लेशभयावृतम् ।
द्वाभ्यां मुक्तं त्रिभिर्मुक्तमष्टाभिस्त्रिभिरेव च ॥
अप्रधर्षं महानन्दं विशोकं विगतक्लमम् ।
ईदृशं परमं स्थानं निराशास्ते च तादृशाः ॥
कालं स पचते तत्र न कालस्तत्र वै प्रभुः ।"

आरण्यपर्वणि—

"योगसिद्धा महात्मानस्तमोमोहविवर्जिताः ।
तत्र गत्वा पुनर्नेमं लोकमायान्ति भारत ॥
स्थानमेतन्महाराज ध्रुवमक्षरमव्ययम् ॥"—

इत्यादिभिर्बहुधा नित्यविभूतेस्सूत्रकारैरेव प्रपञ्चितत्वेन तत्र तेषामनभ्युपगमस्य वक्तुमशक्यत्वात् ॥

अथैवं—नैयायिकमतनिरासावसरे "रूपादिमत्त्वाच्च विपर्ययो दर्शनात्", "उभयथा च दोषात्" इत्याभ्यां सूत्राभ्यां परमाणूनां रूपादिमत्त्वे अनित्यत्वप्रसङ्गस्य तदभावे च द्व्यणुकादौ कारणगुणपूर्वकगुणानुत्पत्त्या जगतो नीरूपत्वापादनरूपदूषणस्य च अभिधानासङ्गतिः, नित्यविभूतेर्भगवद्विग्रहस्य च नित्यत्वाभ्युपगमे रूपस्यानित्यत्वव्याप्यताभङ्गात् । एवं—"प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे" इति सूत्रस्य चासङ्गतिः; तत्र ब्रह्मणः शिरःपक्षपुच्छाद्यवयवभेदसत्त्वे उपचयापचययोरापादनान्नित्यविग्रहसत्त्वे च तत्र शिरःपक्षादिसत्त्वेऽप्युपचयापचययोरभावेन सावयवत्वस्योपचयापचयव्याप्यत्वाभावेनोक्तापादनासम्भवात्—**इति चेन्न** ॥ स्वमते रूपादिमत्त्व-

स्यानित्यत्वव्याप्यताविरहेऽपि तन्मते तद्व्याप्यत्वाविघातेन तन्मतसिद्धार्थमादाय तन्मते दूषणाभिधानस्योपपत्तेः, "न च पर्यायादप्यविरोधो विकारादिभ्यः" इति सूत्रे आत्मनस्स्वमते सङ्कोचविकासरूपावस्थाविरहेऽपि जैनमतसिद्धार्थमादाय तन्मते दूषणाभिधानदर्शनात्; प्रियशिरस्त्वाद्यप्राप्तिरित्यत्र च न कालभेदेन वृद्धिह्रासपरावुपचयापचयशब्दौ, किं तु प्रकोष्ठाङ्गुल्योरिव कालभेदानपेक्षपीनत्वकृशत्वरूपोपचयापचयपराविति. सावयवत्वस्य तादृशोपचयापचयव्याप्यत्वे व्यभिचारविरहाद्ब्रह्मणस्सावयवत्वे प्रदेशभेदेन स्थूलत्वकृशत्वयोरेवापादनस्याभिमतत्वात्, अस्थूलमनण्विति श्रुतिविरोधेन तत्रेष्टापत्त्यसम्भवात्। स्पष्टं चेदं टीकायां। तथा च—अप्राकृतलोकस्सूत्रकृदनुमत एव। अक्षरशब्दस्वारस्यादपि न तल्लोकस्य प्रकृतिपरिणामरूपत्वं; न क्षरतीत्यक्षरमिति योगार्थस्य नित्यविभूतौ सम्भवात्, लोकत्वरूपावस्थाविशिष्टस्यापि प्रलयादौ नाशाभावेन नाशप्रतियोगितापर्याप्त्यनधिकरणत्वस्य तादृशलोकत्वविशिष्टे सत्त्वेनाक्षरशब्दस्य तत्रैव स्वारस्यात्, "अक्षरमम्बरान्तधृतेः" इत्यत्र योगमादायैवाक्षरशब्दस्य ब्रह्मपरताव्यवस्थापनात्तद्वदिहापि सम्भवात्, परमे व्योमन्निति समभिव्याहारस्य प्रकृतिपरिणामपरत्वे बाधकस्य सत्त्वाच्च॥ न च नित्यविभूतेरतिरिक्तत्वे सप्तविंशमथापर इत्युक्ततत्त्वसङ्ख्याविरोधः, नित्यविभूतेरनङ्गीकारेऽपि गुणक्रियादिकमादाय तत्त्वसङ्ख्याविरोधस्य जागरूकत्वात्, द्रव्याणामेव परिगणनमित्यङ्गीकारेऽपि धर्मभूतज्ञानस्य द्रव्यस्याधिकस्य सत्त्वेन तद्विरोधस्य दुष्परिहरत्वात्॥ न च—जीवस्य धर्मभूतज्ञानविशिष्टत्वेन तत्त्वपङ्क्तौ निवेशाद्विशेष्याणामेव परिगणनाद्धर्मभूतज्ञानस्य विशेषणत्वान्न सङ्ख्याविरोध इति—वाच्यम्; तथा सति नित्यविभूतेरपीश्वरविशेषणतयैव प्रवेशेन तद्विरोधाभावात्॥

सा च विभूतिर्ज्ञानानन्दात्मिका, 'ज्ञानानन्दमया लोकाः' इत्यादि प्रमाणात् । **रहस्याम्नाये** 'किमात्मिका भगवतो व्यक्तिः' इति भगवद्विग्रहस्य प्रकारे पृष्टे—'यदात्मको भगवांस्तदात्मिका व्यक्तिः' ; 'किमात्मको भगवान्' 'ज्ञानात्मको भगवान् शक्त्यात्मको बलात्मक ऐश्वर्यात्मकः' इत्याद्युत्तरदर्शनेन दिव्यमङ्गलविग्रहरूपस्य शुद्धसत्त्वद्रव्यस्य ज्ञानात्मकत्वसिद्धेश्च ॥

अत्र केचित्—उक्तरहस्याम्नायानुरोधाद्विग्रहस्य ज्ञानात्मकत्वस्वीकारे षाड्गुण्यरूपत्वमपि दुर्वारं; तस्मिन्नेव शास्त्रे सहपाठात्, इष्टापत्तौ च चेतनत्वप्रसङ्गात् । न च—तत्रापीष्टापत्तिरिति—वाच्यम्, जीवेश्वरविकल्पबाधात्, षाड्गुण्यात्मकत्वस्यौपचारिकत्वे च ज्ञानात्मकत्वेऽपि तथात्वस्य दुर्वारत्वात् । अतस्त्रिगुणविभूतिरिव नित्यविभूतिरपि जडैव, निश्शेषाविद्यानिवृत्तिपूर्वकनिरवधिकज्ञानविकासस्थानतया ज्ञानत्वोपचार इति युक्तम् । विफलं च नित्यविभूतेस्स्वयंप्रकाशत्वकल्पनं, नित्यमुक्तेश्वराणां सर्वविषयकसाक्षात्कारसत्त्वेन तेषां तेनैव तद्भानात्, बद्धानां च शास्त्रादिजन्यपरोक्षज्ञानेन तद्भानात् ॥ न चैवं—जीवस्वरूपस्यापि स्वप्रकाशत्वं न स्यात्, तस्यापि धर्मभूतज्ञानेनैव भानोपपत्तेरिति—वाच्यम् ; सुषुप्त्यवस्थायां धर्मभूतज्ञानविरहेऽप्यात्मनो भासमानतया स्वप्रकाशताया युक्तत्वेऽपि नित्यविभूतेः क्वापि ज्ञानान्तरविगमदशायां भानाभावेन तत्कल्पनस्यायुक्तत्वात् । एवं नित्यविभूतेरनन्तानां गोपुरमण्टपप्रासादादीनां ज्ञानपरिणामत्वाभ्युपगमे अल्पीयसां लीलाविभूतिस्थानां तेषां ज्ञानपरिणामत्वस्य कैमुतिकन्यायेनाङ्गीकर्तुं शक्यतया योगाचारमतनिराकरणानुपपत्तिः ; ततश्च तन्मतनिराकरणार्थं प्रवृत्तस्य यत्र ज्ञानत्वं तत्र स्वभिन्नार्थविषयकत्वमिति व्याप्तिप्रतिपादनपरस्य "नाभाव उपलब्धेः" इति सूत्रस्य, यत्र स्वभिन्नार्थविषयकत्वाभावः तत्र ज्ञानत्वाभाव इति व्यतिरेकव्याप्ति-

प्रतिपादनपरस्य "न भावोऽनुपलब्धेः" इति सूत्रस्य चासङ्गतिः ; नित्यविभूतौ ज्ञानत्वसत्त्वेऽपि स्वभिन्नार्थविषयकत्वाभावेन व्याप्तिद्वयेऽपि व्यभिचारात्। जागरितप्रत्ययः स्वभिन्नार्थशून्यः, ज्ञानत्वात्, स्वाप्नज्ञानवत्—इत्यनुमाने बाधितत्वादिदोषजन्यत्वरूपोपाधिप्रतिपादनपरस्य "वैधर्म्याच्च न स्वप्नादिवत्" इत्यस्य चासङ्गतिः ; नित्यविभूत्यात्मकज्ञाने स्वभिन्नार्थशून्यत्वसत्त्वेऽपि बाधितत्वादेरभावेन साध्यव्यापकताभङ्गात्। एवं नित्यविभूतेरजडत्व एव प्रथमसूत्रटीकास्वारस्यम्। तथा च—'**संविन्नाम काचिन्निराश्रया निर्विषया वा अत्यन्तानुपलब्धेर्न सम्भवति**' इति भाष्यप्रतीकमुपादाय **टीका**—

"ननु कथं विषयाश्रयशून्यज्ञानाभावः, स्वरूपज्ञानं विषयाश्रयशून्यं त्वन्मते। उच्यते। स्थविष्ठमिदं चोद्यं, किं त्वया ज्ञातुरेव ज्ञानशब्दवाच्यस्याजडत्वनित्यत्वादिकं विषयाश्रयशून्यत्वं नित्यत्वादिकं च साध्यते, तत्सिद्धसाधनम्। यदि ज्ञातृव्यतिरिक्तस्य ज्ञानस्य, तर्हि ज्ञातृव्यतिरिक्तं विषयाश्रयरहितं ज्ञानं शून्यमिति ब्रूमः, ज्ञातृज्ञेयतदवच्छिन्नज्ञानस्वरूपव्यतिरिक्तं ज्ञानमनुपलम्भनिरस्तम् ॥" —इति ॥

तस्मान्नित्यविभूतिर्जडैव ॥ —इति वदन्ति ॥

परे तु—नित्यविभूतिरजडैव ; उक्तरहस्याम्नायाद्यनुरोधात्, शक्त्याद्यात्मकत्वादिवत् ज्ञानात्मकत्वस्य मुख्यत्वे बाधकविरहात्, 'स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणम्' इत्युपबृंहणानुरोधाच्च, उक्तरीत्या प्रमाणसिद्धे स्वप्रकाशत्वे तद्वैयर्थ्यस्याकिञ्चित्करत्वात् ; अन्यथा धर्मभूतज्ञानेनैव सर्वकार्योत्पत्तावात्मकल्पनस्य व्यर्थतया तस्याप्यप्रसिद्धिप्रसङ्गात् ; आत्मनि व्यभिचारवारणाय प्रमाणजन्यज्ञानत्वं यत्र तत्र स्वभिन्नार्थविषयत्वमित्यादिव्याप्तिस्वीकारेण नित्य-

विभूतौ व्यभिचाराप्रसक्त्या उक्तसूत्रविरोधविरहात्, प्रमाणतदाभासान्यतरजन्यज्ञानत्वविशिष्टसाध्यव्यापकत्वस्य बाधितत्वरूपोपाधौ सत्त्वेन वैधर्म्याच्चेत्यस्यापि न विरोधः ॥ —इत्याहुः ॥

सा च पञ्चोपनिषत्प्रतिपाद्यानि पञ्च महाभूतानि एकादशेन्द्रियाणीति षोडशतत्त्वात्मिका ॥ * * * *

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य

श्रीमदनन्तार्यवर्यस्य कृतिषु

सिद्धान्तसिद्धाञ्जने

नित्यविभूतिपरिच्छेदो यावत्सम्पादितः ॥

॥ श्रीः ॥

विधिसुधाकर.

...शूरमहाराजाधिराजमहास्थ...

शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः

पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितः ।

विद्वद्वरैः परिशोध्य

म. अ. अनन्तार्येण

प्र. भ. तो. नरसिंहार्येण च

कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायाम्

प्राकाश्यं नीतः ॥

१८९९

मूल्यं रु. १—०—०

॥ श्रीः ॥

विधिसुधाकरः

श्रीमद्रामानुजार्यं श्रुतिशिखरशिखाधाविमेधाविलासैः
प्रोद्यद्व्याहारगुम्भैर्विदलितकुमताडम्बरं तं भजामि।
यद्भाष्याम्भोधिगर्भप्रसृमरसुमहायुक्तिवीचीविहारा
वेलान्ते विक्षिपन्ति प्रतिकथकघटादूषणालीतृणानि ॥

शेषार्यवंशवार्धीन्दुरनन्ताचार्यकोविदः।
नत्वा नाथादिमाचार्यान् चक्रे विधिसुधाकरम् ॥

विधिनिषेधार्थवादरूपेण वाक्यं त्रिविधम्। तत्र प्रवर्तकं वाक्यं विधिः; 'ओदनकामः पचेत', 'स्वर्गकामो यजेत' इत्यादिलौकिकालौकिकवाक्यानां प्रवृत्तिहेतुभूतकृतिसाध्यताबोधद्वारा प्रवर्तकत्वात्॥

अथ—'ब्रह्मविदाप्नोति परं' इत्याद्यर्थवादानामपि फलसाधनताबोधद्वारा प्रवर्तकत्वात्तत्रातिप्रसङ्गः। न च–कृतिसाध्यताबोधकवाक्यत्वं विधित्वं, तच्च नार्थवादानां–इति वाच्यम्; कृत्यर्थकधातुघटिते 'पाकं कुर्वीत', 'यागं कुर्वीत' इत्यादावव्याप्तेः, तत्र धात्वर्थकृतौ कृतिसाध्यत्वस्य बाधेन लिङा तद्बोधासम्भवात्। न च–तत्र धातुना कृतिः, द्वितीयया च साध्यत्वरूपं कर्मत्वं प्रतीयत इति तादृशवाक्यस्य कृतिसाध्यताबोधकत्वं अनपवादं; तत्र विषयत्वमात्रस्य

द्वितीयार्थत्वे पाकानुपधायकतद्विषयककृत्युत्तरकाले पाकं चकारेत्यादिप्रयोगवारणाय साध्यताख्यविषयताया एव तदर्थत्वावश्यकत्वादिति–वाच्यम्; तथा सति 'पाकं करोति', 'यागं करोति' 'घटं करोति' इत्यादिवाक्येष्वतिव्याप्तेः। उक्तरीत्या तत्रापि कृतिसाध्यताबोधकत्वसत्त्वात्॥ —इति चेत्॥

मैवम् ॥ अयमेतदकरणे प्रत्यवायभाग्भवेदित्याकारकेच्छारूपा भगवदाज्ञा पुरुषान्तराज्ञा वा तदुभयं प्रत्यवायप्रायोजकीभूताभावप्रतियोगिप्रवृत्तिविषयकाप्ताज्ञात्वेनानुगमय्य तादृशाप्ताज्ञाबोधकवाक्यत्वमेव विधिलक्षणम्। 'अहरहस्सन्ध्यामुपासीत' इत्यादौ निरुक्तेच्छारूपभगवदाज्ञा लिङर्थः। 'कर्ता चाख्यातार्थः' इति निरुक्ताज्ञाविषयसन्ध्योपासनकर्ता ब्राह्मण इति बोधः। तादृशबोधानन्तरं च निरुक्ताज्ञाविषयत्वेन हेतुना प्रत्यवायप्रयोजकीभूतस्वानुकूलकृतिमत्त्वसम्बन्धावच्छिन्नाभावप्रतियोगित्वस्य सन्ध्यावन्दनादावनुमित्या तत्र प्रवृत्त्युपपत्तिः। कृतिसाध्यताज्ञानस्येव प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वज्ञानस्यापि अन्वयव्यतिरेकाभ्यां प्रवृत्तौ हेतुत्वात्। धात्वर्थोपासनस्याख्यातार्थकर्त्रैकदेशकृतौ साध्यतासम्बन्धेनान्वयेन कृतिसाध्यताया अपि सन्ध्यावन्दने भानात्। कृतिसाध्यत्वप्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वयोः ज्ञानेऽपि बलवदनिष्टानुबन्धित्वज्ञाने प्रवृत्त्यनुदयात् तज्ज्ञानस्याप्यपेक्षितत्वे तु निरुक्ताज्ञाविषयत्वेन बलवदनिष्टाननुबन्धित्वस्यापि अनुमानं बोध्यम् ॥

न च–निरुक्ताज्ञाविषयत्वे लिङश्शक्तिं कल्पयित्वा तेन प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वबलवदनिष्टाननुबन्धित्वयोरनुमानाङ्गीकारापेक्षया तयोरेव लिङश्शक्तिकल्पनमुचितम्; आक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यतायाश्श्रीभाष्यसिद्धत्वादिति–वाच्यम्। उभयार्थेऽपि शक्तिसद्भावस्थले हि तन्न्यायस्य प्रवृत्तिः, लिङादेस्तु

निरुक्ताज्ञार्थकत्वमेव ॥ विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्, लोट् च, लिङर्थे छन्दसि लेट्—इत्यादिपाणिन्यनुशासनेन सिद्धम् । तत्र विधिः प्रेरणमिति वैयाकरणैर्व्याख्यातत्वात् । प्रेरणं हि शासनमेव ॥

उक्तं च **भट्टपराशरपादैः**—"त्रयी वृद्धास्तत्तद्विधिरपि भवत्प्रेरणम्" इति । "रक्षाकूतनिवेदनश्रुतिरसौ त्वन्नित्यशास्तिस्ततः" —इति ॥

श्रीभाष्येऽप्यभिहितं—'स्वशासनावबोधि शास्त्रं प्रदिश्य'—इति ।

उक्तं च **नारायणाचार्यैः** ॥

"आप्तस्य हितकामस्य नियोगं केचिदूचिरे ।
भाष्यकारोऽपि भगवानेतमेवान्वमन्यत ॥" —इति ॥

द्रमिडभाष्येऽप्युक्तं—"स्वशासनानुवर्तिनो ज्ञात्वा"—इति ॥

शास्त्रसिद्धं चेदं—

श्रुतिस्स्मृतिर्ममैवाज्ञा यस्तामुल्लङ्घ्य वर्तते ।
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ॥"

—इति वचनात् ॥

प्रपञ्चितं चैतत् **गीतायां**—

"ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धिनष्टानचेतसः ॥"

—इति स्वाज्ञानुवर्तिनां प्रशंसां तद्विपरीतानां च निन्दां च कृत्वा, स्वाज्ञानुपालनमकुर्वतामासुरप्रकृत्यन्तर्भावपूर्वकमधर्मगत्यभिधानात् ।

सूचितं चैतज्जैमिनिना—"चोदनालक्षणोऽर्थो धर्मः" इति । आज्ञाविषयो धर्म इत्यर्थः, चोदनाशब्दस्याज्ञापरत्वात् ॥

उक्तं च शाबरभाष्ये—

"आचार्यचोदितः करोमीति हि दृश्यते" —इति ॥

किं च–नित्यनैमित्तिककर्मविधायकशास्त्रगतलिङादेर्निरुक्ताज्ञार्थकत्वाभावे तयोराज्ञाविषयत्वासिद्ध्या तदकरणस्य प्रत्यवायजनकत्वानुपपत्तिः, तदाज्ञाविषयाकरणस्यैव तन्निग्रहजनकताया लोकसिद्धत्वात् । नित्यकर्माभावत्वेन नैमित्तिककर्माभावत्वेन च प्रत्यवायं प्रत्यपूर्वतया हेतुत्वकल्पने च गौरवम् । प्रत्यवायस्य भगवन्निग्रहरूपत्वं च श्रीभाष्यादिषु स्थापितम् । एवं यस्तु राजाज्ञायां सत्यामपि तामज्ञात्वा स्वत एव पाकादाविष्टसाधनत्वादिबुद्ध्या प्रवृत्तस्तस्य पाके वर्तमानतादशायां चैत्रः पचेदिति प्रयोगस्यापत्तिः । यस्तु ज्योतिष्टोमादिकं तपसा साक्षात्कृत्य प्रवृत्तः, ज्योतिष्टोमेन स्वर्गकामो यजेतेति शास्त्रस्य तद्विषयत्वेऽपि प्रामाण्यापत्तिश्च । न चेष्टापत्तिः । यस्तु विधिवाक्यादेव प्रवर्तते तद्विषयत्व एव विधेः प्रामाण्यमिति सिद्धान्तात्, तदीयपाकादावपि राजादिनिग्रहरूपप्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वस्याबाधात् । ज्योतिष्टोमादीनां साक्षात्कारश्च 'स एतान्मरुत्वतीयानात्मस्मरणानपश्यत्तानगृह्णीत" इत्यादिश्रुतिसिद्धः । अस्मिन्मते च लिङर्थाज्ञाया विषयत्वप्रयोज्यत्वोभयसम्बन्धेन धात्वर्थेऽन्वयाङ्गीकारादुक्तस्थले पाकादिक्रियायामाज्ञाप्रयोज्यत्वस्य बाधादप्रामाण्योपपत्तेः ॥

ननु--प्रत्यवायप्रयोजकीभूताभावप्रतियोगिप्रवृत्तिविषयकनिरुक्ताज्ञाबोधकवाक्यत्वस्य विधिलक्षणत्वे काम्यविधावव्याप्तिः ; तत्रायमत्र प्रवर्ततामित्याकारकानुज्ञाया एव लङाद्यर्थत्वात्, तादृशानुज्ञाविषयत्वेनेष्टसाधनत्वाद्यनुमित्या तत्र प्रवृत्तेरिष्टत्वात् । एवं श्येनेनाभिचरन् यजेतेति विधिवाक्येऽप्यव्याप्तिः, शत्रुमरणे प्रवृत्तानामधिकारिणां निषिद्धोपायान्तरप्रवृत्तौ महान् प्रत्यवायः, अभिचारप्रवृत्तौ

अल्पीयानेव; तत्र प्रवृत्तानां फलप्राप्तौ शास्त्रप्रामाण्यनिश्चयेन तेषामपि शास्त्रवश्यता स्यादित्यभिप्रायेण तादृशविधेः प्रवृत्तत्वात्; अयं पापः प्रसक्तश्चेदत्र प्रवर्ततामित्याकारकपापकर्मप्रसक्तिकालीनप्रवृत्तिविषयकाभिप्रायस्याज्ञानुज्ञाबहिर्भूतस्य तत्र लिङर्थत्वात्, निरुक्ताज्ञाद्यर्थकत्वाभावात्—इति **चेन्न** । निरुक्ताज्ञानुज्ञाभिप्रायान् प्रवृत्तिप्रयोजनाप्ताभिप्रायत्वेन अनुगमय्य तद्बोधकवाक्यत्वस्य विधिलक्षणत्वाङ्गीकारात् ॥

तदेतदभिप्रेत्यैव **भट्टपराशरपादैः** प्रतिपादितम्—

"आज्ञा ते सनिमित्तनित्यविधयः स्वर्गादिकाम्याद्विधि-
स्सानुज्ञा शठचित्तशास्त्रवशतोपायोऽभिचारश्रुतिः ।
सर्वा यस्य समस्तशासितुरहो श्रीरङ्गसर्वस्व ते
रक्षाकूतनिवेदनी श्रुतिरसौ त्वन्नित्यशास्तिस्ततः ॥"—इति ॥

न्यायपरिशुद्धावप्युक्तं—निगमान्तदेशिकैः—

"नित्यनैमित्तिकादिविधिभेदेषु प्रशासितुरभिप्रायविशेषाः ॥"
—इति ॥

ननु—लिङादेराप्ताभिप्रायार्थकत्वं न भाष्यकारानुमतं; वेदार्थसङ्ग्रहे लिङादेः कोऽर्थः परिगृहीत इति प्रश्नपूर्वकं यजदेवपूजायामिति देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां लिङादयोऽभिदधतीति न किञ्चिदनुपपन्नम् । कर्तृवाचिनां प्रत्ययानां प्रकृत्यर्थस्य कर्तृव्यापारसम्बन्धप्रकारो हि वाच्यः, भूतवर्तमानतामन्ये वदन्ति, लिङादयस्तु कर्तृव्यापारसाध्यतां वदन्तीति प्रतिपादनात्; **श्रीभाष्येऽप्याद्यसूत्रे**—

"अतो विधिवाक्येष्वपि धात्वर्थस्य कर्तृव्यापारसाध्यत्वं शब्दानुशासनसिद्धमेव लिङादेर्वाच्यमित्यध्यवसीयते"—

इत्यभिधानात् । तथा च कृतिसाध्यत्वमेव लिङर्थः—इति चेन्न । कृतिसाध्यत्वस्य लिङाद्यर्थकत्वेऽपि स्वशासनावबोधिशास्त्रं प्रदिश्येति भाष्यान्तरविरोधस्यानुशासनादिविरोधस्य च दुर्वारत्वात् । न हि विधिनिमन्त्रणेत्यादिसूत्रे विधिशब्दस्य कृतिसाध्यत्वार्थकत्वं सम्भवति, निमन्त्रणादिरूपवक्त्रभिप्रायसाहचर्येण विधिशब्दस्याप्याप्ताभिप्रायविशेषपरताया एव स्वारसिकत्वात् । अत आप्ताभिप्रायविषयीभूता या कृतिः तत्साध्यत्वमेव लिङर्थ इति भाष्यद्वयैककण्ठ्यम् ॥ निरुक्ताज्ञादिविषयत्वस्य पुरुषादिसाधारण्येन तत्र प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वेष्टसाधनत्वादीनामभावेन व्यभिचारात्तस्य तदनुमापकत्वायोगेन तादृशाभिप्रायविषयीभूतकृतिसाध्यत्वस्यैव लिङाद्यर्थत्वावश्यकत्वात् । केवलकृतिसाध्यत्वस्य चैत्यवन्दनादिरूपनिष्फलकर्मसाधारण्येन तत्र प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वाभावेन व्यभिचारेण कृतावाज्ञाविषयत्वविशेषणस्यावश्यकत्वाच्च । स्पष्टं चैतदभिहितं कर्त्रधिकरणे **भाष्ये**—

> "शास्त्राणि हि—यजेत स्वर्गकामः, मुमुक्षुर्ब्रह्मोपासीतेत्येवमादीनि—स्वर्गमोक्षादिफलस्य भोक्तारमेव कर्तृत्वे नियुञ्जते ; न ह्यचेतनस्य कर्तृत्वेऽन्यो नियुज्यते शासनाच्छास्त्रम् ॥"—इति ॥

कर्तृत्वे नियुञ्जते—कर्तृत्वविषयकं शासनं बोधयन्तीत्यर्थः । आज्ञाविषयीभूतकृतिसाध्यत्वस्य विध्यर्थत्वेन कृतिविषयकशासनबोधकत्वं शास्त्रस्येति भावः ॥

यद्यप्युक्तभाष्यात् लकारार्थकर्तृघटककृतावेवाज्ञाविषयत्वं प्रतीयते, न तु कृतिसाध्यत्वरूपलिङर्थघटककृताविति, नाज्ञाविषयीभूतकृतिसाध्यत्वार्थकत्वं लिङो लभ्यते । तथाऽपि लकारार्थघटककृतेर्लिङर्थघटककृतेश्चाभेदात्तथोक्तमिति बोध्यम् ॥

वस्तुतस्तु—कर्तृत्वे नियुञ्जत इति भाष्यस्वारस्यादाप्ताभिप्राय एव विध्यर्थः। तस्याख्यातार्थघटककृतावेवान्वयः; न तु तद्विषयककृतिसाध्यत्वपर्यन्तं तदर्थः, गौरवात्। 'श्रुतिस्स्मृतिर्ममैवाज्ञा यस्तां' इत्यादिशास्त्रस्य विधिनिमन्त्रणेत्याद्यनुशासनस्य च स्वारस्यभङ्गाच्च तादृशकृतावेव धात्वर्थसन्ध्यावन्दनादेस्साध्यत्वसम्बन्धेनान्वयेन तादृशकृतिसाध्यत्वस्य सन्ध्यावन्दनादौ तुल्यवित्तिवेद्यतया लाभादेव प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वानुमानात्प्रवृत्त्युपपत्तिः। लिङादेस्साध्यतासम्बन्धेन किञ्चिदन्वितकृत्यर्थकत्वादेव कर्तृव्यापारसाध्यतामभिदधतीत्यस्य नानुपत्तिः। अन्विताभिधानस्य भाष्यादिसंमतत्वेन साध्यत्वांशेऽपि लिङश्शक्तेः। अत एव वेदार्थसङ्ग्रहे—

"कर्तृवाचिनां प्रत्ययानां प्रकृत्यर्थस्य कर्तृव्यापारसम्बन्धप्रकारो हि वाच्यः ॥" —इति

संसर्गतया भासमानसाध्यत्वबोधकत्वमादायैव कृतिसाध्यताबोधकत्वमुपपादितम्। शासनस्य पदार्थत्वादेव स्वशासनाववोधीति भाष्यं स्वरसम्; तस्य पदार्थैकदेशत्वे तत्स्वारस्य हानेः। एवं—न कलञ्जं भक्षयेदित्यादौ धात्वर्थभक्षणस्य प्रतियोगितासम्बन्धेनाभावे तादृशाभावस्य चाख्यातार्थघटककृतौ तत्रैव लिङर्थभूतनिरुक्ताज्ञाविषयत्वस्य चान्वयात् कलञ्जभक्षणाभावसाध्यकनिरुक्ताज्ञाविषयीभूतकृतिमानिति बोधः। तथा च—निरुक्तज्ञाविषयीभूतकृतिसाध्यत्वेन कलञ्जभक्षणाभावे प्रत्यवायप्रयोजकाभावप्रतियोगित्वानुमानात् कलञ्जभक्षणाभावाभावरूपकलञ्जभक्षणे प्रत्यवायप्रयोजकत्वलाभात् तत्र निवृत्त्युपपत्तिः। कलञ्जभक्षणाभावस्य च तद्विरोधितद्विषयकद्वेषादिरूपत्वात् कृतिसाध्यत्वस्य न बाध इति बोध्यम् ॥

यत्तु न्यायपरिशुद्धौ—"यद्यपि परमतेऽप्युदयनोक्तान्यनिषेधानुपपत्तिः, तथाऽपि सा नास्मत्पक्षमवगाहते, कर्तव्यताया विधि-

लब्धत्वेन कर्तव्य इति नञोऽन्वयाविरोधात् कर्तृव्यापारसाध्यत्वमेव च वक्तव्यम् "—इत्युक्तम्; तदप्याज्ञाविषयीभूतकृतिसाध्यत्वस्य लिङर्थत्वात्तदभावस्य कलञ्जभक्षणादौ न बाध इत्यर्थपरम्। अन्यथा केवलकृतिसाध्यत्वाभावस्य तत्र बाधात्। इदमपि परोक्तदूषण-निरासपरमेव, न तु स्वमते निषेधस्थले तथा बोधोपपादनपरं; तथा बोधस्याबाधेऽपि कलञ्जभक्षणादावनिष्टसाधनत्वाविषयकतया निवृत्ति-प्रयोजकत्वासम्भवात्। अस्मदुक्तबोधस्य च निवृत्तिप्रयोजकत्वमनु-पदमेवोपपादितम्॥

नन्वेवं—उक्तनिषेधशास्त्रे पूर्वोक्तविधिलक्षणातिव्याप्तिः। तत्राप्या-प्ताभिप्रायबोधकत्वसत्त्वात्। न च—अभावविशेष्यतानापन्नकृतिवि-शेषणतापन्नाप्ताभिप्रायबोधकत्वस्य विवक्षणान्नातिव्याप्तिरिति—वाच्यम्; तथा सति पाण्डित्यकामो जन्मतिथावामिषं परिहरेदेकादश्यामुप-वसेदित्याद्यभावविधावव्याप्तिः; तत्रामिषभोजनाभावभोजनसामान्याभा-वसाध्यककृतावेव लिङर्थाभिप्रायस्य विशेषणत्वात्, प्राणसञ्चाराभाव-रूपप्राणायामविधौ अविहितप्रयोजनशून्यव्यापारनिवृत्तिरूपशमादि-विधौ चाव्याप्तेश्च। नञर्थाभावविशेष्यतानापन्नत्वनिवेशेऽपि न निस्तारः, 'एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि' इत्यत्राव्याप्तेः, 'नातिरात्रे षोडशिनं गृह्णाति' इति विकल्पविधावव्याप्तेश्च, तत्र षोडशिग्रहणा-भावस्य अङ्गताबोधनात्—इति चेन्न। प्रवृत्तिप्रयोजकाप्ताभिप्रायबोध-कत्वस्य लक्षणत्वेनादोषात्, न कलञ्जं भक्षयेदित्यादिनिषेधस्य कलञ्जभक्षणे निवृत्तिप्रयोजकत्वेऽपि प्रवृत्तिप्रयोजकाभिप्रायबोधकत्वा-भावात्। न च—प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वज्ञानस्य प्रवृत्तिहेतुत्वान्निषेधस्याप्यभावे प्रवृत्तिप्रयोजकत्वं दुर्वारमिति—वाच्यम्। भावविशेष्यकतज्ज्ञानस्य प्रवृत्तिहेतुत्वेऽप्यभावविशेष्यकतज्ज्ञानस्य निवृत्तिहेतुत्वात्, पाण्डित्यकामो जन्मतिथावामिषं न भुञ्जीतेत्यभावविधौ

लिङः अयमत्र प्रवर्ततामित्यनुज्ञार्थकत्वेन तादृशानुज्ञाविषयकृतिसाध्यत्वेन तादृशाभावे इष्टसाधनत्वानुमानात् तत्र प्रवृत्तिप्रयोजकत्वोपपत्तेः। एवं 'नातिरात्रे षोडशिनं ग्रह्णाति' इत्यादावप्यनुज्ञाया लिङर्थत्वेन तस्यापि प्रवृत्तिप्रयोजकत्वोपपत्तेः। तथा च–यत्र लिङः आज्ञार्थकत्वं तादृशाभावसाध्यककृतिबोधकवाक्यस्य 'न कलञ्जं भक्षयेत्'—इत्यादेः निवृत्तिप्रयोजकत्वान्निषेधत्वं, अनुज्ञार्थकलिङ्घटिताभावसाध्यककृतिबोधकवाक्यस्य चेष्टसाधनत्वानुमितिद्वारा प्रवृत्तिप्रयोजकत्वाद्विधित्वमिति विवेकः ॥ न चैवमेकादश्यामुपवसेदित्यस्य निषेधत्वापत्तिरिति वाच्यम्; इष्टत्वात् ॥

नन्वेवं–'न हिंस्यात्सर्वा भूतानि' इत्यत्र सर्वभूतहिंसासामान्याभावसाध्यककृतौ लिङा निरुक्ताज्ञाविषयत्वप्रतीत्या तादृशाज्ञाविषयीभूतकृतिसाध्यत्वेन तादृशहिंसासामान्याभावस्य प्रत्यवायप्रयोजकीभूताभाव प्रतियोगित्वानुमित्या हिंसासामान्ये निवृत्तिप्रसक्तौ यागीयाहिंसायां 'अग्नीषोमीयं पशुमालभेत' इति विहितायां प्रवृत्त्युपपत्तये नहिंस्यादित्यत्र धातोर्विहितहिंसातिरिक्तहिंसापरत्वावश्यकतया उक्तस्थले उत्सर्गापवादन्यायप्रवृत्तिरावश्यकी। तथा च–नहिंस्यादिति निषेधघटकहिंसिधातोर्बलवदनिष्टाजनकत्वे सति वेदनाजनकव्यापारे शक्तत्वाद्यागीयपश्वालम्भनस्य पशुवेदनाजनकस्यापि पशोर्बलवदिष्टरूपस्वर्गजनकत्वेन तदजनकत्वघटितहिंसाशब्दार्थत्वाभावात् वेदनाजनकेऽपि चिकित्सके हिंसकत्वव्यवहाराभावेन सत्यन्तस्य सार्थकत्वात् तादृशविधिनिषेधयोरविरोध इति श्रीभाष्ये समाधानवर्णनमसङ्गतम्, सर्वत्र विरुद्धविधिनिषेधस्थलेषु क्लृप्तेन तादृशन्यायेनैव प्रकृतेऽपि समाधानसम्भवे समाधानान्तरान्वेषणस्यायुक्तत्वात्–इति चेन्न ॥ अग्नीषोमीयं पशुमालभेतेत्यस्य यागविधायकत्वेन हिंसाविधायकत्वाभावात्, पूर्वतन्त्रे द्रव्यसंयोगाच्चोदना पशुसोमयोरिति द्वितीयाध्याय-

द्वितीयपादपञ्चमाधिकरणे तद्वाक्यस्य यागविधायकत्वसमर्थनात्, तस्मिन्नधिकरणे हि 'अग्नीषोमीयं पशुमालभेत' इति श्रूयते ॥

तथा–हृदयस्याग्रेऽवद्यति, अथ जिह्वायाः, अथ वक्षस इत्यादीनि। तत्राग्नीषोमीयवाक्यं हृदयादिद्रव्यकावदानानुवादेन देवताविधायकं, उताग्निषोमीयपशुकरणकयागविधायकमिति संशये–तद्वाक्यं न यागविधायकं, तथा सति हृदयादिवाक्यानां द्रव्यसंस्कारविधिपरत्वं वक्तव्यं तच्च न युज्यते, यागीयद्रव्यस्य पशोरेव संस्कारावश्यकत्वेऽपि हृदयादिद्रव्यसंस्कारस्यानुपयोगात् । अतो हृदयादिद्रव्यकावदानानुवादेन देवताविधिपरमेवेदं वाक्यम्। तत्रावदानाक्षिप्तं स्पर्शनमालभतिनाऽनूद्यते, पशुशब्देन च लक्षणया पशुविकृतिद्रव्यत्वेन हृदयादिकमुच्यते; अग्नीषोमीयमिति च अग्निसोमदेवताकत्वं विधीयते, द्रव्यदेवतासमभिव्याहाराच्च यागाः कल्पनीयाः–**इति पूर्वपक्षं प्रापय्य**; अग्नीषोमीयवाक्ये पशुविशिष्टयाग एव विधीयते, पशोरेव हृदयादिद्रव्यद्वारेण यागे करणत्वेऽपि हृदयादीनामपि संस्कारस्य यागोपयुक्तत्वेन हृदयादिवाक्यानां संस्कारविधिपरत्वमिति–**सिद्धान्तितम्** ॥

एवं यागे–कृत्स्नः पशुरेकं हविः, उत हृदयादिहविरिति संशय्य हृदयादीनां हविष्ट्वमिति स्थापनपरे "पशोरेकहविष्ट्वं समस्तचोदितत्वात्" इति दाशमिकाधिकरणे, तथा येन केन चिदङ्गेन यागः कर्तव्यः, उत समस्तैरङ्गैः, अथवा हृदयादिभिरेकादशभिरिति संशय्य, हृदयाद्येकादशभिरिति स्थापनपरे तदुत्तराधिकरणे च तद्वाक्यस्य यागविधिपरत्वमुक्तम् । एवं चाङ्पूर्वकलभधातोर्यागे पशुमिति द्वितीयायाश्च करणत्वे लाक्षणिकत्वात् उत्सर्गापवादन्यायो न प्रवर्तते, व्याप्यधर्मावच्छिन्नविधिव्यापकधर्मावच्छिन्ननिषेधस्थल एव तत्प्रवृत्तेः ॥

न च—आङ्पूर्वकलभधातोर्हिंसापूर्वकत्वविशिष्टे यागे अजहत्स्वार्थलक्षणाङ्गीकारात् हिंसाया अपि विधेयत्वमुपपद्यत इति—वाच्यम्; तथा सत्यग्नीषोमीयपशुकर्मकत्वस्य धात्वर्थैकदेशहिंसायामन्वयासम्भवेन याग एव तत्करणत्वान्वयस्य वाच्यतया हिंसासामान्यस्यैव विधानापत्त्या विहितहिंसातिरिक्तहिंसाया एवाप्रसिद्ध्यापत्तेः, हिंसायामेव कथं चिदन्वयाभ्युपगमे चाग्नीषोमीयपशुकरणकयागस्यालाभापत्तेः, विशिष्टे लक्षणाया असम्भवात्। अत एव मीमांसकैरालभेतेत्यस्य केवलयागे जहत्स्वार्थलक्षणा स्वीकृता॥

उक्तं च **भाट्टरहस्ये**—"धात्वर्थश्च क्वचिच्छक्यार्थ एव, भावनायां प्रकारो यथा यजेतेत्यादौ; क्वचित्तु लक्ष्यार्थः, यथा अग्नीषोमीयं पशुमालभेतेत्यादौ यागः। लक्ष्यार्थोऽपि क्वचिच्छक्यार्थयुक्तः, यथा पृष्टेरुपतिष्ठतेत्यादावात्मनेपदानुरोधेन समीपस्थितिरूपशक्यार्थविशिष्टमुपस्थानम्॥"—इति॥

न च—हिंसापूर्वकयाग एव धातोर्लक्षणाऽस्तु; अग्नीषोमीयं पशुमित्यस्योभयत्रान्वयान्नानुपपत्तिरिति—वाच्यम्; तथा सति न हिंस्यादित्यत्र हिंसिधातोर्विहितहिंसातिरिक्तहिंसायां लक्षणापत्त्या गौरवात्, तदपेक्षया आलभेतेत्यस्य केवलयागे लक्षणाङ्गीकारस्य युक्तत्वात्, किं च विशेषणविशेष्ययोरुभयोर्विध्यर्थान्वयाबाधस्थल एव विशिष्टस्य विधेयत्वं न तु विशेषणे तद्बाधे; अनित्यो घट इत्यादौ विशेषणेऽनित्यत्वानन्वयात्, प्रकृते च हिंसायां विध्यर्थान्वयस्य न हिंस्यादित्यनेन बाधितत्वान्न विशिष्टविधिसम्भवः। न च—न हिंस्यादित्यस्य विहितहिंसातिरिक्तहिंसानिषेधकत्वान्न विशिष्टविधिबाधकत्वमिति—वाच्यम्। तथा सत्यन्योन्याश्रयापत्तेः, विधिवाक्यस्य विशिष्टविषयत्वे सिद्धे निषेधस्य विहितातिरिक्तपरत्वसिद्धिः, तत्सिद्धौ च विधेर्विशिष्टपरत्वसिद्धिरिति॥

न च—‘रुरुशशकूर्मवराहमेषमांसैस्सांवत्सराणि’ इत्यादिश्राद्धकल्पस्थ-मांसविधायकस्मृत्या न हिंस्यादिति निषेधस्य विहितहिंसातिरिक्तपर-त्वावश्यकत्वान्नान्योन्याश्रय इति—वाच्यम्; उक्तस्मृतेर्मांसविक्रयि-भ्यस्सकाशान्मांसं क्रयेण सम्पाद्य श्राद्धकर्तव्यतापरत्वात् हिंसापरत्वा-भावात्, पत्नीसंयाजेषु ‘जाघन्या पत्नी संयाजयन्ती’ इति पत्नीसंयाजार्थक तया विहिताया आलभमन्तरेण क्रयादिना लब्धाया गोपालरूपजाघ-न्याग्रहणस्य जाघनीचैकादशत्वादिति तार्तीयिकाधिकरणसिद्धत्वात्॥

न चैवमपि—श्राद्धकल्पस्थपश्वालम्भविधिपरस्मृत्या तादृशनिषे-धस्य विहितातिरिक्तपरत्वमावश्यकमिति—वाच्यम्; तादृशस्मृतीनां गवालम्भादिना सम्पादितमांसेनापि श्राद्धं कर्तव्यमिति श्राद्धकर्तव्य-तावश्यकतापरत्वात्। उक्तं च **पाशुपताधिकरणटीकायां**—

> “मांसेनापि श्राद्धं कर्तव्यमित्यवश्यं श्राद्धकर्तव्यतातिवाद-रूपत्वात् तादृशवचनानाम् ॥” —इति ॥

अस्तु वा तादृशवचनानां गवालम्भविधायकत्वम् । तथाऽपि तादृशस्मृत्या श्राद्धकल्पस्थगवालम्भव्यतिरिक्तपरत्वमेव निषेधस्या-वगम्यते, न तु यागीयहिंसातिरिक्तपरत्वमपीति पूर्वोक्तान्योन्याश्रयो दुर्वारः । एवं च यागीयपश्वालम्भनस्य हिंसाशब्दार्थत्वानङ्गीकारेण श्रीभाष्योक्तनिर्वाह एव युक्तः ॥

तदेतदभिप्रेत्योक्तं **टीकायां**—‘अयमेव समीचीनो दुष्प्रधर्षणः परि-हारः’ इति । यागीयपश्वालम्भनस्य हिंसात्वाभावश्च । ‘न वा उ एत-न्म्रियसे न रिष्यसि देवान् इदेषि पथिभिस्सुगेभिः’ इति संज्ञपनमं-त्रात्मकश्रुत्या, ‘तस्माद्यज्ञे वधोऽवधः’ इति मनुस्मृत्या च सिद्धः । न रिष्यसि—न हिंस्यसे, यतो देवान् इदेषि प्राप्नोषि—इत्यर्थाद्दुःखजन-कव्यापारस्यापि बलवदिष्टजनकत्वेन हिंसात्वाभावबोधनात्। न च—

हिंसिधातोर्न दुःखजनकव्यापारे शक्तिः, तथा सति निष्ठुरवचनादिना दुःखजनकस्यापि पुरुषस्य हिंसकत्वव्यवहारापत्तेः; किन्तु मरणावच्छिन्नव्यापार एव शक्तिरिति व्रणचिकित्सादौ नातिप्रसङ्ग इति बलवदिष्टाजनकत्वविशेषणं युक्तमिति—वाच्यम्; **छांन्दोग्ये भूमविद्यायां**—

"स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वा आचार्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहुः, पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमसि आचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसि" —

इति निष्ठुरवक्तुरपि हिंसकत्वव्यवहारेण मरणावच्छिन्नव्यापारे तच्छक्त्ययोगात् दुःखजनकव्यापार एव शक्त्या उक्तविशेषणस्यावश्यकत्वात् ॥

न चैवं—भेदाभेदश्रुत्योश्शरीरात्मभावप्रतिपादकघटकश्रुत्या विरोधपरिहारवत् हिंसाविधिनिषेधयोरपि 'अहिंसन् अन्यत्र तीर्थेभ्यः' इति छान्दोग्यसिद्धोत्सर्गापवादन्यायेन विरोधपरिहारो युक्तः; तत्राहिंसन्नन्यत्र तीर्थेभ्य इत्यस्य यागेभ्योऽन्यत्रेत्यर्थकत्वादिति—वाच्यम्। उक्तरीत्या यागीयहिंसाया विधानाभावेनोत्सर्गापवादन्यायाप्रवृत्तेः, तादृशश्रुतेः गृहस्थानामवर्जनीयतुलस्याहरणादिजन्यहिंसाव्यावृत्तिपरत्वात् ॥

एतेन—प्रकृतस्थले शङ्करभाष्ये उत्सर्गापवादन्यायप्रवृत्तिवर्णनं—निरस्तम् ॥

यदपि भामतीकल्पतरुग्रन्थयोरुक्तम्—विशेषविधिविहितार्थस्य सामान्यविधिना क्रोडीकारो हि उत्सर्गापवादन्यायः। यथाऽऽहवनीये जुहोतीति होममात्रस्याहवनीयान्वयविधिना पदहोमस्यापि विषयीकारे

पदहोमान्वयविशेषविधानात् तदतिरिक्तपरत्वं सामान्यशास्त्रस्य, अत्र तूत्पत्तिसमय एव निषेधस्य–प्रसक्तं हि प्रतिषिध्यते–इति न्यायेन पुरुषार्थहिंसाविषयत्वावगमान्न क्रत्वर्थहिंसाप्रवेशः । शङ्कर-भाष्ये 'उत्सर्गापवादन्यायोक्तिस्तु अविशेषप्रवृत्तत्वेनावभासमानस्य शास्त्रस्य विशेषत्याजनालक्षणगुणसाम्याद्गौणीति शंकरभाष्ये शिक्षणं कृत्वा—**निर्वाहान्तरं कृतम्** ।

अत्रोच्यते—विशेषविधिविहितस्य सामान्यविधिना क्रोडीकारो ह्युत्सर्गापवादन्याय इत्यस्य कोऽर्थः ? यत्र विशेषशास्त्रविधेयता-वच्छेदकव्यापकं सामान्यशास्त्रविधेयतावच्छेदकं तत्रोत्सर्गापवादन्याय इत्यर्थ इति चेन्न; अग्नीषोमीयं पशुमालभेतेत्यादौ सामान्यशास्त्रस्य निषेधरूपत्वेनात्रोत्सर्गापवादन्यायस्य प्रसक्तेरेवाभावेन पुरुषार्थहिंसा-परत्वावलम्बनेन तद्वारणानौचित्यात् ॥

न च–सामान्यशास्त्रविधेयतानिषेध्यतान्यतरावच्छेदकं यत्र विशेष-शास्त्रविधेयतावच्छेदकव्यापकं तत्र तन्न्याय इत्यर्थान्नानुपपत्तिरिति –वाच्यम् । तथा सति यत्र सामान्यशास्त्रं विधिरूपं विशेष-शास्त्रं च निषेधरूपं तथाविधे 'पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति' इति सामान्यतः यज्ञे प्रवर्ग्यविधिसमभिव्याहृते 'न प्रथमयज्ञे प्रवृ-ञ्ज्यात्' इति निषेधस्थले तादृशन्यायानापत्तेः ॥

न च–विशेषशास्त्रविधेयतानिषेध्यतान्यतरावच्छेदकव्यापकमिति विवक्षणान्न दोष इति–वाच्यम्; गामानय, बलीवर्दमानय–इत्यादावपि तदापत्तेः । न चेष्टापत्तिः । विरुद्धविषये उत्सर्गापवादन्यायः, अवि-रुद्धविषये गोबलीवर्दन्याय इति सिद्धान्तात्; 'नानृतं वदेदाहिताग्नि-र्नानृतं वदेत्', 'ब्राह्मणो न हन्तव्यः, आत्रेयो न हन्तव्यः' इत्यादौ सामान्यनिषेधे सत्यपि प्रत्यवायाधिक्यबोधनाय विशेषनिषेधस्थले ऽप्युत्सर्गापवादन्यायापत्तेश्च ॥

न च—विशेषशास्त्रविधेयतावच्छेदकव्यापकं यत्सामान्यशास्त्रनिषेध्यतावच्छेदकं यत्र विशेषशास्त्रनिषेध्यतावच्छेदकव्यापकं सामान्यशास्त्रविधेयतावच्छेदकं तदुभयस्थलेऽप्युत्सर्गापवादन्यायप्रवृत्तिरित्यर्थान्न दोष इति—वाच्यम्। एवं सति पदाहवनीयशास्त्रस्थले तन्न्यायानापत्तेः; न परदारान् गच्छेन्न काञ्चन परिहरेत्—इत्यत्राप्युत्सर्गापवादन्यायानापत्तेश्च। तत्र वामदेव्योपासकस्य विधीयमानं यत्प्रार्थयमानसर्वयोषिद्गमनं तत्त्वस्य स्वस्त्रीगमनसाधारणस्य निषेध्यतावच्छेदकीभूतपरदारगमनत्वव्यापकत्वाभावात्॥

न च—'न काञ्चन परिहरेत्' इत्यत्र काञ्चनेत्यस्य स्त्रीभिन्नां कामपीत्यर्थः; स्वस्त्रीगमनस्य शास्त्रान्तरेणैव सिद्धेरिति—वाच्यम्। एवमपि—अमावास्यायां पितृभ्यो दद्यात्, न रात्रौ श्राद्धं कुर्वितेत्यत्रापि उत्सर्गापवादन्यायानापत्तेः। तत्र निषेध्यतावच्छेदकीभूतरात्रिश्राद्धत्वस्याष्टकादिश्राद्धसाधारणस्यामावास्याश्राद्धत्वव्याप्यत्वाभावात्। व्यापकत्वस्थाने सामानाधिकरण्यनिवेशान्नोक्तदोष इत्यपि न सत्; सा तथाऽपि 'साक्षी चेता केवलो निर्गुणश्च', 'यस्सर्वज्ञस्सर्ववित्' इत्यादावुत्सर्गापवादन्यायापत्तेः। न चेष्टापत्तिः, निर्गुणश्रुतेर्विहितसर्वज्ञताद्यतिरिक्तनिषेधपरत्वे निर्विशेषब्रह्मासिद्धिप्रसङ्गात्॥

न च—विशेषशास्त्रतात्पर्यविषयीभूतविधेयतानिषेध्यतान्यतरावच्छेदकसमानाधिकरणमिति निवेशान्नानुपपत्तिः; सगुणप्रकरणगुणबोधकश्रुतौ 'सत्यकामं ब्रह्मोपासत' इत्येवं विधायां सत्यकामत्वादेर्द्वितीयार्थप्रकारित्वेऽन्वयात् प्रकारितायाश्च ब्रह्मविशेष्यतावच्छेदेनोपासनायामन्वयाद्ब्रह्मणि सत्यकामत्वादिप्रकारकोपासनायां तात्पर्येऽपि ब्रह्मणि सत्यकामत्वादिवैशिष्ट्यतात्पर्याभावात्, निर्गुणप्रकरणस्थले गुणबोधकश्रुतेर्निषेधार्थमनुवादरूपतया गुणांशे तात्पर्याभावात् न तत्रोक्तन्यायप्रसक्तिः। अत एव—'जर्तिलयवाग्वा वा जुहुयाद्गवी-

भुक्यवाग्वा वा न ग्राम्यान् पशून् हिनस्ति नारण्यान्, अथो खल्वाहुः अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोति' इत्यत्र जर्तिलयवाग्वादिहोमे न विधिः, किं तु पशुहिंसानिन्दार्थमनुवादः पयस्तुत्यर्थः, न तु विहितप्रतिषेधाद्विकल्प इति प्रथमाष्टमे स्थितमिति—वाच्यम्। गुणोपसंहारपादे 'आनन्दादयः प्रधानस्य' इति सूत्रे उपासनाप्रकारीभूतानामप्यानन्दादीनां ब्रह्मणि वैशिष्ट्ये आनन्दं ब्रह्मेत्यादिश्रुतितात्पर्यस्य व्यतिहारसूत्रे च 'तद्योऽहं सोऽसौ योऽसौ सोऽहम्' इति श्रुत्युक्तस्य जीवे ईश्वराभेदस्य ईश्वरे वा जीवाभेदस्य ध्यानप्रकारत्वेऽपि तयोस्तद्वैशिष्ट्येऽपि तात्पर्यस्योत्तरतापनीयादौ निर्गुणोपास्तेरुक्तत्वेऽपि तद्वैशिष्ट्यो तात्पर्यस्य भवद्भिरेवोक्तत्वेन उपासनप्रकारीभूतानामपि गुणानां श्रुतितात्पर्यविषयत्वस्य दुर्वारत्वात्; निर्गुणप्रकरणस्थगुणश्रुतेरनुवादरूपत्वे निर्गुणत्वनिषेधरूपसत्यकामत्वादिविधानार्थं निर्गुणत्वस्यानुवाद इति विनिगमनाविरहेणापत्तेः, जीवब्रह्माभेदश्रुतेरपि तथात्वापत्तेश्च; तादृशगुणश्रुतेरपि गुणे तात्पर्यस्य दुर्वारत्वात्, उत्सर्गापवादन्यायप्रवृत्तेस्तत्र वज्रलेपत्वात्। एवं न हिंस्यादित्यत्रापि विधेयतावच्छेदकीभूतपशुहिंसात्वव्यापकत्वस्य निषेध्यतावच्छेदके सर्वभूतहिंसात्वे सत्त्वेन तन्न्यायस्य दुर्वारत्वात् ॥

न च—निषेधे हिंसिधातोः पुरुषार्थहिंसैवार्थ इति—वाच्यम्; पुरुषार्थहिंसाबोधस्य लक्षणां विना सम्भवात्; तादृशलक्षणाया एव तन्न्यायफलत्वात् ॥ न च—कर्त्रर्थकाख्यातेन हिंसायां कर्तृनिष्ठत्वप्रतीत्या पुरुषार्थहिंसैव निषेध्यतया प्रतीयत इति—वाच्यम्; क्रत्वर्थहिंसाव्यावृत्तस्य सर्वपुरुषार्थसाधारणस्याख्यातबोध्यस्य पुरुषार्थत्वस्य निर्वचनासम्भवात्। तथा हि—पुरुषार्थत्वं न तावत्पुरुषकृतिसाध्यत्वं, तस्याख्यातबोध्यत्वेऽपि क्रत्वर्थहिंसाव्यावृत्तत्वाभावात्। अत एव नेष्टसाधनत्वं, अख्यातबोध्यत्वाभावाच्च ॥

ननु—क्रतुजन्यपरमापूर्वभिन्नं यदिष्टं तत्साधनत्वमेव पुरुषार्थत्वम्। क्रत्वर्थहिंसायां क्रतुजन्यपरमापूर्वोत्पत्त्यभावप्रयोजकीभूताभावप्रतियोगिकलिकापूर्वजनकतात्मकं यत्परमापूर्वप्रयोजकत्वरूपं क्रत्वर्थत्वं, तस्य सत्त्वेऽपि तदतिरिक्तेष्टसाधनत्वाभावान्नानुपपत्तिः। गोदोहनेन पशुकामस्य प्रणयेदित्युक्तप्रणयने च परमापूर्वातिरिक्तपशुरूपफलसाधनत्वबोधात् पुरुषार्थत्वोपपत्तिः—**इति चेन्न**॥ निरुक्तपुरुषार्थत्वस्य न हिंस्यादिति निषेधवाक्येनाबोधनात् तद्विशिष्टहिंसात्वस्य निषेध्यतावच्छेदकत्वानुपपत्तेः॥

यत्तु—प्रसक्तं हि प्रतिषिध्यत इति न्यायेन हिंसायाः लोके इष्टसाधनत्वेन प्रसक्तत्वात् तेनैव रूपेण निषेधावश्यकत्वात् निषेधवाक्ये तेनैव रूपेण बोधः; पदादुपस्थितस्येव प्रत्यक्षादिनोपस्थितस्यापि शाब्दबोधे भानात् घटकर्मत्वादिबोधे घटः कर्मत्वमित्यादिनिराकाङ्क्षपदाजन्योपस्थितित्वेन प्रत्यक्षादिसाधारण्येन हेतुत्वात्। अत एव घटेन जलमाहरेत्यादौ योग्यतावशादुपस्थितस्य छिद्रेतरत्वादेर्बोधः। एवं चैत्रोऽयमित्यादौ लोके 'उद्भिदा यजेत पशुकामः' इत्यादौ वेदे च प्रत्यक्षोपस्थितानामेव चैत्रोद्भिदादिपदानां नामत्वेनान्वयः; अन्यथा चैत्रपदवाच्योऽयं, उद्भित्पदवाच्येन यागेनेत्यादिबोधे तत्र लक्षणाप्रसङ्गात्। न चेष्टापत्तिः; अगृहीतशक्तिके पदे शक्यसम्बन्धरूपलक्षणाग्रहासम्भवात्। नामार्थयोर्भेदेन नान्वय इत्यस्य नामजन्योपस्थितिविषययोरेव भेदेन नान्वय इत्यर्थात् प्रत्यक्षादिनोपस्थितस्य नाम्नो भेदेनान्वयेऽपि नानुपपत्तिः। एवं च—'हिमालयो नाम नगाधिराजः', 'हिरण्यपूर्वं कशिपुं प्रचक्षते' इत्यादि यथाश्रुतमेव सङ्गच्छते। प्रत्यक्षोपस्थितहिरण्यपदपूर्वककशिपुपदस्यैव वाच्यतासम्बन्धेनान्वयात्, ततश्च लोकावगतेष्टसाधनत्वादिरूपेणैव हिंसाबोधनात्, तेनैव रूपेण निषेध इति न तन्न्यायप्रवृत्तिः॥ —इति॥

तन्न। तथा सति सूत्रयोजनादौ सर्वत्र पदाध्याहारानुषङ्गादिना बोधोपपादनस्य शङ्करभाष्यादिसिद्धस्यानुपपत्तेः। सौर्ये चरावतिदेशप्राप्ते 'अग्नये जुष्टं निर्वपामि' इति मन्त्रे अग्निपदबाधेन सूर्यपदाध्याहाररूपस्योहस्य विश्वजिता यजेतेत्यादौ स्वर्गकामपदाध्याहारस्य च पूर्वतन्त्रसिद्धस्य चानुपपत्तेश्च, तत्र तत्र तत्तदध्याहारेणैवोपपत्तेः॥

अथ—

आद्यसूत्रे श्रीभाष्ये—"एवं किल बालाश्शब्दार्थसम्बन्धमवधारयन्ति। मातापितृप्रभृतिभिरम्बाताततमातुलादीन् शशिपशुनरमृगपक्षिसर्पादींश्च एनमवेहि इमञ्चावधारयेत्यभिप्रायेण अङ्गुल्या निर्दिश्य निर्दिश्य तैस्तैश्शब्दैस्तेषु तेष्वर्थेषु बहुशश्शिक्षिताश्शनैश्शनैस्तैस्तैरेव शब्दैस्तेष्वर्थेषु स्वात्मनां बुद्ध्युत्पत्तिं दृष्ट्वा शब्दार्थयोस्सम्बन्धान्तरादर्शनात् सङ्केतयितृपुरुषाज्ञानाच्च तेषु तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन. इति निश्चिन्वन्ति"—इत्युक्तम्॥

तत्र पुरोवृत्तिविशेष्यकाम्बादिपदप्रकारकबोधो न पदशक्तिज्ञानजन्योपस्थितिजन्यः, तादृशबालस्य पूर्वं पदसामान्ये शक्तिग्रहाभावात्; किं तु श्रावणप्रत्यक्षरूपपदोपस्थितिचाक्षुषप्रत्यक्षरूपार्थोपस्थितिजन्यः॥ न च–पदवृत्तिज्ञानजन्यपदार्थोपस्थित्यभावे कथं शाब्दबोध इति–वाच्यम्; प्रत्यक्षादिना वा पदवृत्त्या वा उपस्थितपदार्थानां संसर्गावगाहिज्ञानं हि शाब्दबोधः, न तु पदवृत्त्युपस्थितानामेव संसर्गावगाहिज्ञानं तथा; पदाभावेऽपि भाट्टमते बोधाङ्गीकारात्॥

उक्तं च वाक्याधिकरणे भाट्टैः—

"पश्यतश्श्वेतिमारूपं हेषाशब्दं च शृण्वतः।
खुरविक्षेपशब्दं च श्वेताश्वो धावतीति धीः॥
दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित्।" —इति॥

शाबरभाष्येऽप्युक्तं–

"अन्तरेणापिपदं शुक्लादेरन्वयधीः" —इति॥

इदं च न्यायरत्नाकरे व्याख्यातं—"अश्वत्वाद्युपलक्षितं श्वेतं पश्यन् तस्मिन् प्रदेशे हेषाशब्देनाश्वं खुरशब्देन गमनं चानुमिनोति–इति अनुपलब्धिप्रमाणेन तत्प्रदेशे श्वेतत्वाद्यन्वययोग्यस्य वस्त्वन्तरस्यानुपपन्नत्वं जानन् पुरुषः कल्पयति श्वेतत्वादीनामन्यान्वयसाकाङ्क्षाणां मिथोऽन्वयं विना अनुपपन्नत्वधीसहकृतं, साकाङ्क्षाणां मिथोऽन्वययोग्यत्वधीसहकृतं च श्वेतत्वादीनां ज्ञानं मिथोऽन्वयधीकारणम्"—इति॥

न च–घटमानयेत्यादौ पदानां समभिव्याहारज्ञानस्यापि कारणत्वेन क्लृप्ततया तदभावे कथं शाब्दबोधः, अतस्तत्र श्वेतो धावतीति वाक्यकल्पनावश्यकत्वात्, पदवृत्तिज्ञानजन्योपस्थितेरेव शाब्दधीहेतुत्वमिति इयमम्बेत्यादौ न शाब्दबोधसम्भव इति–वाच्यम्; पर्यायपदान्तरसमभिव्याहारजन्यबोधे व्यभिचारवारणाय समभिव्याहारज्ञानजन्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशावश्यकतया तदनुत्तरबोधे तस्य कारणताविरहेण वाक्यकल्पनस्य विफलत्वात्। एवमनुपपत्तिज्ञानकार्यतावच्छेदकमपि तदुत्तरशाब्दत्वं, अतो वाक्यजन्यशाब्दबोधस्थले तदसत्त्वेऽपि न क्षतिः॥ न च–वाक्याजन्यबोधस्थलेष्वनुपपत्तिज्ञानकल्पनापेक्षया वाक्यकल्पनं युक्तमिति–वाच्यम्; नानावर्णघटितपदानां कल्पनापेक्षया एकस्यानुपपत्तिज्ञानस्यैव कल्पनाया लघुत्वात्। सम्भवति च श्वेतत्वं तद्देशे दृश्यमानमश्वान्यासंसर्गित्वेन प्रतीयमानं अश्वसंसर्गित्वं विनानुपपन्नमिति धीः। एवं धावनेऽप्यनुपपन्नत्वधीर्बोध्या॥ न च–यत्र गवाश्वादिसम्भाविते देशे श्वेतत्वादिकं दृश्यते तत्रानुपपत्तिज्ञानाभावात् तत्र वाक्यकल्पनमावश्यकमिति–वाच्यम्; तत्रापि गवाश्वान्यासंसर्गित्वेन प्रती-

यमानं श्वेतत्वं तदन्यतरसंसर्गं विनाऽनुपपन्नमित्यनुपपत्तिज्ञानेन विप्रतिपत्तिवाक्यस्थल इव गौरश्वो वा श्वेतो धावतीति संशयात्मकशाब्दबोधस्यैवाङ्गीकारात् ॥ **श्रीभाष्येऽपि**—'शब्दार्थयोस्सम्बन्धान्तरादर्शनात्' इत्यनुपपत्तिज्ञानमुक्तम्; सम्बन्धान्तरानुपपत्तिज्ञानादिति तदर्थः। संशयात्मकशाब्दबोधश्च श्रीभाष्यसम्मतः । **वैश्वानराधिकरणे**—"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते" इति वैश्वानरविद्यावाक्यगतस्य वैश्वानरशब्दस्य जाठराग्नौ महाभूततृतीये देवतायां परमात्मनि च श्रुतौ तत्र तत्र प्रयोगात्, उपक्रमादिषूपलभ्यमानलिङ्गानामपि सर्वसाधारणत्वादुक्तार्थचतुष्टयविषयकसन्देह एव तादृशवाक्याज्जायते न तु परमात्मविषयकनिर्णय इति—**पूर्वपक्षं कृत्वा**; परमात्मासाधारणलिङ्गात् परमात्मनिर्णयो जायते—इति **सिद्धान्तकरणात्**; वैश्वानरस्साधारणशब्दविशेषादिति सूत्रे साधारणशब्दप्रयोगेन संशयपूर्वपक्षस्य सूचितत्वाच्च ॥

न च—पूर्वकाण्डे वेदप्रामाण्यस्य समर्थितत्वात् अप्रमाविशेषरूपसंशयात्मकबोधजनकत्वरूपाप्रामाण्यात्पूर्वपक्षो न युक्त इति—वाच्यम्; पूर्वतन्त्रे अपशूद्राधिकरणे शूद्रस्य यज्ञाद्यनधिकारसमर्थनेन तन्न्यायेन उपासनासामान्यानधिकारस्य सिद्धावपि "आजहारेमाश्शूद्रानेनैव मुखेनालापयिष्यथाः" इति शूद्रशब्देनामन्त्रणपूर्वकं जानश्रुतिं प्रति रैक्वस्य उपदेशदर्शनात्, संसर्गविद्यायां विशेषतो रथकाराधिकरणन्यायेन अधिकारस्यादित्याशङ्कानिरासाय पुनरधिकरणारम्भवदत्रापि साधारणशब्दनिमित्तकाधिकाशङ्काप्रयुक्तसंशायकत्वलक्षणाप्रामाण्यशङ्कानिरासाय वैश्वानराधिकरणारम्भोपपत्तेः ।

यद्यपि—टीकायां वेदप्रामाण्यसमर्थनात् संशयपूर्वपक्षासम्भवमभ्युपेत्य अर्थानियमात्पूर्वपक्ष एव वर्णितः, चतुर्ष्वर्थेष्वन्यतमानिर्धारणेऽपि सर्वथा कस्मिंश्चिदर्थे प्रमाणमेवेदमिति सामान्यतः प्रामाण्यस्यानपो-

दितत्वात् । विधिशब्दस्य मन्त्रत्वे भावस्स्यादिति दाशमिकाधिकरणे आग्नेययागे 'यदाग्नेयोऽष्टाकपालो भवति' इति विहिते विधिगताग्निशब्देनैव हविस्त्यागवेलायां उद्धेशः, उत पर्यायभूतशुचिपावकादिशब्देनापीति संशये, अनियम इति पूर्वपक्षं कृत्वा विधिगताग्निशब्देनैवोद्देशादिति सिद्धान्तकरणादित्युक्तम् ॥ **तथाऽपि** टीकाकृतां वेदे संशयात्मकबोधानङ्गीकारेऽपि लौकिकवाक्ये तथा बोधाभ्युपगमस्सूच्यते ; वाक्यस्य संशायकत्वाभावात् संशयपूर्वपक्षासम्भवमनुक्त्वा प्रामाण्यसमर्थनात्, संशायकत्वाभावोक्त्या लौकिकवाक्ये संशयसम्भवद्योतनात् । तथा च–पदानुपस्थितविषयकशाब्दबोधस्य श्रीभाष्य एवाङ्गीकारात् नहिंस्यादित्यादौ पुरुषार्थहिंसानिषेध इति युक्तम् ॥

—इति चेत् ॥

अत्रोच्यते—

शाब्दबोधो हि त्रिविधः–प्रत्यक्षाद्युपस्थितमात्रविषयकः, पदवृत्त्युपस्थितमात्रविषयकः, प्रत्यक्षाद्युपस्थितपदार्थपदवृत्त्युपस्थापितपदार्थोभयविषयकश्चेति ॥

तत्राद्यः पश्यतश्श्वेतिमारूपमित्यादिभाट्टोक्तस्थले, इयमम्बेत्यादिभाष्योक्तस्थले च ; यद्यपि भाष्योक्तस्थले पदश्रवणमस्ति ; तथाऽपि पदवृत्तिज्ञानजन्योपस्थित्यभावात् पदवृत्त्यनुपस्थितार्थानामेव तत्र भानमिति बोध्यम्। घटमानयेत्यादौ **द्वितीयः। तृतीयस्तु**–घटेन जलमाहरेत्यादौ लोके उद्भिदा यजेतेत्यादौ नहिंस्यादित्यादौ च वेदे भवद्भिरभ्युपगम्यते, स तु श्रीभाष्यमतेनाभ्युपगम्यते, पदानुषङ्गाध्याहारादेस्तत्र तत्र वर्णनात्। युक्तञ्चैतत्, शाब्दीह्याकाङ्क्षा शब्देनैव पूर्यत इति न्यायेन पदवृत्तिप्रयोज्यस्मृतेस्तदन्यस्मृतिसहकारेण बोधोपधायकत्वासम्भवात् । अस्तु वा श्रीभाष्यमते तादृशबोधाङ्गीकारात् पुरुषार्थहिंसाया निषेधनिर्वाहः ॥ भवन्मते तु तथा निर्वाहो न युक्तः ;

भवन्मते तृतीयबोधाङ्गीकारे सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यत्रोपादानत्वोक्त्या निमित्तत्वस्योपस्थितत्वेन तद्विशिष्टद्वितीयस्यैवाद्वितीयशब्देन निषेधस्य युक्ततया अद्वितीयपदेन गुणादीनामपि निषेध इति भवत्सिद्धान्तस्य भङ्गप्रसङ्गापत्तेः । एवं चेतनगुणत्वसाम्याद्धेयत्वेनोपस्थितानां गुणानां निर्गुणश्रुत्या निषेधः, शरीरत्वसाम्यात्कर्मकृतत्वप्राकृतत्वादिना उपस्थितानामेवाशरीरश्रुत्या निषेध इत्याद्यापत्तेश्च दुर्वारत्वादित्यलं पल्लवितेन । तस्मात्पुरुषार्थहिंसाया एव निषेधो न क्रत्वर्थहिंसाया इति निर्वाहोऽपि श्रीभाष्यमत एव युज्यते ॥

एतेन—मधुना दीक्षिता ब्रह्मचारित्वादिति दाशमिकाधिकरणे सत्रमहीनं च द्वादशाहस्तत्र सर्वैर्मध्वशनं कर्तव्यं न वेति सन्देहे यजमानानामेव सत्रे दीक्षितानामृत्विक्त्वात् दीक्षितस्य ब्रह्मचर्यविधानात् ब्रह्मचारिणश्च मधुप्रतिषेधात् न कर्तव्यं सत्रे मध्वशनम् । न च संस्थिते पृष्ठ्ये षडहे मध्वाशयेद्घृतं वेति विहितमध्वशनाभावे वैगुण्यापत्तिः ; घृताशनेन साद्गुण्यसम्भवात् । अतो मध्वशनमहीनविषयमिति प्राप्ते ब्रह्मचारिणां निषेधस्य पुरुषार्थमध्वशनविषयत्वान्न क्रत्वर्थस्य मध्वशनस्य निषेध इति स्थापितं; तन्न्यायेनात्रापि पुरुषार्थहिंसाया एव निषेध इति—**निरस्तम्** ॥ मध्वशननिषेधशास्त्रगतब्रह्मचारिपदस्य प्रतिपदोक्तब्रह्मचारिपरतयैव द्वादशाहे सत्रे मध्वशनोपपत्तौ धातोः पुरुषार्थाशनपरत्वस्यायुक्तत्वात् निषेधशास्त्रगतं ब्रह्मचारिपदं उपदिष्टातिदिष्टसाधारणब्रह्मचारिपरं उतोपदिष्टमात्रपरमिति संशय्य ; अतिदिष्टसाधारणब्रह्मचारिपरं, असति बाधके प्रमाणानां सामान्ये पक्षपात इति न्यायात्, न च द्वादशाहे मध्वशनशास्त्रं बाधकं, तस्याहीनद्वादशाहे सावकाशतया बाधकत्वायोगादिति पूर्वपक्षे—ब्रह्मचारिपदस्यातिदिष्टसाधारणत्वे लक्षणाप्रसङ्गात् इष्टमात्रविषयतया सत्रेऽपि

मध्वशनोपपत्तिः, ज्योतिष्टोमे दीक्षितस्य ब्रह्मचर्यविधानादतिदेशेनैव क्रत्वर्थतया ब्रह्मचर्यप्राप्तेरित्यधिकरणशरीरस्य भाष्यकृतामभिप्रेतत्वात् पुरुषार्थनिषेधपरत्वेऽपि श्रीभाष्यमते न बाधकमिति चानुपदमेवोपपादितम् ॥

इदं तावत्प्रसङ्गाद्विचार्यते उद्गीथविद्यायाः क्रत्वर्थत्वमुत पुरुषार्थत्वं ?

न तावत्क्रत्वर्थत्वं; 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद' इत्युद्गीथोपासनशून्यस्यापि क्रतुकर्मत्वोक्त्या उद्गीथोपासनस्य व्यभिचारेण क्रतुजन्यपरमापूर्वजनककलिकापूर्वजनकत्वरूपक्रत्वर्थत्वायोगात् ॥

अथ—तत्रर्त्विजामुपासनाभावेऽपि ब्रह्मकर्तृकोपासनस्य सत्त्वान्न व्यभिचारः। उद्गीथोपासनस्य ऋत्विग्गतकलिकापूर्वं प्रति नापृथक्सिद्धिसम्बन्धेन कारणत्वं, किन्तु स्वविषयोद्गीथादिकर्तृत्वसम्बन्धेन। तथा च—ब्रह्मकर्तृकोपासनस्याप्युक्तसम्बन्धेन ऋत्विक्षु सत्त्वान्नानुपपत्तिः; 'एवं—विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति' इति ब्रह्मणो वेदनेनैव ऋत्विजां रक्षणश्रवणात्। तत्रोद्गीथोपासनेन यज्ञयजमानयो रक्षणं क्रतुफलाप्रतिबन्धकरणं, ऋत्विजां रक्षणं च स्ववेदनेनोक्तसम्बन्धेन ऋत्विग्गतेन कलिकापूर्वजननमिति विवेकात्। एवं-होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरतीति उद्गातुरुपासनाभावे होतृगतेनोपासनेन समाधानाभिधानाच्च, उक्तप्रत्यासत्त्यैवोद्गीथोपासनस्य करणताबोधनात् ॥ होतृषदनात्—होतृकर्तृकोद्गीथप्रणवैक्यज्ञानात्, दुरुद्गीथं—स्वकर्तृकवेदनरहितमुद्गीथं, अनुसमाहरति—उद्गाता समादधातीत्यर्थात्। उद्गीथप्रणवैकत्वविज्ञाने होत्रा उद्गात्रा च कर्तव्ये तत्रोद्गातुरेतादृशज्ञानाभावेऽपि न दोषः। प्रणवे होतुरुद्गीथे उद्गातुश्च कर्तृत्वेन होतृगतज्ञानेनैवोद्गातरि कलिकापूर्वसम्भव इति तद्वाक्यतात्पर्यात्—इति चेन्न ॥ यत्र ब्रह्मादीनामप्युद्गीथोपासनं नास्ति तत्र व्यभिचारेण परमापूर्वप्रयोजकत्वरूपक्रत्वर्थत्वासम्भवात्। न च—

तादृशस्थले क्रतुना परमापूर्वमेव न जायत इति—वाच्यम् । **ऐहिकम-प्रस्तुतप्रतिबन्धे तद्दर्शनात्** इत्यधिकरणे तादृशक्रतोरपि परमापूर्व-जनकत्वाभ्युपगमात् ; तदधिकरणे हि यज्ञस्य फलं स्वर्गादिकमिव विद्याऽपि 'यज्ञेन दानेन तपसाऽनाशकेन ब्राह्मणा विविदिषन्ति' इति श्रुतेः ॥

सा च विद्या—अभ्युदयफला मुक्तिफला चेति द्विविधा । तत्राभ्युदयफला विद्या उद्गीथविद्यासहितयज्ञेन तज्जन्मन्येव निष्पद्यते; 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति श्रुत्या उद्गीथविद्यासहितकर्मफलस्य प्रबलकर्मणा प्रतिबन्धाभावरूप-वीर्यवत्तरत्वश्रवणात् ; उद्गीथविद्यारहितयज्ञेन तु प्रतिबद्धत्वाभावे तज्जन्मनि सति प्रतिबन्धके तद्विगमानन्तरं विद्या निष्पद्यत इति व्यवस्थापितम् । उद्गीथविद्यारहितयज्ञेन परमापूर्वजनने प्रतिबन्धक-विगमानन्तरमपि विद्यानिष्पादकत्वानुपपत्त्या तस्य परमापूर्वजनकत्व-मपि तदधिकरणानुमतमित्युद्गीथविद्याया व्यभिचारात् तत्प्रयोजकत्वं न सम्भवति ॥ न च—व्रीहियवयोर्व्यभिचारेऽप्यव्यवहितोत्तरत्वं निवेश्य परमापूर्वप्रयोजकत्वोपपादनवदत्रापि तत्सम्भव इति—वाच्यम् । यदेव विद्यया करोतीति श्रुत्या हि प्रबलकर्माप्रतिबद्धप्रयोजकत्वं विद्याया अवगम्यते ; "तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलं" इति सूत्रे तथोक्तत्वात् । अप्रतिबन्धप्रयोजकत्वं च—प्रबलकर्म-निष्ठप्रतिबन्धकतावच्छेदकीभूताभावप्रतियोगित्वरूपमुत्तेजकत्वम् ; सिषाधयिषाया अनुमित्यप्रतिबन्धप्रयोजकत्वस्य सिद्धिनिष्ठप्रतिबन्धक-तावच्छेदकीभूताभावप्रतियोगित्वरूपत्वात्, अनुमितौ सिषाधयिषा-विरहविशिष्टसिद्धेरिव क्रतुजन्यफले उद्गीथविद्याविरहविशिष्टप्रबल-कर्मणः प्रतिबन्धकत्वात् । एवं च क्रतुजन्यपरमापूर्वं प्रति हेतुत्वस्यैवा-भावान्नाव्यवहितोत्तरत्वनिवेशेन तदुपपादनमिति तस्य न क्रत्वर्थत्वम् ॥

अत एव न पुरुषार्थत्वमपि । गोदोहनादेः परमापूर्वभिन्नपश्वादि-फलकत्ववदस्याः फलान्तराजनकत्वात् ॥ —इति चेन्मैवम् ॥

अनुमितिस्थले सिद्धिकालीनानुमितौ सिषाधयिषायाः कारणत्व-मित्येकः पक्षः। सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यानुमितिसामान्ये कारणत्वादुत्तेजकत्वमित्यपरः पक्षः। तत्र द्वितीयपक्षे सिषाधयिषायाः विशेषणाभावरूपतया प्रतिबन्धकाभावरूपविशिष्टाभावसम्पादकत्वम्। तथोद्गीथविद्याया अपि **प्रथमपक्षे**—प्रबलकर्मकालीनक्रतुफले तस्याः कारणत्वात् क्रत्वर्थत्वम्। क्रत्वर्थत्वं हि—न परमापूर्वप्रयोजकत्व-मेव, किन्तु क्रतुफलप्रयोजकत्वम्। तच्च विद्यादिरूपफलप्रयोजकत्वेऽप्युपपद्यते। **द्वितीयपक्षे**—विशिष्टाभावरूपप्रतिबन्धकाभावप्रयोजकत्वात् विशेषणाभावरूपविद्यायाः पुरुषार्थत्वमुपपद्यते, पश्वादिवत्प्रतिबन्धका-भावस्यापि पुरुषेष्टत्वात्। एतेनोद्गीथविद्यायाः पुरुषार्थत्वे अन्यथात्वं-शब्दादित्यधिकरणे उद्गीथविद्यायाः क्रत्वर्थत्वेन क्रतुसाद्गुण्यफलकत्वेऽपि आर्थवादिकमपि फलं तदविरुद्धं ग्राह्यमिति देवताधिकरणे प्रति-पादितमिति भाष्यं विरुध्यते ॥

तथा पुरुषार्थाधिकरणे—यदेव विद्यया करोतीति विद्यायाः तृतीया-श्रुत्या कर्माङ्गत्वप्रतिपादनात् न विद्यातः पुरुषार्थ इति तच्छ्रुतेरिति सूत्रेण पूर्वपक्षे कृते तत्र विद्याशब्दस्य प्रकृतोद्गीथविद्यामात्रविषयत्वे-नोद्गीथविद्यामात्रस्य कर्माङ्गत्वेऽपि न ब्रह्मविद्यायाः कर्माङ्गत्वमस्ती-ति एतदर्थप्रतिपादकयोरसार्वत्रिकीतिसूत्रतद्भाष्ययोश्च विरोधस्स्यात्, तस्याः क्रत्वर्थत्वे च 'तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलं', 'अङ्गेषु यथाश्रयभावः' इत्यधिकरणद्वयस्य महता संरम्भेण क्रत्वर्थतानिराकरणपरस्य असङ्गतिरित्याशङ्क्य—उद्गीथविद्यायाः पुरु-षार्थत्वमेव, उक्ताधिकरणद्वये व्यवस्थापितत्वात्; अन्यथात्वंशब्दा-दित्यधिकरणभाष्यं असार्वत्रिकीति सूत्रं चाभ्युपगम्यवादमात्रमिति—

केषां चित्समाधानमनुपादेयम्; अभिप्रायभेदेनाविरोधोपपादनादित्यलं प्रसक्तानुप्रसक्त्या। तस्मादग्नीषोमीयवाक्यस्य यागविधिपरत्वेन हिंसाविधायकत्वाभावात् हिंसाविधायकत्वेऽपि निषेधवाक्यस्य पुरुषार्थहिंसाविषयत्वात् उत्सर्गापवादन्यायो न सम्भवतीति सिद्धम् ॥

एतेन—अग्नीषोमीयवाक्यस्य यागविधिपरत्वेऽपि तादृशयागस्य हिंसां विनाऽनुपपन्नत्वेन तत्र प्रवृत्तिनिर्वाहाय हिंसाविधेरपि कल्पनीयत्वादुत्सर्गापवादन्यायो दुर्वारः—**इति निरस्तम्**; प्रत्यक्षनिषेधविरोधेन विधिकल्पनाया अयोगात् ॥

न च—सामान्यनिषेधस्य विशेषविधिकल्पनायां न प्रतिबन्धकत्वं, तथा सति 'तिभि ऋणवा जायते' इति ऋणश्रुत्या, 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' इति सन्न्यासे प्रत्यवायश्रुत्या, यावज्जीवमग्निहोत्रं जुहोति, स खल्वेवं वर्तयन्यावदायुषं' इति गार्हस्थ्यधर्माणां यावज्जीवानुवृत्तिश्रुत्या च सन्न्यासस्य बाधितत्वेन 'त्रयो धर्मस्कन्धाः' इत्याश्रमान्तरवत्सन्न्यासेऽपि विधिरिति विधिकल्पनस्य **विधिर्वाधारणवदिति** सूत्रसिद्धस्यानुपपत्तेः। एवं च—यथा सन्न्यासे विधिं कल्पयित्वा तेन ऋणादिश्रुतीनां सङ्कोचेनोत्सर्गापवादन्यायस्तथा प्रकृतेऽपि। प्रतिपादितं चेदं विधिर्वेत्यत्र **श्रीभाष्ये**—एवमाश्रमान्तरविधानात् ऋणश्रुतिर्यावज्जीवश्रुतिरपवादश्रुतिश्चाविरक्तविषया वेदितव्याः—**इति वाच्यम्** ॥ सामान्यनिषेधस्य विशेषविधिकल्पनप्रतिबन्धकत्वाभावे 'सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्', 'अबाधाच्च' इति सूत्रयोर्विरोधापत्तेः। तथा हि प्राणविद्यायां 'न ह वा एवंविदि किञ्चनानन्नं भवति' इति छान्दोग्ये—'नास्यानन्नं जग्धं भवति' इति वाजसनेयके श्रवणात्। प्राणविद्यानिष्ठस्य सर्वदा सर्वान्नानुमतिरिति पूर्वपक्षे प्राणात्यय एव प्राणविदस्सर्वान्नानुज्ञानं न सर्वदा, ब्रह्मविदोऽप्युषस्तेः प्राणात्यय एव इभ्योच्छिष्टाशनस्य दर्शनेन

प्राणविदस्सर्वान्नानुमतिः प्राणात्यय एवेत्यस्य किंपुनर्न्यायसिद्धत्वात् ॥

न च—यथा ब्रह्मविद्यानिष्ठविषये अप्रवृत्तमपि न काञ्चनपरिहरेत् तद्व्रतमिति शास्त्रबलात् वामदेव्योपासकस्य प्रार्थयमानसर्वयोषित्परिग्रहानुज्ञानं न परदारान् गच्छेदिति निषेधोपमर्देन प्रवर्तते, तथा प्राणविद्यानिष्ठविषये सर्वान्नानुमतिर्विशेषशास्त्रबलात्स्यादिति—वाच्यम् । तत्र प्रत्यक्षविधिसत्त्वात् अत्र तदभावेन वैषम्यादिति पूर्वसूत्रेण सिद्धान्तिते अत्रापि विधिकल्पनं स्यादित्याशङ्कायां आहारशुद्धौ सत्त्वशुद्धिरिति प्रत्यक्षनिषेधविरोधेन विधिकल्पनासम्भवादित्यर्थपरस्याबाधाच्चेत्यस्य प्रवृत्तेः ॥

एवं च—सामान्यनिषेधस्य विशेषविधिकल्पने प्रतिबन्धकताविरहे तत्रापि विधिकल्पनसम्भवेन प्राणविद्यानिष्ठस्य सर्वदा सर्वान्नानुज्ञापत्तिर्दुर्वारा । सन्न्यासस्थले च 'ब्रह्मचर्यं समाप्य गृही भवेत्, गृहाद्वनी भूत्वा प्रव्रजेत्; यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्'—इतिजाबालश्रुतौ प्रत्यक्षविधिसत्त्वेन तद्बलेन ऋणादिश्रुतीनामविरक्तविषयतया व्यवस्थितत्वेन तादृशसामान्यनिषेधाप्रवृत्त्या 'त्रयो धर्मस्कन्धाः' इत्यत्र सन्न्यासविधिकल्पनस्य युक्तत्वात् ॥ न च—जाबालश्रुतिगतप्रत्यक्षविधिबलादेव सन्न्यासे प्रवृत्तिनिर्वाहात्त्रयो धर्मस्कन्धा इत्यत्र सन्न्यासविधिकल्पनं व्यर्थमिति—वाच्यम्; येन पुरुषेण जाबालवाक्यं न श्रुतम्, त्रयो धर्मस्कन्धा इत्यादिच्छान्दोग्यवाक्यमेव श्रुतं तस्य पुरुषस्य सन्न्यासे प्रवृत्तिनिर्वाहकतया सार्थक्यात्, **भेदान्नेति चेदेकस्यामपि** इतिसूत्रे वैश्वानरादिविद्यानां शाखाभेदेन श्रूयमाणानामैक्ये शाखाभेदेनैकस्या एव विधिभेदो व्यर्थ इत्याशङ्क्य तत्तच्छाखाध्यायिनं प्रति तस्य तस्य वाक्यस्य प्रवर्तकतया सार्थक्यस्योपपादितत्वात्, तन्न्यायस्य प्रत्यक्षविधिद्वयस्थल इव प्रत्यक्षकल्पितविधिद्वयस्थलेऽपि प्रवृत्तेः ॥

न चैवं—श्रीभाष्ये जाबालानामाश्रमविधिमसन्तमिव कृत्वैतेष्वन्यपरेष्वपि वाक्येषु आश्रमप्राप्तिरवश्याश्रयणीयेत्युपपादितमिति विधिर्वेति सूत्रस्य कृत्वाचिन्तापरत्वाभिधानं विरुध्यते, जाबालश्रुतौ प्रत्यक्षविधिसत्त्वेऽपि छान्दोग्ये विधिकल्पनसम्भवादिति—वाच्यम्। आश्रमविधिमसन्तमिव कृत्वेत्यस्य जाबालश्रुतिमनधीतवन्तं पुरुषं प्रति तादृशविधिमसन्तमिव कृत्वेत्यर्थाङ्गीकारेणाविरोधात्, अन्यथा सूत्रकारस्य सर्वज्ञस्य तादृशश्रुत्यपरामर्शकल्पनापत्तेः, पूर्वतन्त्रे क्वचित्कृत्वाचिन्ताया अगत्याऽभ्युपगमेऽपि सति गत्यन्तरे तदङ्गीकारस्यानुचितत्वात्॥

वस्तुतस्तु—त्रयो धर्मस्कन्धा इत्यत्र विधिकल्पनमयुक्तम्; कल्पकाभावात्, ऋणश्रुत्यादिभिर्बाधाच्च॥

अथ—त्रयो धर्मस्कन्धा इत्यत्र प्रतिपाद्यमाना आश्रमा विधिविषयाः, इष्टसाधनतया श्रुतिबोधितत्वात्, ज्योतिष्टोमादिवत्। न चासिद्धिः; तत्र यज्ञोऽध्ययनं दानमिति प्रथम इत्यनेन गृहस्थस्य, तप इति द्वितीय इत्यनेन वैखानसपरिव्राजकयोः, ब्रह्मचार्याचार्यकुलवासी तृतीय इत्यनेन ब्रह्मचारिणश्चोपपादनेन 'सर्व एते पुण्यलोका भवन्ति, ब्रह्मसंस्थोऽमृतत्वमेति' इत्युत्तरवाक्ये एतच्छब्देन चतुर्णामाश्रमविशिष्टानां परामर्शेन तेषां ब्रह्मोपासनशून्यानां पुण्यलोकप्राप्तेः सति ब्रह्मोपासने मोक्षप्राप्तेश्च बोधनात्, धनवान् सुखीत्यादाविवोद्देश्यतावच्छेदकविधेययोः प्रयोज्यप्रयोजकभावस्य संसर्गतया भानेन तत्तदाश्रमविशिष्टानां फलप्राप्त्यभिधाने तादृशाश्रमाणां फलजनकत्वभानात्, यज्ञोऽध्ययनं दानमिति प्रथम इत्यादौ इतिशब्दानन्तरं प्रवृत्तिमानित्यध्याहारेण यज्ञदानादिविषयकप्रवृत्तिमतो गृहस्थस्य तपोविषयकप्रवृत्तिमतोर्वैखानसपरिव्राजकयोश्च बोधनात्, घट इति ज्ञानवानित्यादौ घटविषयकज्ञानवतो बोधात्, ब्रह्मचार्याचार्यकुलवासी

तृतीय इत्यत्र पुरुषस्य ग्रहणेन पूर्ववाक्ययोरपि तत्तद्धर्मानुष्ठातृपुरुषपरत्वावश्यकत्वात्—इति चेन्न । उक्तानुमानस्य जाबालश्रुतिगतविधिविषयत्वमादायैव चारितार्थ्यात् विध्यन्तरकल्पकत्वायोगात्, धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेन त्रयो धर्मस्कन्धा इत्यत्र उक्ताश्रमाननुतिष्ठेदिति विधिवाक्यं कल्पयित्वा तस्य 'सर्व एते पुण्यलोका भवन्ति' इत्यर्थवादमूलत्वकल्पनापेक्षया सिद्धस्यैव विधिवाक्यस्यार्थवादमूलत्वमात्रकल्पनस्योचितत्वात्; विशेषणमात्रकल्पनया निर्वाहे विशिष्टकल्पनायाः एकधर्मिकल्पनया निर्वाहे धर्मिद्वयकल्पनायाश्चानुचितत्वात् । अत एव पूर्वतन्त्रे—'स्योनन्ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मे सुमनस्यमानः' इतिमन्त्रस्य दलद्वयसमभिव्याहारात्मकवाक्यप्रमाणात् बलीयसा लिङ्गेन यथार्हं विभज्य सदनकरणे पुरोडाशप्रतिष्ठापने च विनियोगमभिधाय समभिव्याहारात्मकैकवाक्यताबलात् कृत्स्नं मन्त्रं सदनकरणे विनियोजयतो बोधायनस्य वचनमप्रमाणम् ॥

न च—कल्पसूत्रस्य स्वसमानविषयकश्रुतिमूलत्वकल्पनया प्रामाण्यं युक्तमिति—वाच्यम्; सिद्धे एकवाक्यत्वे विनियोगमूलकत्वकल्पनापेक्षया तन्मूलत्वविशिष्टश्रुतिकल्पनस्य गुरुत्वादित्युक्तम् । अत एव च परमात्मनस्त्रैलोक्यशरीरप्रतिपादकं 'द्यां मूर्धानम्' इति स्मृतिवचनं स्वमूलत्वेन वैश्वानरविद्यायाः परमात्मविषयत्वं कल्पयतीति, 'स्मर्यमाणमनुमानं स्यात्' इति सूत्रस्य परेषां स्मृतिवचनं हि स्वमूलत्वेन श्रुतिं कल्पयति, न तु वैश्वानरविद्यामेव कल्पयितुं प्रभवति; स्वसमानविषयत्वेन प्रसिद्धायां 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' इति मुण्डकश्रुतौ स्वमूलत्वमात्रकल्पनेनोपपत्तौ परमात्मपरत्वेन सन्दिग्धायां वैश्वानरविद्यायां स्वसमानविषयत्वस्वमूलत्वोभयकल्पनायां स्मृतेस्साम-

र्थविरहादिति टीकायां दूषणमुक्तम्। एतत्सर्वमभिप्रेत्यैव विधिर्वेति सूत्रस्य श्रीभाष्ये कृत्वाचिन्तापरत्वोपपादनम्। तथा च त्रयो धर्मस्कन्धा इत्यत्र विधिकल्पनस्य श्रीभाष्याननुमतत्वात्सामान्यनिषेधस्थले विधिकल्पनायोगात्, कल्पितविधिनोत्सर्गापवादन्यायो निष्प्रमाणक एव॥

नन्वेवं–'तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते, एवमेवंविदि पापं कर्म न श्लिष्यते' 'तस्यैवात्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन' इत्याद्युत्तराघाश्लेषश्रुतौ 'तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेत, एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इति पूर्वाघविनाशश्रुतौ चोत्तरपूर्वाघयोः अश्लेषविनाशकामो ब्रह्मोपासीत–इति फलविधिं कल्पयित्वा 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इति सामान्यनिषेधस्याविद्वद्विषयतया सङ्कोचस्य तदधिगमउत्तरपूर्वाघयोरित्यधिकरणसिद्धतया प्रत्यक्षसामान्यनिषेधस्थलेऽपि विधिकल्पनस्य तेनोत्सर्गापवादन्यायस्य च दुर्वारता—इति चेन्न॥ नाभुक्तमिति शास्त्रस्य प्रायश्चित्तविधायकशास्त्रेण विरोधपरिहारायाकृतप्रायश्चित्ते कर्मणां भोगं विना नाशाभावपरत्वावश्यकतया ब्रह्मविद्याया अपि प्रायश्चित्तत्वस्य—

"अपि चेत्पातकं किञ्चिद्योगी कुर्यात्प्रमादतः।
योगमेव निषेवेत नान्यं कृच्छ्रं समाचरेत्॥"—

इत्यादिशास्त्रसिद्धतया, उत्तरपूर्वाघाश्लेषविनाशबोधकशास्त्रस्य नाभुक्तमिति शास्त्रेण विरोधाभावादत्र प्रायश्चित्तविधिनैवोत्सर्गापवादन्यायस्य सिद्धत्वेन कल्पितविधिना तदनङ्गीकारात्॥

ननु–प्रायश्चित्तविधिप्रयुक्तोत्सर्गापवादन्यायेन हि नाभुक्तमितिशास्त्रघटककर्मपदस्य निष्पन्नप्रायश्चित्तासमानकालीनकर्मलाक्षणिकत्व-

मेव वक्तव्यम्; अत्र निष्पन्नत्वानिवेशे अनिष्पन्नप्रायश्चित्तसमानकालीनकर्मणोऽप्यनुभवेन विनानाशापत्तेः। एवं च विद्यारम्भकाले पूर्वाघविनाशबोधकशास्त्रेण नाभुक्तमित्यस्य न विरोधपरिहारसम्भवः, विद्यायाः प्रायश्चित्तत्वेऽप्यारम्भकाले तस्या अनिष्पन्नत्वेन निष्पन्नप्रायश्चित्तासमानकालीनत्वस्य विद्यारम्भकालीनपूर्वाघेऽपि सत्त्वात्कल्पितविधिना तादृशन्यायस्य दुर्वारता—इति चेन्न॥ विद्यारम्भकाल एव पूर्वाघानां विनाशाङ्गीकारे "साम्पराये तर्तव्याभावात्तथा ह्यन्ये" इत्यधिकरणविरोधापत्तेः; तदधिकरणे हि—कौषीतकिनां पर्यङ्कविद्यायां 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति'—इत्युपक्रम्य, 'स आगच्छति विरजां नदीं तां मनसाऽत्येति तत्सुकृतदुष्कृते धूनुते'—इति विरजानदीतरणानन्तरं सुकृतदुष्कृतनाशश्रवणात्, छान्दोग्ये—'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि'—इति शरीरवियोगकाले तच्छ्रवणादुभयश्रुत्यविरोधाय केषांचित्कर्मणां शरीरवियोगकाले नाशः, केषांचिच्च विरजातरणानन्तरम्—इति **पूर्वपक्षं प्रापय्य**; कर्मणस्सुखदुःखभोगैकफलकत्वाद्देहवियोगानन्तरं भोक्तव्यसुखाद्यभावेन कर्मकल्पनस्य विफलत्वाद्देहवियोगकाल एव कृत्स्नकर्मनाशस्य कौषीतकीगतस्य तत्सुकृतदुष्कृते धूनुत इत्यस्य एनं देवयानमापद्येत्यस्य प्रागन्वयान्न विरोधः—इति **सिद्धान्तितम्**॥ तथा च—विद्यानिष्पत्त्यनन्तरमेव कर्मनाशाङ्गीकारान्निष्पन्नप्रायश्चित्तासमानकालीनकर्मलक्षणयैव विरोधपरिहारोपपत्तिः॥

न चैवं—तदधिगम उत्तरपूर्वाघयोरित्यधिकरणे विद्यारम्भकाले पूर्वाघनाशव्यवस्थापनं विरुध्यत इति—वाच्यम्; विद्यारम्भे हि न पूर्वाघस्य विनाशो जायते; किन्तु विद्यारम्भः प्रीतस्य परमात्मन एतदुपासनसमाप्तावेतस्याघनाशो भूयादिति सङ्कल्पो जायते। विनाशस्तु

देहवियोगकाल एव, भगवतस्सत्यसङ्कल्पत्वात् सङ्कल्पमात्रेण विनाशस्य सिध्यावश्यकत्वेऽपि तादृशसङ्कल्पविषयीभूतकालाभावान्न सिद्धिः, अथापि सिद्धप्राय इत्यभिप्रायेण सूत्रे अश्लेषविनाशाविति विनाशपदोपादानात् ॥

प्रतिपादितं चेदं पूर्वपक्षसिद्धान्तरूपेण **टीकायाम्**—

"ननु—पूर्वं शरीरपातानन्तरं कर्मक्षय उक्तः; अत्र तूपासनारम्भे कर्मप्रहाणमुक्तं ; कथमिदमुपपद्यते ? उच्यते—उपासनारम्भसमाप्त्योः भगवत्प्रीतिविशेषाभिप्रायत्वात् अधिकरणद्वयाविरोधः । उपासनारम्भप्रीतः परमात्मा तत्समाप्तावुपासकस्याघं क्षमिष्यामीति सङ्कल्पयति ; समाप्तौ तु क्षान्तमिति सङ्कल्पयति । अतोऽधिकरणद्वयार्थ उपपन्नः ॥" —इति ॥

न चैवमपि—नोक्तलक्षणया विरोधशान्तिः ; देहवियोगकालेऽपि विद्याया अनिष्पन्नतया निष्पन्नप्रायश्चित्तसमानकालीनत्वस्य कर्मण्यभावात् तदानीमेव विद्यानिष्पत्तौ तदुत्तरक्षणे मोक्षावश्यकतया अर्चिरादिगतेर्वैयर्थ्यप्रसङ्गादिति—वाच्यम् ; उपासनस्य स्वजन्यार्चिरादिगतिजनितब्रह्मप्राप्तिमत्तासम्बन्धेन स्वस्वरूपाविर्भावरूपमोक्षं प्रति कारणतया उपासनस्य निष्पन्नत्वेऽपि तादृशकारणतावच्छेदकसम्बन्धसम्पादकतया गतिसार्थक्यात्, 'एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति श्रुत्या अर्चिरादिगतिजनितब्रह्मप्राप्तेर्व्यापारताबोधनेन स्वजन्यतादृशव्यापारवत्तासम्बन्धेन कारणताया अपि तादृशश्रुतिसम्मतत्वात् ॥

न च—**परं जैमिनिर्मुख्यत्वादिति सूत्रश्रीभष्ये** "यथा हि विद्योत्पत्तेः वर्णाश्रमधर्मशौचाचारदेशकालाद्यपेक्षा तमेतं वेदानुवचनेनेत्यादिशास्त्रादवगम्यते, तथा निश्शेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यते" इत्युक्तत्वात् देह-

वियोगकाले विद्याया निष्पत्त्यभावावगमादुक्तलक्षणया न विरोधपरिहार इति—वाच्यम्; तत्र विद्यानिष्पत्तिपदस्य विद्याव्यापारनिष्पत्तिपरत्वेनाविरोधात्। विद्यानिष्पत्तिपदस्य यथाश्रुतार्थपरत्वेऽपि न क्षतिः; नाभुक्तमिति शास्त्रस्य स्वाश्रयत्वस्वजन्यकर्माश्रयत्वान्यतरसम्बन्धेन भोगजनकत्वपरतया अश्लेषविनाशशास्त्रस्य च कर्मणां ब्रह्मविदि भोगजनकत्वाभावपरतया विरोधस्यैवाभावेन तन्न्यायानपेक्षणात्, विद्यया ब्रह्मविदि कर्मणां नाशेऽपि स्वजन्यकर्माश्रयत्वसम्बन्धेन तस्य सुहृत्सु द्विषत्सु च फलजनकत्वोपपत्तेः। तथा च **तदधिगम इत्यत्र श्रीभाष्यम्**—

> "न च नाभुक्तं क्षीयते कर्मेत्यनेन शास्त्रेणास्य विरोधः; भिन्नविषयत्वात्। तद्धि कर्मणां फलजननसामर्थ्यद्राढिमविषयं, एतत्तूत्पन्नाया विद्यायाः प्राक्कृतानां पाप्मनां फलजननशक्तिविनाशसामर्थ्यं, उत्पत्स्यमानानां च फलजननशक्त्युत्पत्तिप्रतिबन्धकरणसामर्थ्यं च प्रतिपादयतीति द्वयोर्विषयो भिद्यते॥" —इत्यादिना॥

यत्तु न्यायसिद्धाञ्जने—नाभुक्तं क्षीयते कर्मेत्यादिकं तु विद्याविहीनविषयम्—इत्युक्तं; तत्तु—न स्वमतानुरोधेन, किन्तु भास्करभाष्ये तथोक्तत्वात्तन्मतानुरोधेनेति न श्रीभाष्यविरोध इति बोध्यम्॥ वस्तुतस्तु—विद्यानिष्ठविषये कर्मणां फलजनकत्वासम्भवे विद्याहीनतन्मित्रादौ स्वजन्यकर्माश्रयत्वसम्बन्धेन भोगजनकत्वपरं तादृशशास्त्रमिति न्यायसिद्धाञ्जनवाक्यार्थः। तथा च भाष्योक्तार्थस्यैव विशदीकरणान्न तद्विरोधः॥

अथ—अत्रोत्सर्गापवादन्यायेन वा विषयभेदेन वा विरोधपरिहारो न युक्तः, नाभुक्तमिति शास्त्रे स्मृतित्वस्य श्रुतप्रकाशिकोक्तत्वेन श्रुतिस्मृत्योर्विरोधे श्रुत्या स्मृतिबाधस्यैव युक्तत्वात्। उक्तं हि

पूर्वकाण्डे—'विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्' इति; प्रत्यक्ष-श्रुतिविरुद्धं स्मृतिवचनं अनपेक्षं अनादरणीयमित्यर्थः। ननु तादृशस्मृतेरपि स्मृतित्वहेतुना श्रुतिमूलकत्वानुमानादादरणीयत्वं स्यादित्यत्राह 'असति ह्यनुमानम्' इति; असति प्रत्यक्षश्रुतिविरोधे हि स्मृतिमूलश्रुत्यनुमानमित्यर्थः। एवं चाश्लेषविनाशादिबोधकप्रत्यक्ष-श्रुतिविरोधेन नाभुक्तमिति स्मृतिमूलश्रुत्यनुमानासम्भवात्तादृशस्मृते-रप्रामाण्यमेव युक्तम्—इति चेन्न। विद्वदविद्वत्साधारण्येन प्रवृत्ताया-स्तादृशस्मृतेरश्लेषविनाशादिबोधकश्रुत्या विद्वद्विषये बाधेन विद्वद-विद्वदुभयसाधारणस्वसमानार्थकश्रुतिमूलकत्वानुमानासम्भवेऽप्यविद्वन्मा-त्रविषयकसमानार्थकश्रुतिमूलकत्वानुमानसम्भवात्तादृशस्मृतेरविद्वद्विषये प्रामाण्यस्य दुर्वारत्वात्, आत्मघटावनित्यावित्यनुमानस्य श्रुत्या आत्मांशे बाधेऽपि घटांशे प्रामाण्यस्य दर्शनात्। तथा चोक्तरीत्या बाधाङ्गीकारे स्मृतिगतकर्मपदस्याविद्वत्कृतकर्मणि लक्षणा समाश्रयणीया, श्रीभाष्योक्तनिर्वाहे च न लक्षणेति लाघवम्॥

नन्वेवं—न चाधिकारिकमपि पतनानुमानात्तदयोगादिति सूत्रे स्मृत्या श्रुतिबाधाङ्गीकारो न युज्यते। तत्र हि स्त्रीसङ्गादिना भ्रष्टानां ब्रह्मचारिणां प्रायश्चित्तविधायिकायाः 'यो ब्रह्मचार्यवकिरेत् स तं गर्दभमालभेत' इति श्रुतेः—

"आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः।
प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा॥"—

इति स्मृत्या—बाधाङ्गीकारात्। आधिकारिकं—अधिकारिविचाररूप-पूर्वकाण्डषष्ठाध्याये प्रतिपादितं श्रौतं प्रायश्चित्तं, नैष्ठिकानां भ्रष्टानां न सम्भवति; कुतः? पतनानुमानात्—नैष्ठिकानां भ्रष्टानां पतनस्मृतेः, तस्य प्रायश्चित्तासम्भवात्; अतोऽधिकारलक्षणोक्तं प्रायश्चित्तं न नैष्ठिकविषयं, किन्तूपकुर्वाणब्रह्मचारिविषयमिति तत्सूत्रार्थस्य भाष्यो-

क्तत्वात्। तैत्तिरीयक आरणे द्वितीयप्रश्नेऽपि प्रायश्चित्तमुक्तम्—'स एतां प्रायश्चित्तिं विदाञ्चकार, स देवः काश्यपो यो ब्रह्मचार्यवकिरेत्, अमावास्यायां रात्रीयामग्निं प्रणीयोपसमाधाय द्विराज्यस्योपघातं जुहोति' इत्यादिना। एवं च प्रायश्चित्तविधायकप्रत्यक्षश्रुतिबाधेन प्रायश्चित्ताभावस्मृतेः श्रुतिमूलकत्वानुमानायोगात् औदुम्बरी सर्वा वेष्टयितव्येति स्मृतेरिवाप्रामाण्यं वा प्रायश्चित्तगौरवाभिप्रायकत्वं वा युक्तम्—इति चेन्न ॥ ब्रह्मचारित्वसामानाधिकरण्येन प्रायश्चित्तप्रतिपादिकायाः श्रुतेस्तत्सामानाधिकरण्येन तदभावप्रतिपादकस्मृतौ बाधकत्वायोगात्, स्मृतेरबाधेन निर्वाहसम्भवे तद्बाधस्यान्याय्यत्वेन श्रुतेस्सामानाधिकरण्येन प्रायश्चित्तबोधपरत्वस्यैव युक्तत्वात्। न च—उपकुर्वाणब्रह्मचारिणः स्त्रीनियमातिक्रमस्योपपातकान्तर्भूतस्य प्रायश्चित्तमभिधाय उत्तरेषां चैतदविरोधीति स्मृत्या नैष्ठिकादिषु प्रायश्चित्तातिदेशात् तदनुरोधेन श्रुतेरप्यवच्छेदकावच्छेदेन प्रायश्चित्तबोधपरत्वावश्यकतया श्रुत्या स्मृतिबाधो दुर्वार इति—वाच्यम्; एवमपि श्रुतेः स्मृतिबाधकत्वायोगात्; निषिद्धकर्मणा हि भगवतस्त्रिविधो निग्रहो जायते—स्त्रीसङ्गादिना ब्रह्मचारी नरकानुभवभाग्भवेदित्येकः, वैदिककर्मस्वनधिकृतो भवेदिति द्वितीयः, स्त्रीसङ्गादिसजातीयनिन्दितकर्मसु रुचिमान् भवेदिति तृतीयः। तत्र त्रिविधनिग्रहविनाशकानि कानिचित्प्रायश्चित्तानि, कानिचिच्चान्यतमशक्तिविनाशकानि। अत्र प्रायश्चित्तविधायकश्रुत्या द्वितीयनिग्रहाभावप्रयोजकप्रायश्चित्ताभावपरस्मृतेर्न विरोधः; येन शुध्येदित्यनेन द्वितीयनिग्रहाभावरूपशुद्धिहेतुभूतप्रायश्चित्ताभावस्यैव स्मृत्या बोधनात्, स्मृतेः प्रायश्चित्तसामान्याभावपरत्वे येन शुध्येदित्यस्य व्यर्थतापत्तेः। प्रायश्चित्तसामान्यपरश्रुतेः प्रायश्चित्तविशेषाभावपरस्मृतौ च न बाधकत्वं; वह्निमत्ताज्ञानस्य महानसीयवह्न्यभाववत्ताबुद्धावप्रतिबन्धकत्वात्, प्रथमनिग्रहनिरासकप्रायश्चित्तपरतयाऽपि श्रुतेर्निर्वाहात् ॥

न च–उक्तरीत्या श्रुतिबोधितस्य प्रायश्चित्तस्य नैष्ठिकेऽपि प्रवृत्त्यङ्गीकारे नचाधिकारिकमिति सूत्रस्य भाष्योक्तार्थोऽनुपपन्नः, किन्त्वाधिकारिकं द्वितीयनिग्रहाभावप्रयोजकं कर्माधिकारापादकं प्रायश्चित्तं न सम्भवतीत्येवार्थो युक्त इति–वाच्यम्; आधिकारिकपदस्य अधिकारिलक्षणोक्तमित्यर्थस्येवाधिकारापादकमित्यर्थस्यापि श्रीभाष्यसम्मतत्वात्। तथा च **बहिस्तूभयथाऽपीत्यत्र श्रीभाष्यम्**--

"यद्यपि कल्मषनिवर्हरणाय कैश्चिद्वचनैः प्रायश्चित्ताधिकारो विद्यते, तथाऽपि कर्माधिकारानुगुणशुद्धिहेतुप्रायश्चित्तं न सम्भवति; 'प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा' इति स्मृतेरित्यर्थः ॥" —इति ॥

न च–उक्तार्थोऽपि 'न चाधिकारिकम्' इति सूत्र एव वक्तव्यमिति–वाच्यम्। तथा सति 'उपपूर्वमपीत्येके' इति सूत्रे करिष्यमाणाया उत्तरेषां चैतदविरोधीत्यतिदेशस्मृत्या प्रायश्चित्तसद्भावशङ्काया अनुपपत्तेः, अतः प्रथमतो यथाश्रुतार्थस्यैवाङ्गीकारात् ॥ न चैवमप्यविशेषप्रवृत्तश्रुतेस्स्मृत्या सङ्कोचलक्षणबाधाङ्गीकारो न युक्त इति वाच्यम्; स्मृतेर्विशेषविषयत्वरूपप्राबल्यसत्त्वेन तया श्रुतिसङ्कोचोपपत्तेः। न च–प्रमेयसिद्धेः प्रमाणाधीनत्वात् प्रमेयबलाबलस्य प्रथमावगतप्रमाणबलाबलापेक्षया दुर्बलत्वात् विशेषत्वरूपप्रमेयप्राबल्यमङ्गीकृत्य स्मृत्या श्रुतिबाधो न युक्त इति–वाच्यम्। प्रमाणानां हि न तमःप्रकाशयोरिव स्वरूपतो विरोधः, किन्तु प्रमेयविरोधनिबन्धनः। तथा च प्रमेयविरोधपर्यालोचनदशायामेव सामान्यत्वविशेषत्वादिरूपप्रमेयगतबलाबलेन शास्त्रार्थनिर्णयसम्भवेन तत्र प्रमाणबलाबलस्याकिञ्चित्करत्वात्। अत एव पूर्वतन्त्रे शिष्टाकोपाधिकरणे 'वेदं कृत्वाऽथवेदिं करोति' इति श्रुतेः पदार्थधर्मभूतक्रमबोध-

कत्वेन दुर्बलत्वात् क्षुतआचामेदिति पदार्थबोधकत्वेन प्रबलया स्मृत्या सङ्कोचः स्वीकृतः। उक्तं च **वार्त्तिके**—

"दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा।
तदा हि विपरीतत्वं शिष्टाकोपे यथोदितम् ॥
अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः।
दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः ॥" —इति ॥

उत्तरतन्त्रेऽप्यसन्दिग्धार्थत्वेन प्रबलया कपिलस्मृत्या सान्दिग्धार्थत्वेन दुर्बलानां वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यं न सम्भवतीत्याशङ्क्य, कपिलस्मृतेः प्रबलतरमन्वाद्यनेकस्मृतिविरुद्धत्वेन अप्रमाणत्वात् तया वेदान्तबाधो न युक्त इति स्मृत्यधिकरणे सिद्धान्तितम् ॥

एतदभिप्रेत्यैव सर्वार्थसिद्धौ—'तन्मात्राणि भूतादौ लीयन्ते' इति श्रुत्यनुरोधात् पञ्चतन्मात्राणामपि तामसाहङ्कारादुत्पत्तिः। न च—अनेकपुराणेषु शब्दतन्मात्रस्यैकस्यैव तामसाहङ्कारादुत्पत्तिः। स्पर्शतन्मात्रादीनामाकाशादिभ्य उत्पत्तिरिति प्रतिपादनं विरुध्यत इति—वाच्यम्; श्रुतिविरुद्धस्मृतीनामप्रामाण्यात्—**इत्याशङ्क्य**; उपबृंहणरहितायाः श्रुतेराप्तमान्योन्यसङ्घटितानेकोपबृंहणविरोधे तदनुगुणं नेतव्यत्वात् पाशाधिकरणन्यायेन बहुवचनस्य निरर्थकत्वात् शब्दतन्मात्रस्यैकस्यैव तामसाहङ्कारादुत्पत्तिः—**इदि समाहितम्** ॥

अत एव च—"निर्गुणवाक्यानां सगुणवाक्यानां च विषयमपहतपाप्मेत्याद्यपिपास इत्यन्तेन हेयगुणान् प्रतिषिध्य सत्यकामस्सत्यसङ्कल्प इति ब्रह्मणः कल्याणगुणान् विदधतीयं श्रुतिरेव विविनक्तीति सगुणनिर्गुणवाक्ययोर्विरोधाभावात्"—इति **प्रथमसूत्रस्थश्रीभाष्यव्याख्यानावसरे टीकायां**—'साक्षी चेता केवलो निर्गुणश्च' इति गुणसामान्यनिषेधवत् गुणसामान्यविधानस्य श्रुतिषु क्वाप्यदर्शनात् 'वर्षायुतैर्यस्य

गुणा न शक्याः' 'स ते गुणानामयुतैकदेशं' 'नान्तं गुणानां गच्छन्ति' इत्यादिस्मृतिवचनाभिप्रायेण सगुणवाक्यानामित्युक्तमिति—व्याख्याय श्रुतिस्मृत्योरुत्सर्गापवादन्यायो दर्शितः। न च—श्वेताश्वतरे 'यः कालकालो गुणिसर्वविद्यः' इति गुणसामान्यविधायकश्रुतिसत्त्वात्तादृशश्रुत्यभावाभिधानमनुपपन्नमिति—वाच्यम्। द्रव्यमात्रसाधारणस्य गुणसामान्यस्याभिधानवैयर्थ्यात्तत्रत्येनिप्रत्ययस्य प्राशस्त्यपरतया गुणीत्यस्य प्रशस्तगुणवानित्यर्थकत्वेन गुणसामान्यार्थकत्वाभावात्। यद्वा—गुण्यते आवर्त्यते पुनःपुनराश्रितैरनुसन्धीयत इति गुणः। सौशील्यं—महतो मन्दैस्सह नीरन्ध्रेण संश्लेषरूपं, तद्वानित्यर्थः; 'वशी वदान्यो गुणवानृजुश्शुचिः' इति सौशील्याभिप्रायेणाभियुक्तैर्गुणशब्दप्रयोगात्, 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु' इति विश्वकोशात्; एवमेव 'को न्वस्मिन् साम्प्रतं लोके गुणवान्' इत्यत्र **गोविन्दराजीये** व्याख्यातत्वाच्च। एवं च श्रुतिबाधितार्थे श्रुत्यन्तरस्येव स्मृतिबाधितेऽपि श्रुतेस्सङ्कोचः॥

अत एव श्रुतिसिद्धार्थे श्रुत्यन्तरस्येव स्मृतिसिद्धार्थेऽपि श्रुतेरनुवादित्वमेव पूर्वतन्त्रे मृताग्निहोत्राधिकरणे उत्तरतन्त्रे च कार्याख्यानादपूर्वमित्यत्रोक्तम्। **मृताग्निहोत्राधिकरणे** 'ये पुरोदञ्चो दर्भाः तान् दक्षिणाग्रान् स्तृणीयात्' इति **श्रुतौ**—ये पुरोदञ्चो दर्भाः ते उदञ्चः कार्या इत्येवं विधिवाचकपदाध्याहारेण उदक्त्वांशेऽपि विधायकत्वम्, उताग्रवन्ति प्रागग्राण्युदगग्राणि वेति स्मृतिप्राप्तस्योदगग्रत्वस्यानुवाद इति **संशये**; अपूर्वत्वाद्विधायकत्वमेव, यदाग्नेयोऽष्टाकपाल इत्यादाविव यच्छब्दस्य विधिकुण्ठकत्वाभावेन तत्कल्पनसम्भवादिति उदक्त्वञ्चापूर्वत्वादिति सूत्रेण **पूर्वपक्षं कृत्वा**; नोदगग्रत्वस्य विधिः, किन्तु स्मृतिप्राप्तस्यानुवादः, कुतः प्राप्तिः, अग्रवन्तीत्यादिस्मृतेरिति सतो वा लिङ्गदर्शनादिति सूत्रेण **सिद्धान्तितत्वात्**॥ एवं—'किं मे वासो

भविष्यति, आप इति होचुः, तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति' इति छान्दोग्ये श्रवणादपां प्राणवासस्त्वानुसन्धानं कर्तव्यमिति प्रतीयते । **बृहदारण्यके**—काण्वशाखायां 'किं वासः' इतिप्रश्नस्य 'आपो वासः' इत्युत्तरमुक्त्वा 'तद्विद्वांसः श्रोत्रिया अशिष्यन्तः आचामन्त्यशित्वा चाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते' इति वाक्ये अनमनग्नं कुर्वन्त इति वाक्यश्रवणाद्वासस्त्वचिन्तनमपि कर्तव्यमिति प्रतीयते । आचामन्तीत्याचमनविधिरपि माध्यन्दिनशाखायां 'तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेत्, एतमेव तदनमनग्नं कुरुते' इत्यनग्नत्वचिन्तनाद्वासस्त्वचिन्तनविधिरपि प्रतीयते। आचमने च विधिप्रत्ययश्रवणादाचमनविधिः स्पष्टं प्रतीयते। तत्र द्वयोर्विधेयत्वे वाक्यभेदापत्तेरेकस्यैव विधेयत्वे वक्तव्ये विधिकल्पनप्रयुक्तगौरवाभावात् आचमनस्यैव विधिः, वासस्त्वादिचिन्तनं तु कथञ्चित्स्तुतिरूपतया नेतव्यमिति—**पूर्वपक्षे** आचमनस्य भोजनाङ्गस्य स्मृत्याचारप्राप्तत्वेन विधेयत्वा सम्भवादाचमनान्तरस्य च विधाने गौरवात्प्राणवासस्त्वानुसन्धानमेव विधेयमिति—**सिद्धान्तस्य** कार्याख्यानादपूर्वमिति सूत्रसिद्धत्वात्; स्मृतिप्राप्तेऽपि श्रुतेः प्रामाण्ये तादृशसिद्धान्तभङ्गात्, भोजनाङ्गस्यैवाचमनस्य विधेयतासम्भवेन गौरवाभावात् ॥

न च—स्मृतिप्राप्ते श्रुतेरनुवादित्वेऽपि तादृशसिद्धान्तभङ्गो दुर्वारः, आचमनान्तरविधान इव प्राणवासस्त्वानुसन्धानविधानेऽपि गौरवस्य तुल्यत्वाद्विधिकल्पनाप्रयुक्तगौरवस्य सिद्धान्ते अधिकत्वादिति—वाच्यम् । प्राणवासस्त्वानुसन्धानस्य विधेयत्वाभावे छान्दोग्ये—अद्भिः परिदधतीत्यस्यानन्तरं 'लम्भुको ह वासो भवत्यनग्नो भवति' इत्यर्थवादस्यानुपपत्तेः, प्राणवासस्त्वानुसन्धानस्यैव वासोलाभानग्नत्वप्राप्त्योस्तत्क्रतुन्यायेन फलतया पूर्ववाक्यस्य तद्विधिपरत्वावश्यकत्वात्;

वासो लम्भुको भवति—वासो लब्धा भवतीत्यर्थात्, छान्दोग्ये आच-मनस्यैवानुक्तेः, प्राणवासस्त्वानुसन्धानस्य च शाखात्रयानुगतत्वेन विधेयताया युक्तत्वात्; पूर्वसन्दर्भे—किं मे अन्नं भविष्यति, आश्वभ्य आशकुनिभ्य आकीटपतङ्गेभ्यस्तत्तेऽन्नमिति—तत्तत्प्राण्यदनीये वस्तुनि प्राणाप्यायकभूते प्राणान्नत्वदृष्टिविधिसत्त्वात् तत्साहचर्यादपि वास-स्त्वदृष्टिविधेर्न्याय्यत्वाच्च। इदमपि हेतुत्रयं कार्याख्यानादिति सूत्रादेव लभ्यते; कार्याख्यानादित्यस्य वासस्त्वानुसन्धानकार्यस्य वासोलाभ-स्याभिधानादित्यप्यर्थात्, समन्तादभिधानवाचिना आख्यानादित्य-नेन शाखात्रयानुगतिलाभात्, अपूर्वमित्यस्य पूर्वसन्दर्भगतदृष्टिविधि-सजातीयमित्यप्यर्थात्, नञस्सादृश्यार्थकत्वादिति बोध्यम्॥

ननु—

उक्तरीत्या स्मृतिप्राप्तार्थे श्रुतेः प्रामाण्याभावे सदेव सोम्येदमग्र आसीदित्यनेन विहितबृहदबृहत्साधारणप्रमाविषयत्वरूपसत्त्वविशिष्ट-कारणानुवादेन ब्रह्म वा इदमित्यनेन बृहत्त्वस्य चेतनाचेतनसाधारण-तादृशबृहत्त्वावच्छिन्ने च, आत्मा वा इदमित्यनेनात्मत्वस्यजीवपर-साधारणतादृशात्मत्वावच्छिन्ने च, एको ह वै नारायण आसीदित्यनेन नारायणत्वस्य च विधिरिति सिद्धान्तो विरुध्यते॥

"आसीदेको ह वै चात्र विष्णुर्नारायणोऽव्ययः।
न ब्रह्मा न च रुद्रश्च न देवा न महर्षयः॥
न इमे द्यावापृथिवी न सोमो न च भास्करः।
न नक्षत्राणि लोकाश्च न चाण्डं महदावृतम्॥"—

इत्यनेन पाद्मपुराणगतद्वात्रिंशाध्यायगतोपबृंहणेनात्मत्वविशिष्टे कारणे नारायणत्वस्य प्राप्तत्वात्, अत्रत्यविष्णुपदस्य आत्मपरत्वात्, आप्नो-तीत्यात्मेति शरीरप्रतिसम्बन्ध्यर्थकात्मपदस्थाने व्याप्त्यर्थकविष्णु-पदस्य प्रयोगात्; अन्यथा विष्णुशब्दस्य एको ह वा इति श्रुत्यु-

पबृंहणत्वानुपयुक्ततया वैयर्थ्यापत्तेः। एवं—

"एको नारायणो देवः पूर्वसृष्टं स्वमायया।
संहृत्य कालकलया कल्पान्त इदमीश्वरः॥
एक एवाद्वितीयोऽभूदात्माधारो निराश्रयः।"—

इति भागवतैकादशस्कन्धनवमाध्यायगतोपबृंहणेनात्मन्येव नारायणत्वस्य प्राप्तत्वाच्च। महाभारते—

"पुरा तु प्रलये प्राप्ते नष्टे स्थावरजङ्गमे।
ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे॥
आभूतसंप्लवे प्राप्ते प्रलीने प्रकृतौ महान्।
एकस्तिष्ठति विश्वात्मा स तु नारायणः प्रभुः॥"—

इति वचनेन तिष्ठतीति सदेवेतिवाक्यप्राप्तां सत्तां, महानिति ब्रह्मवेतिवाक्यप्राप्तं महत्त्वं, विश्वात्मेति आत्मावा इदमितिवाक्यप्राप्तमात्मत्वं चानूद्य पुरोवादावगतयावद्धर्मविशिष्टे 'स तु नारायणः प्रभुः' इति नारायणत्वस्य विधानेन प्राप्तत्वाच्च॥ न च—उक्तश्रुतेर्निरुक्ताज्ञाबोधकत्वरूपं विधायकत्वं नास्ति, किन्तु नारायणत्वगतविधेयताख्यविषयताशालिबोधजनकत्वरूपं गौणं विधायकत्वमिति नानुपपत्तिरिति—वाच्यम्; निरुक्ताज्ञाविधायकत्वरूपविधेयत्वस्येव विधेयताख्यविषयताया अप्यप्राप्तार्थ एव सम्भवात्। अत एव प्रथमसूत्रभाष्ये तत्त्वमसीत्यादौ त्वंपदार्थे श्वेतकेतुशरीरके अभेदेन ब्रह्मप्रकारकबोध एव स्वीकृतो न तु तद्विधेयको बोधः; ऐतदात्म्यमिदं सर्वमिति पूर्ववाक्येनैव सर्वशरीरके ब्रह्मणस्तादात्म्येन प्राप्तत्वात्। तथा च भाष्यं—"तत्त्वमसीत्यत्रोद्देश्योपादेयविभागः कथमिति चेत् नात्र किञ्चिदुद्दिश्य किमपि विधीयते, ऐतदात्म्यमित्यनेनैव प्राप्तत्वात्॥" —इति॥ —इति चेन्न॥

स्वोपजीविस्मृतिप्राप्तार्थे श्रुतेर्विधायकत्वस्य स्वानुपजीविस्मृतिप्राप्तार्थे अनुवादित्वस्य च स्वीकारेण विरोधविरहात् । आसीदेको ह वा इत्यादिस्मृतेरेको ह वै नारायण इति श्रुत्युपबृंहणत्वेन स्वोपजीवितया तत्प्राप्तेऽपि श्रुतेः प्रामाण्यात्, मृताग्निहोत्राधिकरणे श्रुतेरग्निहोत्र-मात्रविषयतया स्मृतेश्चाविशेषेण प्रवृत्त्या मिथो मूलमूलिभावायोगात् कार्याख्यानादित्यत्र कर्मसामान्याङ्गाचमनविधायकस्मृतेर्भोजनमात्राङ्गा-चमनविधायकश्रुतिमूलकत्वाभावादुक्ताचमनयोस्स्वानुपजीविस्मृतिप्राप्त-त्वेन तत्र श्रुतेरनुवादिताया युक्तत्वात् । आप्ताभिप्रायरूपविध्यर्था-न्वयबोधे च स्वानुपजीविमानान्तरजन्यबोधीयाप्ताभिप्रायनिष्ठप्रकारता-निरूपितविशेष्यताशून्यत्वरूपाप्राप्तत्वमेव नियामकम् । तेन स क्रतुं कुर्वीतेत्यादौ उपासनकृतावबाधितस्यापि तस्य नान्वयबोधः, सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यनेन तादृशोपासनकृतेः प्राप्तत्वेन तत्र कुर्वीतेति लिङर्थान्वये तात्पर्यविरहात् । परं तु तत्र 'मनोमयः प्राणशरीरो भारूपः' इत्यारभ्य 'एतमितः प्रेत्याभिसम्भवि-तास्मीति' इतीतिशब्दान्तवाक्यप्रतिपाद्ये मनोमयत्वादिप्रकारकत्वं एव कुर्वीतेति विध्यर्थान्वयः ॥

यद्यपि—तत्र मनोमयत्वादिप्रकारकत्वविशिष्टोपासनकृतावेव तद-न्वयः पतीयते । तथाऽपि—सविशेषणे हीति न्यायेन तादृशप्रकारकत्व एव तदन्वयः । स क्रतुं कुर्वीतेत्यस्यार्थवादे 'यथा क्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति' इत्यत्र क्रतुविधिसिद्धवत्कारेण प्रकारस्तुत्या क्रतुवाक्यस्य प्रकारविधितात्पर्यावगमात् तादृशन्याय-प्रविष्टबाधपदस्य तात्पर्याविषयत्वपरतया प्रकृतेऽपि विशेष्ये बाधस्य सत्त्वात् ॥

न च—तत्र विशेषणेऽपि न विध्यर्थान्वयसम्भवः, सर्वं खल्विदं ब्रह्मेति पूर्ववाक्ये सर्वशरीरकत्वप्रकारकत्वविशिष्टब्रह्मोपासनस्य प्राप्त-

त्वेन गुणान्तरप्रकारकत्वेऽप्याकाङ्क्षाविरहेण तत्रापि तात्पर्यायोगात्; सर्वं खल्विदं ब्रह्मेत्यस्य शान्तिशेषतया प्रथमान्तत्वेऽप्युपासेस्सकर्मकत्वात्कर्माकाङ्क्षायां पूर्वोपस्थितब्रह्मण एव कर्मतयाऽन्वयस्य वाच्यतया उपस्थित्यविशेषेण सार्वात्म्यस्यापि तत्र विधेयत्वावश्यकत्वात्, उत्पत्तिशिष्टगुणावरुद्धे गुणान्तरविधानासम्भवस्य वक्ष्यमाणत्वादिति—वाच्यम्; उपासेः कर्माकाङ्क्षानिवृत्तये ब्रह्मपदस्य विभक्तिपरिणामेन लाघवादनुषङ्गेऽपि सर्वमित्यस्य तथाऽनुषङ्गे मानाभावात् सार्वात्म्यस्योत्पत्तिशिष्टत्वाभावात्। तदेतदभिप्रेत्य टीकायामुक्तम्—

> "ननु–उपासनविधेरुत्पत्तिशिष्टसर्वात्मकत्वगुणावरोधान्मनोमयत्वादीनां नोपास्याकारत्वम्–इति चेन्न। सर्वात्मकत्वस्य उपासनविधिवाक्यस्थत्वाभावात्" —इति ।

विधेयताख्यविषयतारूपविधेयत्वे च स्वानुपजीविमानान्तरजन्यबोधीयविधेयताशून्यत्वमेव नियामकम्। अतस्तत्त्वमसीत्यादौ तत्पदार्थे न विधेयता, ऐतदात्म्यमिदं सर्वमित्यनेनैव प्राप्तत्वात्; किन्तु प्रकारत्वमात्रमिति ॥

न चैवं–पुरोवादवाक्यावगतसत्त्वादिविशिष्टकारणे यतोवेत्यादिवाक्येन निरतिशयबृहत्त्वस्य विधानमिति सिद्धान्तो विरुध्यते, 'ब्रह्म वा इदमग्र आसीत्' इत्यनेनैव तस्य विहितत्वादिति–वाच्यम्; तत्रत्यब्रह्मशब्दस्य केवलबृहत्त्वाश्रयमात्रपरत्वात् निरतिशयबृहत्त्वाश्रयपरत्वाभावात्, उक्तार्थाभिप्रायेणैव जन्माद्यधिकरणटीकायां बृहत्त्वमात्रं पूर्वप्रतिपन्नाकार इत्युक्तम् ॥ न च—तादृशसिद्धान्तोऽनुपपन्नः, अन्वयानुपपत्तितात्पर्यानुपपत्त्योरभावेऽपि 'ब्रह्म वा' इति श्रुतिघटकस्य निरतिशयबृहत्त्वाश्रयवाचिनो ब्रह्मशब्दस्य केवलबृहत्त्वाश्रये लक्षणाङ्गीकारादिति–वाच्यम्; विशिष्टवाचकानां पदानां सति पृथग्विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वस्य

'स कीचकैर्मारुतपूर्णरन्ध्रैः' इत्यादौ मारुतपूर्णरन्ध्रत्वविशिष्टवेणुबोधककीचकपदे दृष्टत्वादत्रापि यतोवेत्यादिवाक्ये निरतिशयत्वविशिष्टबृहत्त्ववाचिपदान्तरसत्त्वेन 'ब्रह्म वा' इतिवाक्यगतब्रह्मशब्दे विशेष्यमात्रलक्षकत्वस्य युक्तत्वात्, तन्न्यायस्यैकवाक्यस्थविशेषणविशेष्यवाचिपदद्वयविषयत्वेऽपि यतोवेत्यादिवाक्यस्य कारणवाक्यप्रतिपन्ने ब्रह्मत्वविधायकत्वेन परस्परसाकाङ्क्षतया तदेकवाक्यत्वात्, परस्परसाकाङ्क्षत्वे एकोपनिषद्गतयोरिव भिन्नोपनिषद्गतयोरपि वाक्ययोरेकवाक्यत्वस्य युक्तत्वात् ॥

अत एव परैस्सर्ववेदान्तप्रत्ययाधिकरणगते "दर्शयति च" इति सूत्रे—'यस्त्वेतमेवं प्रादेशमात्रमभिविमानम्' इति छान्दोग्यवाक्ये एवंशब्दो न पूर्वोक्तप्रकारपरः, पूर्वं प्रादेशमात्रत्वस्यानुपपादनात्; किन्तु वाजसनेयकोक्तमूर्धचुबुकान्तरालभ्यप्रादेशमात्रत्वपरः; वाजसनेयके—

> "प्रादेशमात्रमिह वै देवास्सुविदिता अभिसम्पन्नास्तथा तु व एनान् वक्ष्यामि यथा प्रादेशमात्रमभिसम्पादयिष्यामि, स होवाच मूर्धानमुपदिशन्नेष वा अतिष्ठा वैश्वानर इति, चक्षुषी उपदिशन्नुवाच--एष वै सुतेजा वैश्वानर इति, नासिके उपदिशन्नुवाच—एष वै पृथग्वर्त्मा वैश्वानर इति, मुख्यमाकाशमुपदिशन्नुवाच—एष वै बहुलो वैश्वानर इति, मुख्या आप उपदिशन्नुवाच—एष वैरयिर्वैश्वानर इति, चुबुकमुपदिशन्नुवाच—एष वै प्रतिष्ठा वैश्वानर इति"—

इति मूर्धचुबुकान्तरालवृत्तित्वेन प्रादेशमात्रत्वोपपादनात्—इत्युक्तम् ॥ मुख्यमाकाशं—मुखगतमाकाशं, मुख्या आपः—मुखगता आप इत्यर्थः ॥

तथा 'सर्वाभेदादन्यत्रेमे' इत्यधिकरणे—कौषीतकीद्वितीयाध्यायगतां 'अथातो निश्श्रेयसादानमेता ह वै देवता अहँ श्रेयसे

विवदमानाः' इत्यादिना प्राणस्य श्रैष्ठ्यमुपपाद्य; 'अथो य एवं विद्वान्' इत्यादिना प्राणोपासकस्य फलप्रतिपादिकां प्राणविद्यामुदाहृत्य; तत्रैवंशब्दस्य पूर्वनिर्दिष्टपरामर्शकत्वात्तद्विद्यायां श्रैष्ठ्यमात्रस्यान्वयेऽपि न शाखान्तरोक्तानां वसिष्ठत्वादीनामन्वयसम्भवः, तथा सत्येवंशब्दप्रतिपादितस्य तन्मात्रगुणकत्वस्य हानिस्स्यात्, अश्रुतानां च गुणान्तराणां कल्पना स्यात्—इति **पूर्वपक्षं कृत्वा**; एवंशब्दो हि न पूर्वनिर्दिष्टमात्रपरामर्शकः, किं तु एवंशब्दस्योपस्थितपरामर्शकत्वाच्छाखान्तरीयवसिष्ठत्वादीनामपि गुणद्वारोपस्थितत्वात्तेषामपि परामर्शोपपत्तिः; यथा देवदत्तश्शौर्यादिगुणवत्त्वेन स्वदेशे प्रसिद्धो देशान्तरेऽपि परिचयविशेषात्तत्तद्गुणवत्त्वेन विभाव्यते, तथेहापि प्राणसंवादादिसारूप्यस्याभेदेन प्राणविज्ञानस्यैकत्वेनैकप्रधानसम्बन्धात्तेऽपि गुणा उपास्या एव—इति **परैरुक्तम्**। तथा च भिन्नशाखास्थानामप्येकप्रकरणगतानामेकवाक्यत्वं परेषामनुमतम् ॥

यद्यपि—यस्त्वेतमेवमिति छान्दोग्यगतैवंशब्देन वाजसनेयकोक्तमूर्धचुबुकान्तरालवृत्तित्वलभ्यप्रादेशपरिमितत्वस्य परामर्शो न श्रीभाष्यसम्मतः; प्रादेशशब्दपूर्ववाक्यनिर्दिष्टद्युप्रभृतिप्रदेशसम्बन्धित्वरूपयौगिकार्थस्यैव स्वीकारात्, एवंशब्दस्य शाखान्तरोक्तप्रकारपरत्वापेक्षया प्रादेशशब्दरूढित्यागस्योचितत्वात्। उक्तं च सर्ववेदान्तप्रत्ययाधिकरणटीकायां—'यस्त्वेतमिति न वाजसनेयकोक्तानुवादः, स्वशाखावाक्य एव पूर्वप्रतिपादितस्यानुवादेन फलसमर्पकत्वसम्भवात्' इति। तथाऽपि—प्राणविद्यागतैवंशब्देन शाखान्तरोक्तपरामर्श आचार्यानुमत एव ॥

यद्यपि—श्रीभाष्ये सर्वाभेदाधिकरणे 'यो ह वै ज्येष्ठं च श्रेष्ठं च वेद' इत्यादिकया छान्दोग्यवाजसनेयकरीत्या प्रवृत्ता कौषीतकीनवमाध्यायगता प्राणविद्यैवोदाहृता, न द्वितीयाध्यायगता। तथाऽपि—

टीकायां द्वितीयाध्यायगतप्राणविद्यायामप्यैक्यस्योपपादितत्वात् छान्दोग्यादिगतगुणपरामर्शकत्वमेवंशब्दस्य टीकाकृतामनुमतमेव ॥

न चैवं—देवदत्तगुणप्रसिद्धिदृष्टान्तश्चातिप्रसङ्गादनादृत इति तन्मते दूषणाभिधानं टीकाकृतां विरुध्यत इति—वाच्यम्; गुणिद्वारोपस्थितानां गुणानामन्यत्र परामर्शाङ्गीकारे ब्रह्मद्वारा विद्यान्तरीयगुणानामुपस्थितानां विद्यान्तरे परामर्शप्रसङ्ग इति दूषणाभिधानेऽपि तदेकवाक्यतापन्नशाखान्तरोक्तगुणानां शाखान्तरे परामर्शाङ्गीकारे दूषणानभिधानात्तस्येष्टत्वेऽपि विरोधाभावात्। अत एव—'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति, स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्' इति मार्गमभिधाय; 'य एवंवित्पर्यङ्कं पादेनाध्यारोहति' इत्यादिकायां कौषीतकीगतपर्यङ्कविद्यायामेवंपदेन छान्दोग्याद्युक्तार्चिरादिमार्गस्यैव परामर्शः, न तु पूर्वनिर्दिष्टाग्निलोकादिमार्गस्य, तादृशस्य मार्गान्तरस्याभावादित्युक्तं—यावदधिकारमवस्थितिरित्यत्र टीकायाम् ॥ न च—छान्दोग्ये अर्चिरादिका कौषीतकीवाक्ये अग्निलोकादिका बृहदारण्यकेऽप्यर्चिरादिका तत्रैव वाय्वादिका मुण्डके सूर्यादिका च गतिश्श्रूयते; मन्त्रवर्णेऽपि 'ये चत्वारः पथयो देवयानाः' इति देवयानस्य चातुर्विध्यं श्रूयते, तथा च कौषीतकीगतेनैवंशब्देनाग्निलोकादिमार्गस्य परामर्शेऽपि नानुपपत्तिरिति—वाच्यम्; तथा सति चतुर्विधमार्गचिन्तनस्यापि विद्याङ्गत्वावश्यकतया परस्परं व्यभिचारापत्तेः ॥ न च—यादृशविद्यासन्निधाने यादृशो मार्गश्श्रूयते तादृशविद्यायां तादृशमार्गचिन्तनस्याङ्गत्वाङ्गीकारान्न व्यभिचार इति—वाच्यम्; छान्दोग्ये **पञ्चाग्निविद्यायां**—

"तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्

षड्डुदङ्ङेति मासांस्तान् मासेभ्यस्संवत्सरं संवत्सरादादित्यं आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति ॥"——

इत्यर्चिरहश्शुक्लपक्षोत्तरायणसंवत्सरादित्यचन्द्रामानवघटितमार्गस्य, **वाजिनां पञ्चाग्निविद्यायां**—

"य एवमेतद्विदुर्ये चेमेरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति मासान् मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं तत्पुरुषोऽमानवस्स एत्य ब्रह्मलोकान् गमयति ॥"——

इति अर्चिरहश्शुक्लपक्षोत्तरायणदेवलोकादित्यामानवघटितमार्गस्य च पाठेन द्विविधमार्गचिन्तनस्यापि पञ्चाग्निविद्याङ्गत्वाऽपत्त्या व्यभिचारस्य दुर्वारत्वात्; 'तद्य इत्थं विदुः' इति पञ्चाग्निविद्यानिष्ठान् 'ये चेमेरण्ये श्रद्धा तप इत्युपासते' इति श्रद्धापूर्वकब्रह्मोपासकांश्चोक्त्वा तदुभयविधानामपि तादृशमार्गोक्त्या ब्रह्मविद्यासामान्य एव द्विविधमार्गचिन्तनस्य कारणतया सर्वत्र व्यभिचारापत्तेः ॥

एवं कौषीतकीगतपर्यङ्कविद्यायां 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति' इत्याद्युक्ताग्निलोकादिमार्गस्येव द्विविधार्चिरादिमार्गस्यापि श्रद्धापूर्वकब्रह्मोपासनत्वाविशेषेण प्राप्त्या त्रयाणां व्यभिचारस्यापत्तेः ॥ न च—यत्र विद्यायां मार्गो न श्रुतः तत्र ये चेमेरण्य इत्यनेन प्राप्तमार्गद्वयचिन्तनस्याव्यवहितोत्तरत्वं निवेश्य कारणताद्वयं, पञ्चाग्निविद्यादावपि यत्र मार्गद्वयं श्रुतं तत्रापि तथा कारणताद्वयं, यत्रोपकोसलविद्यायां छान्दोग्यगतपञ्चाग्निविद्यारीत्या एको मार्गश्श्रुतः तत्राप्युक्तरीत्या कारणताद्वयं, यत्र पर्यङ्कविद्यादौ

मार्गत्रयं श्रुतं तत्र मार्गत्रयचिन्तनस्य कारणतात्रयमिति कल्पनान्न व्यभिचार इति—वाच्यम्; तथा सति कार्यकारणभावबाहुल्यापत्तेः, मार्गविधायकविद्यावाक्यानां भिन्नशाखागतानामप्येकवाक्यत्वं स्वीकृत्य एकविधमार्गविधायकस्यैव कल्पयितुं युक्तत्वात्, अग्न्यादित्ययोस्सर्वत्र प्रत्यभिज्ञानेन मार्गैकत्वाश्रयणं न्याय्यमित्यर्चिरादिना तत्प्रथितेरित्यधिकरणसिद्धत्वात्, असति बाधके लाघवतर्कसहकृतप्रत्यभिज्ञानस्यैक्यसाधकत्वात्; सर्वब्रह्मविद्यानां ब्रह्मरूपैकार्थप्रत्यभिज्ञानैक्यापत्तिवारणायासति बाधक इति; तत्र गुणानन्त्यादुपसंहारासम्भवस्य बाधकत्वात्, अत्र मार्गान्वयिनां पदार्थानां द्वादशसङ्ख्यावत्त्वेन चिन्तनयोग्यत्वान्मार्गैक्ये बाधकाभावात्। ये चत्वार इति मन्त्रवर्णस्तु चातुराश्रयाभिप्रायो वा ऐष्टिकपाशुकसौमिकदार्वीहौमिकगत्यभिप्रायो वा भवतीति न मार्गचतुष्टयसाधकः—इत्यर्चिराद्यधिकरणटीकायामुक्तम्। तथा च—परेषामिव टीकाकृतामप्येकप्रकरणगतानां भिन्नशाखास्थवाक्यानामेकवाक्यत्वमनुमतं; व्यवस्थापितं च भिन्नशाखास्थवाक्यानामप्येकवाक्यत्वं 'हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्स्तुत्युपगानवत्तदुक्तम्' इत्यधिकरणे सूत्रकृता। तत्र हि—कुशा वानस्पत्या इति कालापिश्रुतिवाक्यस्य महावृक्षजन्यत्वरूपसामान्याकारेण स्तोत्रगणनार्थसमिच्छलाकाबोधकस्य औदुम्बर्यः कुशा इति शाट्यायनिवाक्येन उदुम्बरजन्यत्वरूपविशेषाकारेण तादृशशलाकाबोधकेन यथैकवाक्यता; यथा वा—'देवासुराणां छन्दोभिस्स्तुवते' इत्यविशेषेण छन्दस्स्तुतिविधायकवाक्यस्य देवच्छन्दाँसि पूर्वाणीति पैङ्गश्रुतिवाक्येन पौर्वापर्यबोधकेनैकवाक्यता; यथा च 'हिरण्येन षोडशिनस्स्तोत्रमुपाकरोति' इति छन्दोगवाक्यस्य कालविशेषाबोधकस्य 'समयाविषिते सूर्ये षोडशिनस्स्तोत्रमुपाकरोति'

इति कालबोधकतैत्तरीयकवाक्येनैकवाक्यता, षोडशिनः—पात्रविशेषस्य, स्तोत्रं—गानविशेषविशिष्टोच्चारणं, समयाविषिते—अर्धास्तमिते, उपाकरोति—आरभत इत्यर्थः; अध्ययनारम्भरूपे उपाकर्मण्यप्युपाकरणशब्दप्रयोगेन तादृशधातोरारम्भार्थकतासिद्धेः। यथा चर्त्विज उपगायन्तीत्युत्सर्गवाक्यस्य नाध्वर्युरुपगायेदित्यपवादवाक्येनैकवाक्यता; तथा 'अश्व इव रोमाणि विधूय पापं' इति छन्दोगवाक्यस्य 'तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इत्याथर्वणवाक्यस्य च केवलकर्मनाशप्रतिपादकस्य 'तस्य पुत्रा दायमुपयन्ति, सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्यां' इति शाट्यायनिवाक्येन नष्टकर्मणामन्यत्रसङ्क्रमणरूपोपयोगबोधकेनैकवाक्यत्वमिति स्थापितम् ॥

न च—उक्तदृष्टान्तचतुष्टयेऽप्येकवाक्यत्वानङ्गीकारे क्षतिविरह इति—वाच्यम्; तथा सति वानस्पत्या इति वनस्पति शब्दार्थसङ्कोचेन वनस्पतिसामान्यसम्बन्धिशलाकानामौदुम्बरशलाकानां च विकल्पापत्तेः। एवं दृष्टान्तान्तरेऽपि विकल्पापत्तिरूह्या; एकवाक्यत्वाङ्गीकारे च वानस्पत्यपदार्थे औदुम्बर्यस्याभेदेनान्वयेन सङ्कोचाद्विकल्पापत्त्यनवकाशात् ॥ न च—तादृशवाक्ययोरेकवाक्यत्वे कुशापदद्वयवैयर्थ्यमिति—वाच्यम्; तत्रैकस्योद्गातृसम्बन्धिस्तोत्रगणनार्थत्वावच्छिन्नरूपविशेषणमात्रपरत्वेनापरस्य च शलाकारूपविशेष्यमात्रपरत्वेन द्वयोरवैयर्थ्यात् ॥ न च—उक्तरीत्या प्रयासेनैकवाक्यत्वोपपादनं न सूत्रकाराद्यनुमतं, किन्त्वेकवाक्यस्यापरवाक्यं प्रति शेषत्वमेव; तदुपयुक्तार्थपरत्वरूपं तच्छेषत्वं च वाक्यभेदेऽपि निर्वहतीति—वाच्यम्; तादृशशेषशेषिभावस्य सङ्क्षिप्तविस्तृतग्रन्थभेदस्थले सर्वत्र दृष्टत्वेन तत्र विप्रतिपत्त्यभावेन दृष्टान्तचतुष्टयेन तत्साधनस्य विफलत्वात्, तदुक्तामिति दाशमिकपर्युदासाधिकरणोदाहरणस्य चानुपपत्तेः ॥

इत्थं हि तदधिकरणशरीरम्—

"चातुर्मास्येषु साकमेधेऽपि तृतीये पर्वणि श्रूयते—'नार्षेयं वृणीते न होतारं वृणीते'—इति। तथानारभ्य श्रूयते 'यजतिषु ये यजामहं करोति नानूयाजेषु' ॥" इति ॥

तत्र सन्देहः-किमतिदेशप्राप्तस्य वरणस्य नार्षेयमिति निषेधप्राप्तत्प्रतिषेधस्य च विकल्पः, उत पितृयज्ञे वरणाननुष्ठानमेवेति; तथा अनूयाजेषु ये यजामह इति मन्त्रपाठतत्प्रतिषेधयोर्विकल्पः, उत मन्त्रपाठाननुष्ठानमेवेति। तत्र पूर्वपक्षः—उक्तस्थले पर्युदासाङ्गीकारे आर्षेयवरणभिन्नं होतृवरणभिन्नं प्रकृतिगतं पितृयज्ञे कर्तव्यमिति, अनूयाजभिन्नेषु यागेषु ये यजामह इति मन्त्रपाठं करोतीति चार्थस्स्यात्; तथा सति नञो भिन्ने लक्षणापत्तिः ॥ न च—नञो भेदार्थकत्वेऽपि नानुपपत्तिः, तस्याश्रयतासम्बन्धेनान्वयादेव विशिष्टलाभादिति--वाच्यम्; तथा सति तस्यापि प्रातिपदिकतया प्रातिपदिकार्थयोर्भेदेन नान्वय इति व्युत्पत्तौ निपातभेदनिवेशे गौरवेण तद्विरोधापत्तेः। अतो नञः क्रियान्वयरूपः प्रसज्यप्रतिषेध एव स्वीकर्तव्यः;

"प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्।
पर्युदासस्सविज्ञेयो यत्रोत्तरपदेन नञ् ॥"—

इत्युक्तत्वात्। तथा च वरणनिषेधो मन्त्रपाठनिषेधश्चार्थ इति विकल्प एव; चोदकेन पितृयज्ञेऽपि वरणस्य यजतिपदार्थासङ्कोचेन यजतिष्वित्यनेनानूयाजेष्वपि मन्त्रपाठस्य प्राप्तत्वात्, प्राप्तप्रतिषेधे षोडशिग्रहणाग्रहणयोरिव विकल्पस्य युक्तत्वात्। तथा च तदधिकरणे पूर्वपक्षसूत्रं—'प्रतिषेधः प्रादेशे चानारभ्यविधाने च प्राप्तप्रतिषेधत्वाद्विकल्पस्स्यात्'—इति। प्रादेशे चोदकेनातिदेशे सति श्रूयमाणे नार्षेयवाक्ये, अनारभ्यविधाने येयजामहइतिवाक्ये श्रूयमाणे नानूयाजवाक्ये च प्रतिषेध एव नञर्थस्स्यात्; ततश्च प्राप्तप्रतिषेध-

त्वाद्विकल्प इति सूत्रार्थः। एवं प्राप्ते सिद्धान्तः—प्रतिषेधपरत्वपक्षेऽपि 'न वृणीते' 'न करोति' इति धात्वर्थवरणमन्त्रकरणयोरिष्टसाधनत्वाद्यभावस्य प्रातिपदिकार्थस्य भेदेनान्वयायोगादभाववति लक्षणा दुर्वारा; तथा च विकल्पस्याष्टदोषदुष्टस्यान्याय्यत्वात्पर्युदासपक्ष एव युक्त इति। तथा च सिद्धान्तसूत्रं—"अपि तु वाक्यशेषत्वादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशस्स्यात्"—इति। विकल्पस्यान्याय्यत्वाद्ये यजामह इति विधेरेव नानूयाजवाक्यमेकदेशस्स्यात्, पर्युदासवृत्त्या विधिवाक्यैकवाक्यतापन्नत्वादिति सूत्रार्थः। एवं च पर्युदासाङ्गीकारादेकवाक्यत्वमेवेति। सूचितं चेदमधिकरणशरीरं श्रीभाष्ये—

"सामान्येनावगतमर्थं विशेषे व्यवस्थापयितुं क्षमस्य वाक्यस्य तच्छेषत्वमनभ्युपगच्छद्भिस्तयोरर्थयोर्विकल्पस्समाश्रयितव्यः। स च सम्भवन्त्यां गतौ न युज्यते; तदुक्तं पूर्वस्मिन् काण्डे—अपि तु वाक्यशेषत्वादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशस्स्यादिति॥" —इति॥

ननु—इदमधिकरणमयुक्तं, प्रसज्यप्रतिषेधपक्षेऽपि विकल्पाप्राप्तेः; विशेषनिषेधसहितसामान्यविधिस्थले विधिघटकसामान्यवाचिपदस्य विशेषातिरिक्तपरतायाः 'ब्राह्मणेभ्यो दधि दातव्यं कौण्डिन्याय न दातव्यं' इत्यादौ क्लृप्तत्वेन चोदकस्यार्षेयादिवरणातिरिक्तधर्मपरतायाः यजतिपदस्यानूयाजभिन्नयागपरतायाश्चावश्यकत्वात्। न च—ब्राह्मणेभ्यो दधिदातव्यमित्यादावपि कौण्डिन्यभेद एव नञा ब्राह्मणेषु प्रतीयत इति—वाच्यम्; अनुयोगिप्रतियोगिवाचकपदयोस्समानवचनकत्वाभावे तत्प्रतियोगिकभेदबोधनासम्भवात्, कौण्डिन्यपदस्य एकवचनान्तत्वेन बहुवचनान्तब्राह्मणपदसमानवचनकत्वाभावात्; अन्यथा—घटा न नील इत्यादावपि भेदबोधप्रसङ्गात्। न च—प्रतियोगिवाचकपदोत्तरविभक्त्या अनुयोगिवाचकपदोत्तरविभक्तितात्पर्यविषयसङ्ख्याविरुद्ध-

सङ्ख्याया विवक्षितत्वे भिन्नवचनयोरपि प्रतियोग्यनुयोगिवाचिपदयोस्साधुत्वं भवति, बौद्धाद्यागमा न प्रमाणमित्यादौ तथा दर्शनादिति—वाच्यम्; कौण्डिन्यस्यानेकत्वेन तद्गतैकत्वसङ्ख्यायाः विवक्षणासम्भवात्। जातिगतैकत्वस्य परम्परयाऽन्वयसम्भवेन सङ्ख्यायाः विवक्षणसम्भवेन भेदबोधसम्भवेऽपि न पर्युदासस्सम्भवति; तथा सति द्वितीयस्य दातव्यमित्यस्यानन्वयप्रसङ्गात्। एवममावास्यायां पितृभ्यो दद्यादिति विधिनाऽमावास्यापदार्थासङ्कोचेन रात्रावपि प्राप्तस्य श्राद्धकरणस्य न रात्रौ श्राद्धं कुर्वीतेत्यनेन निषेधेऽपि न विकल्पप्रसक्तिः, तत्रापि विशेषनिषेधसत्त्वेन विधिघटकामावास्यापदस्य रात्रीतरपरताया आवश्यकत्वात्। न च तत्रापि रात्रिभेदस्यामावास्यायामन्वयमङ्गीकृत्यैकवाक्यत्वमभ्युपगन्तुं युक्तं, तथा सति कुर्वीतेति क्रियापदवैयर्थ्यात्। एवं च विधिनिषेधयोर्भिन्नवाक्यत्वेऽपि विशेषनिषेधसहितसामान्यविधिस्थले कॢप्तेन सामान्यवाचिपदस्य विशेषेतरपरत्वनियमेनैव प्रसज्यप्रतिषेधपक्षेऽपि विकल्पापत्त्यनवकाशात्तदर्थं पर्युदासमवलम्ब्यैकवाक्यत्वकल्पनमनुचितम्। किं च पर्युदासाधिकरणानन्तरमविशेषेण—यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्सन्दिग्धमाराद्विशेषशिष्टं स्यादित्यधिकरणे—यदाहवनीये जुहोतीति सामान्यशास्त्रस्य पदे जुहोतीत्यनेन विकल्पः उत बाध इति—सन्देहे; द्वयोरपि प्रत्यक्षशास्त्रत्वेन तुल्यबलत्वाद्विकल्प इति—पूर्वपक्षे; पदशास्त्रस्य विशेषविषयत्वेन प्रबलत्वात्तेन सामान्यशास्त्रस्य पदहोमातिरिक्तहोमलाक्षणिकत्वरूपसङ्कोचलक्षणो बाध इति—स्थापितम्। तन्न्यायेनात्रापि विशेषशास्त्रेण सामान्यशास्त्रस्य सङ्कोचेनोपपत्तौ एकवाक्यत्वमङ्गीकृत्य पर्युदासाधिकरणे विकल्पवारणमनुचितम्—इति **चेन्न** ॥

विधिनिषेधयोर्भिन्नवाक्यत्वेऽपि विशेषनिषेधसहितसामान्यविधिस्थले कॢप्तेन सामान्यवाचकपदस्य विशेषेतरपरत्वनियमेन विशेषनिषेध-

स्यैव वैयर्थ्यापत्तेः। अमावास्यायां पितृभ्यो दद्यादिति शास्त्रघटका-मावास्यापदस्य रात्रीतरामावास्यापरत्वेन रात्रौ श्राद्धस्यैवाप्रसक्त्या न रात्राविति निषेधवैयर्थ्यस्य दुर्वारत्वात् ॥ न च—तादृशनिषेधाभावे अमावास्यापदस्य रात्रीतरामावास्यायां लक्षणैव न युज्यते, निषेधशास्त्रस्यैव तादृशलक्षणातात्पर्यग्राहकत्वान्न वैयर्थ्यमिति—वाच्यम्; निषेधवाक्यस्य लक्षणातात्पर्यग्राहकत्वेऽपि स्वार्थे तात्पर्याभावेन वैयर्थ्यस्य दुष्परिहरत्वात्; अतो विशिष्टवाक्यस्य वैयर्थ्याङ्गीकारापेक्षया क्रियापदमात्रवैयर्थ्यमभ्युपगम्य न रात्रौ श्राद्धं कुर्वीतेत्यादावपि पर्युदासमवलम्ब्यैकवाक्यत्वाभ्युपगम एव युक्तः; तदभावे विकल्पापत्तिश्च युक्ता। न च—न रात्रावित्यस्यामावास्याविध्येकवाक्यत्वे अष्टकादिश्राद्धविधेरसङ्कोचादष्टकादिश्राद्धस्य रात्रावप्यनुष्ठानप्रसङ्ग इति—वाच्यम्; अमावास्यादिश्राद्धविधायकवाक्यार्थ इवाष्टकादिविध्यर्थेऽपि न रात्रावित्यर्थस्य रात्रिभेदस्य प्रवेशसम्भवात्, भवन्मतेऽप्यमावास्याष्टकादिबोधकतत्तद्विधिस्थपदानां रात्रिभेदविशिष्टतत्तदर्थेषु लक्षणाया आवश्यकत्वेन तादृशलक्षणातात्पर्यग्रहार्थं तत्तद्विधिजन्यबोधात्पूर्वं निषेधवाक्योपस्थितेर्नियमत आवश्यकतया तत्कल्पनप्रयुक्तगौरवाभावात् ॥

एतेन—नार्षेयं वृणीते यजतिषु ये यजामहं करोतीत्यादावपि पदाहवनीयन्यायेन निर्वाहात् न्यायान्तरानुसरणं विफलमिति—निरस्तम्; पदाहवनीयस्थले सामान्यशास्त्रस्य विशेषेतरलाक्षणिकत्वेऽपि पदशास्त्रस्य वैयर्थ्याभावात्पदशास्त्रस्य लक्षणातात्पर्यग्राहकत्वेऽपि पदहोमविधानार्थं तादृशशास्त्रस्य स्वार्थेऽपि प्रामाण्यावश्यकत्वात्; नानूयाजवाक्यस्य लक्षणातात्पर्यग्राहकत्वे वैयर्थ्यस्यैव प्रसङ्गेन विध्येकवाक्यत्वस्यैव युक्तत्वात्। एवं च—विशेषशास्त्रं यत्र विधिपरं तत्र सामान्यशास्त्रस्य विशेषातिरिक्तलक्षणायामपि न दोषः,

यत्र विशेषशास्त्रं केवलनिषेधमात्रपरं तत्र सामान्यशास्त्रे न लक्षणा; तथा सति विशेषशास्त्रस्यैव वैयर्थ्यप्रसङ्गात्। किं तु–सामान्यशास्त्रघटकयागादौ विशेषशास्त्रसमर्पितानूयाजभेदादेरन्वयः। यत्र च सामान्यशास्त्रं नाना विशेषशास्त्रं चैकं तत्रामावास्याष्टकादिशास्त्रेष्वपि विशेषशास्त्रसमर्पितरात्रिभेदान्वयोऽगत्या स्वीक्रियते॥

वस्तुतस्तु—रात्रौ श्राद्धं न कुर्वीतेत्यस्यामावास्याष्टकाद्यनेकविध्येकवाक्यत्वस्यामावास्याद्यनेकपदानां रात्रिभिन्नामावास्यात्वादिना लक्षणायाश्च स्वीकारमपेक्ष्य निषेधवाक्य एव कालसामान्यबोधकसप्तम्यन्ताध्याहारो युक्तः; तथा च नञः पर्युदासार्थकतया श्राद्धनिमित्तभूतकालेषु रात्रिभिन्नत्वरूपविशेषणस्यैव विधिरयम्। एवं चैतद्वाक्यात् रात्रिभिन्नकालत्वेन श्राद्धजन्यभगवदनुग्रहसामान्ये कालस्य हेतुत्वलाभेन रात्रिकृतश्राद्धे रात्रिभिन्नकालरूपकारणान्तराभावेन भगवदनुग्रहरूपफलानुपधानग्रहान्न रात्रौ श्राद्धकरणप्रसक्तिरिति विधिनिषेधयोरेकवाक्यत्वाभावेऽपि न विकल्पावकाशः॥

न चैवं–हिरण्येन षोडशिनस्स्तोत्रमुपाकरोतीति वाक्यविहितषोडशिस्तोत्रप्रारम्भजन्यानुग्रहे समयाविषित इति विशेषवाक्येनार्धास्तमयकालस्यापि कारणत्वबोधनेन तद्भिन्नकाले कृतस्य स्तोत्रस्य फलोपधायकत्वाभावान्न तद्भिन्नकाले स्तोत्रप्रसक्तिरिति विकल्पानवकाशात्तादृशवाक्ययोरेकवाक्यत्वाभ्युपगमो न युक्त इति–वाच्यम्। एकवाक्यत्वं हि द्विविधं–परस्परसाकाङ्क्षार्थप्रतिपादकत्वरूपमेकमुख्यविशेष्यकबोधजनकत्वरूपं च। तत्र कुशादिदृष्टान्तत्रयं परस्परसाकाङ्क्षार्थप्रतिपादकत्वरूपैकवाक्यत्वे, उपगानरूपचरमदृष्टान्तस्तु एकमुख्यविशेष्यकबोधजनकत्वरूपैकवाक्यत्व इति न दोषः; कुशा वानस्पत्या इत्यत्र वनस्पतिविशेषाकाङ्क्षायाः स्तोत्रमुपाकरोतीत्यत्र कालविशेषाकाङ्क्षाया देवासुराणां छन्दोभिरित्यत्र क्रमविशेषाकाङ्क्षायाश्च सत्त्वेन तन्नि-

घतकैर्वाक्यैस्तेषां पृथगेकवाक्यत्वस्य युक्तत्वात्, ऋत्विज उपगायन्तीत्यत्र नाध्वर्युरित्यनेनाध्वर्युभेदस्यान्वयाङ्गीकारेण तत्र द्वितीयैकवाक्यत्वस्य सत्त्वात्, चतुर्थदृष्टान्तोपपादनायैव पर्युदासाधिकरणस्योदाहरणादिति न काचिदनुपपत्तिः ॥ न च—अश्व इव रोमाणीति छन्दोगवाक्यस्य तथाविद्वानित्याथर्वणवाक्यस्य च सुहृदस्साधुकृत्यामिति शाट्यायनिवाक्येन परस्परसाकाङ्क्षत्वरूपमेकवाक्यत्वमेव विवक्षितमिति दार्ष्टान्तिकानुरोधेन कुशादिदृष्टान्तत्रयोपादानस्य युक्तत्वेऽपि चतुर्थदृष्टान्तोपादानस्य तद्व्यवस्थापकपर्युदासाधिकरणोदाहरणस्य चानुपपत्तिरिति—वाच्यम्; न ह्यत्र भिन्नग्रन्थसाधारणपरस्परसाकाङ्क्षत्वसाधनमात्रेण चरितार्थता, तथा सति अश्व इव रोमाणि विधूयेति छान्दोग्योक्तधूननकर्तुस्तस्य पुत्रादायमिति शाट्यायनिगततच्छब्देन परामर्शानुपपत्तेः । एकग्रन्थे पूर्वनिर्दिष्टस्योत्तरतच्छब्देन परामर्शनेऽपि ग्रन्थान्तरनिर्दिष्टस्य परामर्शादर्शनादत एकग्रन्थत्वसाधनमप्यावश्यकं; तत्र भिन्नशाखागतवाक्ययोरेकग्रन्थत्वमयुक्तमिति शङ्कायां भिन्नशाखावाक्ययोरेकमुख्यविशेष्यकबोधजनकत्वरूपस्यैकग्रन्थत्वव्याप्यस्य चतुर्थदृष्टान्ते प्रदर्शनात्तेन भिन्नशाखावाक्ययोरेकग्रन्थत्वसिद्ध्या शाट्यायनिगततच्छब्देन छान्दोग्यादिनिर्दिष्टस्य परामर्शनिर्वाहः । एवं च भिन्नशाखावाक्ययोरेकग्रन्थत्वसाधनायैव चतुर्थदृष्टान्तस्य पर्युदासाधिकरणोदाहरणस्य च सार्थक्यमिति बोध्यम् ॥

यत्तु **पर्युदासाधिकरणशास्त्रदीपिकायां**—सामान्यविधिविशेषनिषेधयोरतुल्यबलत्वात्पदाहवनीयन्यायेन विशेषेण सामान्यस्य सङ्कोच एव युक्तो न विकल्पः—**इत्याशङ्क्य;** सामान्यशास्त्रेणाहवनीयप्राप्तेः प्रागेव विशेषशास्त्रेण पदस्य विहितत्वात्पश्चात्सामान्यद्वारा प्राप्तस्याहवनीयस्य विशेषशास्त्रेण बाधो युक्तः, अत्र तु निषे-

धस्य प्राप्तिसापेक्षत्वेनानूयाजेषु ये यजामहाप्राप्तेश्च प्रमाणान्तरेणासम्भवान्निर्दोषशास्त्रेणैव प्राप्तिर्वक्तव्या, निर्दोषशास्त्रप्राप्तस्य सर्वथा बाधे प्रापकशास्त्रस्याप्रामाण्यप्रसङ्गात्तत्प्रामाण्योपपत्तये विकल्प इति प्रतिषेधपक्षे विकल्पापादनं युक्तम्—**इति समाहितम्** ॥

अत्रोच्यते—निषेधस्य प्राप्तिसापेक्षत्वं नाम—अभावज्ञानसामान्यस्य समानधर्मिकप्रतियोगिज्ञानजन्यत्वं, तत्तु न युज्यते; प्रत्यक्ष एव प्रतियोग्यारोपस्य हेतुताया नैयायिकादिभिर्निरस्तत्वेन परोक्षज्ञानसाधारणाभावज्ञानसामान्ये तद्धेतुतायास्सुतरामप्रामाणिकत्वात्; अन्यथा नान्तरिक्षेऽग्निश्च्योतव्य इति निषेधस्थलेऽपि प्रतियोगिप्रसक्तिकल्पनापत्तेः। अस्तु वा—अभावज्ञानसामान्ये समानधर्मिकप्रतियोगिज्ञानस्य हेतुतारूपं निषेधस्य प्राप्तिसापेक्षत्वं, तादृशप्रतियोगिज्ञानस्य शास्त्रजन्यत्वावश्यकत्वेऽपि शास्त्रतात्पर्यविषयत्वानावश्यकत्वात्; अन्यथा 'अग्निहोत्रं प्रकृत्य श्रुतस्य जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा जुहुयात् न ग्राम्यान् पशून् हिनस्ति नारण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च पयसाग्निहोत्रं जुहुयात्' इत्यस्य जर्तिलगवीधुकशब्दवाच्यारण्यतिलारण्यगोधूमकृतयवाग्वोरग्निहोत्राहुतिद्रव्यत्वविधानेऽपि तात्पर्यापत्त्या विकल्पापत्तेः। न चेष्टापत्तिः, तदनन्तरं जर्तिलादिप्रतिक्षेपेण पयोविधिदर्शनात्तदेकवाक्यताया जर्तिलयवाग्वा वा जुहुयादित्यादेर्ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्ततया होमार्हा अपि जर्तिलागवीधुकाश्च यदपेक्षया दुष्टास्तत्पयोऽत्यन्तं प्रशस्तमिति जर्तिलादिवाक्यं पयोविध्येकवाक्यतानुरोधात्पयस्स्तुत्यर्थमिति न चेदन्यं प्रकल्पयेत्प्रकॢप्तार्थवादस्स्यादिति दाशमिकाधिकरणे किञ्चिद्विधिपूर्वकं तन्निन्दाया विध्यन्तरश्रवणे सति तदेकवाक्यतानुरोधात्पूर्वप्रवृत्तयोर्विधिनिन्दयोस्तदर्थवादत्वमिति समर्थितम् ॥

एतं न्यायमवलम्ब्यैवोत्तरतन्त्रेऽपि भूम्नः क्रतुवज्ज्यायस्त्वमित्यधिकरणे वैश्वानरविद्यायां किं व्यस्तस्योपासनविधिरुत व्यस्तस्य समस्तस्य च उत समस्तस्यैवेति—**संशये**; मूर्धादिव्यस्तोपासनेष्वौपमन्यवादिभिरुक्तेषु 'अत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमात्मानं वैश्वानरमुपास्ते' इति व्यस्तोपासनेषु फलश्रवणाद्व्यस्तोपासनमेव प्रामाणिकं, 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति' इति च व्यस्तोपासनसमुदायानुवाद एव; अथवा यस्त्वेतमेवमित्यादिना वाक्येन समस्तोपासनमपि विधीयते; अतो द्वयमपि प्रामाणिकं, अल्पफलेच्छायां व्यस्तोपासनं अधिकफलेच्छायां तु समस्तोपासनं कर्तव्यमिति—**पूर्वपक्षे**। मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति व्यस्तोपासने निन्दाश्रवणात्समस्तोपासनमेव प्रामाणिकमिति—**समर्थितम्** ॥

न च—जर्तिलादिवाक्ये हिंसामिश्रकर्मापेक्षया प्राशस्त्यबोधनाय जर्तिलादिविधेस्सार्थक्येऽपि अत्र व्यस्तोपासनविधिवैयर्थ्यमिति—वाच्यम्; 'यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि' इति केकयेनोक्ते तदनभ्युपगमेन वैश्वानरविद्याया एव प्रार्थितत्वात्; प्रतिग्रहापेक्षया व्यस्तोपासनं प्रशस्तं, तदपेक्षया समस्तोपासनं प्रशस्तमिति बोधनाय प्रथमं व्यस्तोपासनोपदेशात्। निषेधार्थमनुवादस्थलेऽपि तात्पर्याङ्गीकारे उक्तस्थलद्वयेऽपि विकल्पापत्तिरिति नोक्तरीत्या विकल्पापादनं युक्तं, किन्तु पूर्वोक्तरीत्या विकल्पापादनं तन्निराकरणाय भिन्नशाखागतवाक्ययोरप्येकग्रन्थत्वं चेति युक्तं, ततश्च सदेवेत्यादिवाक्यनिर्दिष्टस्य यतोवेतिवाक्यगतयच्छब्देन परामर्शस्य विशिष्टवाचकानामिति न्यायप्रवृत्तेश्चोपपत्तिः। तथा च ब्रह्म वेति वाक्ये ब्रह्मशब्दस्य केवलबृह-

त्त्वाश्रयपरत्वाद्यतोवेत्यादिवाक्येन निरतिशयबृहत्त्वस्य विधानोपपत्तिः, तस्य पूर्वमज्ञातत्वात् ॥

न चैवमपि—तस्य विधेयत्वं न सम्भवति, सामान्यतो निरतिशयबृहत्त्वाश्रयः किञ्चिदस्तीति भृगुणाऽपि ज्ञातत्वात्, अन्यथा अधीहि भगवो ब्रह्मेतीति प्रश्नानुपपत्तेः; 'नकिरिन्द्र त्वदुत्तरः' 'न वा ओजीयो रुद्र त्वदस्ति' 'अग्निस्सर्वा देवता ब्राह्मणो वै सर्वा देवता' 'आपो वा इदं सर्वम्' इत्यादिश्रुतिषु निरतिशयबृहत्त्वस्य रुद्रेन्द्रादिषु प्रतिपन्नतया सर्वेषां च निस्समाभ्यधिकत्वघटितनिरातिशयबृहत्त्वानुपपत्त्या तदाश्रयवस्तुविशेषजिज्ञासया तादृशप्रश्नकरणादिति—वाच्यम्; उक्तरीत्या निरतिशयबृहत्त्वस्य विधेयत्वासम्भवमभिप्रेत्यैव टीकायां यतोवेत्यादिवाक्येन प्रापकवाक्यप्रतिपन्नं कारणत्वमनूद्य तस्य ब्रह्मलक्षणत्वं विधीयत इति कल्पान्तरावलम्बनात् ॥

उक्तं च **जन्मादधिकरणटीकायां**—

"निरतिशयबृहत्त्वं बहुष्वर्थेष्वापाततःप्रतीतं, कारणत्वं च प्रापकवाक्यावगतं तस्य निरतिशयबृहद्वस्तुलक्षणत्वमनवगतमिति तदत्र विधेयम् ॥" —इति ॥

अयमर्थः—तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुत्या कारणत्वविशिष्टं ब्रह्मेति बोधे विशेष्यतावच्छेदकीभूतकारणत्वस्य ब्रह्मत्वे समनैयत्यसम्बन्धेन भानात्तादृशसमनैयत्यस्यैव कारणत्वगतब्रह्मत्वसमनैयत्यरूपत्वात् संसर्गतया भासमाने तादृशसमनैयत्यरूपब्रह्मलक्षणत्वे विधेयताख्यविषयता स्वीक्रियते; पृथिव्यां गन्ध इत्यादौ गन्धरूपविशेष्यस्यैव 'या गन्धवती तां पृथिवीं विद्धि' इत्यत्र संसर्गतया भासमाने पृथिवीत्वसमनैयत्यरूपपृथिवीलक्षणत्वेऽपि विधेयत्वस्यावश्यकत्वात् ॥

उक्तं च तत्रैव टीकायां—

'या गन्धवती तां पृथिवीं विद्धीतिवत् कारणत्वस्य ब्रह्मलक्षणत्वमेवास्य वाक्यस्य विधेयम्' —इति ॥

अत एव तिलकी कर्मकुर्वीतेत्यादौ तिलकस्य कर्मकरणस्य च शास्त्रान्तरप्राप्तत्वेन विधेयत्वासम्भवात्संसर्गतया भासमानं कर्मकरणनिष्ठं तिलकसमानकालीनत्वमेव विधेयमित्युक्तं नैयायिकैः ॥

यदि च—समानकालीनत्वसम्बन्धेन तत्र तिलकस्यैव विधेयत्वं न संसर्गस्येति—उच्यते; तदा—प्रकृतेऽपि समनैयत्यसम्बन्धेन ब्रह्मत्वे कारणत्वमेव विधेयमस्त्विति न कश्चिद्विशेषः ॥ न च—विशेष्यतावच्छेदकस्य प्रकारे व्यापकतासम्बन्धेन मानस्याङ्गीकारेऽपि समनैयत्यसम्बन्धेन भानं क्वापि न दृष्टमिति—वाच्यम्; सति तात्पर्ये व्यापकतासम्बन्धेनेव समनैयत्यसम्बन्धेनापि भानस्य सम्भवात्; यत्र व्याप्यधर्मप्रकारकजिज्ञासया प्रश्नः तदुत्तरवाक्यजन्यबोधे विशेष्यतावच्छेदकस्य प्रकारे व्यापकतासम्बन्धेन भानं, यथा कः पचतीति प्रश्नोत्तरभूते देवदत्तः पचतीति वाक्ये; तत्र प्रश्नघटककिंपदस्य समभिव्याहृतपदार्थतावच्छेदकव्याप्यधर्मप्रकारकजिज्ञासाविषयार्थकतया पाककर्तृत्वव्याप्यधर्मप्रकारकजिज्ञासाविषयः पाककर्तेति प्रश्नवाक्याद्बोधेन उत्तरवाक्येऽपि देवदत्तत्वे पाककर्तृत्वव्याप्यत्वभानावश्यकतया विशेष्यतावच्छेदकस्य व्यापकतासम्बन्धेन पाककर्तृत्वे बोधसिद्धेः । अत एव कः पचतीति प्रश्नस्य प्रमेयः पचति मनुष्यः पचतीत्यादि नोत्तरं; यत्र समभिव्याहृतपदार्थतावच्छेदकसमनियतधर्मप्रकारकजिज्ञासया प्रश्नस्तत्रोत्तरजन्यबोधे समनैयत्यस्यैव संसर्गता; यथा का पृथिवीति प्रश्नस्योत्तरे गन्धवती पृथिवीत्यादौ, तत्र किंपदस्य समनियतधर्मप्रकारकजिज्ञासाविषयार्थकत्वात् । अत एव का पृथिवीति प्रश्नस्य घटः पृथिवीति नोत्तरम् ॥

एवं च—नन्वनुमितिहेतुभूतव्याप्तिज्ञाने का व्याप्तिः, न तावदव्यभिचरितत्वं, तद्धि न साध्याभाववदवृत्तित्वं—केवलान्वयिन्यभावादित्यादिचिन्तामणिग्रन्थस्सङ्गच्छते; तत्र किंपदस्य व्याप्यधर्मप्रकारकजिज्ञासाविषयार्थकत्वे साध्याभाववदवृत्तित्वत्वस्यानुमितिजनकज्ञानविषयत्वव्याप्यत्वानपायेन केवलान्वयिन्यभावादित्यस्यासङ्गतेस्समनियतधर्मप्रकारकजिज्ञासाविषयपरत्वावश्यकत्वात्; 'प्रकृते अधीहि भगवो ब्रह्मेति' इत्यत्रापि धातोर्ब्रह्मत्वसमनियतधर्मप्रकारकज्ञानजनकशब्दपरत्वात्तदुत्तरभूते तद्ब्रह्मेत्यत्र समनैयत्यस्य संसर्गत्वं, तस्य विधेयत्वं चावश्यमिति—बोध्यम् ॥

न च—अग्नीन्द्रादिषु बहुषु निरतिशयबृहत्त्वं सन्दिहानस्य कथं कारणत्वसमनैयत्योक्त्या तदाश्रयवस्तुविशेषनिश्चयः, कारणत्वस्यापि बहुषु सन्देहसम्भवादिति—वाच्यम्; कारणत्वस्य 'एको ह वै नारायण आसीत्' इत्यनेन नारायणत्वव्याप्यत्वेन निश्चितत्वात्, तत्र विधेयीभूतनारायणत्वे कारणत्वस्योद्देश्यतावच्छेदकस्य व्यापकतासम्बन्धेन भानात्, तथा निश्चितकारणत्वेन निरतिशयबृहत्त्वाश्रयवस्तुविशेषनिश्चयसम्भव इत्यभिप्रायेणैव जन्माद्यस्य यत इतिसूत्रप्रणयनात्। तथा च **पाशुपताधिकरणे श्रीभाष्यम्**—

> " 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः' इत्यारभ्य 'स एकाकी न रमेत' इति सृष्टिवाक्योदितं स्रष्टारं नारायणमेव समानप्रकरणस्थास्सदेव सोम्येदमग्र आसीदित्यादिषु साधारणास्सद्ब्रह्मादिशब्दाः प्रतिपादयन्तीति जन्माद्यस्य यत इत्यत्र प्रतिपादितम् ॥" —इति ॥

सूत्रकृता कारणत्वेन निरतिशयबृहत्त्वाश्रयवस्तुविशेषनिश्चयकरणात् कारणत्वस्य वस्तुविशेषनिष्ठत्वनिश्चयावश्यकतया सद्ब्रह्मादिसामान्यशब्दानां विशेषपर्यवसानमपि जन्मादिसूत्राभिप्रेतमित्यर्थः ।

जन्माद्यस्य यत इत्यत्र प्रतिपादितमिति भाष्यं तु न यथाश्रुतार्थपरं, तत्सूत्रभाष्ये तादृशार्थस्याप्रतिपादितत्वात्। तथा च प्रतिपादितमिति प्रतीकमुपादाय **टीका**—

"यतो वा इमानीत्यादिवाक्येऽस्यार्थस्याभिप्रेतत्वात्सूत्रकारेणापि तथाऽभिप्रेतमित्यर्थः। जन्मादिसूत्रभाष्येण परस्मात् पुंस इत्यन्तेनायमर्थस्सूचितः॥" —इति॥

अथ—कारणत्वस्य नारायणत्वव्याप्यतया जन्मादिसूत्राभिप्रेतत्वे लिङ्गभूयस्त्वाधिकरणस्योपास्यत्वे नारायणत्वव्याप्यतासाधकस्य वैफल्यं, उपास्यत्वे कारणत्वव्याप्यत्वस्य कारणं तु ध्येय इति श्रुतिसिद्धतया नारायणत्वव्याप्यताया अप्यावश्यकत्वात्, तद्व्याप्यव्याप्यस्य तद्व्याप्यत्वनियमात्। उपास्यत्वस्य कारणत्वव्याप्यत्वमुक्तश्रुतिसिद्धमिति च सूत्रकारानुमतं, कारणवाक्यविचारपरे प्रथमपादे उपास्यत्वप्रतिपादनपरप्रतर्दनविद्याविचाररूपस्येन्द्रप्राणाधिकरणस्य निवेशात्—इति चेन्न॥ कारणत्वस्य नारायणत्वव्याप्यत्वमनुपपन्नं, कारणत्वव्याप्यस्योपास्यत्वस्य नारायणभिन्ने शिवादौ श्रवणादित्याक्षेपपरिहारार्थतया तदधिकरणसार्थक्यात्; तदधिकरणे शिवशम्भ्वादिपदचिह्नितेष्वपि वाक्येषु नारायणस्यैवोपास्यत्वसमर्थनद्वारा उपास्यत्वे नारायणत्वव्याप्यत्वसमर्थनात्—इत्यलं प्रसक्तानुप्रसक्त्या॥

अयं च विधिश्चतुर्विधः—उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति। तत्रोपासनादेः प्राथमिकप्राप्तिर्यतस्स उत्पत्तिविधिः, प्रथमप्राप्तेरुत्पत्तिरूपत्वात्; प्राप्तिः प्रवृत्तिविषयताप्रयोजकाज्ञादिविषयत्वप्रतीतिः; अत्रोपकोसलविद्यायां कं ब्रह्म खं ब्रह्म अस्मद्विद्या चात्मविद्या चेति प्राप्तसुखविशिष्टब्रह्मोपासनानुवादेन अक्षिरूपस्थानसंयद्वामत्वादिगुणविधायकस्य 'य एषोऽक्षिणि पुरषो दृश्यते एतं संयद्वाम इत्याचक्षते' इत्यादेरुपासनोत्पत्तिविधित्वाभावात्प्राप्तौ प्राथम्यं

विशेषणम् । उत्पत्तिविधिश्च क्वचिद्ब्रह्मोपासनमात्रोत्पादकः, यथा सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेत्यादौ ; क्वचिच्च गुणविशिष्टब्रह्मोपासनोत्पादकः, यथा कहोलप्रश्ने 'एष त आत्मा सर्वान्तरः' इत्युक्तसर्वान्तरत्वविशिष्टब्रह्मणो बाल्येन तिष्ठासेदित्युपासनविधिः । तथा च व्यतिहारसूत्रे **श्रीभाष्यम्**–'सर्वान्तरात्मत्वविशिष्टे ब्रह्मण्युपास्ये' इति ; 'विधिप्रत्ययश्चोत्तरत्र दृश्यते, तस्माद्ब्रह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्'—इति च । अत्र **टीका**–'तिष्ठासेत्–ब्रह्मणि तिष्ठासेत्, निष्ठां लभेत, उपासीतेत्यर्थः'—इति ॥

क्वचिद्ब्रह्मोपासनगुणोपासनोभयविधिः ; यथा–'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्'–इति ; अत्र यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्मेत्यनूद्य तस्मिन् दहरपुण्डरीकवेश्मनि यो दहराकाशो यच्च तदन्तर्वर्तिगुणजातं तदुभयमुपासितव्यमित्यर्थः ॥ अत्र—यद्यपि दहराकाशान्तर्वर्तिगुणजातस्यैवोपास्यत्वं वाक्यस्वरससिद्धं ; तथाऽपि 'यस्तमात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति' इति फलश्रुतावुभयोरपि फलकीर्तनादुपासनद्वयमपि विधेयमेव ; तदुपासितव्यमिति तच्छब्दस्य यो दहराकाशः यच्च तदन्तर्वर्तिगुणजातमित्यर्थकत्वात् ॥

क्वचिद्ध प्राप्तब्रह्मोपासनानुवादेन गुणविधिः ; यथा 'सक्रतुं कुर्वीत मनोमयः प्राणशरीरः' इत्यादौ, 'एतं संयद्वाम इत्याचक्षते' इत्यादौ च ॥ क्वचिच्च तादृशोपासनानुवादेन स्थानविधिः, यथा 'य एषोऽक्षिणि पुरुषो दृश्यते' इत्यादौ ; तत्र दृश्यत इत्यनेन दर्शनसमानाकारतापन्नध्यानानुवादात्, 'दृश्यत इत्युपासकदर्शनानुवादः' इति **ब्रह्मविद्याविजये महाचार्यै**रुक्तत्वात् ॥ क्वचिच्च दिव्यमङ्गलविग्रह-

विधिः, यथा 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' इत्यादौ। उक्तं च तत्रैव **महाचार्यैः**—

"य एषोऽन्तरादित्य इत्यादित्यमण्डलान्तर्वर्तिपुरुषस्याप्राप्तत्वात् वचनानि त्वपूर्वत्वादिति न्यायेन यदाग्नेयादिवद्विधिपरम्"—इति ॥

क्वचिच्च फलविधिः, यथा 'यस्तमात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति' इत्यादौ। न च–गुणादिविधीनां प्राथमिकप्रवृत्तिविषयताप्रयोजकत्वाभावादुत्पत्तिविधित्वं न सम्भवतीति–वाच्यम्; प्रवृत्तिविषयता हि क्वचित्साध्यतारूपा, क्वचित्साध्यतावच्छेदकतारूपा, क्वचिदुद्देश्यतारूपा च। तत्रोपासने साध्यतारूपा; गुणविग्रहस्थानेषु साध्यतावच्छेदकतारूपा। तत्र गुणविग्रहयोरपृथक्सिद्धिसम्बन्धावच्छिन्नप्रकारतासम्बन्धावच्छिन्ना साध्यतावच्छेदकता, स्थाने चाधेयतासम्बन्धावच्छिन्नप्रकारतासम्बन्धावच्छिन्ना साध्यतावच्छेदकता; गुणविग्रहयोर्ब्रह्मण्यपृथक्सिद्धिसम्बन्धेन स्थानस्य चाधेयतासम्बन्धेन प्रकारत्वात्। फले चोद्देश्यतारूपेति ॥

तत्रोत्पत्तिशिष्टगुणावरुद्धे न गुणान्तरस्य तादृशविग्रहावरुद्धे न विग्रहान्तरस्य तादृशस्थानावरुद्धे च न स्थानान्तरस्य तादृशफलावरुद्धे च न फलान्तरस्य विधानं सम्भवति; 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इत्यत्रामिक्षारूपोत्पत्तिशिष्टगुणावरुद्धे यागे वाजिनरूपगुणान्तरस्य विधानं न सम्भवतीति वाजिभ्यो वाजिनमिति वाक्यं तद्विशिष्टयागान्तरविधायकमिति गुणाधिकरणे सिद्धान्तितत्वात्, उपासनविधिस्थलेऽपि तन्न्यायानुरोधस्यावश्यकत्वात् ॥

अत एव **सर्वत्रप्रसिद्ध्यधिकरणटीकायां**—शाण्डिल्यविद्यागतोपासनविधेरुत्पत्तिशिष्टसर्वात्मकत्वावरोधान्मनोमयत्वादीनां नोपास्या-

कारसमर्पकत्वम्--**इत्याशङ्क्य ;** सर्वात्मकत्वं नोपास्यगुणः--**इति समाहितम्** ॥

एवमन्तराधिकरणटीकायां--'तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी' इति वाक्यस्य, कप्यासं सूर्यमण्डलं पुण्डरीकं हृदयपुण्डरीकं च यथोपासनस्थानमेवमक्षिणी अप्युपासनस्थाने इत्यर्थः--**इति वाक्यकारोक्तपूर्वपक्षार्थनिराकरणावसरे,** अन्तरादित्यविद्यायां 'य एषोऽन्तरादित्ये' इति स्थानस्योक्तत्वादक्षिविद्यायां च 'य एषोन्तरक्षिणि' इति स्थानस्योक्तत्वात् उभयत्र स्थानविध्यपेक्षा नास्तीत्यनाकाङ्क्षितत्वादिदं वाक्यमनन्वितं स्यात्--**इति दूषणमुक्तम्** ॥

एवं 'जीवमुख्यप्राणलिङ्गान्नेतिचेन्नोपासात्रैविध्यात्' इति **सूत्रटीकायां**--'स यश्चायं पुरुषे यश्चासावादित्ये' इति वाक्ये जीवान्तर्यामिण आदित्यान्तर्यामिणश्चोपासनमुच्यते--**इत्याशङ्क्य ;** तथा सति स्थानभेदाद्विद्याभेदापत्तिः--**इति दूषयित्वा ;** स यश्चायं पुरुष इति विज्ञानमयादन्तरस्यानन्दमयस्यानुवादः, यश्चासावादित्य इति दिव्यमङ्गलविग्रहस्यातिदेशः--**इत्युक्तम्** ॥

एवं **श्रीभाष्ये** सम्बन्धादेवमन्यत्रापीत्यधिकरणे--सत्यं ब्रह्मेत्युपक्रम्य 'तद्यत्सत्यं असौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन् पुरुषस्तावेतावन्योन्यस्मिन् प्रतिष्ठितौ' इति पुरुषद्वयमभिधाय प्रवृत्तायां व्याहृतिविद्यायां 'य एष एतस्मिन् मण्डले पुरुषस्तस्य भूरिति शिर एकं भुव इति बाहू स्वरिति प्रतिष्ठा तस्योपनिषदः ह' इति नामधेयं चाभिधाय ; 'हन्ति पाप्मानं जहाति च य एवं वेद' इति आदित्यमण्डलस्थव्याहृतिशरीरकोपासनस्य फलमुक्त्वा; 'योऽयं दक्षिणेऽक्षिन् पुरुषस्तस्य भूरिति शिर एकं' इत्यादिनाऽक्ष्यधिकरणकपुरुषस्यापि व्याहृतिशरीरकत्वं तस्याहमिति नामधेयं, 'हन्ति

पाप्मानं जहाति च य एवं वेद' इति तदुपासनफलं चाभिहितम् । तत्रादित्यपुरुषाक्षिपुरुषोपासनयोरैक्यं पूर्वपक्षीकृत्यादित्यरूपस्थानविशिष्टोपासने स्थानान्तरान्वयासम्भवाद्भेदस्समर्थितः । तथा सैव हि सत्यादय इति सूत्रभाष्ये—उक्तादित्यपुरुषाक्षिपुरुषोपासनयोरैक्यस्थापनपरतया **शङ्करभाष्यकृतायास्तत्सूत्रयोजनाया दूषणावसरे**—स्थानविशिष्टे स्थानान्तरान्वयासम्भवात्फलविशिष्टे फलान्तरान्वयासम्भवाच्च विद्ययोर्भेदः । न च—उपकोसलविद्यायां 'एतं संयद्वाम इत्याचक्षते, एतं हि सर्वाणि वामान्यभिसंयन्ति, सर्वाण्येनं वामान्यभिसंयन्ति, य एवं वेद' इत्यादौ यथा संयद्वामत्वादिगुणोपासनेषु फलकथनं फलरूपतात्पर्यलिङ्गोपन्यासेन तेषु गुणेषु तात्पर्यप्रदर्शनार्थं, तथा 'तस्योपनिषदहम्' इति 'हन्ति पाप्मानं जहाति च य एवं वेद' इति फलकथनमपि नामधेयवैशिष्ट्ये तात्पर्यग्राहकमेव; न तु व्याहृतिशरीरकाक्षिपुरुषविद्योपासनमलमिति—वाच्यम् ; विशिष्टोपासनस्य फलाकाङ्क्षासत्त्वेन तादृशफलसमर्पकतया सार्थकत्वसम्भवे निरर्थकत्वापरपर्यायतात्पर्यग्राहकत्वकल्पनस्यानुचितत्वात् । न च—तादृशोपासनयोरेकविद्यात्वात् फलश्रुतेस्तात्पर्यग्राहकत्वमिति—वाच्यम्; तथा सत्यन्योन्याश्रयापत्तेः । एकविद्यात्वसिद्धौ फलश्रुतेस्तात्पर्यग्राहकत्वासिद्धिः, तात्पर्यग्राहकत्वसिद्धौ चैकविद्यात्वसिद्धिरिति—**प्रतिपादितम्** ॥ फलविशिष्टे फलान्तरान्वयासम्भवश्च सूत्रकारसम्मतः, प्राणविदस्सर्वान्नीनत्वस्यापद्विषयत्वाभिधानात् । अन्यथा ज्यैष्ठ्यश्रैष्ठ्यादिफलकोपासनेऽपि फलान्तरान्वयसम्भवे 'एवंविदि पापं कर्म न श्लिष्यते' इत्यादेरिव 'न ह वा एवंविदि किञ्चनानन्नं भवति' इत्यादेरपि फलविधित्वापत्तौ आपद्विषयत्वकल्पनानुपपत्तेः । एवं च—सूत्रभाष्यटीकादिषु बहुषु स्थलेषु तादृशन्यायस्य सञ्चारितत्वात्तादृशन्यायानुरोध आवश्यक इत्यवसीयते ॥

ननु--तादृशन्यायानुरोधो न युक्तः, तथा सति **आनन्दादयः प्रधानस्ये**त्यधिकरणे उत्पत्तिशिष्टानेकभावरूपगुणविशिष्टेष्वानन्दादिभावरूपगुणानामन्वयस्य अक्षरधियामित्यधिकरणे तादृशाभावरूपगुणविशिष्टेषूपासनेष्वभावरूपगुणानामन्वयस्य च प्रतिपादनात्तद्विरोधः--इति चेत् ॥ उच्यते। यथा--आर्षेयं वृणीते, त्रीन् वृणीते, पुरोडाशं चतुर्धा करोति, आग्नेयं चतुर्धा करोति--इत्यादिभिन्नवाक्यानामप्येकवाक्यतापन्नानां त्रित्वविशिष्टार्षेयवरणादिविधिपरत्वं पूर्वतन्त्रसिद्धम्; यथा वा द्रष्टव्यो निदिध्यासितव्य इति मैत्रेयीब्राह्मणगतवाक्यस्य 'तस्मिन् यदन्तस्तदुपासितव्यं' इति दहरादिविद्यावाक्येनैकवाक्यत्वमङ्गीकृत्य विद्यासामान्यस्य दर्शनसमानाकारध्यानविधिपरत्वमुत्तरतन्त्रसिद्धम् ; तथा--सत्यंज्ञानमित्यादेस्सर्वविद्याभिस्सहैकवाक्यतामङ्गीकृत्य तत्तद्विद्योदितगुणानन्दादिगुणोभयविशिष्टब्रह्मध्यानविधिपरत्वं स्वीक्रियते। तथा च--तत्तद्विद्योदितगुणानामिवानन्दादिगुणानामप्युत्पत्तिशिष्टत्वान्न तादृशन्यायविरोधः। एवमेव हि कौषीतकिनां प्राणविद्यायां दशमाध्यायगतायां ज्यैष्ठ्यश्रैष्ठ्यरूपगुणद्वयावरुद्धायां छन्दोगवाजसनेयिनां प्राणविद्यायां प्रतिपाद्यमानानां वसिष्ठत्वप्रतिष्ठात्वादिगुणानामुपसंहारः सर्वाभेदादन्यत्रेम इत्यधिकरणसिद्धस्सङ्गच्छते । छन्दोगवाजसनेयिनां प्राणविद्यया सह कौषीतकिनां प्राणविद्याया एकवाक्यत्वमङ्गीकृत्य छन्दोगादिप्राणविद्याप्रतिपन्नवसिष्ठत्वप्रतिष्ठात्वसम्पत्त्यायतनत्वरूपगुणानामप्युत्पत्तिशिष्टत्वस्यैवाङ्गीकर्तव्यत्वात् ॥

अथ--अत्रोत्पत्तिशिष्टगुणावरुद्धे गुणान्तरविधानं नास्तीत्यस्य स्वानिष्पाद्यगुणावरुद्धे गुणान्तरस्य न विधानमित्येवार्थः; अन्यथा उत्पत्तिशिष्टपुरोडाशाद्यवरुद्धेष्वाग्नेयादिषु 'व्रीहिभिर्यजेत' 'यवैर्यजेत'

इत्यादिविकल्पविधिना व्रीह्यादीनां विधानानुपपत्तेः। तथा च व्रीहिनिष्पाद्यपुरोडाशावरुद्धेषु व्रीह्यादीनां विधानवत् वसिष्ठत्वाद्युपपाद्यज्यैष्ठ्यश्रैष्ठ्यावरुद्धे प्राणोपासने वसिष्ठत्वादीनामुत्पत्तिशिष्टत्वाभावेऽपि विधानमुपपद्यते। तत्र वागाद्यपेक्षया प्राणस्य ज्यैष्ठ्यं तदधिकरणयावत्कालवृत्तित्वे सति तदनधिकरणकालवृत्तित्वरूपं कालत आधिक्यम्। तच्च गोलकादिनिष्पत्त्यनन्तरभाविन्याः चक्षुरादिवृद्धेः प्रागेव गर्भस्थपुरुषे प्राणस्य वृद्धिलाभादुपपद्यते। प्राणस्य वृद्ध्या हि गर्भस्य वृद्धिः; प्राणस्य वागाद्यपेक्षया श्रैष्ठ्यं च तद्गतवसिष्ठत्वादिगुणवत्त्वे सत्यधिकगुणवत्त्वं; तच्च वागादिगतवसिष्ठत्वादिगुणवत्त्वं विनाऽनुपपन्नमिति तदुपपाद्यमेव॥ न च—वाचो वसिष्ठत्वं वाग्मिनस्सद्व्यवहारजननेन वस्तुतासम्पादकत्वं सद्व्यवहारजनकत्वपर्यवसितं, चक्षुषः प्रतिष्ठात्वं चक्षुष्मतस्समविषमभूतलादिप्रदर्शनेन प्रतिष्ठासम्पादकत्वं, पतनाभावहेतुभूतसमविषमभूतलादिविषयकचाक्षुषज्ञानजनकत्वपर्यवसितं, श्रोत्रस्य सम्पत्त्वं वेदतदर्थश्रवणेन सम्पत्करत्वं सम्पद्धेतुभूततादृशश्रावणजनकत्वरूपं, मनस आयतनत्वं सुखादिसाक्षात्कारजनकत्वरूपभोगायतनत्वं, चक्षुषा हि 'समे दुर्गे च प्रतितिष्ठति श्रोत्रेण हीमे सर्वे वेदा अभिसम्पन्नाः' इति वाजसनेयकगतवाक्यशेषानुसारात् तादृशं च वसिष्ठत्वादिकं प्राणस्य न सम्भवति, वाक्चक्षुरादिवत्तस्य व्यवहारचाक्षुषादौ हेतुत्वाभावादिति—वाच्यम्; स्वाश्रयत्वस्वप्रयोजकत्वान्यतरसम्बन्धेन व्यवहारचाक्षुषादिजनकतावत्त्वस्य वसिष्ठत्वप्रतिष्ठात्वादिरूपतया तेषां वागादीन्द्रियप्राणोभयसाधारणत्वात्, 'वाग्वा व वसिष्ठा चक्षुर्वा व प्रतिष्ठा' इत्यादिना इन्द्रियेषु स्वाश्रयत्वसम्बन्धेन व्यवहारादिहेतुत्वस्य 'अथ हैनं वागुवाच यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसि' 'अथ हैनं चक्षुरुवाच यदहं प्रति-

ष्ठाऽस्मि त्वं तत्प्रतिष्ठाऽसि' इत्यादिना छान्दोग्ये स्वप्रयोजकत्व-सम्बन्धेन तादृशहेतुतावत्त्वस्य प्राणे प्रतिपादनात्, वसिष्ठत्वादि-विशिष्टस्य वागादेः प्राणाधीनत्वात्प्राणस्यापि वसिष्ठत्वमिति यदहं वसिष्ठोऽस्मीत्यादिवाक्यार्थात्। उक्तं च **श्रीभाष्ये**—

"वागादीनां वसिष्ठत्वादिगुणान्वितानां प्राणाधीनकार्यत्वोपपाद-नेनैव प्राणस्य वागादिवसिष्ठत्वादिगुणहेतुत्वस्य सिद्धत्वात् तदेव हि प्राणस्य वसिष्ठत्वादिगुणयोगित्वं यद्वागादिगतवसि-ष्ठत्वादिहेतुत्वम् ॥" —इति ॥

तथा च वसिष्ठत्वादीनामुत्पत्तिशिष्टत्वाभावेऽपि न दोषः —इति ॥

मैवम् ॥ प्राणस्य श्रैष्ठ्यं हि नोक्तरूपं गुणाधिक्यं, किं तु शरीर-गतजीवोपकरणसामान्याभावप्रयोजकाभावप्रतियोगित्वपर्यवसितं शरी-रस्य कार्यविधुरतारूपपापिष्ठत्वप्रयोजकोत्क्रमणकर्तृत्वमेव श्रेष्ठत्वं, छन्दोगादीनां प्राणविद्यायां 'अहं श्रेयानस्म्यहं श्रेयानस्मि' इति श्रेष्ठत्वे विवादपूर्वकं प्रजापतिसमीपं गतैस्सप्राणैरिन्द्रियैः 'भगवन् को नश्श्रेष्ठः' इति पृष्टे 'यस्मिन् उत्क्रान्ते इदं शरीरं पापिष्ठमिव दृश्यते स वः श्रेष्ठः' इति प्रजापतिना उत्तरदानात्तदनन्तरं वागाद्येकैकेन्द्रि-याणां निर्गमनेऽपीतरेषां सुखेन स्वस्वकार्यसमर्थतयाऽवस्थानं प्रतिपाद्य "अथ ह प्राण उच्चक्रमिष्यन् स यथा सुहयःपड्वीशशङ्कून् सङ्खि-देदेवमितरान् प्राणान् समखिदत्तं हाभिसमेत्योचुर्भगवन्नेधि त्वं नश्श्रे-ष्ठोऽसि मोत्क्रमीः" इति प्रजापतिनिरुक्तं श्रेष्ठत्वं प्राणे दृष्टवता-मिन्द्रियाणां प्राणश्रैष्ठ्यांशे विवादाभावप्रतिपादनादेतावतैव श्रैष्ठ्य-स्योपपादितत्वादनन्तरसन्दर्भगतस्य 'यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठो-ऽसि' इत्यादेः श्रैष्ठ्योपपादकत्वाप्रतीतेः; प्रत्युत श्रैष्ठ्याभ्युपगमपूर्वक-परितोषकदानपरताप्रतीतेश्च। तस्मात्तत्रैकवाक्यत्वाभ्युपगमेन वसिष्ठ-त्वादीनामप्युत्पत्तिशिष्टत्वमङ्गीकार्यमेव ॥

ननु—यस्मिन्नुत्क्रान्त इत्यादेस्स्वस्वकार्यविशिष्टजीवोपकरणसामान्यस्थितिप्रयोजकत्वमेव श्रेष्ठत्वमित्यर्थः। तत्र 'स यथा सुहयः' इत्यादेर्विशेष्यांशस्थितिप्रयोजकत्वोपपादनपरत्वात् यदहं वसिष्ठोऽस्मीत्यादेश्च विशेषणांशस्थितिप्रयोजकत्वोपपादनपरत्वाद्वागादिगतसद्व्यवहारादिजनकत्वप्रयोजकत्वरूपाणां प्राणगतवसिष्ठत्वादीनामपि निरुक्तश्रैष्ठ्योपपादकत्वमस्त्येव। उक्तं च सर्वाभेदादित्यधिकरणश्रीभाष्ये—

"सर्वेषां प्राणाधीनस्थितित्वतदधीनकार्यत्वाभ्यां प्राणस्य ज्यैष्ठ्य,मुपपादितम्" —इति॥

अत्र तदधीनकार्यत्वं प्राणाधीनव्यवहारादिजनकतावत्त्वं, ज्यैष्ठ्यं निरुक्तविशिष्टसत्ताप्रयोजकत्वरूपश्रैष्ठ्यम्। आनन्दादयः प्रधानस्येति सूत्रावतरणश्रीभाष्येऽप्युक्तम्—

"यथा प्राणस्य वसिष्ठत्वाद्यनुसन्धानेन विना ज्यैष्ठ्यश्रैष्ठ्यानुसन्धानानुपपत्तेरनुक्तानामपि वसिष्ठत्वादीनां कौषीतकीप्राणविद्यायां प्राप्तिः; तथा ब्रह्मस्वरूपानुसन्धानं यैर्गुणैर्विना नोपपद्यते ते सर्वासु ब्रह्मविद्यास्वनुसन्धेया इत्ययमर्थः प्रतिपाद्यते॥" —इति॥

तथा च—वसिष्ठत्वादीनां श्रैष्ठ्योपपादकत्वान्नोत्पत्तिशिष्टत्वापेक्षा-वस्तुतो वसिष्ठत्वादीनां उत्पत्तिशिष्टत्वाभावेऽपि न क्षतिः; तेषां कौषीतकीप्राणविद्यायामन्यथाऽनुपपत्तिबलेनैव प्राप्ततया विधानासम्भवात् सर्वप्रकारेण अप्राप्तस्यैव विधेयत्वात्, अन्यथा निदिध्यासनान्यथानुपपत्तिप्राप्तस्य श्रवणस्यापि विधेयत्वापत्तिः—इति चेत्॥ एवं तर्हि आनन्दादीनामपि न ब्रह्मविद्यासामान्ये विधानं; तेषामपि ब्रह्मानुसन्धानान्यथाऽनुपपत्तिबलेनैव प्राप्तत्वात्॥

एतेन–सर्वं खल्विदं ब्रह्मेत्यादौ ब्रह्मोपासने सार्वात्म्यस्य उत्पत्तिशिष्टत्वाभावेऽप्यानन्दादीनां तथात्वावश्यकतया मनोमयत्वादीनां विधानानुपपत्तिस्तदवस्थैव, तादृशन्यायस्य उत्पत्तिशिष्टगुणावरुद्धे तद्विरोधिगुणानां न विधानमित्यर्थकत्वे च सार्वात्म्यस्योपास्यत्वनिराकरणमयुक्तमिति--**शङ्का निरस्ता**; तत्र अन्यथानुपपत्त्या आनन्दादीनां प्राप्तावप्युत्पत्तिशिष्टत्वाभावेन मनोमयत्वादीनां विधानोपपत्तेः ॥

ननु–उपपादकगुणानामप्युपास्यत्वाङ्गीकारे व्यतिहारसूत्रश्रीभाष्यविरोधः; तत्र सर्वान्तरत्वोपपादकानां प्राणहेतुत्वादीनामुपास्यत्वनिराकरणात्। तथा च **श्रीभाष्यम्**—

"ब्रह्मणस्सर्वान्तरात्मत्वमेवोपास्यगुणः, प्राणनहेतुत्वादयस्तु तस्योपपादका नोपास्याः ॥" ––इति ॥

––इति चेत् ॥ **अत्रोच्यते**––सर्वान्तरत्वं हि सर्वान्तर्यामित्वं, सर्वान्तर्वृत्तित्वे सति सर्वनिष्ठचेष्टाप्रयोजकत्वे सति दुःखाभाववत्त्वरूपं; अन्तर्यामिब्राह्मणे 'यश्चक्षुषि तिष्ठन्' इयादिना चक्षुरादिवृत्तित्वस्य 'यश्चक्षुरन्तरो यमयति' इत्यादिना तन्निष्ठचेष्टाप्रयोजकत्वस्य 'स त आत्माऽन्तर्याम्यमृतः' इत्यमृतपदेन दुःखसामान्याभावस्य च चक्षुराद्यन्तर्यामित्वशरीरप्रविष्टत्वबोधनात्, चक्षुरादिचेष्टाप्रयोजकस्य प्राणस्य तदन्तर्यामित्ववारणाय प्रथमसत्यन्तस्य चक्षुराद्यन्तर्वृत्त्याकाशादिवारणाय द्वितीयसत्यन्तस्य तदभिमानिदेवताभूतादित्यवारणाय विशेष्यदलस्य च सार्थकत्वात्। 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तन्मे व्याचक्ष्व' इति याज्ञवल्क्यं प्रत्युषस्तेनान्तर्यामिप्रश्ने कृते 'यःप्राणेन प्राणिति स त आत्मा सर्वान्तरो, योऽपानेनापानति स त आत्मा सर्वान्तरः' इत्यादिनाऽन्तर्यामित्वघटकचेष्टासामान्यप्रयोजकत्वो-

पपादकतया प्राणनादिरूपक्रियाविशेषप्रयोजकत्वमुक्त्वा 'एष त आत्मा सर्वान्तरः' इत्युत्तरितम्। अनेकदेहपरिग्रहवतां योगिनां देवानां च तावद्देहगतक्रियाप्रयोजकत्वस्य प्रदीपवदावेश इति न्यायेन ज्ञानद्वारकव्याप्तिकृतस्य सत्त्वात्तन्न्यायेन कस्य चिज्जीवस्य धर्मभूतज्ञानाद्वारकव्याप्त्या सर्वक्रियाप्रयोजकत्वसम्भावनया जीवव्यावृत्त्यसम्भवं मन्वानेनोषस्तेन 'यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तन्मे व्याचक्ष्व' इति पुनः पृष्टे 'न दृष्टेर्द्रष्टारं पश्येः' इत्यादिना अन्तर्यामित्वमपृथक्सिद्धिसम्बन्धावच्छिन्नवृत्तित्वघटितं; न तु स्वीयधर्मभूतज्ञानवत्त्वसम्बन्धावच्छिन्नवृत्तित्वघटितमित्यभिप्रायेण याज्ञवल्क्येनोत्तरिते अपृथक्सिद्धिसम्बन्धावच्छिन्नसर्ववृत्तित्वघटितान्तर्यामित्वस्य जीवेऽसम्भवादुपरते उषस्ते जीवविभुत्ववादिनैयायिकादिनये तस्यापि जीवसाधारण्यं मन्वानेन कहोळेन पुनरपि तथैव पृष्टे दुःखसामान्याभावस्यापि अन्तर्यामित्वघटकत्वमतोऽन्यदार्तमित्यनेन सूचितमप्यनेन न ज्ञातमिति तस्य स्पष्टीकरणाय 'योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति' इति तदुपपादकगुणोपपादनपुरस्सरं पूर्वं सूचितमेव दुःखसामान्याभावस्य घटकत्वं पुनराविष्कृतमतोऽन्यदार्तमिति ॥

अत्र च—उषस्तकहोळप्रश्नोत्तरश्रुतिप्रतिपाद्ययोर्विद्ययोरैक्यं न युक्तं, एकत्र प्राणनहेतुत्वधर्मभूतज्ञानाद्वारकवृत्तित्वादीनामन्यत्राशनायाद्यतीतत्वादीनां गुणानामुपास्यत्वेन उत्पत्तिशिष्टप्राणनहेतुत्वादिविशिष्टे उपासनेऽशनायाद्यतीतत्वादीनां विधानासम्भवेन गुणाधिकरणन्यायेन विद्याभेदस्यावश्यकत्वात्—इत्याशङ्क्य; प्राणनहेतुत्वादीनामशनायाद्यतीतत्वादीनां च सर्वान्तरत्वान्यथानुपपत्त्या प्राप्तानां विधेयत्वायोगात् गुणाधिकरणन्यायानवतारादित्यभिप्रायेण ब्रह्मणस्सर्वान्तरत्वमेवोपास्यगुणः, प्राणनहेतुत्वादयस्तु तस्योपपादका नोपास्याः—इति श्रीभाष्यं प्रवृत्तम् ॥ उपास्यगुणः—उपासनांशे

विधेयभूतो गुणः, उपपादकाः–अन्यथानुपपत्तिप्राप्ताः, नोपास्याः–न विधेया इत्यर्थः ॥

एतेन–प्राणनहेतुत्वादीनामशनायाद्यतीतत्वादीनां चोपास्यत्वाभावे व्यतिहारो विशिंषन्तीति सूत्रविरोधः, तत्सूत्रे उषस्तेन कर्तव्यस्य प्राणनहेतुत्वानुसन्धानस्य कहोळेनापि कर्तव्यतायाः कहोळेन कर्तव्यस्याशनायाद्यतीतत्वानुसन्धानस्य उषस्तेनापि कर्तव्यतायाः प्रतिपादनात्तेषां गुणानामनुपास्यत्वे परस्परं व्यतिहृत्यानुसन्धानस्य विफलत्वात्––**इति निरस्तम्**; उदाहृतभाष्यस्य प्राणनहेतुत्वादीनां विधेयत्वाभावपरतया उपास्यत्वाभावपरत्वाभावेनाविरोधात् ॥

ननु––उदाहृतभाष्यस्य प्राणनहेतुत्वादीनामनुपास्यत्वपरत्वाभावे तदुत्तरश्रीभाष्यासङ्गतिः। इत्थं हि तदुत्तरं **श्रीभाष्यम्**––

> "ननु–उपास्यगुणस्सर्वान्तरात्मत्वमेव चेत्, प्राणनहेतुत्वस्याशनायाद्यतीतत्वस्य च प्रष्टोर्व्यतिहृत्यानुसन्धानं किमर्थं; तदुच्यते सर्वप्राणिप्राणनहेतुत्वेन सर्वान्तरात्मनि जीवाद्व्यावृत्ते ब्रह्मण्युषस्तेनावधृते सति कहोळेन जीवस्य सर्वात्मना असम्भावितस्वभावविशेषेण सर्वान्तरात्मा व्यावृत्तोऽनुसन्धेय इति कृत्वा पुनः प्रश्नः कृतः। याज्ञवल्क्योऽपि तदभिप्रायमभिज्ञाय प्रत्यगात्मनोऽसम्भावितमशनायादिप्रत्यनीकत्वमुक्तवान्। अतश्चोपास्यव्यावृत्तिप्रतीतिसिद्ध्यर्थमुभाभ्यां परस्परबुद्धिव्यतिहारः कर्तव्यः ॥" ––इति ॥

अत्र–नन्वित्यादिभाष्येण प्राणनहेतुत्वादीनामनुपास्यत्वे व्यतिहारसूत्रवैयर्थ्याशङ्कनेन तत्पूर्वभाष्ये प्राणनहेतुत्वादीनामनुपास्यत्वाभ्युपगमावश्यकत्वात्––इति चेत् ॥ **उच्यते**–नन्वित्यादिभाष्यं हि प्राणनहेतुत्वाशनायाद्यतीतत्वयोरन्यतरेणैव सर्वान्तरत्वोपपादनसम्भवात् उभाभ्यामुभयानुसन्धानं व्यर्थमिति शङ्कापरम्; तदुच्यत इत्यादिभाष्यं

च पूर्वनिरुक्तसर्वान्तरत्वोपपादनमन्यतरेण न सम्भवतीत्युभयानुसन्धानमुभाभ्यां कर्तव्यमिति समाधानपरमिति न विरोधः। अन्यतरस्योपास्यत्वाभ्युपगमेनैव नन्वित्यादिभाष्यप्रवृत्तेस्तत्पूर्वभाष्यस्य प्राणनहेतुत्वानुपास्यत्वपरत्वानावश्यकत्वात्। तथा च टीकायामवतारितम्—

"तत्र सर्वप्राणिप्राणनहेतुत्वाशनायाद्यतीतत्वयोरन्यतरेणैव व्यावृत्तिबुद्धिस्स्यादित्यन्यतरेण किमित्यभिप्रायेण चोदयति नन्विति ॥" —इति ॥

तथा च- प्राणनहेतुत्वादीनामुपपादकानामप्युपास्यत्वमनुमतमेवेति न पूर्वोत्तरभाष्ययोर्विरोधः; न चोत्पत्तिशिष्टन्यायविरोधश्च ॥

अत्रेदं विचार्यते—उत्पत्तिशिष्टन्यायाङ्गीकारे सम्भृत्यधिकरणविरोधः। तदधिकरणे हि तैत्तिरीयके राणायनीयानां खिलेषु च—"ब्रह्म ज्येष्ठा वीर्या सम्भृतानि, ब्रह्माग्रे ज्येष्ठं दिवमाततान, ब्रह्म भूतानां प्रथमोत जज्ञे, तेनार्हति ब्रह्मणा स्पर्धितुं कः"—इति श्रूयते॥ ज्येष्ठानि— इतरानभिभाव्यानि, वीर्याणि ब्रह्मणा सम्यग्भृतानीत्यर्थः। इदं वाक्यं न स्वरूपोपदेशपरं, सर्वव्याप्ते तस्मिन् द्युव्याप्तिकथनस्य उपासनार्थत्वावश्यकत्वात्; नापि सद्विद्यान्यायेन स्ववाक्य एव कल्पिते उपासनविधौ शेषभूतं, अनारभ्याधीतस्यास्य तत्तत्प्रकरणश्रुतोपासनार्थत्वेनैव निर्वाहे तत्रैवोपासनान्तरविधिकल्पनायोगात्। तथा च सम्भृतिद्युव्याप्त्यादिगुणानां विनिगमनाविरहेण सर्वविद्यान्वयित्वे प्राप्ते यत्र हृदयादिरूपाल्पस्थानावच्छिन्ने ब्रह्मण उपास्यत्वं तादृशशाण्डिल्यदहरादिविद्यासु स्वर्गलोकनिष्ठात्यन्ताभावाप्रतियोगिरूपद्युव्याप्तत्वस्य अन्वयो न सम्भवति; देवताधिकरणे देवानामुपासनाधिकारसमर्थनेन उपासकहृदयावच्छिन्नब्रह्मणस्स्वर्गे सत्त्वेऽपि तादृशहृदयानवच्छिन्नस्वर्गप्रदेशे तादृशब्रह्मात्यन्ताभावसत्त्वात्; किन्त्वल्पस्थानगोचरविद्या-

तिरिक्तविद्यास्वेव द्युव्याप्तत्वस्यान्वयात् तत्सहचरितानां सम्भृत्यादीनामपि तत्रैवान्वयः ॥

न चैवं-द्रव्यनिष्ठापृथक्सिद्धिसम्बन्धावच्छिन्नात्यन्ताभावाप्रतियोगित्वरूपदेशापरिच्छेदघटितस्यानन्तत्वस्य आनन्दादय इति सूत्रे सर्वविद्यानुयायित्वेन प्रतिपादितस्यापि तादृशविद्यास्वन्वयो न स्यादिति-वाच्यम्; इष्टापत्तेः। अत एवोक्तं **श्रीभाष्ये**—

"शाण्डिल्यदहरादिविद्यासु अल्पस्थानविषयासु ज्यायान् पृथिव्या यावान् वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इत्यादयस्तत्र तत्राशक्योपसंहारा मनोमयत्वापहतपाप्मत्वादि-विशिष्टस्योपास्यस्य माहात्म्यप्रतिपादनपराः॥"—इत्युक्तम्॥

तत्र टीका—'माहत्म्यप्रतिपादनपराः—स्वतोऽनन्तत्वरूपमाहात्म्यप्रतिपादनपरा इत्यर्थः, न त्वेतद्विद्याया उपास्याकारपरा इत्यर्थः'—इति ॥

अयं भावः—पृथिवीनिष्ठापृथक्सिद्धिसम्बन्धावच्छिन्नप्रतियोगित्वाभावद्युनिष्ठतादृशाभावप्रतियोगित्वाभावकूटस्यैव द्रव्यनिष्ठापृथक्सिद्धि-सम्बन्धावच्छिन्नप्रतियोगित्वसामान्याभावरूपत्वात् ज्यायान् पृथिव्या इत्यादेर्विशेषाभावप्रतिपादकस्यापि निरुक्तसामान्याभावप्रतिपादकत्व-मुपपन्नम्—इति ॥

अत्र स्वतोऽनन्तत्वरूपमाहात्म्यप्रतिपादनपरा इत्यर्थ इति टीका-वाक्याच्छाण्डिल्यादिविद्यास्वनन्तत्वस्योपास्यत्वाभावोऽवगम्यते ॥

नन्वेवं—अव्यवहितटीकाविरोधः; तथा च टीका—

"अल्पस्थानविषयदहरादिविद्यासु द्युव्याप्त्यादेरनुपसंहारश्चेत् कथं सर्वविद्यानुयायिष्वानन्दादिष्वन्तर्भूतस्यानन्त्यस्यानुसन्धेयत्वम्? इत्थं—औपाधिकाल्पत्ववतो ब्रह्मणस्तस्मिन्नेव स्थाने औपाधिकमहत्त्वं विरुद्धमिति तदनुपसंहार उक्तः। आनन्दाद्यन्तर्भूतमानन्त्यं स्वाभा-

विकमिति न विरोधः, औपाधिकाल्पत्वानुसन्धानं स्वाभाविकमहत्त्वानुसन्धानं चाविरुद्धम्; स्वतोऽपरिच्छिन्नं ब्रह्मास्मदनुग्रहायौपाधिकाल्पत्ववत् स्थितमिति ह्यनुसन्धातुं शक्यं, अल्पत्वमहत्त्वयोरौपाधिकयोर्युगपदेकत्रान्वयो विरुद्ध इत्यर्थः"—इति॥

तथा चोक्तटीकायामानन्त्यस्य शाण्डिल्यविद्यादिषूपास्यत्वसमर्थनात्पूर्वापरग्रन्थविरोधः—इति चेत्॥

अत्र भावप्रकाशिकाकृतः—

"कथं सर्वविद्यानुयायिषु आनन्दादिषु अन्यतमस्यानन्तत्वस्यानुसन्धेयत्वमिति ग्रन्थस्यानन्तरं केचिदूचुरिति पठित्वा इत्थमौपाधिकाल्पत्ववत इत्यादि पठितव्यम्। अतस्स्वतोऽनन्तत्वरूपमाहात्म्यप्रतिपादनपराः, न तु विद्याया उपास्याकारपरा इत्यर्थ इति न पूर्वग्रन्थविरोधः॥" —इति वदन्ति॥

वस्तुतस्तु—द्रव्यनिष्ठापृथक्सिद्धिसम्बन्धावच्छिन्नात्यन्ताभावप्रतियोगितापर्याप्त्यनधिकरणत्वरूपानन्तत्वस्य तदुपपादकानां पृथिवीनिष्ठतादृशसम्बन्धावच्छिन्नाभावप्रतियोगितापर्याप्त्यनधिकरणत्वद्युनिष्ठतादृशाभावप्रतियोगितापर्याप्त्यनधिकरणत्वादीनां च शाण्डिल्यदहरादिविद्यासूपास्यत्वमस्त्येव; द्रव्यनिष्ठतादृशाभावप्रतियोगित्वस्य पृथिवीनिष्ठतादृशाभावप्रतियोगित्वादीनां च हृदयावच्छिन्नविशिष्टब्रह्मणि पर्याप्तत्वेऽपि विशेष्यस्वरूपतत्पर्याप्त्यनधिकरणत्वस्याक्षतत्वात्, हृदयावच्छिन्नब्रह्मोपासनेष्वपि निरुक्तानन्तत्वादीनामुपास्यत्वाविरोधात्॥

न चैवं—शाण्डिल्यदहरादिविद्यास्वनन्तत्वस्य ज्यायान् पृथिव्या इत्यादेश्चोपास्यत्वाभावप्रतिपादनपरयोरुदाहृतश्रीभाष्यतट्टीकयोर्विरोध इति—वाच्यम्; ब्रह्मस्वरूपानुसन्धानं यैर्गुणैर्विना नोपपद्यते ते सर्वासु ब्रह्मविद्यास्वनुसन्धेया इत्यानन्दादय इति सूत्रावतरणश्रीभाष्यानुरोधेन अनन्तत्वादीनां ब्रह्मस्वरूपानुसन्धानान्यथाऽनुपपत्तिप्राप्तत्वेन उपास-

नांशे अनन्तत्वज्यायस्त्वादीनां न विधेयत्वमित्यर्थपरत्वादुदाहृत-श्रीभाष्यटीकयोर्विरोधाभावात् ॥

न च—पृथिव्यवधिकज्यायस्त्वादेरौपाधिकमहत्त्वरूपत्वादौपाधिकाल्पत्वमहत्त्वयोर्युगपदेकत्रानुसन्धानं न युज्यत इति—वाच्यम्; पृथिव्यादिनिष्ठापृथक्सिद्धिसम्बन्धावच्छिन्नाभावप्रतियोगितापर्याप्त्यनधिकरणत्वरूपस्य पृथिव्याद्यवधिकज्यायस्त्वस्य स्वरूपगतत्वेन स्वाभाविकतयौपाधिकत्वाभावात्; "अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च" इति सूत्रे—'एषम आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा' इत्यादिना हृदयात्मकाल्पस्थानवृत्तित्वस्य व्रीह्याद्यपेक्षया अणीयस्त्वरूपाल्पत्वस्य च व्यपदेशाच्छाण्डिल्यविद्याप्रतिपाद्यो न परमात्मा, किं तु जीव इत्याशङ्क्य, अणीयस्त्वेनोपास्यत्वप्रतिपादनार्थं हृदयावच्छेदकृतस्याणीयस्त्वस्य व्यपदेशो न त्वणीयस्त्वं स्वाभाविकमिति परिहारमभिधाय व्योमवच्चेतिसूत्रखण्डेन स्वाभाविकं महत्त्वं ज्यायान् पृथिव्या इत्यादिना प्रतिपाद्यत इत्यभिधानात्। तथा च तत्सूत्रे **श्रीभाष्यम्**—

> "व्योमवच्चायं व्यपदिश्यते, स्वाभाविकमहत्त्वं चात्रैव व्यपदिश्यते ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्य इति ॥" —इति ॥

अत्र **टीका**—"महत्तयावगतस्य वस्तुन उपाध्युक्तिपूर्वकमुक्तं परिमाणमौपाधिकं, असम्भावितोपाधिकं परिमाणं स्वाभाविकमिति न्याय इह विवक्षितो भवति। अत्र हि हृदयमल्पोपाधिभूतं श्रुतं न तु ज्यायस्त्वोपाधिश्श्रुतः; पृथिव्यादयस्तदुपाधय इति नाशङ्कनीयम्, ततोऽपि ज्यायस्त्वश्रवणात्; न हि ततोऽधिकपरिमाणं तदुपाधिकं भवितुमर्हति ॥" —इति ॥

न चैवं—द्युव्याप्तत्वस्य द्युनिष्ठात्यन्ताभावप्रतियोगितापर्याप्त्यनधिकरणत्वरूपस्याप्युक्तरीत्या स्वाभाविकत्वापत्त्या सर्वविद्यासूपसंहारप्रसङ्ग इति—वाच्यम्; स्वरूपगतस्य निरुक्तद्युव्याप्तत्वस्य कालानवच्छिन्नतया 'ब्रह्माग्रे ज्येष्ठं दिवमाततान' इति श्रुत्युक्तस्याग्रकालावच्छिन्नद्युव्याप्तत्वस्य स्वाभाविकत्वायोगादौपाधिकत्वावश्यकत्वाद्दिव एव तत्रोपाधित्वात्, तत्र स्वर्गापेक्षया अधिकपरिमाणानुक्तेः। एवं च टीकाग्रन्थे केचिदूचुरित्यध्याहारो नावश्यकः; न तु विद्याया उपास्याकारपरा इति पूर्वटीकाग्रन्थस्य न तु विद्यांशे विधेयसमर्पका इत्यर्थकत्वेनाविरोधात्। ततश्च शाण्डिल्यविद्यायामनन्तत्वस्य पृथिव्याद्यवधिकज्यायस्त्वस्य चोपास्यत्वं श्रीभाष्यादिसिद्धमेव। युक्तं चैतत्।

"स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपस्सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनादरः। एष म आत्माऽन्तर्हृदये अणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यस्सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनादरः। एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितःप्रेत्याभिसम्भवितास्मीति यस्य स्यादद्धा न विचिकित्साऽस्तीतीह समाह शाण्डिल्यश्शाण्डिल्यः॥"—

इति श्रुतौ हि प्राप्तोपासनानुवादेन न मनोमयत्वादीनां विधानं; प्राप्तोपासनानुवादेनानेकगुणविधाने वाक्यभेदापत्त्या विध्यैक्यासम्भवात्;

"प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः॥"—

इति मीमांसकैरुक्तत्वात्, एष म आत्माऽन्तर्हृदय इति वाक्यानां

त्रिरावृत्तेस्सर्वकर्मा सर्वकाम इत्यादीनां द्विरावृत्तेश्च वैयर्थ्यात्; म इति निर्देशायोगाच्च। किं तु—अभिसम्भविताऽस्मीतीति इतिशब्देन मनोमय इत्यारभ्य अभिसम्भविताऽस्मीत्यन्तस्यानुकरणरूपताप्रतीत्या ऐक्यपरत्वात्तादृशवाक्यजन्यबोधसमानविषयकत्वरूपं वाक्यसमानविषयकत्वमेव विधेयं; ततश्चैतादृशवाक्यसमानविषयकं क्रतुं कुर्यादिति स क्रतुमित्यारभ्य अभिसम्भविताऽस्मीत्यन्तवाक्यस्यार्थः। एवं चानेकगुणविधानाभावान्न वाक्यभेदप्रसङ्गः। हृदयान्तर्वृत्तित्वावच्छिन्नविषयताश्रयस्य कर्मत्वाद्यवच्छिन्नविषयताद्वयस्य चोपासने लाभायावृत्त्युपपत्तेर्न वैयर्थ्यम्। उपासनाकारप्रदर्शनत्वाच्च म इति निर्देशोपपत्तिः; समानविषयकत्वविधानादेव मनोमयत्वादीनां सर्वेषां गुणानामुपास्यत्वसिद्ध्या पृथिव्यवधिकज्यायस्त्वादीनामप्युपास्यत्वावश्यकत्वात्। तथा च—न तु विद्याया उपास्याकारपरा इति टीकावाक्यं विधेयत्वप्रतिक्षेपकं, न तूपास्यत्वप्रतिक्षेपकं; ततश्च औपाधिकपरिमाणान्तरावगाहिशाण्डिल्यविद्यादिव्यतिरिक्तब्रह्मविद्यासु सम्भृत्यादीनामन्वयः—इतिसम्भृत्यधिकरणसिद्धान्तः; स चानुपपन्नः, तादृशविद्यानामप्युत्पत्तिशिष्टगुणावरुद्धतया तत्रापि सम्भृत्यादीनां विधानाङ्गीकारे उत्पत्तिशिष्टन्यायविरोधात्॥

न च--पूर्वोक्तरीत्या ब्रह्मज्येष्ठेत्यादिवाक्यस्य तत्तद्विद्याभिस्सहैकवाक्यतामङ्गीकृत्य सम्भृत्यादीनामप्युत्पत्तिशिष्टत्वाङ्गीकारेण विरोधपरिहारस्सम्भवतीति—वाच्यम्; तथा सति सर्वविद्यास्वपि सम्भृत्यादीनामन्वयापत्तेः, शाण्डिल्यादिविद्यासु हृदयौपाधिकपरिमाणेन सह द्युव्याप्तेर्विकल्पापत्तेः, विरुद्धगुणस्योत्पत्तिशिष्टत्वे विकल्पस्य न्याय्यत्वात्। अत एव शाखान्तराधिकरणे क्वचिच्छाखायामग्नीषोमीयमेकादशकपालमिति श्रूयते, अन्यत्र द्वादशकपालमिति, अतो रूपभेदादग्नीषोमीयभेद इत्याशङ्क्य; द्रव्यदेवताकालरूपबहुगुणसारूप्यात्

तदेवेदमिति प्रत्यभिज्ञाया एकवाक्यतापन्नयोश्शाखाद्वयवाक्ययोरप्ये-काग्नीषोमीययागविधायकत्वसिद्धौ सङ्ख्याद्वयस्याप्युत्पत्तिशिष्टतया तुल्यबलत्वाद्विकल्पो न्याय्य इति–समाहितम्। तन्न्यायेनात्रापि विरुद्धौपाधिकपरिमाणद्वयस्याप्युत्पत्तिशिष्टस्य विकल्पाङ्गीकारापत्तिः —इति चेत् ॥

अत्रोच्यते—सम्भवति विकल्पानापादके वाक्यार्थनिर्वाहे तदा-पादकवाक्यार्थनिर्वाहो न युक्तः। तथा च–सर्वविद्याभिस्सहैकवाक्य-त्वाङ्गीकारे विकल्पापत्त्या औपाधिकपरिमाणानवगाहिविद्याभिरेवैक-वाक्यत्वमङ्गीकृत्य तादृशविद्यास्वेव सम्भृत्यादीनामन्वयो युक्तः– —इति ॥

न च–शाखाभेदेनाम्नातयोरग्नीषोमीययोरपि भेदापत्तिः, अभेदे विकल्पस्य दुर्वारत्वादिति---वाच्यम्; द्रव्यदेवताकालरूपप्रधानभूत-बहुगुणसारूप्येण अग्नीषोमीयस्यैक्ये सिद्धविकल्पप्रयुक्तगौरवस्य फलमुखत्वेनादोषत्वात् ॥

अथ—बहुगुणसाम्यस्थले विकल्पस्यादोषत्वे बृहदारण्यगतयोरादि-त्यमण्डलस्थपुरुषविषयकव्याहृतिविद्याक्षिपुरुषव्याहृतिविद्ययोरप्यैक्या-पत्तिः; तस्य भूरिति शिर इत्याद्युक्तस्य रूपस्य हन्तिपाप्मानं जहाति चेति फलस्य च समानत्वात्, व्याहृतिविद्येति संज्ञैक्याच्च ॥ न च– विद्यैक्ये स्थानद्वयस्य नामद्वयस्य चाव्यवस्थितविकल्पापत्तिः, न त्वादित्यमण्डलावच्छेदेनाहर्नामकत्वमक्ष्यवच्छेदेनाहर्नामकत्वमिति व्य-वस्थितविकल्प इति--वाच्यम्; तस्योपनिषदहरितीति वाक्ये तच्छ-ब्दस्य पूर्वनिर्दिष्टस्थानविशेषविशिष्टपरामर्शितया व्याहृतिशरीरकब्रह्म-मात्रपरामर्शित्वाभावाद्व्यवस्थिताविकल्पोपपत्तेः, अग्निहोत्रं जुहोतीत्युत्प-न्नाग्निहोत्रहोमस्यैकस्यैव 'अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहेति सायं जुहोति'

'सूर्यो ज्योतिर्ज्योतिस्सूर्यस्स्वाहेति प्रातः' इति वचनबलात् भिन्नकालावच्छेदेन मन्त्रयोर्व्यवस्थितविकल्पदर्शनात् तन्न्यायेनात्रापि व्यवस्थितविकल्पोपपत्तेः—इति चेन्न ; 'य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन् पुरुषस्तावेतावन्योन्यस्मिन् प्रतिष्ठितौ' इत्युपक्रमगतया भेदव्याप्यया द्वित्वसङ्ख्यया आदित्यपुरुषाक्षिपुरुषयोर्भेदसिद्ध्या तद्विषयकविद्ययोरपि भेदसिद्धावुपसंहारगतफलाभेदादेरैक्यसाधकत्वायोगात्, छान्दोग्ये 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' इत्यादिना आदित्यपुरुषस्य रूपमभिधाय 'तस्यैतस्य तदेव रूपं यदमुष्यरूपं' इत्यक्षिपुरुषे रूपातिदेशाच्च तयोर्भेदसिद्धेः ; तयोरभेदे रूपस्य स्वतः प्राप्तत्वेनातिदेशायोगात् । तस्मादुपक्रम एव यत्र भेदप्रतीतिः तत्र बहुसारूप्ये सत्यपि विद्याभेद एव युक्त इति व्याहृतिविद्याया ऐक्यमङ्गीकृत्य परेषां नाम्नोर्व्यवस्थितविकल्पेन उपसंहारोपपादनमयुक्तमेव ; अन्यथा छान्दोग्यवाजसनेयकगतयोरुद्गीथविद्ययोः परेषां मते ऐक्यस्यापत्तेः । तथा हि वाजिनां तावत्—'द्वया ह प्राजापत्या देवाश्चासुराश्च त एषु लोकेष्वस्पर्धन्त ते ह देवा ऊचुर्हन्तासुरान् यज्ञ उद्गीथेनात्ययाम' इत्युद्गीथेनासुरविध्वंसनं प्रतिज्ञाय उद्गीथे वागादिमनःपर्यन्तदृष्टावसुरैरभिभवमुक्त्वा 'अथ हेममासन्यं प्राणमाचुः' इत्यादिना उद्गीथे प्राणदृष्ट्या असुरपराभवमुक्त्वा 'भवत्यात्मना परास्य भ्रातृव्यो भवति य एवं वेद' इति शत्रुपराजयफलायोद्गीथे प्राणदृष्टिर्विहिता । छन्दोगानामपि 'देवासुरा ह वै यत्र संयेतिरे' इत्यारभ्य 'ते देवा उद्गीथमाजह्रुः, अनेनैनानभिहनिष्यामः' इत्युद्गीथेनासुरपराभवं प्रतिज्ञाय तद्वदेवोद्गीथे वागादिदृष्टौ दोषमभिधाय 'य एवायं मुख्यः प्राणस्तमुद्गीथमुपासां चक्रिरे' इत्यादिनोद्गीथे प्राणदृष्ट्या असुरपराभवमुक्त्वा 'यथाऽश्मानमाखणमृत्वा विध्वंसते एवं हैव स विध्वंसते य एवं विदि पापं कामयते' इति शत्रुपराभवायोद्गीथे प्राण-

दृष्टिर्विहिता, तत्रोभयत्र आख्यायिकाया अविशेषात्फलस्य शत्रुपराजयरूपस्य अविशेषादुद्गीथविद्येति संज्ञैक्याच्च विद्यैक्यं दुर्वारम् ॥

ननु—छान्दोग्ये उद्गीथनिष्ठविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नमुखगतप्राणत्वावच्छिन्नप्रकारताशाल्युपासनरूपा उद्गीथविद्या प्रतीयते, 'अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे' इति छान्दोग्यवाक्येन तादृशोपासनबोधात्, मुख्यः—मुखे भव इत्यर्थः; समानप्रकरणे 'आसन्यं प्राणमूचुः' इति प्रयोगादासन्यमित्यस्य आस्ये भवमित्यर्थात्, उद्गीथमिति द्वितीयान्तार्थोद्गीथविशेष्यकत्वावच्छिन्नोपासने तमिति द्वितीयान्तार्थमुखगतप्राणत्वावच्छिन्नप्रकारकत्वान्वयात्। वाजसनेयके चोद्गातृनिष्ठविशेष्यतानिरूपितोक्तप्रकारताशाल्युपासनरूपा उद्गीथविद्या प्रतीयते; 'अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्रा जेष्यन्ति' इत्यादिवाजसनेयकवाक्येन तादृशोपासनबोधनात्। यद्यप्युक्तवाक्यात् अस्मत्प्रयोजनसम्पादिका प्रार्थना विषयीभूता या उद्गीथोच्चारणानुकूलकृतिः तदाश्रयाभिन्नः प्राण इत्यर्थः प्रतीयते; उत्पूर्वकगाधातोरुद्गीथोच्चारणार्थकत्वात् आख्यातस्य कर्त्रर्थकत्वात् तदेकदेशकृतौ लोडर्थप्रार्थनाया विषयतासम्बन्धेनान्वयात्, न इति षष्ठ्यन्तार्थास्मत्प्रयोजनसम्पादकत्वस्यापि तत्रान्वयात्, त्वंपदस्य प्राणपरत्वात्; तथाऽप्युद्गीथोच्चारणकर्तृभेदस्य प्राणे बाधात् कर्त्रर्थकस्याख्यातस्य तादृशकर्तृनिष्ठोपासनीयविशेष्यतानिरूपितप्रकारताश्रये लक्षणा समाश्रयणीया। तथा च—आख्यातार्थैकदेशप्रकारतायां न इति चतुर्थ्यन्तार्थस्य लोडर्थस्य चान्वयात् अस्मत्सम्बन्धिप्रयोजनसम्पादिका प्रार्थनाविषयीभूता च या उद्गातृनिष्ठोपासनीयविशेष्यतानिरूपितप्रकारता तदाश्रयः प्राण इति बोध उक्तवाक्याज्जायते; देवप्रयोजनसम्पादकोद्गातृविशेष्यकोपासनप्रकारः प्राण इति तेभ्य

एष इति वाक्यार्थः; प्राणप्रकारकतादृशोपासनविशेष्येणोद्गात्रा अस्मान् देवा जेष्यन्तीत्यसुरा विदुरिति ते विदुरित्यादिवाक्यार्थः। एवं च–विशेष्यस्य भेदाच्छान्दोग्यवाजसनेयकगतोद्गीथविद्ययोरैक्यं न सम्भवति––इति **चेन्न** ॥

त्वन्न उद्गायेत्यादावुपासनलाभाय लक्षणाया विद्याभेदवादिभिस्सिद्धान्तिभिरपि वक्तव्यतया तादृशाख्यातस्य कर्मनिष्ठविशेष्यताकोपासनप्रकारे लक्षणाङ्गीकारेणैव विद्यैक्योपपत्तौ गौरवापादकस्य विद्याभेदकल्पनस्यानुचितत्वात्। एवं च–वाजसनेयकगतविद्याया अप्युद्गीथविद्येति संज्ञोपपत्तिः, अन्यथा तादृशविद्याया उद्गातृविशेष्यकत्वे तादृशसंज्ञानुपपत्तेः। उद्गीथविशेष्यकोपासनस्य असुरपराभवहेतुत्वादेव 'हन्तासुरान् यज्ञ उद्गीथेनात्ययाम' इत्युपक्रमाविरोधः; उद्गातृविशेष्यकोपासनस्य तथात्वे तादृशोपक्रमविरोधोऽपि दुष्परिहरः ॥

न च–उत्तरवाक्यानुरोधेन उपक्रमगतोद्गीथशब्दस्य उद्गीथकर्तरि लक्षणाङ्गीकारान्न विरोध इति–वाच्यम्; तथा सत्युपक्रमाधिकरणविरोधापत्तेः। तदधिकरणे हि–"प्रजापतिर्वा इदमग्र आसीत्, स तपोऽतप्यत, तस्मात्तेपानात् त्रयो देवा अजायन्त, अग्निर्वायुरादित्यस्ते तपोऽतप्यन्त, तेभ्यस्तेपानेभ्यस्त्रयोवेदा अजायन्त, अग्ने ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेदः"–इत्युपक्रम्य श्रूयते––'तस्मादुच्चैरृचा क्रियते उपांशु यजुषा उच्चैस्साम्ना"––इति ॥

अत्र संशयः। तत्र किमुच्चैस्त्वादयो ऋगादिधर्मा उत वेदधर्मा इति; उपक्रमे वेदशब्दश्रवणात्, उपसंहारे च ऋगादिशब्दश्रवणात्। वेदशब्दस्य हि मन्त्रब्राह्मणसमुदायत्वावच्छिन्ने शक्तिः, न त्वेकैकस्मिन् मन्त्रवाक्ये ब्राह्मणवाक्ये वा; तथा सति मन्त्रादिरूपैकद्वित्रिवाक्याध्ययनेऽपि 'वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्'

इति शास्त्रार्थानुष्ठानप्रसङ्गात् । पादव्यवस्थावन्मन्त्रत्वावच्छिन्ने ऋक्छब्दस्य मन्त्रत्वसमानाधिकरणगीतित्वावच्छिन्ने सामशब्दस्य ऋक्सामभिन्नमन्त्रत्वावच्छिन्ने च यजुश्शब्दस्य शक्तिः; तेषां ऋगित्यादिसूत्रत्रयेण तथा व्यवस्थापनात् ॥

अत्र–उपक्रमोपसंहारयोर्विरोधाद्द्वयोरविरोधे वर्णनीये उपसंहारस्य विधित्वेन प्रबलत्वात्तदनुरोधेनोपक्रमस्थवेदपदस्यापि तदेकदेशऋगादिमन्त्रपरत्वमिति–**पूर्वपक्षे**; उपक्रमस्यासञ्जातविरोधित्वेन प्रबलत्वादुपक्रमगतवेदपदानुसारेणोपसंहारस्थऋगादिपदानामेव ऋग्वेदादौ लक्षणेति–**सिद्धान्तितम्** । तथा च–तन्न्यायेनोपक्रमगतोद्गीथशब्दस्योपसंहारानुरोधेन कर्तरि लक्षणा न युक्ता, किं तूपक्रमानुरोधेनोपसंहारगतानामुदगायदित्याख्यातपदानामुद्गातृपदानां च कर्मलाक्षणिकत्वं युक्तम् । तदिदमभिप्रेत्य 'अन्यथात्वं शब्दात्' इत्यधिकरणपूर्वपक्षे **श्रीभाष्ये प्रतिपादितम्**—

"अत उपक्रमविरोधाय तेभ्य एष प्राण उदगायदित्यध्यस्तप्राणभाव उद्गीथ उद्गानकर्मभूत एव पाकादिष्वोदनादिवत्सौकर्यातिशयविवक्षया कर्तृत्वेनोच्यते, अन्यथोपक्रमावगत उद्गीथशब्दः कर्तरि लाक्षणिकस्स्यात् ॥" --इति ॥

एतेन–छान्दोग्यगतोपक्रमादिगतोद्गीथादिपदानां वाजसनेयकगतोपक्रमस्थोद्गीथशब्दस्य च कर्तरि लक्षणामङ्गीकृत्य पूर्वपक्षवर्णनं परेषामनुपादेयं; उपक्रमाधिकरणसिद्धान्तबाधितत्वात् प्रबलपूर्वपक्षस्य निरसनीयस्य सम्भवे दुर्बलस्य तस्य निरासायोगात् । प्रबलस्य पूर्वपक्षस्य निरासो हि सिद्धान्तद्रढिमार्थः, न तु मन्दस्य; तस्मिन्निरस्तेऽपि प्रबलस्य पूर्वपक्षस्योदयात् ॥

अथ–छान्दोग्ये 'ओमित्येतदक्षरमुद्गीथमुपासीत' इत्युद्गीथावयवभूतं प्रणवं प्रस्तुत्य एतस्यैवाक्षरस्योपव्याख्यानं भवति, 'देवासुरा ह वै

यत्र संयेतिरे' इत्यारभ्य 'अथ ह य एवायं मुख्यप्राणस्तमुद्गीथमुपासांचक्रिरे' इत्युद्गीथावयवभूतप्रणवविशेष्यकप्राणप्रकारकोपासनस्य प्रतिपादनात्; वाजिनां तु तादृशपूर्वप्रकरणाभावेन कृत्स्नोद्गीथविशेष्यकप्राणप्रकारकोपासनस्य प्रतिपादनाद्विशेष्यभेदेन विद्याभेद इत्यस्य 'न वा प्रकरणभेदात्' इतिसूत्रे व्यवस्थापनात् विद्यैक्यापादनमयुक्तम्—
—इति चेत् ॥

सत्यम् । विशेष्यभेदाद्विद्याभेदोऽस्माभिः स्वीक्रियते, बहुतरसारूप्ये सत्यप्युपक्रमावगतरूपभेदस्य विद्याभेदप्रयोजकत्वात् । भवद्भिस्तु न तथा स्वीकर्तुं शक्यते, उपक्रमे रूपभेदावगमेऽपि बहुतरसारूप्ये सति विद्यैक्यस्य व्याहृतिविद्यायां भवद्भिस्स्वीकारेण तन्न्यायेनात्रापि विद्यैक्यस्य दुर्वारत्वात्; तत्रादित्याक्षिरूपस्थानभेदेन विकल्पेनाहरहन्नामकत्वोपसंहारवदत्रापि विकल्पेनोद्गीथावयवरूपप्रणवकृत्स्नोद्गीथरूपयोर्विशेष्ययोरप्युपसंहारापत्तेः । किं च—भवन्मते विकल्पं विना विद्यैक्योपपादनसम्भवस्थलेऽपि विकल्पेन विद्यैक्यमुपपाद्यते, अनिर्वाहस्थले विकल्पेन विद्यैक्योपपादनस्य पुनर्न्यायसिद्धत्वादुद्गीथविद्ययोरैक्यं दुर्वारम् । तथा हि—वाजिनां पाञ्चजनाश्रयब्रह्मविद्यायां—

> "तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतं, यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः तमेवंमन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतं प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनो विदुस्तेन निचिक्युः ब्रह्म पुराणमग्र्यम् ॥"—

इत्युक्तायां प्राणादिरूपपञ्चजनप्रकारिकायामन्नघटितपञ्चपदार्थप्रकारकत्वज्योतिश्शब्दार्थब्रह्मघटितपञ्चपदार्थप्रकारकत्वयोर्विकल्पः । माध्य-

न्दिनपाठगतस्यान्नस्यान्नमित्यस्य काण्वपाठेऽभावेन तत्र 'तं देवा ज्योतिषां ज्योतिः' इति द्वितीयान्तज्योतिश्शब्दनिर्दिष्टब्रह्मणा पञ्चत्व-सङ्ख्यापूरणमित्यस्य 'ज्योतिषैकेषामसत्यन्ने' इतिसूत्रसिद्धत्वात्; एकेषां काण्वानां पाठे अन्ने असति ज्योतिषा द्वितीयान्तज्योतिश्शब्दनिर्दिष्टब्रह्मणा पञ्चसङ्ख्यासिद्धिरिति तत्सूत्रार्थस्य भवन्मतसिद्धत्वात्। तथा च—ब्रह्मान्नयोर्विकल्पेनोपसंहारमङ्गीकृत्य विद्यैक्योपपादनवदुद्गीथविद्ययोरप्यैक्यं दुर्वारम् ॥

इयांस्तु विशेषः—यस्मिन् पञ्च पञ्चजना इत्यत्र सर्वशाखाप्रत्ययन्यायेन काण्वपाठेऽपि माध्यन्दिनपाठसिद्धान्नस्य अन्वयेन विकल्पं विना निर्वाहसम्भवेऽपि विकल्प आश्रितः, उद्गीथविद्यायां तु विकल्पं विना निर्वाहाभावाद्विकल्प आश्रयणीय इति ॥

ननु—यस्मिन् पञ्च पञ्चजना इत्यत्र पञ्चजनपदवाच्याः क इत्याकाङ्क्षायां प्राणादयो वाक्यशेषादित्यनेन प्राणादीनामेव पञ्चजनशब्दार्थत्वं प्राणस्य प्राणमिति वाक्यशेषबलात्स्वीक्रियत इत्युक्तं; तदुपरि काण्वपाठेऽन्नाभावात् पञ्चजनशब्देन प्राणादीनां ग्रहणं न भवतीत्याशङ्क्य; तत्रान्नाभावेऽपि ब्रह्मणा सङ्ख्यापूरणसम्भवात् प्राणादीनां पञ्चजनशब्दार्थत्वमुपपन्नमिति सूत्रकृतैवोक्तत्वात् अन्नब्रह्मणोर्विकल्पस्सूत्रसिद्ध एव—इति चेन्न। भवदुक्तरीत्या सूत्रतात्पर्ये प्राणादय इति सूत्रस्यैव वैयर्थ्यापत्तेः, 'सन्दिग्धे तु वाक्यशेषात्' इति प्राथमिकाधिकरणेनैव गतार्थत्वात्। तदधिकरणे हि—अक्ताश्शर्करा उपदधातीत्यत्र अविशेषात्तैलादिसाधारणाञ्जनसाधनद्रव्यसामान्यस्य निर्णीतत्वात् तेजो वै घृतमित्यर्थवादस्योपलक्षणपरतयाऽप्युपपन्नत्वात्तेन विधिसिद्धद्रव्यसङ्कोचायोगादर्थवादस्य सन्दिग्धार्थनिर्णायकत्वं न सम्भवति—इत्याशङ्क्य; विधेरविशेषप्रवृत्तत्वेऽप्यर्थवादस्थघृतमात्रेणैवाकाङ्क्षाशान्त्या द्रव्यान्तराक्षेपकत्वे प्रमाणाभावात् विध्यर्थवाद-

योरेकवाक्यत्वेन घृतरूपैकार्थविधायकत्वोपपत्तौ अर्थवादस्योपलक्षणत्वे प्रमाणाभावात् वाक्यशेषरूपस्यार्थवादस्य सन्दिग्धार्थनिर्णायकत्वं सम्भवति–इति सिद्धान्तितम्। अत्रापि तन्न्यायेन पञ्चजनशब्दार्थनिर्णयोपपत्तौ प्राणादय इति सूत्रस्य वैयर्थ्यप्रसङ्गात्॥

न च–परमते पूर्वोत्तरमीमांसयोरैकग्रन्थ्यानङ्गीकाराच्च वैयर्थ्यप्रसङ्ग इति–वाच्यम्; परेषामप्यैकग्रन्थ्यस्येष्टत्वात्। अत एव 'एक आत्मनश्शरीरे भावात्' इत्यत्र शङ्करभाष्ये देहातिरिक्तात्मास्तित्वस्य शास्त्रप्रथमपादे व्यवस्थापनात् अत्र तद्व्यवस्थापनं पुनरुक्तं–इत्याशङ्क्य; शबरस्वामिना तत्र तत्कृतं न सूत्रारूढं, अतो न पौनरुक्त्यं–इति समाहितम्। ब्रह्मजिज्ञासासूत्रे भामत्यां धर्मजिज्ञासासूत्रस्थस्य धर्मपदस्य वेदार्थमात्रोपलक्षणत्वमुक्तं; अत एव तद्भाष्ये बहुस्थलेषु प्रमाणत्वेनोदाहृतायां उपवर्षवृत्तौ पूर्वतन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्याम इत्युक्तम्। तस्मादैकग्रन्थ्यं परेषामप्यनुमतमेवेति वैयर्थ्यं दुष्परिहरम्॥

सिद्धान्तिनां तु न वैयर्थ्यं प्राप्नोति। इत्थं हि सिद्धान्ते तदधिकरणं—यस्मिन् पञ्चपञ्चजना इति वाक्यं कापिलतन्त्रसिद्धतत्त्वपरमुत नेति संशयः; अत्र पूर्वः पक्षः–तद्वाक्यमब्रह्मात्मकतत्त्वप्रतिपादनपरं, ब्रह्मात्मकत्वेनागृह्यमाणतत्त्वनिष्ठपञ्चविंशतिसङ्ख्याबोधकत्वात्,

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥"—

इत्यादिसाङ्ख्यवाक्यवत्–इत्यनुमानेन तादृशश्रुतेरब्रह्मात्मकपञ्चविंशतितत्त्वपरत्वं सिध्यति॥

न च–उक्तवाक्यस्य पञ्चविंशतिसङ्ख्याबोधकत्वमसिद्धमिति–वाच्यम्; अत्र पञ्चजनशब्दो हि न रूढ्या मनुष्यपरस्समुद्रान्तर्वृत्तिदानवविशेषपरो वा, मनुष्याणामनन्तत्वेन दानवस्यैकत्वेन च पञ्चसङ्ख्यान्वयासम्भवात्; किं तु पञ्चानां जनानां समाहारः पञ्चजना

इति समाहारसमासात् पञ्चत्वसमनियततत्त्वगतसमुदायत्वावच्छिन्नपरः ॥

यद्यपि—जनपदस्य छत्रिन्यायेन जायमानाजायमानोभयसाधारणतत्त्वपरत्वात्तत्र पञ्चसङ्ख्यान्वयात् पञ्चजनशब्देन पञ्च तत्त्वानि प्रतीयन्ते; तथाऽपि—समाहारस्थले उत्तरपदस्य तत्पर्याप्तसमुदायत्वावच्छिन्ने लाक्षणिकत्वाज्जनपदस्य तत्त्वपर्याप्तसमुदायत्वावच्छिन्ने लक्षणा, तदेकदेशतत्त्वे पञ्चपदार्थस्याभेदेनान्वये तद्गतसमुदायत्वेऽपि समनैयत्यसम्बन्धेन पञ्चत्वस्य तात्पर्यानुरोधेन भानात्, द्विगुसमासस्थले सर्वत्र समुदायत्वे सङ्ख्यासमनैयत्यबोधस्यावश्यकत्वात्; अन्यथा—सप्तलोकीत्यादिवत्पञ्चलोकीत्यादेरपि प्रसङ्गात्। यद्वा जनपदमेव पञ्चत्वसमनियततत्वसमुदायत्वावच्छिन्ने लाक्षणिकं, पञ्चपदं च तात्पर्यग्राहकम् ॥

न च--महाभूतानामनन्तत्वान्महाभूतादिपर्याप्तसमुदायत्वे पञ्चत्वसमनैयत्यं बाधितमिति—वाच्यम्; भूतत्वतन्मात्रत्वज्ञानेन्द्रियत्वकर्मेन्द्रियत्वावशिष्टपदार्थत्वान्यतमत्वादिना अनुगमय्य तादृशान्यतमव्याप्यप्रकृतिविभाजकोपाधित्वेन महाभूतवृत्तिधर्मपञ्चकतन्मात्रवृत्तिधर्मपञ्चकादिनाऽनुगमं कृत्वा स्वाश्रयतादृशान्यतमव्याप्यप्रकृतिविभाजकोपाधिमत्त्वसम्बन्धेन पञ्चत्वविशिष्टस्यैव प्रकृते पञ्चशब्दार्थतया भूतानामनन्तत्वेऽप्युक्तसम्बन्धेन पञ्चत्वस्य भूतसामान्ये तन्मात्रादिसामान्ये च सत्त्वेन भूतपर्याप्तसमुदायत्वतन्मात्रपर्याप्तसमुदायत्वादीनामुक्तसम्बन्धेन पञ्चत्वसमनैयत्योपपत्तेः। समासाप्रविष्टपञ्चपदार्थपञ्चत्वस्य 'द्वे शते त्रीणि शतानि' इत्यादौ पदार्थतावच्छेदकशतत्वादौ द्वित्वादेरिव निरुक्तसमुदायत्वेऽन्वयात् पञ्चत्वसमनियततत्त्वगतसमुदायत्वपञ्चकलाभादुक्तवाक्यात्पञ्चविंशतिसङ्ख्याबोधोपपत्तिरिति प्राप्तेऽभिधीयते—"न सङ्ख्योपसङ्ग्रहादपि नानाभावादति-

रेकाच्च"। सङ्ख्योपसङ्ग्रहात् उक्तसङ्ख्याबोधकत्वहेतुकानुमानादपि 'यस्मिन् पञ्च पञ्च जनाः' इति वाक्यस्याब्रह्मात्मकतत्त्वप्रतिपादनपरत्वं न सिध्यति, कुतः, नानाभावात्—एषां पञ्चसङ्ख्याविशेषितानां पञ्चजनानां तन्त्रसिद्धेभ्यस्तत्त्वेभ्यः पृथग्भावात्, 'यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः' इति; एतेषां यच्छब्दनिर्दिष्टब्रह्माश्रयतया ब्रह्मात्मकत्वप्रतीतेः, 'तमेवं मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्' इति तच्छब्दनिर्दिष्टस्य ब्रह्मत्वोक्त्या तत्समानार्थकस्य यच्छब्दस्यापि ब्रह्मपरत्वावसायात्; एवं च ब्रह्मात्मकत्वेनागृह्यमाणस्वरूपसाधनविशेषणासिद्ध्या उक्तानुमाने साधनाप्रसिद्धिरित्यर्थः। अतिरेकाच्च तन्त्रसिद्धेभ्यस्तत्त्वेभ्योऽतिरेकोऽपि[1] भवति, यच्छब्दनिर्दिष्टस्यात्मन आकाशस्य चातिरिक्तत्वात्। एवं च—इदं वाक्यं न तन्त्रसिद्धतत्त्वप्रतिपादनपरं, सप्तविंशतितत्त्वबोधकत्वात्, 'तं षड्विंशकमित्याहुस्सप्तविंशमथापरे' इति मन्त्रोपनिषद्वाक्यवत्—इति प्रत्यनुमानमुक्तं भवति; न सङ्ख्योपसङ्ग्रहादपीत्यपिशब्देन स्वरूपासिद्धिश्च विवक्षिता, आकाशस्य पृथङ्निर्देशेन भूतगतसमुदायत्वस्याकाशातिरिक्तचतुष्टयगतस्यैव बोधावश्यकतया पञ्चत्वसमनियतसमुदायत्वपञ्चकबोधकत्वासिद्धेः। अत इदं वाक्यं न पञ्चविंशतितत्त्वपरं, किं तु ज्ञानेन्द्रियपञ्चकपरम्। न च तद्वाक्यस्य ज्ञानेन्द्रियपञ्चकपरत्वे प्रमाणाभावः; यस्मिन् पञ्च पञ्च जना इति वाक्यं ज्ञानेन्द्रियपञ्चकपरं, ज्ञानेन्द्रियत्वव्याप्यचक्षुष्ट्वादिधर्मपञ्चकबोधकवाक्यसमभिव्याहृतत्वे सति पञ्चत्वसङ्ख्याबोधकत्वात्, ज्ञानेन्द्रियाणि पञ्च चक्षुश्श्रोत्रमनोघ्राणादीनीत्यादिवाक्यवत्—इत्यनुमानेन तत्सिद्धेः। न च—प्राणस्य प्राणमिति वाक्ये प्राणान्नशब्दयोर्ज्ञानेन्द्रियत्वव्याप्यधर्मावच्छिन्नपरत्वाभावादुक्तहेतोरसिद्धिरिति—वाच्यम्; तद्वाक्ये

(१) पा तत्त्वेभ्योऽकृतत्वातिरेकोऽपि.

प्राणशब्दः प्राणाप्यायितत्स्पर्शनेन्द्रियलाक्षणिकः, अन्नशब्दश्च स्वाप्यायितत्वस्वकर्मकादनकरणत्वान्यतरसम्बन्धेन अन्नविशिष्टत्वेन घ्राणरसनोभयलाक्षणिकः। तथा च **श्रीभाष्यम्**—

> "अन्नस्येति घ्राणरसनयोस्तन्त्रेणोपादानं, अन्नशब्दोदितपृथिवीसम्बन्धित्वात् घ्राणेन्द्रियमनेन गृह्यते। अद्यते अनेनेत्यन्नमिति रसनेन्द्रियमपि गृह्यते॥" —इति॥

एवं च—घ्राणरसनोभयानुगतनिरुक्तैकधर्मस्यैव ज्ञानेन्द्रियत्वव्याप्यतया हेतुघटकत्वान्न पञ्चत्वसङ्ख्याविरोधः। यथा 'द्वादश मासाः पञ्चर्तवः' इत्यत्र ऋतुषट्के सत्यपि हेमन्तशिशिरयोरेकरूपेण निवेशात् पञ्चत्वं 'वसन्तऋतूनां प्रीणामि' 'ग्रीष्मऋतूनां प्रीणामि' इत्यादिना सर्वानृतून् प्रत्येकं निर्दिश्य 'हेमन्तशिशिरऋतूनां प्रीणामि' इत्युभयगतसमुदायत्वेन द्वयोर्निर्देशात्तादृशसमुदायत्वमेव पञ्चर्तव इति पञ्चत्वघटकमिति प्रतीयते; तथेहापि—चक्षुश्श्रोत्रमनश्शब्दानां त्रयाणामिन्द्रियपरत्वदर्शनेन तत्प्रायपाठेन प्राणान्नशब्दयोरपि तथात्वसिद्धिः॥

न चैवमपि—काण्वपाठेऽन्नस्याभावात्तादृशधर्मपञ्चकबोधकवाक्यसमभिव्याहृतत्वासिद्धितादवस्थ्यमिति—वाच्यम्; पञ्च पञ्च जना इति वाक्यं ज्ञानेन्द्रियपञ्चकपरं, ज्ञानजनकत्वरूपज्ञानेन्द्रियसामान्यलक्षणबोधकवाक्योत्तरत्वे सति पञ्चत्वसङ्ख्याबोधकत्वात्, ज्ञानजनकानीन्द्रियाणि ज्ञानेन्द्रियाणि तानि पञ्चेति वाक्यवत्—इत्यनुमानेन काण्वपाठेऽपि तत्सिद्धेः; 'तं देवा ज्योतिषां ज्योतिः' इति ज्ञानजनकत्वात्मकज्योतिष्ट्वरूपज्ञानेन्द्रियसामान्यधर्माभिधायकवाक्यत्वगिन्द्रियत्वादिविशेषधर्मपञ्चकवाक्योभयमध्यगतस्य यस्मिन्नित्यादिवाक्यस्य ज्ञानेन्द्रियपरत्वावश्यकत्वात्, सामान्यधर्मबोधकवाक्य-

विशेषधर्मबोधकवाक्योभयमध्यगतवाक्यस्य उभयधर्माश्रयवस्तुपरत्वस्य युक्तत्वात्; गन्धवती पृथिवी नित्याऽनित्या चेति सामान्यविशेषधर्मबोधकवाक्यद्वयमध्यगते पृथिवी द्विविधेति वाक्ये तथा दर्शनात्। तत्र प्राणादय इति सूत्रं विशेषधर्मबोधकवाक्यसमभिव्याहारेण तत्साधनपरं, ज्योतिषैकेषामिति सूत्रं च सामान्यधर्मबोधकवाक्योत्तरत्वेन तत्साधनपरमिति विवेकः ॥

काण्वानां पाठे अन्नाभावात्तद्गते यस्मिन् पञ्च पञ्च जना इतिवाक्ये ज्ञानेन्द्रियत्वव्याप्यधर्मपञ्चकबोधकवाक्यसमभिव्याहृतत्वाभावात्तद्घटितहेतुना तद्वाक्यस्य ज्ञानेन्द्रियपरत्वसाधनासम्भवेऽपि न क्षतिः; ज्योतिष्ट्वरूपसामान्यधर्मबोधकवाक्योत्तरत्वघटितहेतुनैव तद्वाक्ये तत्साधनोपपत्तेरिति ज्योतिषैकेषामिति सूत्रार्थात्। तथा च–प्राणादय इत्यादिसूत्रद्वयस्य सन्दिग्धे तु वाक्यशेषादिति सूत्रसिद्धन्यायापेक्षया विलक्षणन्यायप्रतिपादकत्वान्न तत्सूत्रवैयर्थ्यम्। एतेन प्राणादयो वाक्यशेषादिति सूत्रं कृत्वाचिन्तापरमेव, पञ्चजनशब्दस्य वाक्यशेषगतप्राणादिपरत्वासम्भवात्। तद्धि न रूढ्या, तद्ग्राहककोशाद्यभावात्; नापि योगेन, पञ्चत्वविशिष्टजनिमत्त्वरूपयोगार्थस्य घटादिसाधारण्येन तेन रूपेण ज्ञानेन्द्रियाणामेव बोध इत्यस्यासम्भवात्, पञ्चेति पदान्तरार्थस्यान्वयासम्भवाच्च, पञ्चत्वविशिष्टे तदन्वये आकाङ्क्षाभावात्; नापि लक्षणया, शक्यार्थबाधाभावात् ॥

न च–पञ्चजनपदशक्यार्थानां मनुष्याणामानन्त्यात् तत्र पञ्चत्वसङ्ख्यान्वयानुपपत्त्या लक्षणाकल्पनमावश्यकमिति–वाच्यम्; पञ्चपदस्य ब्राह्मणत्वक्षत्रियत्ववैश्यत्वशूद्रत्वनिषादत्वरूपपञ्चजात्यवच्छिन्नपरत्वेन अन्वयानुपपत्त्यभावात्। मनुष्याणामुक्तपञ्चविधजातिमत्त्वं च बहुश्रुतिसिद्धम्। अथर्ववेदे हि तृतीयकाण्डे पञ्चमानुवाके

समाम्नायते--

"यस्त्वां होतारं मनसाऽभिसंविदुस्त्रयोदश भौवनाः पञ्च मानवा वर्चोधसि यशसि सूनृतावते तेभ्योऽग्निभ्यो हुतमस्तु तत् ॥" --इति ॥

अस्यार्थो वेदभाष्ये दर्शितः--अग्ने, त्वा त्वां, होतारं देवानामाह्वातारं, मनसाऽभिसंविदुः सम्यग्जानन्ति ये त्रयोदश भौवनाः--'विश्वकर्मा भौवनः स्वानि सर्वाणि भूतानि जुहुवाञ्चकार' इत्यादिश्रुत्यन्तरप्रसिद्धाः, विश्वकर्मप्रभृतयो भुवनस्य महर्षेः पुत्रास्त्रयोदश सङ्ख्याकाः; पञ्च मानवाः निषादपञ्चमाश्चत्वारो वर्णाः, गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके; तस्मिन् वर्चोधसि तेजो धारयते, यशसि यशस्विने, सूनृतावते प्रियहितवचनयुक्ताय तुभ्यं तेभ्योऽग्निभ्यश्च हुतमेतद्धविरस्त्विति ॥

एवं श्रुत्यन्तरेऽपि--'यज्ञाय धर्म्यं वरपञ्चमानवाः' 'वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यैः'--इति। तत्रापि निषादपञ्चमाश्चत्वारो वर्णाः पञ्च मानवा इति भास्करादिभिर्व्याख्यातं, वर्णानां पञ्चत्वेन निषादग्रहणमग्निसम्बन्धात्। अत एव मन्त्रवर्णे 'जना यदग्निमयजन्त पञ्च' इति श्रूयते। तदिदमभिप्रेत्यैव शारीरकभाष्ये सूत्रानुसारेण पञ्चजनशब्दस्य प्राणादिपरत्वं वर्णितवताऽपि शङ्करेण बृहदारण्यकभाष्ये--पञ्च पञ्च जनाः गन्धर्वाः पितरो देवा असुरा रक्षांसि निषादपञ्चमा वर्णाः--इति च व्याख्यातम्। अतः प्राणादय इति सूत्रं कृत्वाचिन्तापरं; अस्मिन्नपि तन्त्रे कृत्वाचिन्तापरं सूत्रं दृश्यते--स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः--इति। तत्सूत्रे हि--मुण्डके बृहदारण्यके च श्रूयमाणाया अक्षरविद्याया ऐक्यं न सम्भवति, 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तुचीर्णं' इत्याथर्वणिकासाधारणशिरोव्रतस्य मुण्डकेऽक्षरविद्याङ्गत्वदर्शनेन वाजसने-

यकगताक्षरविद्यातो भेदावश्यम्भावात्–इत्याशङ्क्य; शिरोव्रतस्याध्ययनाङ्गत्वेन विद्याङ्गत्वाभावादक्षरविद्याया ऐक्ये नास्तिबाधकमिति–समाहितम्; तच्च न युक्तम्, सौरसंहितायां—

"ब्रह्मविद्योपदेशस्ययोग्यं वक्ष्यामि सुव्रत्या"

इत्युपक्रम्य—

"विधिवच्छ्रद्धया सार्धं न चीर्णं यैश्शिरोव्रतम् ।
ब्रह्मविद्यामिमां तेषां न वदेत कदाचन ॥
इदं शिरोव्रतं चीर्णं विधिवद्यैर्द्विजातिभिः ।
तेषामेव परां विद्यां वदेदज्ञानबाधिकाम् ॥
शिरोव्रतमिदं नाम शिरस्याथर्वणे श्रुतम् ।
अग्निरित्यादिभिर्मन्त्रैष्षड्भिश्शुद्धेन भस्मना ॥
सर्वाङ्गोद्धूलनं कुर्याच्छिरोव्रतसमाह्वयम् ।"—

इति वचनेन शिरोव्रतस्याथर्वशिरश्श्रुतिप्रतिपाद्यभस्मोद्धूलनरूपत्वस्य सर्वब्रह्मविद्याङ्गत्वस्य च प्रतिपादनेन अध्ययनाङ्गत्वायोगादिति–केषां चिन्मतं निरस्तम् ॥

कोशादेः शक्तिग्रहांशे प्रामाण्यं हि न स्वतः, वेदातिरिक्तस्य शब्दस्य स्वतःप्रामाण्यायोगात्; नापि स्मृत्यादिवत् श्रुतिमूलकतया, तथा सति स्मृतिन्यायाभ्यां कोशस्य बाधायोगात्। दृश्यते हि–'वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः' इति कोशस्य ब्रह्मशब्दस्य वेदतपसोश्शक्तिग्राहकस्य—

"वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि ।
तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने ॥
यस्मिन् प्रयुज्यमाने तु गुणयोगस्सुपुष्कलः ।
तत्रैव मुख्यवृत्तोऽयमन्यत्र ह्युपचारतः ॥"—

इति गरुडपुराणवचनेन पुरुषोत्तमादन्यत्र ब्रह्मशब्दस्यामुख्यताप्रतिपादकेन बाधः। उक्तपुराणवचनस्येव कोशस्यापि श्रुतिमूलकत्वे उभयोस्समबलत्वेन एकेनापरस्य बाधायोगात्। उक्तं च श्रीभाष्ये—'तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः'—इति ॥

न च—'अपशवो वा अन्ये गोऽश्वेभ्यः पशवो गोअश्वानेवास्मै समीचो दधाति' इति श्रुतिवाक्यस्य पशुशब्दवाच्येष्वजादिषु अपशुत्वप्रतिपादकस्यापि न तत्परत्वं; किं तु गवाश्वप्राशस्त्यपरत्वमिति सत्सिद्धिपेटिकायां व्यवस्थापितम्; तन्न्यायेनोक्तगरुडपुराणवचनमपि गुणपौष्कल्यप्रतिपादनेन विष्णुप्राशस्त्यपरं, न तु तदतिरिक्तानां ब्रह्मशब्दवाच्यत्वाभावपरमिति तेन कोशस्य बाधो न युक्त इति—वाच्यम्; सप्त ग्राम्याः पशव इति श्रुत्यन्तरविरोधाल्लोकव्यवहारविरोधादपशवो वा अन्ये पशव इति स्ववचनविरोधादपशुत्वविधौ प्रयोजनाभावात् वैशब्दोपबन्धात्, समीच इति प्राशस्त्योक्तेश्च; अपशव इत्यस्य प्रशस्तपशुभिन्नार्थकत्वमभ्युपगम्यार्थवादत्वाङ्गीकारेऽपि प्रकृते तथाविधबाधकाभावेन उक्तगारुडपुराणवचनस्य ब्रह्मशब्दस्य विष्णौ मुख्यवृत्तेरन्यत्रामुख्यवृत्तेश्च प्रतिपादनेऽपि तात्पर्यावश्यकत्वात्। उक्तं च सूत्रकृता—'स्याच्चैकस्य ब्रह्मशब्दवत्' इति। ब्रह्मशब्दस्य परमात्मनि मुख्यत्वं तपसि गौणत्वं च यथा 'तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति' इत्यादौ स्वीक्रियते, तथा सम्भूतशब्दस्यापीति तत्सूत्रार्थस्य शङ्करेण प्रतिपादनादुक्तवचनेन कोशबाधः परेषामपीष्टः। तथा 'पीलुः काण्डे द्रुमे गजे' इति पीलुशब्दस्य गजे शक्तिप्रतिपादकस्य कोशस्य 'चरुः स्थाल्यां हविष्यपि' इति चरुशब्दस्य स्थाल्यां शक्तिप्रतिपादकस्य च कोशस्य न्यायेन बाधो दृश्यते। तेष्वदर्शनादिति पूर्वतन्त्रप्रथमाध्यायतृतीयपादस्थशास्त्रप्रसिद्ध-

पदार्थप्रामाण्याधिकरणे–पीलुशब्दस्य वृक्षविशेषे आर्याणां प्रयोगो गजे म्लेच्छानां, चरुशब्दस्य हविष्यार्याणां स्थाल्यां म्लेच्छानां प्रयोगः; तत्रोभयत्रापि तयोश्शब्दयोश्शक्तिः, आर्याणामिव म्लेच्छानामपि प्रयोगे अभियुक्तत्वादिति–पूर्वपक्षं प्रापय्य; शब्दैकसमधिगम्य-धर्माधर्मयोरविप्रतिलिप्सया शब्दार्थतत्त्वविवेचनचतुराणामार्याणां व्यव-हारस्य केवलदृष्टार्थप्रवृत्तम्लेच्छव्यवहारापेक्षया प्रबलत्वादार्यव्यव-हारानुरोधात् पीलुशब्दस्य वृक्षविशेषे शक्तिः, गजे लक्षणया शक्ति-भ्रमाद्वा प्रयोगः; तथा च–चारुशब्दस्य हविषि शक्तिः, स्थाल्यां लक्षणया शक्तिभ्रमाद्वा प्रयोग इति—व्यवस्थापितम्; एवं–पुण्डरीकं सिताम्भोजमिति कोशस्य पुण्डरीकशब्दस्य सिताम्भोजपरत्वग्राह-कस्य रक्ताम्भोजपरत्वग्राहकाभ्यां न्यायश्रौतव्यवहाराभ्यां बाधः, जातिनैमित्तिकं यथास्थानमिति नवमाध्यायतृतीयपादस्थस्तरणमन्त्रो-हाधिकरणे 'मौद्गं चरुं निर्वपेच्छ्रियै श्रीकामः' इति विहितायामिष्टौ 'पौण्डरीकाणि बर्हींषि भवन्ति' इति स्तरणार्थत्वेन विहितेषु पुण्डरी-केषु अतिदेशतः प्राप्तस्य 'दर्भैस्तृणीत हरितैः' इति प्रकृतिगतस्य मन्त्रस्य दर्भपदस्थाने पुण्डरीकं पदं हरितपदस्थाने रक्तपदमूहितव्य-मिति व्यवस्थापितत्वात् पुण्डरीकपदस्य रक्ताम्भोजपरत्वगतेः। एवं–'तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी'–इति श्रौतव्यवहारोऽपि रक्ताम्भोजपरत्वग्राहकः, पाणिपादतलनखनेत्रान्ततालुजिह्वाधराणां सप्तानां रक्तत्वस्य महापुरुषलक्षणत्वेन सामुद्रिकोक्ततया पुरुषोत्तमा-क्षियुगलोपमानवाचिनः पुण्डरीकपदस्य श्वेताम्भोजपरत्वायोगात्। अतः कोशस्य लोकप्रयोगमूलकतयैव प्रामाण्याल्लोकप्रयोगस्य शक्ति-भ्रमादिमूलकत्वे तन्मूलकः कोशस्तदंशेऽप्रमाणमेव। श्रुतिगतवाक्य-शेषस्य च स्वतः प्रमाणतया तेन जायमानश्शक्तिग्रहस्तु न केनापि

बाधमर्हतीति पञ्चजनशब्दस्य वाक्यशेषबलात् ज्ञानेन्द्रियशक्तिस्सिध्यत्येव ॥

एवं च–अप्रमाणमूर्धन्येन वाक्यशेषेण सूत्रकृता शक्तिस्थापने दुर्बलभूतकोशाभावान्न पञ्चजनशब्दस्य ज्ञानेन्द्रियेषु रूढिरिति वचनमज्ञानमूलकमेव ॥

॥ श्रीरस्तु जगतां मुदे ॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य

श्रीमदनन्तार्यवर्यस्य कृतिषु

विधिसुधाकरो

यावत्सम्पादितः ॥

॥ श्रीः ॥

|| श्रीः ||

सुदर्शनसुरद्रुमः

श्रीमन्महीशूरमहाराजाधिराजमहास्थानसभाभूषणैः
शेषार्यवंशमुक्ताफलैः श्रीयादवाद्रिनिवासरसिकैः
पण्डितमण्डलीसार्वभौमैः

श्री ॥ उ ॥ म. अ. अनन्तार्यवर्यैः

विरचितः ।

विद्वद्वरैः परिशोध्य

म. अ. अनन्तार्येण

प्र. भ. तो. नरसिंहार्येण च

कल्याणपुर-विचारदर्पण-मुद्राक्षरशालायामङ्कयित्वा
प्राकाश्यं नीतः ॥

१८९९.

मूल्यं रू. २—०—०

॥ श्रीः ॥

सुदर्शनसुरद्रुमः

भव्योल्लासाय भूयाद्विनमदमरराड्दिव्यकोटीरकोटी-
  रत्नाग्रप्रत्नमुक्तामणिगणविलसत्कान्तिकिञ्जल्कजुष्टम् ।
पादाब्जं श्रव्यनव्येतरफणितिसतीदिव्यसीमन्तसीमा-
  सन्धार्यं श्रीपतेश्श्रीयदुशिखरिशिखारत्नदीपस्य विष्णोः ॥१॥

चिरन्तनसरस्वतीचिकुरमल्लिकातल्लज-
  प्रफुल्लनवमञ्जरीप्रविगलन्मधूलीझरी ।
कला कलयतां मुदं कमलनेत्रवक्षस्स्थली-
  कषोपलतटीकनत्कनकरेखिका काचन ॥२॥

पूर्वाचार्यपरम्परां प्रतिपदं वन्दे मुकुन्दे रतां
  यस्याः प्राथमिको रमाप्रियसखो नाथादयो मध्यमाः ।
श्रीमच्छिङ्गलदेशिकस्तु चरमो येनाहमध्यापितः
  शास्त्रं यत्पदसंश्रयात्प्रकथनो यद्दैवतो यत्सुतः ॥३॥

जयन्तु जगतां श्लाघ्या जराजन्मनिरासकाः ।
पुरन्दरस्य यमिनां पदपङ्कजरेणवः ॥४॥

शेषार्यवंशवार्धीन्दुरनन्ताचार्यकोविदः ।
करोति विदुषां प्रीत्यै सुदर्शनसुरद्रुमम् ॥५॥

रङ्गाचार्यमनीषिणां निवसतां गोवर्धने वर्धने
प्राज्ञानां करुणावशाद्विलसितामाज्ञां पुरस्कुर्वता ।
मन्दोदीरितफल्गुदूषणवचोनिर्मूलनेच्छावता
ग्रन्थोऽयं रचितः फलं च गमितः श्रीपार्थसूतार्पणात् ॥६॥

इह तावत्प्रत्यक्षानुमानशब्दैस्तप्तमुद्राधारणस्य धर्मत्वं व्यवस्थाप्यते ॥

तत्र तप्तमुद्राधारणस्य धर्मत्वग्राहकं प्रत्यक्षं नेन्द्रियजन्यं, तादृशस्य प्रत्यक्षस्य धर्मत्वाविषयकत्वात् । किन्त्वीश्वरयोगिप्रभृतीनां प्रत्यक्षं, अस्मदादीनामपि तप्तमुद्राधारणांशे लौकिकं धर्मत्वांशेऽलौकिकं प्रत्यक्षं च, तद्ग्राहकम् ॥

न च—तादृशालौकिकप्रत्यक्षस्य श्रुतिस्मृत्यादिजन्यशाब्दबोधगृहीतग्राहितया न प्रामाण्यसम्भवः, अज्ञाताबाधितार्थग्राहिताया एव प्रामाण्यरूपत्वादिति—वाच्यम्; तथा सति स्मृत्यादीनामप्यप्रामाण्यापत्तेः। एवं—तप्तमुद्राधारणं धर्मः, अलौकिकाविगीतशिष्टाचारविषयत्वात्, दर्शादिवत्—इत्यनुमानं च तद्ग्राहकम् ॥

यत्तु—तप्तचक्रादिधारणं धर्म इत्यत्र न प्रत्यक्षं प्रमाणं, धर्मस्य प्रत्यक्षागोचरत्वात्; नाप्यनुमानं, श्रुत्यनुपजीविनोऽनुमानस्य धर्मप्रमाणत्वायोगात्—**इति** ॥

अत्रोच्यते ॥ तप्तचक्रादिधारणविशेष्यकधर्मत्वप्रकारकप्रत्यक्षत्वावच्छेदेन प्रमात्वाभावस्साध्यते, उत प्रमात्मकप्रत्यक्षसामान्ये तद्विशेष्यकतत्प्रकारकत्वाभावः, प्रत्यक्षत्वावच्छेदेन चक्रादिधारणनिष्ठविशेष्यतानिरूपितधर्मत्वनिष्ठभ्रमान्यनिरूपितप्रकारताकत्वाभावो वा?

नाद्यः—तादृशप्रत्यक्षस्य भवन्मतेऽसिद्धत्वेन पक्षस्योभयवाद्यसिद्धत्वापत्तेः । अनात्मकतादृशप्रत्यक्षस्य प्रसिद्धावपि न निस्तारः; तादृशप्रत्यक्षस्यापि धर्मितावच्छेदकाद्यंशे प्रमात्वसम्भवेन प्रमात्वसामान्याभावसाधने बाधात्, धर्मत्ववन्निष्ठविशेष्यतानिरूपितधर्मत्वप्रकारताकत्वाभावसाधनेऽपि तप्तमुद्राधारणं सन्ध्यावन्दनं च धर्म इति समूहालम्बनप्रत्यक्षे बाधात् । सामानाधिकरण्येन साध्यतास्वीकारे च तादृशप्रत्यक्षसामान्यस्य प्रामाण्यानिराकरणादसङ्गतिः; सामानाधिकरण्येन प्रमात्वाभावसिद्धावपि प्रत्यक्षविशेषस्य प्रामाण्यसम्भवाविरोधात्, धर्मस्य प्रत्यक्षागोचरत्वादिति हेत्वसङ्गतेश्च, तप्तचक्रादिधारणनिष्ठधर्मत्वस्य प्रमात्मकप्रत्यक्षागोचरत्वादितिहेत्वर्थत्वे च साध्याविशेषात् ॥

न द्वितीयः—अन्यांशे प्रमात्मकप्रत्यक्षे बाधात् तदंशे प्रमात्मकप्रत्यक्षस्य चाप्रसिद्धेः, महानसीयवह्निमति वह्न्यभावसाधनवत्तदंशे प्रमात्मकप्रत्यक्षे तद्विशेष्यकतत्प्रकारकत्वाभावसाधनासम्भवात् अमान्यप्रत्यक्षत्वावच्छेदेन तत्साधनेऽप्यन्यांशे अमात्मकप्रत्यक्षस्य प्रामाण्यानिराकरणादसङ्गतिः ॥

नापि तृतीयः—ईश्वरयोगिप्रत्यक्षादौ बाधात्, इन्द्रियजन्यप्रत्यक्षत्वावच्छेदेन तत्साधनेऽप्यन्यांशे लौकिकप्रत्यक्षमादाय बाधात् अलौकिकान्यप्रत्यक्षत्वावच्छेदेन तत्साधनेऽन्यांशेऽलौकिकप्रत्यक्षस्य प्रामाण्यानिराकरणादसङ्गतिः । तदंशे अलौकिकान्यत्वनिवेशेऽपि न निस्तारः, तदंशे लौकिकालौकिकोभयात्मकप्रत्यक्षस्य प्रामाण्यानिराकरणात् ॥

न च—ईश्वरयोगिप्रत्यक्षादेस्तप्तमुद्राधारणांशे धर्मत्वावगाहित्वस्य अस्माभिरनभ्युपगमान्न दोषः; प्रतिवादिरीत्या बाधस्य दोषत्वे अनुमानमात्रोच्छेदादिति—वाच्यम् । एवमपि साध्याप्रसिद्धेर्दुर्वार-

त्वात्, तादृशभ्रमान्यनिरूपितप्रकारताया अप्रसिद्धत्वात् ; प्रत्यक्षत्वसामानाधिकरण्येन तत्साधने च सिद्धसाधनं ; धर्मस्य प्रत्यक्षागोचरत्वादिति हेतुरप्ययुक्तः, व्यधिकरणत्वात् । धर्मत्वाविषयकत्वादिति हेतुकरणेऽपि प्रतिवादिरीत्या असिद्धिः ; तप्तमुद्राधारणगतधर्मत्वं प्रत्यक्षग्राह्यमिति वदन्तं प्रत्येवानुमानप्रयोगात् तादृशधर्मत्वस्य प्रत्यक्षग्राह्यतामनभ्युपगच्छन्तं प्रत्यनुमानप्रयोगे त्वनुमानवैफल्यात् सिषाधयिषया न्यायप्रयोगस्य चासाम्प्रदायिकत्वात् । नापीत्याद्यप्ययुक्तं ; अनुमानप्रामाण्यस्य पूर्वमुक्तत्वात्, अनुमानविशेषस्य प्रमाणत्वाभावेन तत्सामान्यस्य प्रमाणत्वाभावसाधनायोगाच्च ॥ न च—श्रुतेरभावस्य वक्ष्यमाणतया तदुपजीव्यनुमानस्यासम्भवात्, तदनुपजीव्यनुमानस्य च प्रमाणत्वायोगादनुमानसामान्यस्य तदंशेऽप्रामाण्यं युक्तमिति—वाच्यम् ; वक्ष्यमाणरीत्या श्रुतेरभावस्यासिद्धेः ॥ न च श्रुतिसद्भावेऽपि तदुपजीव्यनुमानस्यानुवादित्वादप्रामाण्यमिति वाच्यम् ; तथा सति स्मृत्यादेरप्यप्रामाण्यापत्तेः ॥ —इति ॥

एवमेव प्रत्यक्षानुमानादिपदानां कारणपरत्वेऽप्युक्तरीत्यैव दोषो बोध्य इति दिक् ॥

तत्र प्रमाणभूतशब्दस्तावत् श्रुतिस्मृतिपुराणपाञ्चरात्राणि । तत्र श्रुतिरपि पठ्यमानश्रुतिः खिलश्रुतिश्चेति द्विविधा । तत्र पठ्यमानश्रुतिः प्रथममुदाह्रियते ॥

शतपथे तावत्—

"अथ कात्यायनः पप्रच्छ । याज्ञवल्क्य इति होवाच— परं ब्रह्मेत्येको देवो विश्वतश्चक्षुरुत विश्वात्मा विश्वतोबाहुरुत एष पुरुषोऽन्तर्यामोऽन्तर्यामस्स विश्वतोमुखस्सर्वात्मा विश्वतस्पादिति । नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जायत इति । सं बाहुभ्यां नमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः । पुरुषोऽन्तर्यामोऽ

न्तर्यामः । स आदित्यतेजो भवति, स आदित्यलोको भवति, स विष्णुरेव भवति, स विष्णुलोको भवति । तप्तं चक्रं द्विभुजे धार्यमित्यग्निहोत्रमेव लोको भवत्यूर्ध्वपुण्ड्रमालिखेत्तस्माद्द्विरेखं भवति । भूःस्वयम्भूर्ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद ॥

"अथ कात्यायनः पप्रच्छ । याज्ञवल्क्य इति होवाच—ज्ञानं वै पुरुषो ब्रह्मणो जायते ब्राह्मणो भवति, वसिष्ठः कश्यपोऽत्रिर्जमदग्निर्विश्वामित्रोऽयं व्यासः पाराशर्यस्सनकादयो देवास्स ब्रह्मलोको भवति, तप्तं चक्रं द्विभुजे धार्यमिति स विष्णुलोको भवति सोऽनन्तलोको भवति स पुण्यलोको भवति स वै पुण्यो भवति य एवं वेद ॥

"अथ कात्यायनः पप्रच्छ । याज्ञवल्क्य इति होवाच—आदित्यः पुरुषस्स आदित्यः कस्मिन् प्रतिष्ठितश्चाध्यात्मं च प्रतिष्ठितं वेद प्रति तिष्ठति, प्रजया पशुभिरस्मिन् लोकेऽमृतत्वमेति पापं हरति, सुदर्शनं धार्यमित्यूर्ध्वपुण्ड्रं द्विरेखं भवति, ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद ॥

"अथ कात्यायनः पप्रच्छ। याज्ञवल्क्य इति होवाच—आप एव यस्यायतनं हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणं नारायणं पुरुषं सर्वस्यात्मनः परायणं विष्णुरेव भवति तप्तं चक्रं द्विभुजे धार्यमिति ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद ॥

"अथ कात्यायनःपप्रच्छ । याज्ञवल्क्य इति होवाच—इदं वै तत्पुरुषस्य परायणो भवति तप्तं चक्रं द्विभुजे धार्यमिति, इमावेव गौतमभरद्वाजावयमेव गौतमोऽयं वै भरद्वाजः, इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निः । इमावेव वसिष्ठकाश्यपा वयमेव वसिष्ठोऽयं काश्यपो वामदेवोऽत्रिर्वाचा ह्यन्नमद्यते तद्यदत्ति

तस्यैतस्य सर्वस्यात्ता भवति सर्वमस्यान्नं भवति स विष्णुरेव भवति य एवं वेद ॥

"अथ कात्यायनःपप्रच्छ । याज्ञवल्क्य इति होवाच–पृच्छामि त्वा परमं तं पृथिव्याः पृच्छामि यत्र पुरुषस्य नाभिः, ब्रह्मणो जायत इति । देवासः पितरो येन विधृतेन बाहुना सुदर्शनेन प्रयतास्स्वर्गं लोकमायन् । येनाङ्किता मनवो लोकसृष्टिं वितन्वन्ति ब्राह्मणास्तद्वहन्त्यग्निना वै होत्रा तप्तं चक्रं द्विभुजे धार्यमित्यूर्ध्वपुण्ड्रमालिखेत्तस्मात् द्विरेखं भवति पुनरागमनं न याति ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद ॥ * ॥

"अथ कात्यायनेति होवाच–विष्णुरिन्द्रो वै देवा इन्द्रो वै नारायणान्नु जायते, किंदैवतोऽस्यां विष्णुदैवत इति, स विष्णुः कस्मिन् प्रतिष्ठित इति....रूपाणि पश्यति, कस्मिन् रूपाणि प्रतिष्ठितानीति, हृदय इति होवाच, तप्तं चक्रं द्विभुजे धार्यमिति, ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद ॥

"अथ कात्यायनेति होवाच–परमपुरुषो वै देवा मनो वै ब्रह्म मनोऽनन्तानन्तलोके निवसति तप्तं चक्रं द्विभुजेधार्यमिति ब्राह्मणास्तद्वहन्त्यग्निना वै होत्रा तप्तं तनुरित्यापोऽन्तरिक्षं समुद्रं गच्छन्त्यथापो देवास्समुद्रं गच्छन्ति यथाह वै देवा ब्राह्मणाः केशवं प्रति गच्छन्ति ॥

"अथ कात्यायनेति होवाच–पुरुषश्चन्द्रमस्यादित्यः कस्मिन् प्रतिष्ठित इत्यादित्यान्तःपुरुषस्य देवस्य देवनादिगुणयुक्तस्य हिरण्यगर्भोपाध्यवच्छिन्नेति ब्राह्मणा भगवन्तो यो वः कामयते मनो वै कामं मनोऽनन्ता मनो वै ब्रह्म मनो वै विष्णुरिति ब्राह्मणा धारयन्त्यूर्ध्वपुण्ड्रं द्विरेखं भवति ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद ॥

"अथ कात्यायनेति होवाच–सर्वं तदिदं सर्वात्मनः परायणं नारायणं महाज्ञेयं विश्वात्मानं परायणमिति देवो भूत्वा देवासः पितरो विदुरित्यात्मा गुहायां निहितोस्य इत्यन्तर्यामो मघवन् मादयस्व स्वाहोर्वन्तरिक्षमन्वेमि स्वां कुतोऽसीति ब्रह्मणेति होवाच, तप्तं चक्रं द्विभुजे धार्यमिति, ब्रह्मणस्सायुज्यं सलोकतां जयति य एवं वेद ॥"

—इति ॥

त्रिष्वपि वेदेषु—"पवित्रं ते विततं ब्रह्मणस्पते, प्रभुर्गात्राणि पर्येषि विश्वतः, अतप्ततनूर्न तदामो अश्नुते, शृतास इद्वहन्तस्तत्समाशत ॥" — इति ॥

यजुषि काठके—"चरणं पवित्रं विततं पुराणं, येन पूतस्तरति दुष्कृतानि, तेन पवित्रेण शुद्धेन पूताः, अति पाप्मानमरातिं तरेम । लोकस्य द्वारमर्चिमत्पवित्रम्, ज्योतिष्मद्भ्राजमानं महस्वत्, अमृतस्य धारा बहुधा दोहमानं, चरणं नो लोके सुधितां दधातु ॥"—इति ॥

ऋचि साम्नि च—"चमूषच्छ्येनश्शकुनो भिभृत्वा गोविन्दुर्द्रप्स-आयुधानि बिभ्रत् । अपामूर्मि स च मानस्समुद्रं तुरीयं धाम महिषो विवक्ति ॥" —इति ॥

तत्र पवित्रं त इतिश्रुतेरयमर्थः ॥ ब्रह्मणः–चतुर्मुखस्य । पते–नियामक; चेष्टासामान्यप्रयोजकसङ्कल्पवत्त्वं तन्निष्ठस्वत्वनिरूपकत्वं वा तत्पतित्वं । प्रभुः–चेष्टासामान्यप्रयोजकसङ्कल्पाश्रयस्त्वं । विश्वतः–विश्वस्य, सार्वविभक्तिकस्तसिः । सर्वेषां गात्राणि पर्येषि–व्याप्नोषि, अन्तर्यामिरूपेण वर्तसे; गात्रत्वव्यापकसंयोगानुकूलव्यापाराश्रय इति यावत् । ते–व्यापकस्य तव ; पवित्रं विततं–अग्निसन्तप्तस्वसंयोगजन्यकिणवत्त्वसम्बन्धेनाऽऽस्तिकजनसामान्यनिष्ठं ॥ तथा च–स्वीयान्तर्यामिरूपवत्तासम्बन्धेन गात्रत्वव्यापकस्य तव चक्रं उक्तसम्बन्धेन योगाप्रयोज्यास्तिक जनगात्रत्वव्यापकमित्यर्थः । गात्रे योगाप्रयोज्यत्वनिवेशाच्च चक्रा-

ङ्कितानामपि योगिनां योगप्रयोज्यशरीरे चक्राङ्कनविरहेऽपि नाव्यापकत्वानुपपत्तिः । पवित्रशब्दस्य परिशुद्धित्राणकर्तृत्वावच्छिन्ने योगशक्तेस्सुदर्शनत्वावच्छिन्ने रूढेश्च सत्त्वाद्योगरूढता, 'पुनाति त्रायते चेत्यतः पवित्रं इति- **एकायनब्रह्मणे** निरुक्तत्वात् ॥

'सुदर्शने च दर्भे च पवित्रं चणसूत्रके ।'

इति **वेदनिघण्टुवचनात्**—

'सुदर्शनं सहस्रारं पवित्रं चरणं पविः ।'

'सुदर्शनं हरेश्चक्रं पवित्रं चरणं पविः ।'

इति **निघण्टुवचनाच्च** ॥

पाद्मे च—

'पवित्रं चरणं नेमी रथचक्रं सुदर्शनं ।
सहस्रारं प्राकृतघ्नं लोकद्वारं महौजसं ।
नामानि विष्णुचक्रस्य पर्यायेण निबोधम ॥' —इति॥

श्रीशास्त्रेऽपि— 'पवित्रं चरणं चक्रं लोकद्वारं सुदर्शनं ।
पर्यायवाचका ह्येते चक्रस्य परमात्मनः ॥'—इति ॥

योगशक्यतावच्छेदकघटकपरिशुद्धिश्च—प्रत्यवायाभावप्रकारकभगवत्सङ्कल्पः ; विशेष्यतासम्बन्धेन तादृशसङ्कल्पं प्रति वह्निसन्तप्तस्वसंयुक्तभुजघटितदेहवत्तासम्बन्धेन सुदर्शनस्य हेतुत्वात्तस्य परिशुद्धिकरत्वोपपत्तेः । त्राणं च—मोक्षादिरूपं फलम् । तद्धेतुत्वमप्युक्तसम्बन्धेन सुदर्शनस्य बोध्यम् । तेनातप्ततनूः--तज्जन्यरूपपरावृत्त्याश्रयभुजवद्भिन्नः, तापस्य करणसाकाङ्क्षत्वात् पवित्रशब्दस्य प्रथमान्ततया क्रियासाकाङ्क्षत्वाच्च तेनेत्यध्याहारेण योजनाया युक्तत्वात् । तप्ता तनूर्यस्य स न भवतीत्यतप्ततनूरिति विग्रहाङ्गीकारेण तपधातो रूपपरावृत्त्यर्थकतया क्तप्रत्ययस्याश्रयार्थकतया तनुपदस्य भुजार्थकतया चोक्तार्थलाभात् । आमः—अदग्धपापः, अविनष्टमोक्षहेतुभूतोपासनादिप्रति-

बन्धकतापवानिति यावत् । तत्—ब्रह्म, नाश्नुते न प्राप्नोति। तच्छब्दस्य ब्रह्मनामत्वं 'तदिति वा एतस्य महतो भूतस्य नाम भवति' 'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति प्रमाणसिद्धम्। मोक्षहेतुभूतोपासनप्रतिबन्धकपापनिष्ठप्रतियोगितासम्बन्धेन नाशं प्रति स्वजन्यरूपपरावृत्त्याश्रयभुजघटितदेहावच्छिन्नत्वसम्बन्धेन सुदर्शनस्य हेतुतया तत्सम्बन्धावच्छिन्नतन्निष्ठावच्छेदकताकप्रतियोगिताकभेदस्य मोक्षाभावप्रयोजकत्वोपपत्तेः, तापाभावविशिष्टतन्वाः मोक्षाभावप्रयोजकत्वस्याप्रामाणिकत्वात् । योगिनां चक्राङ्कितानामपि तापाभावविशिष्टदेहान्तरसत्त्वेन मोक्षानापत्त्या च अतप्ता तनूर्यस्येति विग्रहोपेक्षा । इत् —इदं, तप्तसुदर्शनं; वहन्तः—उक्तसम्बन्धप्रयोजकव्यापारवन्तः। शृतासः—दग्धपापाः ; तत्समाशत—ब्रह्म प्राप्तवन्तः—इत्यर्थः ॥ अत्र मोक्षहेतुत्वप्रतिपादनेनैवेष्टसाधनताज्ञानाधीनप्रवृत्त्युपपत्तावपि सद्विद्यादहरविद्यादिवद्विकल्पेन हेतुत्वे सर्वेषां प्रवृत्तिर्न स्यादित्यतो मोक्षाभावप्रयोजकभेदप्रतियोगितावच्छेदकत्वाभिधानम् ॥

यत्तु—पवित्रं त इत्यादिश्रुतिर्न चक्रधारणे प्रमाणं, तस्यापातप्रतीतत्वात् । न हि शब्दस्यापातप्रतीत एवार्थः, 'चित्रया यजेत' 'आज्यैर्जुषते' 'आकाशादेव समुत्पद्यन्ते' इत्यादेरपि चित्राज्याकाशाद्यधिकरणपूर्वपक्षरीत्या चित्रद्रव्यघृतगगनाद्यर्थकत्वस्य 'अन्धो मणिमविन्दत्' इत्यादेरपि प्रतीतार्थपरत्वस्य प्रसङ्गेन मीमांसावैयर्थ्यात्, 'बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति' इति स्मृतेश्च, 'यश्छन्दसां योगमावेद धीरः' इति श्रुत्यैव स्वार्थस्य गहनत्वोक्तेश्च ; किं तु मीमांसितः । न च—आपातप्रतीतार्थत्यागे स्वार्थपरित्यागप्रसङ्गेन शब्द एव बाधितस्स्यादिति—वाच्यम् । आपातप्रतीतार्थमात्रपरित्यागेऽपि मीमांसितस्य स्वार्थस्यात्यागात् । आपातप्रतीतार्थत्यागे पुरुषभ्रान्तिरेव त्यक्ता भवति । तथा च—पवित्रं त इत्यादि-

श्रुतिरन्वयव्यतिरेकाभ्यां कृच्छ्रचान्द्रायणादितपसो मोक्षसाधनत्वप्रतिपादनपरा ॥ तथा हि–ब्रह्मणश्चतुर्मुखस्य पते हे विष्णो प्रभुस्त्वं विश्वेषां गात्राणि पर्येषि–व्याप्नोषि अन्तर्यामिरूपेण वर्तसे । तादृशस्य ते तव पवित्रं 'पूतं पवित्रं मेध्यम्' इत्यमरकोशात्–परिशुद्धं विततं विस्तृतं तत् प्रसिद्धं मोक्षरूपं सुखम् । अतप्ततनूः–तप्तं तपः, भावे निष्ठा; तद्रहिता तनूर्यस्येति स तथोक्तः; यद्वा–कर्तरिक्तप्रत्ययः। अत एव आमः–अपक्वः, अक्षीणपाप इति यावत्; एवंविधः पुमान् नाश्नुते– न प्राप्नोति; तत्तपः, इद्वहन्तः–वहन्त एव, चरन्त एवेत्यर्थः । अत एव शृतासः–दग्धपापाः ; समाशत–मोक्षं प्राप्तवन्तः ॥ तथा च–अन्वयव्यतिरेकाभ्यां तपसो मोक्षसाधनत्वपरत्वान्नेयं श्रुतिस्तप्तचक्रादिधारणे प्रमाणम्॥ —इति ॥

तन्न । तथा सति पवित्रविततशब्दयोस्सन्निकृष्टेन अतप्ततनूरित्यनेनोक्तरीत्या अन्वयसम्भवेऽपि विप्रकृष्टेन तच्छब्देनान्वये व्यवहितयोजनाप्रसङ्गात् ॥

न च–यत्पवित्रं विततं तेनाग्निदग्धेनातप्ततनूरिति त्वदीययोजनायां यत्तेनाग्निदग्धेनेत्यध्याहारप्रसङ्गेन तदपेक्षया व्यवहितान्वय एव युक्त इति–वाच्यम् । 'पश्य मृगो धावति' इत्यादौ वाक्यार्थभूतस्य धावनानुकूलकृतिविशिष्टमृगस्य कर्मतासम्बन्धेन दर्शनेऽन्वयवत् प्रकृतेऽपि त्वत्सम्बन्धिविततत्वविशिष्टस्य सुदर्शनस्य वाक्यार्थभूतस्य करणतासम्बन्धेन तपधात्वर्थेऽन्वयाङ्गीकारेणाध्याहारविरहात्; सम्भवत्येकवाक्यत्वे तत्त्यागायोगात् ॥

न च–विततत्वविशिष्टस्य सुदर्शनस्य नामार्थस्य धात्वर्थे कथं भेदेनान्वयः, अन्यथा काष्ठं पचतीत्यादौ काष्ठादेरपि करणतासम्बन्धेन पाकेऽन्वयापत्तिरिति–वाच्यम् । केवलनामार्थस्य धात्वर्थे भेदे-

नान्वयानङ्गीकारात् वाक्यार्थस्य धात्वर्थे भेदेनान्वयाङ्गीकारे क्षतिविरहात्। अत एव

"श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयश्शुभाः।
पराक्रमं च युद्धेषु जायते निर्भयः पुमान्॥"

इत्यत्र प्रथमान्तपदोपस्थितानां शुभत्वविशिष्टोत्पत्तीनां भेदेन श्रवणेऽन्वयस्सङ्गच्छते। विशेष्यतासम्बन्धेन भेदसम्बन्धावच्छिन्ननामार्थनिष्ठप्रकारताशालिशाब्दबोधे विभक्तिजन्योपस्थितिप्रथमान्तपदसमभिव्याहृतप्रथमान्तपदोत्तरधातुजन्योपस्थित्यन्यतरस्य कारणत्वकल्पनान्न विभक्तिजन्योपस्थितिं विना वाक्यार्थस्य भेदान्वयानुपपत्तिः। स्पष्टं चेदमाख्यातवादगादाधर्यां॥

तथा च–अध्याहारविरहान्नानुपपत्तिः। अस्तु वाऽध्याहारः; तथाऽपि न दोषः, एतन्मन्त्रार्थविशदीकरणार्थप्रवृत्तया "पवित्रमित्यग्निः अग्निर्वै सहस्रारस्सहस्रारो नेमिर्नेमिना तप्ततनुर्ब्रह्मणस्सायुज्यं सलोकतामाप्नोति" इति सामवेदमैत्रायणीयशाखागतश्रुत्या अध्याहारस्य दर्शितत्वेनाध्याहारस्य प्रामाणिकत्वात्। अथवा पवित्रं विततमित्युभयमपि सम्बुद्ध्यन्तब्रह्मणस्पत इत्यनेन समानाधिकरणम्। त इति तृतीयार्थे षष्ठी। विततं पवित्रं ब्रह्मणस्पते ते त्वया अतप्ततनूरिति सम्बन्धः। प्रभुरिति षष्ठ्यर्थे प्रथमा। प्रभोस्सर्वेश्वरस्य गात्राणि विश्वतः विश्वानि, पर्येषि परिवारयसि—इत्यर्थः॥

यद्वा–प्रभुस्त्वं विश्वेषामाश्रितानां गात्राणि पर्येषि, लाञ्छितानि कृत्वा स्वीकरोषि–इत्यर्थः॥

एवं च–तेनेत्यध्याहारविरहे वाक्यार्थस्य करणतासम्बन्धेनान्वयविरहेऽपि च न क्षतिः। न च–तृतीयार्थे षष्ठीस्वीकारे लक्षणाप्रसङ्ग इति–वाच्यम्। सम्बन्धत्वेन करणत्वार्थकत्वे लक्षणाविरहात्; विशेषरूपेणाभिमतसम्बन्धबोधाङ्गीकारे भवतामपि लक्षणाया दुर्वा-

रत्वात् । एवं—अतप्ततनूरित्यत्र भावेनिष्ठामङ्गीकृत्य तपोरहित-तनूरित्यर्थकरणमपि न सत् ; तथा सति तपोरहिततनुमत्त्वस्य मोक्षाभावप्रयोजकत्वलाभेन तपश्शालिनामपि योगिनां मोक्षाभाव-प्रसङ्गात्, तेषां योगजन्यतपोरहितशरीरान्तरस्य सम्भवात् । तनुत्वावच्छेदेन तपोराहित्यस्य च न बोधसम्भवः, बाधात् । स्वीयतनुत्वावच्छेदेन तद्बोधस्याबाधेऽप्यतप्ततनूरित्यतो न तादृश-बोधसम्भवः ; स्वीयतनुत्वेनोपस्थापकपदाभावात् । तनुशब्दस्य स्वीय-तनुत्वावच्छिन्ने लक्षणास्वीकारेण तथा बोधोपपादनमपि न सत्; स्वत्वस्याननुगतत्वेन देवदत्तादितनुत्वावच्छिन्न एव लक्षणाया वाच्यतया शास्त्रस्य सर्वसाधारण्येन प्रवृत्त्यनुपपत्तेः । कर्तरिक्तप्रत्ययपक्षोऽपि न युक्तः, तन्वां कर्तृत्वस्य बाधात्, अन्यथा शरीरस्य फलभोक्तृत्वापत्तेः, शास्त्रफलं प्रयोक्तरीति न्यायात्; कर्ताशास्त्रार्थवत्त्वादित्यधिकरणविरो-धाच्च ; गौणकर्तृत्वपरत्वे च क्तप्रत्ययस्य लक्षणाप्रसङ्गात्; अतप्ततनू-रित्यत्र तनूपदवैयर्थ्याच्च, अतप्त इत्यनेनैव तपोरहितस्य न मोक्ष इत्यर्थलाभात् ; अस्मत्पक्षे तु अवयविवाचकस्य तनुशब्दस्य मूले बाह्वोरिति सिद्धबाहुमूलाद्यवयवोपलक्षकतया सार्थकत्वात् ॥

यदपि—वाचिकवेदानुवचनमानसिकध्यानकायिकासनादिलक्षण-तपसां सत्त्वेऽपि "यदाऽस्य त्वचाऽस्थि संक्षीयते, अथ मोक्षो भवति ; यदाऽस्य कृष्णं चक्षुषोर्न्लेष्यति अथ मेध्यो भवति" इत्यादिशास्त्रान्तर-सिद्धस्य कायशोषणपर्यन्तस्य कायिकस्य तपस आवश्यकत्वसूचनाय तनूपदमावश्यकम् । तथा च—केशानां सङ्घातश्चूडा यस्य स केशचूडः इत्यादिवत् तप्तेन तपसा शोषिता तनूर्यस्येति बहुव्रीहिसमासः, ततो नञ्समासः न तप्ततनूरतप्ततनूरिति ; एवं च तनूपदस्य मुख्यार्थलाभः ॥ त्वत्पक्षे तु—अप्रकृतत्मन्त्रिकवचनानुसारेणावयविवाचिनस्तनूपदस्य बाहुमूलाद्यवयवलक्षकत्वे श्रुतिबाधः—इति । तन्न ; मध्यमपदलोपि-समासे तप्तपदस्य तपश्शोषिते लक्षणाप्रसङ्गात् ॥

उदाहृतश्रुत्यनुरोधेन तनूपदस्याप्यस्थ्यादिपरत्वावश्यकतया लक्षणाया दुर्वारत्वात् मध्यमपदलोपिसमासस्य साधुतानिर्वाहाय तप्ततनूपदस्य शाकपार्थिवादिगणे पाठकल्पनाप्रसङ्गात्, तप्तेत्यस्य भावक्तान्तत्वे क्तप्रत्ययस्य निरर्थकत्वापत्तेश्च ; सम्भवति सार्थकत्वे निरर्थकत्वस्यान्याय्यत्वात् । **एतेन**—तनूशब्दः कृशवचनः, तनूरिति दीर्घश्छान्दसः, तप्तेन तपसा तनूः कृशः तप्ततनूः, ततो नञ्समासः, अतप्ततनूः—**इति निरस्तम्** ॥ छान्दसदीर्घस्य कल्पनीयत्वाच्च । एवं—वहन्त इत्यस्य आचरन्त इत्यर्थकत्वे लक्षणाप्रसङ्गश्च ॥

यत्तु—त्वन्मतेऽपि मुख्यपवित्रशब्दवाच्यस्य विष्णुचक्रस्य वहनानुपपत्त्या लोहादिमयसुदर्शनप्रतिकृतिसमर्पिणे पवित्रशब्दस्य अत्यन्त जघन्यलक्षणा समाश्रयणीयेति तदपेक्षया वहन्त इत्यस्य आचारलक्षणैव युक्ता—**इति** । **तन्न** ; पवित्रशब्दस्य परिशुद्धित्राणकर्तृत्वावच्छिन्ने योगशक्तेस्सुदर्शनत्वावच्छिन्ने रूढिशक्तेश्च स्वीकारात्, परिशुद्धित्राणकर्तृत्वरूपयोगशक्यतावच्छेदकस्य लोहमयमुद्रासाधारणस्योक्तत्वात्; रूढिशक्यतावच्छेदकस्य भगवन्मूर्तिभेदभिन्नसकलसुदर्शनसाधारणजातिरूपस्य देवताविशेषाधिष्ठिताकृतिविशेषाश्रययावद्वस्तुनिष्ठस्य सुदर्शनत्वस्यापि लोहमुद्रावृत्तित्वे बाधकविरहात्, लोहमुद्राया अपि तादृशाकृत्याश्रयत्वाद्देवताविशेषाधिष्ठितत्वाच्च । एवं च—पवित्रपदस्य मुद्रापरत्वेऽपि न लक्षणा । न च—रूढिशक्यतावच्छेदकस्य जातिविशेषस्य न मुद्रासाधारण्यम्, चित्रगवादौ गोत्वादिजातिवदसम्भवात् ; अत एव पिष्टमय्यो गाव इत्यादौ केवलाकृतिविशिष्टे गोपदस्य लक्षणेत्युक्तं शक्तिवादगादाधर्याम्—इति वाच्यम् । एवमपि केवलयोगशक्यतावच्छेदकरूपेण मुद्राया बोधे लक्षणाया अप्रसक्तेः, शक्यतावच्छेदकभिन्नरूपेण उपस्थितावेव तत्स्वीकारात् । अत एव—पङ्कजपदात् केवलपङ्कजनिकर्तृत्वेन कुमुदादेर्बोधे लक्षणा नास्तीत्युक्तं **नैयायिकैः** ।

आलङ्कारिकैरपि—विष्णोर्नाभीसरोरुहादित्यत्र सरोरुहपदात् केवलरूढ्यर्थतावच्छेदकपद्मत्वेनैव बोधः, योगार्थतावच्छेदकस्य बाधात्; "कुर्यां हरस्यापि पिनाकपाणेः" इत्यादौ पिनाकपाणिपदात् केवलयोगार्थतावच्छेदकरूपेणैव बोधः, रूढ्यर्थतावच्छेदकस्याबाधेऽपि तात्पर्याविषयत्वात्—इत्युक्तम्। अस्तु वा—आकृतिविशेषावच्छिन्ने पवित्रशब्दस्य लक्षणा, तस्याः निरूढलक्षणात्वेन दोषताविरहात्; अन्यथा धूमादित्यादिहेत्ववयवे धूमपदस्य ज्ञाने लक्षणाया अपि दोषताप्रसङ्गात् ॥

यदपि—तप्तशब्दो न तपोवचनः, किन्तु औदर्यरूपसन्तापवचनः; आमशब्दोऽपि सन्तापजनितावयवसंशोषणराहित्यवचनः; तथा च—हे ब्रह्मणस्पते त्वं प्रभुर्नियन्ता सन् विश्वेषां गात्राणि पर्येषि; तस्य ते पवित्रं परिशुद्धं विततं तत्परम्पदं, तद्विष्णोः परमं पदमिति श्रुत्यन्तरे तच्छब्दस्य परमपदे प्रयोगदर्शनात्; अतप्ततनूः कृच्छ्रचान्द्रायणादिभिरसन्तप्तगात्रः अनुष्णीकृतगात्र इति यावत्। कृच्छ्रचान्द्रायणाद्युपवासक्लेशस्यापि जाठराग्निसङ्क्षोभणद्वारा शरीरसन्तापहेतुत्वात्। अत एव—आमः असंशोषितावयवः, नाश्नुते—न प्राप्नोति, श्रृतासः—कृच्छ्रचान्द्रायणादिभिस्सन्तप्तगात्राः, श्राधातोः कृष्णलं श्रपयेदित्यादौ सन्तापवाचित्वदर्शनात्। अत एव—इत् इदं सन्तापजनितशरीरसंशोषणं वहन्तः सर्वनाम्नां तेन रक्तं रागादित्यादौ योग्यवस्तुपरामर्शित्वदर्शनेन आमपदप्रतिसम्बन्धितया निर्दिष्टस्य इद्वहन्त इत्येतद्गतस्य इदंशब्दस्य सन्तापजनितशरीरसंशोषणवाचित्वौचित्यात्। यद्वा—इच्छब्दो नावयवसंशोषणवचनः, किं तु परमपदवचन एव; तथा च—इत् इदं परमपदं, वहन्तः साधनानुष्ठानेन सम्पादयन्तः, समाशत प्राप्तवन्त इत्यर्थः—इति। तदपि न; पवित्रविततशब्दयोस्सान्निकृष्टेन अतप्ततनूरित्यनेन अन्वयं विना विप्रकृष्टेन तच्छब्देनान्वये व्यवहितयोजनाप्रसङ्गात्;

क्रियासाकाङ्क्षस्य पवित्रं विततमित्यस्य करणसाकाङ्क्षे तपधात्वर्थे अन्वयमनङ्गीकृत्य तच्छब्दार्थे उत्थाप्याकाङ्क्षया अन्वयमुपगम्य करणाकाङ्क्षानिवृत्त्यर्थं कृच्छ्रचान्द्रायणादिभिरित्यध्याहारकल्पनस्यायुक्तत्वात्; "तद्विष्णोःपरमं पदम्" इति श्रुतिघटकतच्छब्दस्य परमपदत्वावच्छिन्नपरत्वे तस्य घटो घट इतिवत् परमम्पदमित्यत्रानन्वयप्रसङ्गेन तस्य प्रमाणसिद्धपरताया एव वक्तव्यत्वात्तादृशश्रुत्यनुरोधेन अत्रत्यतच्छब्दस्य परमपदपरताया असिद्धमसिद्धेनेति न्यायेनानुपादेयत्वात्; गन्ता देवदत्तः, अयं गुण इत्यादौ संयोगानुकूलव्यापाररूपगमिधात्वर्थैकदेशरूपस्य संयोगस्य इदंशब्देन परामर्शादर्शनेन असंशोषितावयवरूपामपदार्थैकदेशस्य संशोषणस्य इच्छब्देन परामर्शायोगात्; तेन रक्तं रागादित्यत्र रज्यते अनेनेति राग इति व्युत्पत्त्या रञ्जकद्रव्यस्य रागशब्दार्थतया तस्यैव तेनेत्यनेन परामर्शात्पदार्थैकदेशस्य परामर्शादर्शनेन तदुदाहरणस्य प्रकृते असङ्गतत्वात् ॥ न च—रागादित्यस्य रञ्जकद्रव्यवाचिपदपरतया तदेकदेशरञ्जकद्रव्यस्य परामर्शो दृश्यत इति—वाच्यम् । 'दशैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः' इत्यादाविव लक्ष्यार्थैकदेशशक्यार्थस्य परामर्शसम्भवेऽपि शक्यार्थैकदेशस्य क्वापि परामर्शादर्शनात् । इच्छब्देन परमपदपरामर्शोऽपि न युक्तः । परमपदप्राप्तिपूर्वकालीनस्य तद्वहनस्यानुपपत्तेः ॥ न च—तद्वहनं तत्प्राप्त्यनुकूलव्यापारः, स च तत्साधनानुष्ठानात्मक इति—वाच्यम् । तथा सति मोक्षसाधनानुष्ठानस्य मोक्षप्राप्तिहेतुतालाभेऽपि कृच्छ्रचान्द्रायणादितपसस्तद्धेतुत्वालाभादसङ्गतेः ॥ न च—इद्वहन्त इत्यत्र शृतास इत्यस्योद्देश्यतावच्छेदकतया धनवान् सुखीत्यादाविव साधनानुष्ठानं प्रति हेतुत्वलाभात्परम्परया मोक्षहेतुत्वं लभ्यत इति—वाच्यम् । यदभावस्य मोक्षाभावप्रयोजकत्वं पूर्वमभिहितं तस्य मोक्षहेतुताया वक्तव्यत्वावश्यकत्वेऽपि तत्साधनानुष्ठानस्य तद्धेतुतायाऽसिद्धत्वेन इद्वहन्त इत्यस्य वैयर्थ्यापत्तेः । 'शृतासस्तत्समाशत' इत्यनेनैवोपपत्तेः ॥

यत्तु–त इति न षष्ठ्येकवचनम्, अपि तु चतुर्थ्येकवचनमेव; पवित्रशब्दोऽपि न तच्छब्दनिर्दिष्टपरमपदविशेषणं, अपि तु कृच्छ्रचान्द्रायणादितपःपर एव। तथा च–हे ब्रह्मणस्पते विष्णो ते त्वदर्थं त्वदाराधनार्थं यत्पवित्रं परिशुद्धिकरं कृच्छ्रचान्द्रायणादितपः तेन अतप्ततनूरसन्तप्तगात्रः, अत एव आमः असंशोषितावयवः तत्परमपदं नाश्नुते। शृतास इत्युत्तरार्धस्य व्याख्या पूर्ववदेव।

"यज्ञायाचरितं कर्म कर्मग्रन्थिर्विलीयते।
यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः॥"—

इत्यादिस्मृतिषु भगवदाराधनार्थस्य कर्मणो मोक्षसाधनत्वप्रतिपादनात्। एवं च–अवयविवाचिनः तनूशब्दस्य बाहुमूलाद्यवयवपरतया सङ्कोचो न कल्पितो भवति, तप्तपदस्य सन्तापवाचित्वेऽपि तप्तपदसादृश्यात्सन्तापं प्रति करणकारकतया हृदयमागतस्य कृच्छ्रचान्द्रायणादितपसः परित्यागश्च न कृतो भवति। तस्मादस्य मन्त्रस्य कृच्छ्रचान्द्रायणादिविधिपरत्वान्न सुदर्शनात्तापविधिपरत्वम्–इति। **तन्न**; त इति चतुर्थ्यन्तार्थस्य भगवत्प्रीतीच्छाधीनेच्छाविषयत्वस्य पवित्रं विततमिति विशेषणद्वयस्य चान्वयार्थं कृच्छ्रचान्द्रायणादितप इत्यध्याहारस्य कल्पनीयतया गौरवात्, उदाहृतभगवद्गीतावचनद्वयस्य भगवत्प्रीत्युद्देश्यकस्य कर्मणो बन्धकत्वाभावप्रतिपादनपरत्वेऽपि मोक्षहेतुत्वप्रतिपादनपरत्वाभावात्। तथा च **शाङ्करभाष्यम्**—

"बन्धार्थत्वात् कर्म न कर्तव्यमिति, तदप्यसत्, कथं यज्ञार्थादिति; यज्ञो वै विष्णुरिति श्रुतेः। यज्ञ ईश्वरः, तदर्थं यत् क्रियते तद्यज्ञार्थं कर्म, तस्मात् कर्मणोऽन्यत्र, अन्येन कर्मणा लोकोऽयमधिकृतः कर्मकृत् कर्मबन्धनः, कर्मैव बन्धनं यस्य सोऽयं कर्मबन्धनो लोकः, न तु यज्ञार्थात्"—**इत्यादि**॥

तस्मात्तद्वचनस्य मोक्षसाधनत्वप्रतिपादनपरतया उपादानं स्वसिद्धान्ताज्ञानविजृम्भितम् ॥

यदपि—"उद्गातारो द्रोणकलशं प्रतिष्ठाप्य तस्मिन्नुदीचीनदिशं पवित्रं वितन्वन्ति, पवित्रं ते विततं ब्रह्मणस्पत इति वितन्यमानमभिमन्त्रयते यजमानः" इत्यापस्तम्बसूत्रेण उद्गातृप्रभृतिभिः द्रोणकलशोपरि वितन्यमानपवित्रानुमन्त्रणे विनियोगाद्युक्तमस्याश्श्रुतेस्तत्परत्वम् । तथा हि—ब्रह्मणः—बृंहकस्य, द्रोणादिवर्धकस्य ओषधिवनस्पतिलक्षणस्यान्नस्य ; पते—हे सोम, 'सोमो वा ओषधीनां राजा' इति श्रुतेः । यद्वा—ब्रह्मणः ब्राह्मणस्य ; पते, 'तस्मात्सोमराजानो ब्राह्मणाः' इति श्रुतेः । ते त्वदर्थं त्वत्पवनार्थं, ईदृशं पवित्रं विततं विस्तृतं ; प्रभुर्गात्राणि पर्येषि विश्वतः—अनेन पवित्रेण तत्स्वरूपतिरोधायकऋजीषाद्यपगमेन प्रभुस्समर्थो भूत्वा रोगाद्यपगमेन तरुणादिस्वरूपमिव गात्राणि स्वरूपाणि विश्वतः पर्येषि प्राप्नोषि विस्तारयसीत्यर्थः ॥ ऋजीषाद्यपगमनार्थस्य पवनस्यान्वयव्यतिरेकाभ्यां फलं दर्शयति—अतप्ततनूर्न तदामो अश्नुते । आमः—दशापवित्रेणासंस्कृतः, अत एव अतप्ततनूः—असमर्थतनूः, तपऐश्वर्ये इति धातोः तप्तशब्दस्य निष्पत्तेः । तत्—स्वकार्यं होमं, नाश्नुते । न चात्र तनूपदवैयर्थ्यं, तनूपदस्याशुचित्वाभिप्रायगर्भत्वात् । तथा च—यतोऽयमसंस्कृतः, अतएवाशुचिस्सन् स्वकार्ये प्रत्यसमर्थ इत्यर्थः फलति । नन्वसंस्कृतस्यापि स्वकार्ये सामर्थ्यमस्तु, तत्राह श्रृतास इद्वहन्तस्तत्समाशतेति । श्रृतासः—संस्कृता एव यागीयपदार्थाः, तं श्रृतं भूतमजुहोदित्यादौ संस्कृतमात्रेऽप्यग्निपक्वे श्रृतशब्दप्रयोगदर्शनात् । अत एव—संस्कृतत्वादेव । वहन्तः—तत्कार्यनिर्वहणविचक्षणास्सन्तः । तत्—स्वकार्यं, समाशत—प्राप्तवन्तः; अशू व्याप्तावित्यस्माद्धातोर्लिटि व्यत्ययेन शपि तस्य बहुलं छन्दसीति लुकि कृते बहुवचने रूपम् । तस्मात्पवित्रमन्त्रस्य द्रोणकलशोपरि वितन्यमानदशापवित्रानुमन्त्रणे विनियोगानुसारेण सोमपरत्वमेव युक्तम्—इति ॥

तन्न—एवं सति सर्वेषां पदानामस्वारस्यस्यावर्जनीयत्वात् । तथा हि—तत्रास्मिन्नर्थे प्रथमोपात्तः पवित्रशब्दस्तावदस्वरसः, संज्ञात्वाभावेन पुरस्संज्ञायामित्यनेन प्रत्ययालाभात्, ऋषिदेवताभिन्नत्वेन कर्तरिचर्षिदेवतयोरित्यनेनापि तदलाभात् । दशापवित्रादौ लक्षणेति वाच्यम्; अतः प्रथमोपात्तपदे लक्षणा दोषः। एवं ब्रह्मशब्दस्य रूढ्या चतुर्मुखपरत्वसम्भवे योगेन वर्धकत्वावच्छिन्नपरत्वकल्पनमनुचितम्, योगाद्रूढेर्बलीयस्त्वस्य रथकाराधिकरणन्यायसिद्धत्वात् । पतिशब्दस्य नियामकत्वावच्छिन्ने स्वत्वनिरूपकत्वरूपस्वामित्वावच्छिन्ने वा शक्तस्य श्रेष्ठत्वावच्छिन्ने लक्षणा समाश्रयणीया; 'सोमो वा ओषधीनां राजा' इति श्रुतावपि राजपदस्य श्रेष्ठत्वावच्छिन्ने लाक्षणिकत्वात् ॥

एतेन—ब्रह्मणः ब्राह्मणस्य पते—इत्यर्थोऽपि निरस्तः; निरुक्तस्य ब्राह्मणनिरूपितपातित्वस्य सोमे बाधात्, पतिशब्दस्य तत्कर्तृकक्रियाङ्गत्वावच्छिन्ने लक्षणावश्यकत्वात् । पते—इति सम्बोधनविभक्त्यर्थस्य प्रकृतवाक्यजन्यबोधाश्रयत्वेनेच्छाविषयत्वस्याचेतने सोमे बाधश्च । एवं प्रभुशब्दस्य समर्थपरत्वमप्यस्वरसम् ॥

न च—तत्कार्ये प्रभुरित्यादौ प्रभुशब्दस्य समर्थपरत्वमपि दृश्यत इति—वाच्यम्; सप्तम्यन्तपदासमभिव्याहृतस्य प्रभुशब्दस्य समर्थपरत्वादर्शनात्, समर्थपरत्वेऽपि तस्य चेतनैकान्तत्वेनाचेतने लक्षणाया अवर्जनीयत्वाच्च। तथा गात्रपदस्य स्वरूपार्थकता, पर्येषीत्यस्य विस्तारार्थकता च लक्षणाधीना; स्वर्गादिवाचकस्यापि गोशब्दस्य पशौ धर्मपुत्रादिसाधारणस्यापि पार्थशब्दस्यार्जुने अधिकाराद्यर्थान्तरसाधारणस्याप्यथशब्दस्यानन्तर्ये प्रसिद्धिप्राचुर्यवत् तप ऐश्वर्ये इति धात्वनुसारेणार्थान्तरसाधारणस्यापि तप्तशब्दस्य दाहार्थकत्व एव प्रसिद्धिप्राचुर्यात् समर्थपरत्वेऽस्वारस्यं दुष्परिहरम् । तनूशब्दस्याशुचित्वा-

वच्छिन्ने लक्षणा, निरनुपसृष्टस्य वहेर्निर्वहणार्थकत्वं, तच्छब्दस्यानुपस्थितहोमाद्यर्थकत्वं चायुक्तमिति ॥

न च—उक्तार्थपरत्वाभावे द्रोणकलशोपरि वितन्यमानपवित्रानुमन्त्रणे विनियोगानुपपत्तिः, मन्त्रस्य यस्मिन्नर्थे विनियोगस्तत्परत्वनियमादिति—वाच्यम्; तादृशनियमासिद्धेः, अनुमन्त्रणे विनियुक्तस्यास्य मन्त्रस्यानुमन्त्रणपरत्वाभावात् ॥ न च—यस्य मन्त्रस्य यादृशार्थे विनियोगस्तस्य तादृशार्थघटकार्थपरत्वमित्येव नियमः, तादृशार्थघटकत्वं च तादृशार्थविषयिताव्यापकविषयितानिरूपकत्वं तादृशार्थकोटिप्रविष्टविशेष्यविशेषणोभयसाधारणम्; तथा च पवित्रमन्त्रस्य वितन्यमानपवित्रानुमन्त्रणे विनियुक्तस्य तद्घटकपवित्रपरत्वानपायान्न दोष इति—वाच्यम्;

“अग्निर्मूर्धा दिव इति मन्त्रं भौमाय कीर्तयेत्।
उद्बुध्यस्वाग्न इत्येवं मन्त्रं सोमसुताय वै ॥
अन्नात्परिस्रुतो रसश्शुक्रस्य तु निगद्यते ।
शनैश्चराय विभवे शन्नोदेवीति होमयेत्।
कयानश्चित्र आभुवदिति राहोरुदीरयेत् ॥”—

इत्यादिभिर्विनियुक्तानां अग्निर्मूर्धादिवःककुदित्यादिमन्त्राणां तत्तदर्थघटकार्थपरत्वस्याप्यभावेन व्यभिचारात् ॥

न च—अग्निर्मूर्धेत्यत्र अग्निपदस्य योगवृत्त्या गौण्या वा भौमबोधकत्वस्य, उद्बुध्यस्वेत्यस्य बुधेतिवर्णसत्त्वेन बुधस्मारकतायाः, ‘अन्नात्परिस्रुतो रसश्शुक्रं ज्योतिरजायत’ इत्यत्र शुक्रपदस्य नपुंसकत्वेऽपि नामसाम्यात्तत्स्मारकत्वस्य, कयानश्चित्र इत्यत्र चित्रपदस्य चित्रात्मकराहुशिरोलक्षकत्वात्तत्स्मारकत्वस्य, शन्नइत्यस्य वर्णद्वयसादृश्येन शनिनामस्मारकत्वस्य सत्त्वाच्च तत्रतत्र विनियोगोपपत्तिः, यादृशार्थे यस्य मन्त्रस्य विनियोगः तस्य तादृशार्थस्मारकत्वमित्येव नियमादिति—

वाच्यम्। तथा सति पवित्रमन्त्रस्य दशापवित्रतात्पर्यकत्वाभावेऽपि यथाकथञ्चित्स्मारकत्वमात्रेण विनियोगोपपत्तेः, स्वारसिकप्रतीतिरहिते दशापवित्ररूपार्थे तात्पर्यासिद्धेः। किं च—यस्य मन्त्रस्य यादृशार्थे विनियोगस्तस्य मन्त्रस्य तादृशार्थपरत्वमिति नियमेऽपि न क्षतिः, दशापवित्रानुमन्त्रणे विनियुक्तस्यास्य मन्त्रस्य तप्तमुद्राधारणपरत्वाभावेऽप्यारुणकेतुकेऽग्नौ प्रकरणादिना करणतया विनियुक्तस्यास्य मन्त्रस्य आरुणकेतुकाग्निस्तुतिपरत्वावश्यकतया तथाभूताग्निस्तुतौ द्वारतयैव देवताविग्रहादिवत् तप्तमुद्राधारणसिद्धेः॥

तथा हि—पवित्रमिति मन्त्रस्तावदारुणकेतुकेऽग्नौ विनियुज्यते। अत्र ब्रह्मणस्पते ब्राह्मणानां स्वामिन्नित्यग्निसंबोधनं, हे ब्रह्मणस्पते त्वं सर्वाणि शरीराणि वैश्वानराग्निरूपेण व्याप्नोषि, ते त्वत्सम्बन्धि सर्वतस्त्वत्संसृष्टं; विततं—विस्तीर्णं सुदर्शनं, तेनातप्ततनूः अनङ्कितभुजः, आमः अपक्वपापः, तत् ब्रह्म, नाश्नुते। इत् इदं सुदर्शनाङ्कनं, वहन्तः, शृतासः पक्वपापाः; अर्शआद्यजन्तत्वाश्रयणात्। तद्ब्रह्म समाशत असेवन्त—इत्यग्निः स्तूयते। अग्निसम्बन्धिसुदर्शनधारणतदभावयोर्मोक्षतदभावप्रयोजकत्वाभिधानेनाग्नेरुत्कर्षसिद्धेः॥

न च—चित्याग्नेः स्तूयमानत्वे तस्य वैश्वानराग्निरूपेण सर्वशरीरव्यापित्वं सुदर्शनतापार्थत्वं च न सम्भवति—इति वाच्यम्। चित्याग्नेरचेतनस्य सम्बोध्यत्वासम्भवेन स्तुतिजन्यप्रीत्याश्रयत्वासम्भवेन स्तुतेर्निष्फलत्वापत्त्या च तादृशाग्न्यधिष्ठातृदेवताया एव स्तुत्यङ्गीकारेण तादृशदेवतायाश्च स्वाधिष्ठितवैश्वानराग्निरूपेण व्यापित्वस्य स्वाधिष्ठितवह्निसन्तप्तेन सुदर्शनेन तापार्थतायाश्चोपपत्तेः॥

यत्तु—हे ब्रह्मणस्पते अग्ने, ते तव, पवित्रं मेध्यं, विततं बहुभिर्मन्त्रैर्बहुना च प्रयोगेण चीर्णं, तत् प्रकृतमारुणकेतुकचयनं, अतप्ततनूः—'त्रिषवणमुदकोपस्पर्शी, चतुर्थकालपानभक्तःस्यात्, अहरहर्वा भैक्षमश्नी-

यात्, संवत्सरमेतद्व्रतं चरेत्' इत्याद्यारुणकेतुकप्रश्नान्त्यानुवाकोक्ततपोभिरशोषिततनूः, नाश्नुते न प्राप्नोति; इत् इदं तप्तं, इदमर्थे इच्छब्दः, वहन्तः आचरन्तः, शृतासः दग्धपापाः, तत् चयनं, पूर्वे ऋषयः, समाशत प्राप्तवन्तः—इत्यर्थः ॥ यद्वा—हे ब्रह्मणस्पते अग्ने, ते विततं पवित्रं तत् स्थानं 'अग्नेः पूर्वदिश्यस्य स्थाने स्वतेजसा भाति' इति मन्त्रवर्णादिषु प्रसिद्धम् । अतप्ततनूः—अकृतारुणकेतुकचयनः, नाश्नुते न प्राप्नोति ; तपश्शब्दस्य धर्ममात्रेऽपि 'तपःश्रुतं च योनिश्चेत्येतद्ब्राह्मणकारकम्' इत्यादौ प्रयोगदर्शनात् । तस्मादारुणकेतुकाग्निस्तुतिद्वारतयाऽपि अस्य मन्त्रस्य न चक्रधारणप्रतिपादनपरत्वं सिध्यति ॥

—इति ॥

तन्न । संवत्सरमेतद्व्रतं चरेदित्याद्युक्ततपसामारुणकेतुकचयनाङ्गतया तज्जन्यकलिकापूर्वस्य आरुणकेतुकचयनजन्यपरमापूर्वहेतुतया तदभावस्य तदभावे प्रयोजकत्वसम्भवेऽपि उक्ततपसामभावेऽप्यारुणकेतुकचयनोत्पत्तिसम्भवेन तदहेतुतया तदभावस्य तदभावे प्रयोजकत्वासम्भवात् । तच्छब्दस्य तज्जन्यपरमापूर्वपरत्वन्तु न सम्भवति, तस्य प्रक्रान्तताविरहात्, अतप्ततनूरित्यत्र उक्ततपोभिरित्यध्याहारस्य तप्तपदस्य शोषिते लक्षणायाः वहन्त इत्यस्याचारे लक्षणायाश्च कल्पनीयत्वाच्च । एतेन यद्वेत्यादिकमपि निरस्तम् ॥

किं च—अस्य मन्त्रस्य चित्याग्निस्तुतिद्वारतयाऽपि चक्रधारणप्रतिपादनपरत्वाभावे—

"विष्णोर्नुकेन मन्त्रेण तापयित्वा सुदर्शनम् ।
चरणं पवित्रमिति द्वाभ्यां तदभिमन्त्रयेत् ॥
पवित्रं ते विततमिति मुद्रयेद्दक्षिणे भुजे ।
ज्ञानं वैराग्यमास्तिक्यं श्रद्धाचास्याभिवर्धते ॥"—

इति **महर्षेस्सनकस्य** सौदर्शने कर्मणि विनियोगानुपपत्तिः ॥

यद्यपि—सनकस्मृतेः स्मृतिषु परिगणनाभावाद्धर्मशास्त्रव्याख्यातृभिः मेधातिथिविज्ञानेश्वरादिभिरनुदाहृतत्वाच्च तस्याः स्मृतित्वे प्रमाणाभावः। अस्तु वा स्मृतित्वं, अथापि सौदर्शने कर्मणि विनियोगानुसारेण अस्य मन्त्रस्य सुदर्शनपरत्वेऽपि तप्तपदस्य दाहपरत्वं करणपदाध्याहारदुष्टमनाश्रयणीयं, येन अस्य मन्त्रस्य मुद्राधारणविधिपरत्वं भवेत्। तथा हि--ब्रह्मणस्पते, यज्ञविघ्नकरासुरादिसंहरणेन ब्राह्मणानां रक्षकेति सुदर्शनस्य सम्बोधनम्; प्रभुशब्देन विष्णुरुच्यते; त्वं विष्णुरूपी भूत्वा सर्वाणि गात्राणि व्याप्नोषि, तस्य ते पवित्रं तत् स्थानं तपोरहितो नाश्नुते ; इदं तपश्चरन्तो दग्धपापाः तत्स्थानं प्राप्तवन्तः—इत्यर्थपरत्वात् ॥ —इति ॥

तन्न—पूर्वकाण्डार्थविशदीकरणार्थप्रवृत्तत्वे सत्यार्षत्वरूपस्मृतित्वस्य सनकस्मृतिसाधारण्यात्, तद्व्यावृत्तस्मृतित्वस्य दुर्वचत्वात्; स्मृतिष्वपरिगणनात् सनकस्मृतेः स्मृतित्वाभावे भगवद्गीताया अपि स्मृतित्वाभावापत्तेः; न चेष्टापत्तिः; स्मरन्ति चेत्यादिसूत्रभाष्ये शङ्करादिभिर्गीतायास्स्मृतित्वेनोदाहरणात् तदनुपपत्तेः। पवित्रमित्यस्यैव करणतासम्बन्धेनान्वयाङ्गीकारेण करणवाचिपदाध्याहाराभावस्य दर्शिततया तप्तपदस्य दाहपरत्वे बाधकाभावात्। "पवित्रमित्यग्निः, अग्निर्वै सहस्रारस्सहस्रारो नेमिः, नेमिना तप्ततनूः, ब्रह्मणस्सायुज्यं सलोकतामाप्नोति" इति सामवेदमैत्रायणीयशाखागतश्रुत्यैव अस्य मन्त्रस्य दाहपरतायाः करणपदाध्याहारस्य च दर्शितत्वेनाध्याहारकल्पनेऽपि दोषाभावात्। 'अक्ताश्शर्करा उपदधाति, तेजो वै घृतम्' इत्यत्रोपस्थितघृतवाचितेनेत्यध्याहारस्य पूर्वतन्त्रानुमतत्वात्। उपस्थितार्थकपदाध्याहारस्यादोषत्वात्। अन्यथा तत्राप्यध्याहारदोषपरिहाराय अक्ता इत्यत्रार्थान्तरकल्पनाप्रसङ्गात्। तप्तपदस्य तपःपरत्वे क्तप्रत्ययवैयर्थ्यस्य तनूपदवैयर्थ्यस्य च बाधकस्योक्तत्वात् ॥

त्वं विष्णुरूपी भूत्वेत्यादिव्याख्यानमप्यनुचितम्, सुदर्शनस्य जीवस्य परमात्मना विष्णुना ऐक्यायोगात्। न च–विष्णुरूपी भूत्वेत्यस्य विष्णुशरीरं भूत्वेत्यर्थ इति–वाच्यम्; तथा सति विष्णुशरीरतायाः सर्वदा सिद्धत्वेन साध्यत्वायोगात्, तस्य सर्वगात्रव्याप्त्यसाधकत्वाच्च। किं चास्य मन्त्रस्य दाहप्रकाशकत्वाभावे दाहे विनियोगस्यानिर्वाहापत्तिः॥ न च–'अग्निर्मूर्धा दिवः ककुत्', 'भुवो यज्ञस्य', 'इदं विष्णुर्विचक्रमे', 'त्रिर्देवःपृथिवीमेष एताम्' इत्यादिमन्त्राणां आग्नेयवैष्णवादियागेषु याज्यानुवाक्यात्वेन विनियुक्तानां यागवाचकपदाभावेन यागवाचकत्वाभावेऽपि तत्साधनाग्निविष्णवादिप्रकाशकत्वमात्रेण यागे विनियोगनिर्वाहवत्, अत्रैव सौदर्शने कर्माङ्गे "विष्णोर्नुकेन मन्त्रेण तापयित्वा सुदर्शनम्" इति विनियुक्तस्य विष्णोर्नुकमन्त्रस्य तापप्रकाशकत्वाभावेऽपि तापसाधनविष्णुप्रकाशकत्वमात्रेण तापविनियोगनिर्वाहवच्च पवित्रमन्त्रस्य दाहे विनियुक्तस्य दाहप्रकाशकत्वाभावेऽपि दाहसाधनसुदर्शनप्रकाशकत्वमात्रेण दाहे विनियोगोपपत्तिः–इति वाच्यम्; अग्निर्मूर्धेत्यादिमन्त्रेषु यागवाचकपदाभावेनागत्या तद्घटकदेवताप्रकाशकत्वमात्रेण विनियोगनिर्वाहेऽपि प्रकृते तापवाचिपदसत्त्वेन तत्प्रकाशकत्वेनैव स्वरसनिर्वाहसम्भवे तत्त्यागायोगात्, अनुष्ठेयार्थप्रकाशकत्वरूपमन्त्रत्वस्य तापाबोधकत्वेऽनुपपत्तेः॥

न च–'नाङ्कयेन्न दहेद्विप्रम्' इत्यादौ दहनस्याङ्कनशब्दवाच्यमुद्रणस्य च भेदावगमात् इह 'मुद्रयेद्दक्षिणे भुजे' इति मुद्रण एवास्य मन्त्रस्य विनियोगेन दाहविनियोगासिद्ध्या दाहपरत्वं न कल्पनीयम्–इति वाच्यम्; लेखनादिसाधारणमुद्राप्रयोजकव्यापारसामान्यस्याङ्कनशब्दार्थत्वात्, मुद्राप्रयोजकाग्निसंयोगस्य दाहशब्दार्थत्वात्, मुद्राप्रयोजकव्यापारत्वेन दाहस्याङ्कनशब्दार्थे क्रोडीकारेऽपि नानृतंवदेदित्यादौ भेदाभावेऽपि प्रत्यवायाधिक्यसूचनाय विशेषनिषेध-

वदत्रापि मुद्राप्रयोजकविलेखनाद्यपेक्षया तत्प्रयोजकदाहस्य प्रत्यवायाधिक्यसूचनार्थं विशिष्य निषेधोपपत्तेः ; तावता मुद्रणभेदस्य तापेऽसम्भवात् ; 'विष्णोर्नुकेन मन्त्रेण तापयित्वा सुदर्शनम्' इत्युक्ततापानन्तरकालीनमुद्रणस्य लेखनादिव्यावृत्तमुद्रानुकूलाग्निसंयोगरूपत्वस्यैव प्रतीतेः ; तत्र विनियुक्तस्यास्य मन्त्रस्य दाहपरत्वावश्यकत्वात् ॥

यदपि—वस्तुतोऽस्य मन्त्रस्य दाहपरत्वेऽपि मन्त्रगततत्पदद्वयेन 'पवित्रं ते विततमिति मुद्रयेद्दक्षिणे भुजे' इत्यावश्यकान्तरङ्गविनियोजकवाक्यसन्निहितस्य मुद्रणस्यैव परामर्शो युक्तः, न तु बहिरङ्गवचनान्तरसन्निहितमोक्षादिरूपफलस्य । तथा च–दाहस्य किणरूपमुद्राहेतुत्वं लोकसिद्धं विनियोजकवचनसिद्धं वा मन्त्रेणानूद्यत इति न दाहस्य मुद्रणस्य वा वैदिकत्वसिद्धिः । यथा–'तस्माद्गायत्त स्त्रियः कामयन्ते' इत्यादिवाक्यानूदितगानादेर्लोकसिद्धतया न वैदिकत्वं तद्वत्—**इति** ॥

तन्न । मूलवाक्योपस्थापितार्थस्य व्याख्यानगततच्छब्देन कदाचित्परामर्शदर्शनेऽपि व्याख्यानोपस्थापितार्थस्य मूलस्थतच्छब्देन परामर्शायोगात्, व्याख्यानसजातीयविनियोजकवाक्योपस्थापितार्थस्य मन्त्रगततच्छब्देन परामर्शासम्भवेन तच्छब्दद्वयस्य मुद्रणपरत्वानुपपत्तेः ; अतप्ततनूरित्यत्र तपधातूत्तरक्तप्रत्ययेन कर्मार्थकेन तापजन्याङ्कनरूपफलाश्रयस्य बोधात् ; इद्वहन्त इत्यत्रापि तापजन्यफलस्य मुद्रणस्यैव इच्छब्देन परामर्शेन मुद्रणं वहन्तस्तत्समाशत, मुद्रणं प्राप्तवन्त इत्यस्य वक्तव्यतया तादृशार्थे च गन्ता गच्छतीत्यादिवद्वाक्यस्य निराकाङ्क्षत्वाद्वाक्यस्य तप्तमुद्राधारणनिष्ठमोक्षसाधनत्वरूपापूर्वार्थपरत्वसम्भवे तद्विहाय वैयर्थ्यापरपर्यायस्य लोकसिद्धार्थानुवादकत्वस्यायोगात् ; तस्माद्गायत्रमित्यादौ चागत्या वैयर्थ्याभ्युपगमात् । अस्तु वा मन्त्रस्य लोकसिद्धार्थानुवादित्वं ; अथापि

न दाहस्य मुद्रणस्य वा वैदिकत्वहानिः । वैदिकत्वं हि—न वेदजन्येष्टसाधनत्वप्रकारकधीविषयत्वं, स्मृतिप्राप्तकर्मणां वैदिकत्वानापत्तेः; किं तु वेदतदुपजीविप्रमाणान्यतरजन्येष्टसाधनत्वप्रकारकधीविषयत्वम् । तच्च—"पवित्रमिति मन्त्रेण मुद्रयेद्दक्षिणे भुजे" इति स्मृतिजन्येष्टसाधनत्वप्रकारकधीविषयत्वान्मुद्रणस्याक्षुण्णम् । न च तादृशस्मृतेर्देवलकादिविषयत्वं, सर्वसाधारण्यस्य वक्ष्यमाणत्वात् ॥

यदपि—अस्य मन्त्रस्य सुदर्शनपरत्वं तद्धारणपरत्वं वा न युक्तम् । हे ब्रह्मणस्पते अग्ने ते विततं पवित्रं स्वरूपं रश्मिजालं वा, तेनादग्धतनूरित्यर्थाश्रयणेन अस्य मन्त्रस्य दाहप्रकाशकत्वसम्भवेन दाहे विनियोगनिर्वाहात्—इति । तन्न; भेदनियतसम्बन्धस्यैव षष्ठ्यर्थत्वेन पवित्रशब्दस्य स्वरूपार्थकत्वे राहोश्शिर इत्यादिवत् षष्ठ्या लक्षणाप्रसङ्गात्, पवित्रमित्यग्निरित्युदाहृतश्रुतिविरोधेन अस्यार्थस्यायुक्तत्वाच्च ॥

यदपि—तत्त्वतस्तु त्वदभिमतस्य विनियोजकवचनस्य मूलगवेषणायां पवित्रमन्त्रगतदाहप्रकाशनसामर्थ्यरूपलिङ्गस्यैव तन्मूलत्वं कल्पनीयम्; न तु विनियोजकसनकस्मृतिसमानविषयं श्रुत्यन्तरं परिकल्प्य तन्मूलत्वं कल्पनीयम् । तथा सति श्रुतिस्वरूपं तस्य विनियोजकस्मृतिमूलत्वं च कल्पनीयमिति गौरवापत्तेः । किं तु सिद्धस्यैव मन्त्रगतदाहप्रकाशनसामर्थ्यरूपलिङ्गस्य धर्मकल्पनातो धर्मिकल्पना लघीयसी—इति न्यायेन स्मृतिमूलत्वमात्रं कल्पनीयम् । तच्च दाहप्रकाशनसामर्थ्यरूपं लिङ्गं पूर्वोक्तन्यायेनापातप्रतीतिसिद्धमिति तन्मूलकवचनस्य न प्रामाण्यम् । अत एवामुं धर्मकल्पनान्यायमाश्रित्यैव पूर्वतन्त्रे "स्योनं ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन्त्सीदामृते प्रतितिष्ठ, व्रीहीणाम्मेध सुमनस्यमानः" इति मन्त्रस्य दलद्वयसमभिव्याहारात्मकवाक्यप्रमाणाद्बलीयसा लिङ्गेन यथार्हं विभज्य सदनकरणे पुरोडाशप्रतिष्ठापने च न्यायविनियोगस्य समभिव्याहारा-

त्मकैकवाक्यताबलात् पुरोडाशप्रतिष्ठापनविशिष्टसदनप्रकाशनसामर्थ्यरूपं लिङ्गं परिकल्प्य कृत्स्नं मन्त्रं सदनकरणे विनियोजयतो बोधायनस्य वचनं लिङ्गाभासमूलत्वेन न प्रमाणमित्युक्तम्; न तु तस्य विनियोजककल्पसूत्रस्य स्वसमानविषयकश्रुत्यन्तरकल्पनेन प्रामाण्यं समर्थितम्। एवमन्यान्यपि लिङ्गाभासमूलकानि कल्पसूत्रादिवचनानि कल्पसूत्राधिकरणे भट्टपादैरप्रमाणत्वेनोदाहृतानि द्रष्टव्यानि। यदा पुनरपि गानेन महाजनपरिगृहीतानां वचनानामप्रामाण्यं, तदा कैव कथा शिष्टापरिग्रहदूषितस्य क्वाप्यनुपलब्धकोशस्य सनकवचनस्याप्रामाण्ये। तथा च सनकवचनस्य प्रामाण्यसिद्धौ तद्बलेन पवित्रमन्त्रस्य दाहपरत्वसिद्धिः, दाहपरत्वसिद्धौ च दाहप्रकाशनसामर्थ्यरूपलिङ्गमुपजीव्य प्रवर्तमानस्य सनकवचनस्य प्रामाण्यसिद्धिरिति परस्पराश्रयोऽप्यनुसन्धेयः॥ तस्माद्विनियोगानुसारेणास्य मन्त्रस्य दाहपरत्वाश्रयणमयुक्तमेव—इति॥

तन्न—उक्तमन्त्रगतस्य दाहप्रकाशनसामर्थ्यरूपलिङ्गस्य 'पवित्रमित्यग्निः, अग्निर्वै सहस्रारः' इति श्रुतिसिद्धत्वेनापातप्रतीतिसिद्धत्वाभावात्, सनकस्मृतिवचनस्योक्तलिङ्गमूलकत्वेऽपि प्रामाण्योपपत्तेः; तादृशस्मृतिवचनोपजीव्यस्य दाहप्रकाशनसामर्थ्यलिङ्गस्य श्रुतिसिद्धत्वेन स्वप्रामाण्याधीनसिद्धिकत्वाभावेनान्योन्याश्रयविरहाच्च॥

यत्तु—परमार्थतस्त्वस्य मन्त्रस्य विनियोगानुसारेण दाहपरत्वकल्पने प्राप्तार्थतया विधिशक्तिविलोप एव स्यात्; तथा हि पवित्रं ते विततमिति मुद्रयेदित्यस्य विनियोजकस्मृतिवचनस्य पवित्रमन्त्रविशिष्टचक्रधारणविधिपरत्वे तेनैव स्मृतिवचनेन चक्रधारणस्य प्राप्ततया पवित्रमन्त्रस्य चक्रधारणविधिपरत्वायोगात् अस्य स्मृतिवचनस्य चक्रधारणानुवादेन मन्त्रविनियोगविधिपरत्वेऽनुवादस्य प्राप्तिसापेक्षतया चक्रधारणस्यान्यतः प्राप्तिर्वक्तव्या। तत्र पवित्रमन्त्रादेव चक्र-

धारणप्राप्त्यभ्युपगमे पवित्रमन्त्रस्य विधायकत्वसिद्धौ तत्प्राप्तचक्रधारणानुवादेन स्मृतिवचनस्य पवित्रमन्त्रविनियोजकत्वसिद्धिः ; स्मृतिवचनस्य विनियोजकत्वसिद्धौ च स्मृतिविनियोगवत्त्वेन मन्त्रस्य विधायकत्वसिद्धिरित्यन्योन्याश्रयापत्तेः । वचनान्तरप्राप्तं चक्रधारणमनूद्य स्मृतिवचनस्य विनियोगविधिपरत्वे तस्मादेव वचनान्तरान्मुद्राधारणस्य प्राप्ततया न पवित्रमन्त्रस्य विधायकत्वसिद्धिः—इति ॥

तन्न । न हि प्रमाणान्तरप्राप्तत्वं विधायकत्वविरोधि ; तथा सति विधायकश्रुतिसमानार्थकस्मृतिसद्भावस्थले श्रुतेर्विधायकत्वानापत्तेः, तद्विधेयत्वेनाभिमतस्य स्मृतिप्राप्तत्वात् ; किं तु स्वानुपजीविमानान्तरप्राप्तत्वम् । तथा च स्मृतेस्स्वोपजीवित्वात्तत्प्राप्तस्यापि श्रुत्या विधेयत्वमुपपद्यत इति । पवित्रं ते विततमिति मुद्रयेदित्यस्य तादृशमन्त्रविशिष्टचक्रधारणविधिपरत्वेऽपि न दोषः । एवमस्य मन्त्रस्य चक्रधारणानुवादेन मन्त्रविनियोगविधिपरत्वमप्युपपद्यते । तत्र पवित्रमन्त्रादेव चक्रधारणस्य प्राप्त्यभ्युपगमेऽपि नान्योन्याश्रयः ; ऋषिसमवेतस्यैव पवित्रमन्त्रविशेष्यकविधिपरत्वप्रकारकज्ञानस्य विनियोगजनकत्वात्, तस्य चाचार्योपदेशयोगजधर्मादिजन्यत्वेन विनियोगजन्यत्वाभावात्, अस्मदादिगतस्य तादृशज्ञानस्य विनियोगाधीनत्वेऽपि विनियोगजनकत्वाभावात् । वचनान्तरप्राप्तं चक्रधारणमनूद्य स्मृतिवचनस्य विनियोगविधिपरत्वमपि युक्तमेव ; वचनान्तरान्मुद्राधारणस्य प्राप्तत्वेऽपि वचनान्तरं येन न श्रुतं तं प्रति पवित्रमन्त्रस्य विधायकत्वसम्भवात्, नानाशाखागतानां अग्निहोत्रं जुहोतीति वाक्यानां तत्तच्छाखाध्यायिनं प्रत्यग्निहोत्रविधायकतायाश्शास्त्रसिद्धत्वात्, स्वबोधनीयपुरुषगताज्ञानविरोधिस्वानुपजीविमानान्तरप्राप्तार्थत्वस्यैव विधायकत्वकुण्ठकत्वात् । एवमुपबृंहणबलादप्यस्य मन्त्रस्य चक्रधारणविधायकत्वं सिद्ध्यति ।

तथा हि पाद्मे—

"चरणं पवित्रं विततं पुराणं वाङ्मयं शुभम् ।
तेन चक्रेण संतप्तास्तरेयुः पातकाम्बुधिम् ॥
पवित्रं ब्राह्मणस्पत्यं जगद्व्याप्तं हरेस्सदा ।
तेनातप्ता तनूर्येषां ते न यान्ति हरेः पदम् ॥
तेन तप्ता तनूर्येषां ते प्रयान्ति परंपदम् ।
शुद्धेन तेन तप्तेन ब्रह्म तेन पुनीहि नः ॥
येन देवाः पवित्रेण आत्मानं पुनते सदा ।
तेन सहस्रधारेण पावमान्यः पुनन्तु नः ॥
प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयम् ।
तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे ॥
सनेमि चक्रमजरं चक्षुरस्य महात्मनः ।
तस्मिन् हि विधृते देवा महोन्नतपदं ययुः ॥
यत्ते पवित्रमर्चिषि अग्ने तेन पुनीहि नः ।
इत्येवं श्रुतयस्सर्वाः कथयन्ति वरानने ॥
तस्माद्वै विधिवद्धार्याश्शङ्खचक्रादिहेतयः ।"

इत्यादिना तप्तचक्रधारणे पवित्रश्रुतिचरणश्रुतिगतपदानां श्रुत्यन्तरगतपदानां च समन्वयप्रदर्शनेन पवित्रचरणश्रुत्योश्श्रुत्यन्तराणां च चक्रधारणपरत्वमाश्रयणीयम् ॥

यत्तु—'देवा वै यज्ञाद्रुद्रमन्तरायन्' इत्यादिप्रत्यक्षसिद्धार्थप्रतिपादनपरवेदभागोपबृंहणस्य पुराणादेः प्रत्यक्षमूलकत्वसम्भवेऽपि मानान्तरानधिगतार्थप्रतिपादनपरविधिवाक्योपबृंहणपुराणादेः प्रत्यक्षमूलकत्वासम्भवेन पवित्रमन्त्रस्य शक्तितात्पर्यनिर्णयानुकूलस्य बुद्धिपरिकल्पितन्यायमूलत्वस्यैव वक्तव्यतया न्याय एव शरणीकरणीयः— इति ॥ तदपि न । मानान्तरानधिगतार्थप्रतिपादनपरविधिवाक्योपबृंहणस्यापि प्रत्यक्षमूलकत्वसम्भवात्, न्यायमूलकत्वमेव इति नियमानुपपत्तेः; इतरेषां

चानुपलब्धेरिति स्मृत्यधिकरणगुणसूत्रे अतीन्द्रियार्थप्रतिपादनपरोपबृंहणस्यापि प्रत्यक्षमूलकत्वस्यैवोक्तत्वेन तद्विरोधापत्तेश्च । अत एव अतीतानागतादिगोचरचतुर्मुखप्रसादादिलब्धसाक्षात्कारमूलकत्वमुपबृंहणस्योक्तं **श्रीरामायणे**—

"मच्छन्दादेव ते ब्रह्मन् प्रवृत्तेयं सरस्वती।"—

इत्यारभ्य,

"रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः ।
रामस्य सह सौमित्रे राक्षसानां तथैव च ॥
वैदेह्याश्चैव यद्वृत्तं प्रकाशं यदि वा रहः ।
तच्चाप्यकथितं सर्वं विदितं ते भविष्यति ॥
न ते वागनृता काव्ये का चिदत्र भविष्यति ।
कुरु रामकथां दिव्यां श्लोकबद्धां मनोरमाम् ॥" —इति ॥

न च–रामायणस्योक्तवचनेन भगवच्चरितवर्णन एव चतुर्मुखप्रसादजन्यसाक्षात्कारमूलकत्वं प्रतीयते, न तु मानान्तरानधिगतार्थवेदवाक्योपबृंहण इति–वाच्यम्; तस्योपलक्षणत्वात्। अत एव **श्रीमद्रामायणे**—

"वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ।"—इत्युक्तम् ।

तथा **विष्णुपुराणे**—

'संप्राप्तश्च तदा तत्र वसिष्ठो ब्रह्मणस्सुतः ।'—

इत्यारभ्य,

"पुराणसंहिताकर्ता भवान् वत्स भविष्यति ।
देवतापारमार्थ्यं च यथावद्वेत्स्यते भवान् ॥
प्रवृत्ते च निवृत्ते च कर्मण्यस्तमला मतिः ।
मत्प्रसादादसन्दिग्धा तव वत्स भविष्यति ॥
ततश्च प्राह भगवान् वसिष्ठो मे पितामहः ।
पुलस्त्येन यदुक्तं ते सत्यमेतद्भविष्यति ॥" —इति ॥

तथा श्रीमहाभारते आदिपर्वणि—

“तपसा ब्रह्मचर्येण व्यस्य वेदान् महामतिः ।
संस्कारोपगतं गुह्यं नानाशास्त्रोपबृंहितम् ॥
पुण्ये हिमवतः पार्श्वे मध्ये गिरिगुहालये ।
विशोध्य देहं धर्मात्मा दर्भसंस्तरमाश्रितः ॥
शुचिस्सुनियमोपेतश्शान्तात्मा तपसि स्थितः ।
भारतस्येतिहासस्य धर्मेणान्वीक्ष्य तां गतिम् ॥
प्रविश्य योगज्ञानेन सोऽपश्यत्सर्वमन्ततः ।
निष्प्रभेऽस्मिन्निरालोके सर्वतस्तमसाऽवृते ॥” —इत्यादि ॥

तत्रैव **मोक्षधर्मे** भगवतो बादरायणस्य नारायणप्रसादलब्धं प्रत्यक्षमुपबृंहणमूलमित्युक्तम्—

“पराशरसुतश्श्रीमान् व्यासो वाक्यमुवाच ह ।
मया हि सुमहत्तप्तं तपः परमदारुणम् ॥
भूतं भव्यं भविष्यच्च जानीयामिति सत्तमाः ।
तस्य मे तप्ततपसो निगृहीतेन्द्रियस्य च ॥
नारायणप्रसादेन क्षीरोदस्यानुकूलतः ।
प्रकाशकमिदं ज्ञानं प्रादुर्भूतं यथेप्सितम् ॥
तच्छृणुध्वं यथा ज्ञानं वक्ष्येऽसंशयमुत्तमम् ।
यथावृत्तं हि कल्पादौ दृष्टं मे ज्ञानचक्षुषा ॥
परमात्मेति यं प्राहुस्साङ्ख्ययोगविदो जनाः ।
महापुरुषसंज्ञां स लभते स्वेन कर्मणा ॥” —इति ॥

तत्रैव मोक्षधर्मे भगवान्—

“भूतभव्यभविष्याणां ज्ञानानां वेत्स्यसे गतिम् ।
ये ह्यतिक्रान्तगाः पूर्वं सहस्रयुगपर्ययाः ॥
तांश्च सर्वान्मयादिष्टो द्रक्ष्यसे नात्र संशयः ।

पुनर्द्रक्ष्यसि चानेकान् सहस्रयुगपर्ययान् ॥
अपि ध्यानान्मम मुने नैतद्वचनमन्यथा ।" —इति ॥

तस्मात्प्रत्यक्षमूलकतयैवोपबृंहणस्य प्रामाण्यमित्युपबृंहणानुरोधात्पवित्र-श्रुतेश्चक्रधारणविधायकत्वमङ्गीकर्तव्यं ; न्यायमूलकतया प्रामाण्येऽपि न्यायदार्ढ्यस्य पूर्वमुपपादितत्वात्तन्मूलकोपबृंहणानुरोधाच्च तथाऽङ्गी-कर्तव्यम् । अतीन्द्रियार्थेषूपबृंहणस्याप्रामाण्ये अपिस्मर्यतइत्यादिशारी-रकसूत्रे ह्यतीन्द्रियार्थव्यवस्थापकतयोपबृंहणोदाहरणानुपपत्तिः । एवं प्रमाणलक्षणे प्रतिपादितस्योपबृंहणस्यानर्थक्यापत्तिश्च ॥

यच्चोक्तं—अविवक्षितार्थेऽपि मन्त्रस्य पुराणेषूपबृंहणं दृश्यते ; यथा—

"सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः,
जनिताऽग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः"—

इति मन्त्रस्य सोमलतायां विष्ण्वादिजनयितृत्वासम्भवेन तज्जनयितृ-त्वांशे विवक्षारहितस्यापि,

"सोमं ससर्ज यज्ञार्थं सोमाद्द्यौस्समजायत ।
धरा वह्निश्च सूर्यश्च वज्रपाणिश्शचीपतिः ॥
विष्णुर्नारायणश्श्रीमान् सर्वं सोममयं जगत् ।"—

इति वायुसंहितायामुपबृंहणदर्शनात् ; तस्मान्नोपबृंहणानुसारेण पवित्र-मन्त्रस्य चक्रधारणपरत्वसिद्धिः—इति ॥ **तन्न** ; उपबृंहणविशेषस्याप्रामा-ण्यदर्शनमात्रेणोपबृंहणत्वावच्छेदेन तथात्वसाधने 'स प्रजापतिरात्मनो वपामुदक्षिदत्' इत्यादिवेदवाक्यविशेषस्य बाधितार्थकत्वदर्शनेन वेदत्वा वच्छेदेन तथात्वापत्तेः ; इदं रजतमिति ज्ञानस्याप्रामाण्यदर्शनमात्रेण ज्ञानत्वावच्छेदेन तथात्वसिद्धौ शून्यवादापत्तेः । एवं मन्त्रादिगतसोम-पदस्य तच्छरीरकपरमात्मपरत्वेन तादृशपरमात्मनश्च द्यावापृथिव्यादि-जनयितृत्वसम्भवादवतारविष्णुजनयितृत्वसम्भवाच्च । तथा सोमपदस्य परमात्मपर्यन्तत्वाभावेऽपि न क्षतिः, सूर्यादीनां कर्मद्वारा सोमसाध्य-

त्वात्, यज्ञैराराधितो भगवानपि लीलयाऽवतरतीति पुराणादिसिद्धत्वाच्च। तदाह **पराशरः**—

"देह्यनुज्ञां महाराज मा धर्मो यातु संक्षयम्।
हविषां परिणामोऽयं यदेतदखिलं जगत्॥" —इति॥

तथा चोपबृंहणानुसारेण पवित्रमन्त्रस्य चक्रधारणपरतया वेदमन्त्रकरणकविधिविषयतया च चक्रधारणस्य वैदिकत्वसिद्धिः। न च—प्राणाय स्वाहेति वेदमन्त्रान्विते प्रथमकबलभक्षणे व्यभिचाराद्वेदमन्त्रान्वितत्वं न वैदिकत्वसाधकमिति—वाच्यम्; प्रथमकबलभक्षणेऽपि वेदजन्येष्टसाधनत्वादिप्रकारकबोधविषयत्वादिरूपवैदिकत्वसत्त्वात्॥

यदपि—पद्मपुराणवचनं 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इत्यादिवत्, 'इत्येवं श्रुतयस्सर्वाः कथयन्ति वरानने' इत्यनेन कथञ्चिन्मन्त्रपदप्रकाश्यत्वं हेतुवन्निगद्य, "तस्माद्वै विधिवद्धार्याश्शङ्खचक्रादिहेतयः" इत्यनेन मन्त्रसिद्धं चक्रादिधारणं स्तौतीति न पाद्मोपबृंहणबलाच्चक्रादिधारणस्य वैदिकत्वसिद्धिः—इति॥ **तन्न**; कथयन्तीत्यस्य बोधयन्तीत्यर्थकतया मन्त्रजन्यबोधविषयत्वस्यैव प्रतीतेः, कथञ्चिन्मन्त्रपदप्रकाश्यत्वं निगद्यत इत्यस्याग्रहमूलकत्वात्, वेदोपबृंहणार्थं प्रवृत्तस्य पुराणस्य मन्त्रपदप्रकाश्यत्वे तात्पर्यासम्भवात्, 'तस्माद्वै विधिवद्धार्याः' इत्यनेन चक्रधारणे प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वप्रतीतेः, चक्रधारणविधानस्यैव बोधनेन स्तावकत्वकथनायोगाच्च। किञ्च—स्तावकत्वं नाम प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वाभाववति चक्रधारणे तद्बोधकत्वं वा विशिष्टवाक्यस्य प्रतीयमानार्थपरित्यागेन बलवदनिष्टाननुबन्धित्वलाक्षणिकत्वं वा? नाद्यः—अप्रामाण्यापत्तेः, प्रमाणान्तरबाधाभावे वृथा तत्कल्पनस्यानुचितत्वात्। अत एव न द्वितीयः, स्तावकत्वेऽपि नाविहितस्य स्तुतिरिति न्यायेन विध्युन्नयनावश्यंभावाच्च॥

यदप्युक्तं—वस्तुतस्तु न पुराणकर्तृसमुत्प्रेक्षितन्यायाभाससिद्धार्थकथनपरमिदं वचनं; किन्तु वैशेषिकसाङ्ख्यशैवागमप्रक्रियानुवादिपुराणभागेषु वैशेषिकादिसमुत्प्रेक्षितहेत्वाभासानुवादकवचनवत्पाञ्चरात्रप्रक्रियानुवादिपुराणभागेषु स्वमताभिनिवेशपिहिततत्त्वदृष्टिपाञ्चरात्रिकमतभ्रान्तिविप्रलिप्सादिसमुत्प्रेक्षितन्यायाभाससिद्धस्वमतानुगुणश्रुतियोजनाप्रकारानुवादकान्येतादृशोपबृंहणवचनानि तन्मताभिमानिपुरुषसंवादप्रदर्शनपूर्वकं निबद्धानीति नैतेषां तत्र तात्पर्यम्; शुक्तिका रजतमभादिति भ्रान्तिसिद्धरजतानुवादिवाक्यवत्परभ्रमसिद्धस्यैवार्थस्यानुवादात्। अत एव प्राचीनैः—'बहवः पुरुषा राजन् साङ्ख्ययोगविधायिनाम्' इति महाभारतवचनादात्मनानात्वमाशङ्क्य साङ्ख्यमतप्रक्रियानुवादित्वादात्मनानात्वपरत्वं नास्तीत्युक्तम्——इति॥

तदयुक्तं; यस्यार्थस्योत्तरत्र दूषणं प्रतिपाद्यते तदर्थप्रतिपादनपरश्रुतिपुराणादेर्भ्रान्तिसिद्धार्थानुवादपरत्वं, यथा सद्विद्यायां—तद्धैक आहुरसदेवेदमग्र आसीदिति वाक्यस्य तथात्वं, कथमसतस्सज्जायेतेत्युत्तरवाक्येन तन्निराकरणात्, दूषणाभावेऽपि तथात्वकल्पने च सर्वत्रापि तथात्वकल्पनसम्भवेन सर्वस्मृतीतिहासपुराणादीनामप्रामाण्यापत्तेः॥

एतेन—बहवः पुरुषा राजन्नित्यस्यापि साङ्ख्यप्रक्रियानुवादित्वं प्राचीनोक्तमयुक्तं; 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' इत्यादिश्रुतिसिद्धात्मनानात्वप्रतिपादनपरत्वाच्च॥

यच्चोक्तं—पाद्मोपबृंहणबलादिव शैवपुराणोपबृंहणबलात्पवित्रचरणश्रुत्योस्तप्तलिङ्गमुद्राधारणपरत्वप्रसङ्गः। तथा हि—

"ब्रह्मेति लिङ्गमाख्यातं ब्रह्मणस्पतिरीश्वरः।
पवित्रं तद्धि विख्यातं तत्सम्पर्कात्तनुश्शुचिः॥
ऋगित्याह पवित्रं ते विततं ब्रह्मणस्पते।

तस्मात्पवित्रं लिङ्गाख्यं धार्यं शैवमनामयम् ॥
तेनातप्ततनूरज्ञः"—

इत्यादिना,

'दीक्षया सहितस्साक्षादाप्नुयाल्लिङ्गमुत्तमम्' ।

इत्यन्तेन अगस्त्यं प्रति रैणुकेन पवित्रश्रुतेर्लिङ्गधारणपरतया व्याख्यातत्वात्—इति । तत्तुच्छम्; शैवपुराणस्य तामसत्वेन पाद्मपुराणस्य च सात्त्विकत्वेन तयोर्विरोधे पाद्मवचनस्यैव ग्राह्यत्वात्, भगवच्छास्त्रे च पवित्रश्रुतेस्सौदर्शनत्वाभिधानेन तद्विरोधाच्च; भगवच्छास्त्रमूलकमनुस्मृतिविरोधे स्मृत्यन्तराणामनादरणीयतायाः 'मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यते' इत्यादिवचनसिद्धत्वेन साक्षाद्भगवच्छास्त्रविरोधेऽनादरणीयतायाः कैमुतिकन्यायसिद्धत्वात् ॥

ननु—शैवपुराणस्य तामसत्वे पाद्मपुराणस्य च सात्त्विकत्वे किं मानं, किं वा मानं तामसानामनादरणीयत्वे—इति चेत्। उच्यते—

"वैष्णवं नारदीयं च तथा भागवतं परम् ।
गारुडं च तथा पाद्मं वाराहं शोभनं स्मृतम् ।
सात्त्विकानि पुराणानि शोभनानि शुभानने ।
ब्रह्माण्डं ब्रह्मकैवर्तं मार्कण्डेयं तथैव च ॥
भविष्यद्वामनं ब्राह्मं राजसानि निबोध मे ।
शैवमाग्नेयकं चैव लैङ्गं स्कान्दं तथैव च ॥
कौर्मं चैव तथा मात्स्यं तामसानि प्रचक्षते ।"

इति पाद्मपुराणवचनैस्सात्त्विकराजसतामसविभागस्य,

"नाद्रियेत पुराणादीन् राजसांस्तामसांस्तथा ।
अनीशानां परेशत्वं वृथा यत्रोपवर्ण्यते ॥"

इति भारद्वाजवचनेन तामसानामनुपादेयत्वस्य च सिद्धेः; किं चानन्यथासिद्धमेवोपबृंहणं श्रुत्यर्थनिर्णयाय प्रभवति; 'ब्रह्मेति लिङ्गमा-

ख्यातं' इत्याद्युपबृंहणं च तप्तलिङ्गमुद्राधारणांशे नानन्यथासिद्धं; तस्योपबृंहणस्य सुदर्शनपरत्वेनाप्युपपत्तेः। तथा हि—ब्रह्मेति लिङ्गमाख्यातमित्यस्यायमर्थः—ब्रह्मेतिशब्देन लिङ्गं भगवच्चिह्नं सुदर्शनमाख्यातं, एवम्भूतस्य सुदर्शनस्य ईश्वरो नारायणः पतिर्नियन्ताऽपि 'पतिं विश्वस्यात्मेश्वरं शाश्वतम्', 'निरुपाधीश्वरत्वं तु वासुदेवे प्रतिष्ठितम्' इत्यादिश्रुतिस्मृतिष्वीश्वरशब्दस्य नारायणे प्रयोगदर्शनात्; तत् प्रसिद्धं सुदर्शनं पवित्रं, तत्सम्पर्कात्तनुश्शुचिः, पवित्रं ते विततमिति ऋगाहेति योजना। तस्माल्लिङ्गाख्यं चिह्नाख्यं। शैवं—शिवस्य नारायणस्येदमिति शैवं, 'शाश्वतं शिवमच्युतं' इत्यादौ नारायणेऽपि शिवशब्दप्रयोगदर्शनात्; यद्वा—शिवेन रुद्रेण धार्यमाणत्वाच्छैवं, वैष्णवानामहं यथेति भागवतादौ शिवस्य वैष्णवोत्तमत्वोक्तेस्तस्यापि चक्रधारणसिद्धेः। तेन विष्णुचक्रेणातप्ततनूरज्ञः; तप्ततनूर्विशेषज्ञ इत्यर्थः। दीक्षया—तापादिसंस्काररूपया; सहितोऽधिकारी—उत्तमं भगवच्चक्रादिचिह्नं, तत्सारूप्यमिति यावत्; आप्नुयात्—प्राप्नोति। यदि लिङ्गशब्दश्शिवलिङ्गपरस्स्यात् तदोपबृंहणानुसारेण तप्तलिङ्गधारणं श्रुतिविहितमिति तप्तलिङ्गं वैदिकैर्धार्यं स्यात्; न हि वैदिकेषु केनापि तद्धार्यते। न च—पाशुपतव्रतादिशिवधर्मतत्फलकैलासादिप्राप्तिप्रतिपादकपूर्वापरवाक्यसन्दर्भमध्यगतलिङ्गपदस्य शिवलिङ्गपरत्वमुचितं, न तु विष्णुचिह्नभूतचक्रादिपरत्वं, प्रकरणविरोधादिति—वाच्यम्; शिवलिङ्गपरत्वे सात्त्विकपुराणविरोधेनोपबृंणस्यैवाप्रामाण्यापत्तेः, शिवस्य चक्रादिधारणेन वैष्णवोत्तमत्वरूपपरमोत्कर्षप्रतिपादकतया प्रकरणविरोधाभावाच्च॥

यदपि—'तस्मात्पवित्रं लिङ्गाख्यं शैवं धार्यमनामयम्'—इत्यत्र शिवलिङ्गशब्दयोः क्रमेण नारायणतच्चक्रवाचित्वाश्रयणं न सम्भवति; सुरभयस्सुमनसः, रामार्जुनावित्यादौ यत्रोभयपदं नानर्थकं,

तत्र परस्परसमभिव्याहारेण तत्तदर्थविशेषरूढिसमुन्मेषवत् शिवलिङ्गपदयोः परस्परसमभिव्याहारेण शशाङ्कशेखरतत्प्रतिकृतिरूढ्योरेव समुन्मेषात्--इति । तन्न; यत्र पदद्वयं नानार्थकं तत्र परस्परसमभिव्याहारस्य तात्पर्यग्राहकत्वेऽन्योन्याश्रयात्, शिवपदस्य रुद्रपरत्वनिश्चयं विना लिङ्गपदस्य तत्प्रतिकृतिपरत्वनिश्चयासम्भवात् लिङ्गपदस्य तत्प्रतिकृतिपरत्वनिश्चयं विना शिवपदस्य रुद्रपरत्वनिश्चयायोगादिति ॥

यदपि—"यत्ते गात्रादग्निना पच्यमानादभिशूलं नहतस्यावधावति, मा तद्भूम्या माश्लिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातम्"—इति मन्त्रेण तप्तशूलधारणमपि प्रसञ्जनीयम्—इति । तन्न; इष्टसाधनत्वानिष्टनिरासकत्वान्यतरप्रकारकवेदजन्यबोधविषयत्वस्यैव धर्मत्वव्याप्यत्वेन धर्मत्वापादकत्वेऽपि केवलवेदजन्यबोधविषयत्वस्य धर्मत्वानापादकत्वात्; अन्यथा न कलञ्जं भक्षयेदिति वेदजन्यबोधविषयस्य कलञ्जभक्षणादेरपि धर्मत्वापत्तेः । न च–अनिष्टसाधनत्वाप्रकारकवेदजन्यबोधविषयत्वस्य धर्मत्वव्याप्यत्वाङ्गीकारान्नोक्तदोष इति–वाच्यम्; तथाऽपि 'इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत्' इत्युक्तयतिहननादेरपि धर्मत्वप्रसङ्गात्; तथा चोक्तान्यतरप्रकारकवेदजन्यबोधविषयत्वस्य त्रिशूलधारणेऽभावाद्धर्मत्वापादनं न युक्तम् ॥

न च–अभिशूलमग्निना शूलसंसृष्टेनाग्निना, पच्यमानात् तज्जन्यवर्तमानकालीनकिणाश्रयात्, ते गात्रात्, यदल्पमप्यवधावति चित्याग्निदाहकाले अज्ञातं सत् पतति; तदङ्गं भूम्यां माश्लिषत् मा लग्नं भूत्, उशद्भ्यः कामयमानेभ्यः, रातं दत्तमस्त्वित्यर्थात् अग्नितप्तशूलजन्यकिणस्य देवप्रीतिरूपेष्टसाधनत्वबोधनाद्धर्मत्वापादनं युज्यत इति–वाच्यम्; पच्यमानादित्यनेन पाकस्य वर्तमानत्वबोधेऽपि किणस्य तदबोधात्—लडाद्यर्थवर्तमानत्वादेर्धात्वर्थेऽन्वयेऽपि तज्जन्यफलेऽन्वयासम्भवात्;

अन्यथा मध्यमार्गगन्तरि काशीं गच्छतीत्यादिप्रयोगानुपपत्तेः, विक्लित्त्य-नुकूलव्यापारस्य पचधात्वर्थत्वेन किणस्य फलत्वाभावाच्च । न च—अभिशूलं शूलसंसृष्टात् अग्निना पच्यमानात् चित्याग्निना पच्यमानादित्यर्थाङ्गीकारान्न विरोधः, निहतस्येत्यनेन मरणानन्तरकालीनत्व-बोधादिति—वाच्यम्; तथा सति शूलसंसृष्टत्वमात्रप्रतीतावपि तप्तशूल-धारणाप्रतीतेरापादकासिद्धेः ॥

वस्तुतस्तु—अश्वमेधे श्रूयमाणस्यास्य मन्त्रस्याश्वपरत्वमेव युक्तं; तथैव भट्टभास्करादिभिर्व्याख्यातत्वात्; "हे अश्व अग्निना पच्यमानात्ते गात्रात्, यदल्पमप्यवधावति अज्ञातं सत् पतति, पृथिव्यां निहतस्य निहन्यमानस्य तव अभिशूलं शूले सक्तमङ्गं वा अवधावति, तदङ्गं भूम्यां मा श्लिषत् मा लग्नं भूत्, उशद्भ्यः कामयमानेभ्यो रातं दत्तमस्तु" इति तद्भाष्यात्; तस्मादस्य मन्त्रस्य तप्तशूलधारणे धर्मत्वापादकत्व-कथनमसङ्गतमेव ॥

यदपि—स्मृतिपुराणतन्त्रादिषु यानि तापरूपाणि कर्माण्युपदिष्टानि तद्विषयतयैवायं मन्त्रो योजनीयः; तथा हि—सन्ति बहवस्तापाः, 'ग्रीष्मे पञ्चाग्निमध्यस्थस्सूर्याभिमुखमास्थितः'—इत्यादिस्मृतिप्रतिपन्न-वैखानसधर्मभूतपञ्चाग्निसूर्यादितापः, तथा योगशास्त्रविहितप्राणायाम-सङ्क्षुभितजाठराग्निसन्तापः, सुरापानमरणान्तिकप्रायश्चित्तभूततप्तसुरागो-मूत्रादिपानसम्पादितसकलदेहतापः, मृतशरीरदाहात्मकचित्याग्निदाहः, अग्निवैद्यमतःपरमिति वैद्यशास्त्रप्रतिपन्नसन्निपातादिरोगनिवर्तकाग्निवै-द्यदाहः, श्रोत्रियस्य पारलौकिकज्ञानवतस्सम्पातायातपापानुष्ठानसम्पन्न-पश्चात्तापः, ब्रह्महत्यादिपातकिनां देशान्तरगमनेऽपि तत्कृतपापपरि-ज्ञानाय तप्तकबन्धभगमुद्रादितापश्च । सम्भाव्यते च तेषां सर्वेषां तापानां तप्तपदेन प्रत्ययः । युज्यते च पवित्रमन्त्रोत्तरार्धगतेन तत्पदद्वयेन 'तेनरक्तं रागात्', 'तत्र भवः', तत्र जातः', 'तस्यापत्यम्'

इत्यादिव्याकरणसूत्रगततत्पदवत् शब्दासन्निहितस्यापि योग्यताबलेन बुद्धिमागतस्य तत्तत्तापविशेषसाध्यफलस्य परामर्शः। तथा च—अग्निसाध्यतापानुष्ठानसमये ब्रह्मणस्पतिशब्देन अग्नेस्सम्बोधनं कार्यं; एवं सूर्यादिसाध्यतापानुष्ठानसमये सूर्यादीनां साधनतया तत्सम्बोधनं कार्यम्। यद्वा—अग्निसाध्यतापानुष्ठानसमयेऽपि सूर्यादीनां सर्वकर्मसाक्षितया ब्रह्मणस्पतिशब्देन तेषामन्यतमस्य सम्बोधनं युज्यते; 'अग्निर्वाग्भूत्वा मुखं प्राविशत्', 'अग्निर्मे वाचि श्रितः' इत्यादिश्रवणात्। यद्वा—सुषुम्नस्सूर्यरश्मिरित्यादिश्रुत्या सुषुम्नानाडीरूपेणादित्यस्य जठरवृत्तिवैश्वानररूपेणाग्नेः प्राणपञ्चकरूपेण वायोरन्तर्यामिरूपेण परमेश्वरस्य सर्वगात्रव्याप्तिवचनमुपपद्यते। पवित्रशब्दश्च—'पूतं पवित्रं मेध्यं च' इत्यमरकोशाभिधानात्, 'अग्निः पवित्रं स मा पुनातु, सूर्यः पवित्रं स मा पुनातु', 'असौ वा आदित्योऽच्छिद्रं पवित्रं', 'यत्ते पवित्रमर्चिषि, अग्ने विततमन्तरा, ब्रह्म तेन पुनीमहे, उभाभ्यां देव सवितः, पवित्रेण सवेन च', 'पाणिलिङ्गं पवित्रम्' इत्यादिवैदिकप्रयोगाच्च सूर्याग्निस्वरूपतद्रश्मिजालशिवलिङ्गादिषु यथायोगं वर्तनीयः। तथा च पवित्रशब्दस्य सूर्यादिस्वरूपपरत्वे—हे ब्रह्मणस्पते हे अग्ने यत् त्वत्स्वरूपं तेनादग्धतनूः तत्तदुचितं फलं नाश्नुते—इत्यर्थो ग्राह्यः; पवित्रशब्दस्य रश्मिजालपरत्वे—मेध्यं यद्रश्मिजालं तेनादग्धतनूस्तद्योग्यं फलं नाश्नुत इत्यादियोजनाभेदा यथासम्भवमूहनीयाः॥ —इति॥

अत्रोच्यते—तत्र हि पञ्चाग्निसूर्यादितापपरत्वं तावदयुक्तं, चतुर्मुखनियामकत्वस्य सूर्ये बाधेन ब्रह्मणस्पत इत्यनेन सम्बोध्यत्वानुपपत्तेः, सूर्यस्य वेदस्वरूपतायाः 'सैषा त्रय्येव विद्या तपति' इत्यादिश्रुतिसिद्धत्वेऽपि तन्नियामकत्वेन प्रसिद्ध्यभावाद्ब्रह्मशब्देन वेदस्य ग्रहणेऽप्यनिस्तारात्, सूर्यस्वरूपस्य तद्विग्रहस्य वा विभुत्वाभावेन गात्राणि पर्येषीत्यस्यानुपपत्तेः। न च—'आदित्यश्चक्षुर्भूत्वाऽक्षिणी

प्राविशत्' 'सुषुम्नस्सूर्यरश्मिः' इत्यादिश्रुतिभिरिन्द्रियाभिमानिदेवतात्वेन सुषुम्नानाडीरूपरश्मिद्वारेण च व्याप्तिरादित्यस्याप्युपपद्यत इति—वाच्यम्; प्रतियोगिवैयधिकरण्याघटितगात्रत्वव्यापकत्वस्य तावताऽपि बाधात्, नेत्राद्यवच्छेदेन सतोऽप्यादित्यस्यान्यदेशावच्छेदेनाभाव-सत्त्वात्, विश्वतश्शब्दपरीत्युपसर्गाभ्यां तादृशव्यापकत्वस्यैव बोधनात्, पदान्तरासमभिव्याहृतस्य प्रभुशब्दस्य निरुपाधिकप्रभुत्वावच्छिन्न-वाचकत्वस्याप्यनुपपत्तेश्च ॥

पवित्रं विततमित्यस्य मेध्यं यद्रश्मिजालमित्यर्थोऽपि न युक्तः, रश्मिजालपदस्याध्याहारप्रसङ्गात्। तच्छब्दद्वयस्य बुद्धिस्थतत्तत्साध्य-फलपरत्वमपि न युक्तं; अनिर्दिष्टपरामर्शकत्वायोगात्, तेन रक्तं रागादित्यत्र रागादित्यस्य रञ्जकद्रव्यवाचिपदादित्यर्थकतया निर्दिष्ट-स्यैव रञ्जकद्रव्यस्य तच्छब्देन परामर्शात्; 'तत्र जातः' 'तस्यापत्यं' इत्यादावपि ङ्याप्प्रातिपदिकादित्यतः प्रातिपदिकादित्यनुवृत्त्या प्राति-पदिकशब्दस्य च अर्थवदधातुरित्यनेनार्थविशिष्टशब्दस्वरूपे परिभाषि-तत्वेन तत्परतया तद्घटकप्रातिपदिकार्थस्य तच्छब्देन परामर्शाद-निर्दिष्टपरामर्शायोगात्। अस्तु वा तत्रागत्याऽनिर्दिष्टपरामर्शः, तथाऽपि प्रकृते गत्यन्तरस्योपपादितत्वेन तदयोगात् ॥

एतेन योगशास्त्रविहितप्राणायामादिसङ्क्षुभितजाठराग्निसन्तापादि-परत्वमपि निरस्तम्; "अग्निः पवित्रं स मा पुनातु, सूर्यः पवित्रम्" इत्यादौ सूर्यशब्दस्याग्नित्वाद्यवच्छिन्नपरत्वे घटो घट इतिवन्निराकाङ्क्षत्वप्रसङ्गेन सहप्रयोगस्य तद्धर्मावच्छिन्ने शक्तिकुण्ठकस्य तद्धर्मावच्छिन्नशक्ति-साधकतयोपन्यासस्याज्ञानमूलकत्वात्, ते पवित्रमित्यस्य त्वत्स्वरूप-मित्यर्थे अभेदे षष्ठ्या अस्वारस्यात्, अतप्ततनूरित्यत्र प्राणायामसङ्क्षुभित-जाठराग्निनेत्यध्याहारापत्तेश्च ॥

पाणिलिङ्गं पवित्रमिति लिङ्गे पवित्रशब्दप्रयोगोऽप्यसिद्धः ; पाणिलिङ्गं पवित्रमिति वाक्यस्यान्ध्रैर्यजुर्वेदारण्यके पाठेऽपि विद्यारण्यभट्टभास्करादिभिरव्याख्यातत्वेन तादृशपाठस्याप्रामाणिकत्वात्, द्राविडानां शिष्टानां पाठाभावात्, पाणिमन्तं पवित्रमिति पाठाच्च । किञ्च पवित्रश्रुतेः परमात्मपरतया सूर्यादिपरत्वासम्भवः । तदाह भगवान् शौनकः—

"आध्यात्मिकं पवित्रं ते सूक्तं जप्त्वाऽऽप्लुतश्शुचिः ।
गतिमिष्टामवाप्नोति विन्दते चेह वृद्धताम् ॥" —इति ॥

एतदेव शौनकवचनमनुरुध्य सामवेदभाष्यकृता भरतस्वामिना पवित्रश्रुतिः परमात्मपरतया व्याख्याता । न चैवं–सौदर्शनत्वविरोध इति–वाच्यम् ; परमात्मपरस्यापि तदायुधत्वेन सुदर्शनपरत्वाविरोधात् । अपि च पवित्रमित्यग्निरिति श्रुत्या पवित्रश्रुतेस्सुदर्शनधारणपरतया व्याख्यातत्वेन अर्थान्तरपरत्वकथनमत्यन्तमप्रामाणिकम् ॥

यत्तु—"नाङ्कयेन्न दहेद्देहं दहेच्चेत्कामकारतः ।
नाधिकुर्वन्ति दग्धाङ्गाश्श्रौतस्मार्तेषु कर्मसु ॥"—

इत्यादिस्मार्तनिषेधवचनमूलत्वेनायं मन्त्रो योजनीयः । तथा हि–हे ब्रह्मणस्पते ब्राह्मणोत्तम, त्वं प्रभुः स्वतन्त्रोऽसि, पवित्रं पवित्राणि पूतानि, सुपां सुलुगित्यनुशासनाद्विभक्तिव्यत्ययः ; विश्वतो गात्राणि करचरणादीनि सर्वाङ्गानि, विस्तीर्णं यथा भवति तथा पर्येषि धारयसि; तदङ्गानां पवित्रत्वं च 'यावतीर्वै देवतास्तास्सर्वा वेदविदि ब्राह्मणे वसन्ति' इतिश्रुतेः । तस्मात्तप्तमुद्रा न धार्येत्यभिप्रेत्य परमकारुणिकी श्रुतिराह अतप्तेति ; आय विष्णवे, तप्ता तनूर्येन तथोक्तः, अत एवामः–अपक्वान्तःकरणः, तत्–प्रसिद्धं, नाश्नुते–न भजते ; एवं–विष्णुरूपेण चक्रेण तप्ता तनूर्यस्य स तथोक्त इति वा विग्रहः । न केवलं तप्ताङ्गानामिष्टाभावमात्रं; अनिष्टमप्यस्तीत्याह—शृतास

इति ; शृताः पक्वाः, इत् तप्तचक्रमुद्रासन्तापं, वहन्तः समाशत। अर्थात्पाक एव कर्मत्वेन सम्बध्यते, स च योग्यत्वात्कुम्भीपाकादिरूपः। यद्वा—अतप्तेति तपसन्ताप इत्यस्य लङात्मनेपदप्रथमपुरुषैकवचनं, छान्दसमेकपदत्वं, क्तभावार्थं त्वयाऽपि तदनुसरणात्। अस्तु वा द्वैपद्यं, तथाऽपि न दोषः ; तेनायमर्थः—यस्य तनूरङ्गानि, नातप्त न दग्धवान्, स आमः ; अत एव ब्राह्मणोत्तमस्तत्पदमश्नुते। एवमतप्ताङ्गानां फलमुक्त्वा तप्ताङ्गानामनिष्टमाह शृतास इति। तच्छब्देन पूर्ववदेव कुम्भीपाकस्य परामर्शः, तथा च ब्राह्मणोत्तमैस्तप्तमुद्रा न धार्येति फलितोऽर्थः—इति ॥

तदयुक्तम्; पतिशब्दस्य स्वामित्वनियामकत्वावच्छिन्नशक्तस्योत्तमपरत्वे शरीरत्वावच्छिन्नशक्तस्य गात्रशब्दस्य करचरणादिपरत्वे व्याप्त्यर्थकस्य पर्येषीत्यस्य धारणपरत्वे च लक्षणाप्रसङ्गात्। भिन्नवचनान्तयोः पवित्रगात्रशब्दयोस्सामानाधिकरण्यायोगात्; विभक्तिव्यत्ययकल्पनस्य चागतिकत्वात् ; गात्राणि त्वं धारयसीत्यनेनैव गात्रेषु त्वत्सम्बन्धित्वसिद्ध्या तव गात्राणि त्वं धारयसीत्यस्यावक्तव्यत्वेन त इत्यस्यानन्वयात् ; कर्मपारतन्त्र्यशास्त्रपारतन्त्र्यभगवत्पारतन्त्र्याद्याश्रये ब्राह्मणे स्वातन्त्र्यस्य बाधेन प्रभुशब्दस्य बाधितार्थकत्वात् ; विततमित्यस्य पर्येषीत्यनेनान्वये व्यवहितान्वयप्रसङ्गात् ; अनेकदेशसम्बन्धरूपविततत्वस्य पतनप्रतिबन्धकसंयोगानुकूलव्यापाररूपधात्वर्थे बाधेनान्वयासम्भवात् ; गात्रत्वव्यापकपतनप्रतिबन्धकसंयोगानुकूलव्यापारस्य स्वीयावयवमात्रधारके ब्राह्मणे बाधेन विश्वतो गात्राणि पर्येषीत्यस्यानुपपत्तेश्च ॥

न च—ते विश्वतोगात्राणि पर्येषीत्यनेन त्वत्सम्बन्धिगात्रत्वव्यापकसंयोगानुकूलव्यापारबोधनान्नानुपपत्तिः, अत एव त इत्यस्यापि सार्थक्यमिति—वाच्यम्; तथाऽपि त्वत्सम्बन्धिगात्राणि त्वं धारयसीत्यस्या-

नावश्यकतया पर्येषीत्यस्य वैयर्थ्यप्रसङ्गात् । आय विष्णवे, तप्ता तनूरित्यर्थोऽपि न युक्तः; तप्तपदस्य करणसाकाङ्क्षत्वेन चक्रेणेत्यध्याहारावश्यकतया वृत्त्यघटकपदार्थानन्वितस्वार्थकत्वाभावेनासामर्थ्यात्तप्तपदस्य समासानुपपत्तेः ॥ न च—इयमनुपपत्तिर्भवन्मतेऽपि समाना, शरैश्शातितपत्र इत्यादाविव वृत्त्यघटकपदार्थानन्वितेत्यत्राभेदान्वयं निवेश्य सामर्थ्योपपादनं चास्माकमपि तुल्यमिति—वाच्यम् ; तथाऽपि तप्तपदयोगे चतुर्थीसमासस्यानुशासनाभावेनासाधुत्वात् ॥

एवं—एन विष्णुरूपेण चक्रेण तप्ता तनूरित्यर्थोऽपि न युक्तः ; चक्रस्य विष्णुशरीरत्वेऽपि विष्णवभिन्नत्वाभावात्, अशब्दस्य विष्णुशरीरत्वावच्छिन्नपरत्वे च लक्षणाप्रसङ्गात् । अतप्ततनूर्न तदामो अश्नुत इत्यनेन दग्धाङ्गस्येष्टाभावमुक्त्वाऽनिष्टप्राप्तिप्रतिपादनाय शृतास इत्यादिकमित्यपि न सत्; तथा सति शृतास इद्वहन्त इति कर्तृवाचकपदवैयर्थ्यात्, अतप्तनूर्न तदामोऽश्नुते तत्कुम्भीपाकमश्नुत इत्येव वक्तव्यत्वात्, तच्छब्दस्यानिर्दिष्टकुम्भीपाकपरत्वायोगाच्च । अतप्तेति पदच्छेदमङ्गीकृत्य व्याख्याऽपि न साधीयसी; यस्य तनूर्नातप्तेत्यनेन यत्सम्बन्ध्यवयवकर्मकतप्तचक्रकरणकदाहाभावः स ब्राह्मणोत्तमस्तत्पदमश्नुत इत्यर्थस्य प्रतीयमानस्य बाधात्, यस्य चक्राङ्कनं नासीत्तत्पुरुषस्य तत्पदेनोपादाने तदवयवकर्मकतादृशदाहाप्रसिद्ध्या तदभावस्य सुतरामप्रसिद्धेः, यत्पदेन चक्राङ्कितोपादाने तदीयावयवकर्मकतादृशदाहस्य प्रसिद्ध्या तदभावस्यान्यत्र प्रसिद्धत्वेऽपि तस्य मोक्षप्राप्तिरित्यर्थप्रसङ्गेन भवतामनिष्टापत्तेः ॥ न च—यत्पदेनानङ्कित एवोपादेयः तथाऽपि नाप्रसिद्धिः, तादृशदाहत्वावच्छेदेन तदीयतनुकर्मकत्वाभावबोधादिति--वाच्यम्; रूपपरावृत्त्यनुकूलव्यापाररूपतपधात्वर्थघटकरूपपरावृत्तित्वावच्छेदेन तनूरिति द्वितीयान्तार्थतनुवृत्तित्वाभावस्य हि बोधो वाच्यः ; स च—बाधितः, सूर्यकिरणादि-

जन्यपरावृत्तेस्सर्वसाधारण्यात्; तप्तचक्रसंयोगात्मकव्यापारजन्यरूपपरावृत्तित्वावच्छेदेन तदभावस्याबाधेऽपि तेन रूपेण रूपपरावृत्तेर्धातोरनुपस्थित्या तथा बोधासम्भवात्। तादृशरूपपरावृत्त्यनुकूलव्यापारलाक्षणिकत्वे च धातोर्लक्षणैव दोषः। एवमतप्तेत्यस्य क्रियापदत्वे यत्तच्छब्दाध्याहारप्रसङ्गः; अतप्ततनूरित्यस्य बह्वृचैरेकपदत्वेन पाठात्; शाखान्तरे पदकाराप्रवृत्तावपि एकत्र निर्णीतश्शास्त्रार्थोऽपरत्रापीति न्यायात् बह्वृचपाठानुरोधेनैकपदत्वस्यैवौचित्याच्च ॥

यदपि—स्वतोऽध्ययनसिद्धपदविभागाभावेनान्तरङ्गस्ववाक्यार्थपर्यालोचनया पदव्यवस्थायां सम्भवन्त्यां बहिरङ्गशाखान्तरीयपदाध्ययनानुसारेण पदव्यवस्थाया अयुक्तत्वात्—इति। तन्न; पदद्वयकल्पने पूर्वोक्तरीत्या वाक्यार्थस्य बाधेन तदबाधनिर्वाहायाप्यैकपद्यकल्पनाया एव युक्तत्वात्। किं च—प्रत्यक्षशतपथश्रुतिविहितस्य सुदर्शनधारणस्य निषेधासम्भवादनुपपत्तेश्चोक्तार्थोऽनुपपन्नः। तथा हि—किं प्राप्तस्य निषेधः, उताप्राप्तस्य? आद्येऽपि रागाच्छास्त्राद्वा? रागोऽपि किं भोजनादाविव सुखसाधनत्वज्ञानात्, उत ख्यातिलाभाद्यर्थत्वज्ञानात्? नाद्यः—असिद्धेः, तस्य दुःखहेतुतयैवानुभूयमानत्वात्। न द्वितीयः—यद्रूपावच्छिन्नस्य रागात्प्राप्तिस्तद्रूपावच्छिन्नस्य निषेधेऽपि ख्यात्याद्यप्रयोजनकस्य चक्रधारणस्य निषेधायोगात्। नान्त्यः—शास्त्रप्राप्तस्य निषेधासम्भवात्, अन्यथा शास्त्राप्रामाण्यापत्तेः। न चरमः—शशशृङ्गं नास्तीतिवदप्रसक्तनिषेधस्याशक्यत्वादप्रयोजकत्वाच्च ॥ न च—उक्तरीत्या स्वात्महननकेशोल्लुञ्छनादेरपि निषेधोऽनुपपन्नस्स्यादिति—वाच्यम्; तत्रासच्छास्त्रात्प्राप्तस्यैव निषेधाङ्गीकारादिति ॥

इति पवित्रश्रुतिविचारः

एवं चरणश्रुतिरपि सुदर्शनधारणे प्रमाणम् ॥

चरणश्रुतेस्तावदयमर्थः ॥ चरणं–परगतिसाधनं सुदर्शनं, चरणशब्दस्य परगतिसाधनत्वावच्छिन्ने योगशक्तेस्सुदर्शनत्वावच्छिन्ने रूढिशक्तेश्च सत्त्वात्, 'चरणं प्राङ्गणे चक्रे' इतिकोशात् । पवित्रं–परिशुद्धिकरं, परिशुद्धिश्च प्रत्यवायाभावप्रकारकभगवत्सङ्कल्पः, विशेष्यतासम्बन्धेन तादृशसङ्कल्पं प्रति स्वाश्रयवह्निसन्तप्तमुद्रासंयुक्तभुजघटितदेहवत्तासम्बन्धेन सुदर्शनस्य हेतुत्वात्तस्य परिशुद्धिकरत्वोपपत्तेः । यद्यपि–पवित्रशब्दस्यापि सुदर्शनत्वावच्छिन्ने रूढिरस्ति, तथाऽपि–विशिष्टवाचकानां पदानां पृथग्विशेष्यवाचकपदसमवधाने विशेषणमात्रपरत्ववत् धर्मद्वयावच्छिन्नवाचकपदानामप्येकधर्मावच्छिन्नवाचकपदान्तरसमवधाने तदितरधर्मावच्छिन्नमात्रपरत्वस्य 'कुर्यां हरस्यापि पिनाकपाणेः' इत्यादाविव वक्तव्यतया सुदर्शनत्वावच्छिन्नवाचकचरणपदसमभिव्याहारात्पवित्रशब्दस्य योगार्थमात्रपरत्वं बोध्यम् ।

न च–विनिगमनाविरहाच्चरणशब्दस्यैव योगार्थमात्रपरत्वमितिवाच्यम्; 'चरणं नो लोके' इत्याद्युत्तरवाक्यानुरोधेन चरणशब्दस्य विशेष्यवाचकत्वेन विनिगमकसत्त्वात् । विततं–संस्कृतमुद्रात्वव्यापकं, संस्कृतमुद्रासामान्ये समाश्रितानुग्रहार्थं सन्निहितमास्त इति विततपदार्थविधेयको बोधः । येन पूतः–यज्जन्यपापाभावप्रकारकभगवत्सङ्कल्पविषयीकृतः; दुष्कृतानि तरति–दुष्कृतनाशानुकूलव्यापाराश्रयः, तादृशव्यपारश्चक्रधारणरूप एव, नाशानुकूलव्यापारार्थकतरतिधात्वर्थतावच्छेदकनाशरूपफलस्य प्रतियोगितासम्बन्धेन दुष्कृतेषु सत्त्वात्; घटं नाशयेदित्यादौ घटादेरिव तेषां कर्मता बोध्या । न च–प्रति-

योगितासम्बन्धेन पापनाशं प्रति स्वाश्रयभुजघटितदेहावच्छिन्नत्व-कालिकविशेषणत्वोभयसम्बन्धेन तप्तचक्रसंयोगस्य कारणत्वे प्रायश्चित्तादीनां वैयर्थ्यमिति–वाच्यम्; स्वसमानकालीनपापानां चक्रधारणेन नाशेऽप्यनन्तरकालीनपापनिरासकतया तेषां सार्थक्यात्। अन्यथा—

"सन्ध्यामुपासते ये तु सततं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥"

इत्यादिशास्त्रात् सन्ध्यावन्दनादीनामपि पापनिवर्तकत्वोक्त्या तेषां वैयर्थ्यप्रसङ्गस्य दुर्वारतापातात्॥

यदि च–केषांचिदेव पापानां सन्ध्यावन्दनादिभिर्नाश इति न तद्वैयर्थ्यं; अथवा विधूतपापा इत्यनेन तदकरणप्रयुक्तप्रत्यवाय-परिहार एव विवक्षित इति नोक्तदोषः–इति विभाव्यते। तदा प्रकृतेऽपि तुल्यं; तरति दुष्कृतानीत्यत्र तरतेरभावप्रयोजक-धर्मार्थकत्वेन दुष्कृतानीत्यस्य प्रत्यवायार्थकत्वेन तथैवार्थसम्भवात्, येन पूत इत्यस्य यज्जन्यप्रत्यवायाभावप्रकारकसङ्कल्पविषय इत्यर्थात्। पवित्रेण–परिशुद्धिकरेण, शुद्धेन–निरस्तसमस्तदोषगन्धेन, तेन–सुदर्शनेन, धृतेनेति शेषः; पूताः वयं, अरातिं–शत्रुं, भगवत्साक्षात्कार-प्रतिबन्धकमिति यावत्; पाप्मानं–पापं प्रत्यवायं वा, अतितरेम–नाशानुकूलव्यापाराश्रयाः अभावप्रयोजकधर्माश्रया वा, लोकस्य द्वारं–भगवल्लोकप्राप्त्युपायभूतं, अर्चिर्ज्योतिर्महश्शब्दैर्ज्वालाकिरणप्रकाश-भेदस्य विवक्षितत्वान्न पौनरुक्त्यं; भ्राजमानं–शोभमानं, अमृतस्य–परमपुरुषार्थस्य मोक्षस्य, धाराः–अनुभवप्रकारान्, दोहमानं–दुहानं, मुक्तिप्रदमित्यर्थः; लोकस्य द्वारमित्यनेन स्वरूपयोग्यत्वरूपकारणत्वस्य दोहमानमित्यनेन च फलोपधायकत्वस्य च विवक्षणान्न पौनरुक्त्यं; एतादृशं चरणं–सुदर्शनं, नः–अस्मान्, लोके परमपदे, सुधितान् सुप्रतिष्ठितान्, दधातु करोतु। मोक्षकामो नरस्सुदर्शनधारणं कुर्यात्;

यद्वा पापनिवृत्तिकामस्सुदर्शनधारणं कुर्यादिति विधिरत्र द्रष्टव्य इति प्राहुः । अत्र विधिप्रत्ययार्थो न तावदिष्टसाधनत्वं, लोकस्य द्वारमित्यादिभिरेव तदवगमात्; नापि कृतिसाध्यत्वं, धृतेनेत्यध्याहृतपदेन तदवगमात्, नित्यत्वालाभाच्च; किं तु प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वम्। तथा च--मोक्षकामादिनिष्ठतद्धारणाभावस्य प्रत्यवायप्रयोजकत्वलाभान्नित्यतासिद्धिः। न च--मोक्षकामनाया अधिकारिविशेषणत्वे तच्छून्ये तदकरणे प्रत्यवायानुपपत्तिरिति--वाच्यम्; मोक्षकामइत्यस्य सम्भवाभिप्रायेण स्वरूपकीर्तनमात्रपरत्वादधिकारघटकत्वाभावात्, नरत्वस्यैवाधिकारत्वात् ॥

अत्र **भास्करः**---चरणश्रुतिरपि न सुदर्शनधारणे प्रमाणं, तस्या अपि प्रकरणार्थपर्यालोचनायामर्थान्तरपरत्वावगमात्। तथा हि--'देवेभ्यो वै स्वर्गो लोकस्तिरोऽभवत्' इत्युपक्रम्य, 'तं तपोऽब्रवीत्तं श्रद्धाऽब्रवीत्तं सत्यमब्रवीत्तं मनोऽब्रवीत्तं चरणमब्रवीत्' इत्यादिवाक्यसमुदायेन चातुर्होत्रचयनाङ्गभूताः अपाघाख्याः पञ्चेष्टीर्विधाय "ता वा एताः पञ्च स्वर्गस्य लोकस्य द्वारः, अपावा अनुवित्तपो नाम, तपः प्रथमां रक्षति, श्रद्धा द्वितीयां, सत्यं तृतीयां, मनश्चतुर्थीं, चरणं पञ्चमीम्" इत्युक्त्वा, 'अनु ह वै स्वर्गं लोकं विन्दति, कामचारोऽस्य स्वर्गे लोके भवति' इत्युपसंहृतम्। तत्र मनसा प्रायपाठान्मनोवदिन्द्रियमेव चरणशब्देन गृह्यते, नान्यत्; 'विशये प्रायदर्शनात्' इत्यत्र प्रायदर्शनस्यैव नियामकत्वोक्तेः। तथा च--चरणं पञ्चमीमिति ब्राह्मणवाक्योपात्तं चरणेन्द्रियमेव तस्मिन् चरणयागे पुरोऽनुवाक्यायाज्यात्वेन विनियुक्ताभ्यां 'चरणं पवित्रं', 'लोकस्य द्वारं' इतिमन्त्राभ्यामभिधीयते मन्त्रब्राह्मणयोरैकार्थ्यात्।

---इति ॥

अत्रोच्यते---चरणशब्दः इन्द्रियत्वव्याप्यधर्मावच्छिन्नतात्पर्यकः, तादृशधर्मावच्छिन्नतात्पर्यकानेकपदसमभिव्याहृतत्वात्, यत्र यादृश-

धर्मावच्छिन्नवाचकानेकपदसमभिव्याहृतत्वं तत्र तादृशधर्मावच्छिन्न-वाचकत्वमिति सामान्यव्याप्तेरित्यनुमानात् चरणशब्दस्येन्द्रिय-परत्वसाधनं हि भवतामभिप्रेतं; तत्तु न सम्भवति ; मनस एकस्ये न्द्रियत्वेऽपि श्रद्धादीनामिन्द्रियत्वाभावेनेन्द्रियत्वव्याप्यधर्मावच्छिन्न-परानेकपदसमभिव्याहाररूपतत्प्रायपाठरूपस्य हेतोरसिद्धेः, हेतु-कोटावनेकत्वमनिवेश्यासिद्धिवारणेऽपि श्रद्धादिपदे व्यभिचारात् । न च—तद्धर्मावच्छिन्नपरत्वेन सन्दिह्यमानत्वस्य तादृशसन्देहस्वरूप-योग्यत्वरूपस्य तद्धर्मावच्छिन्नवाचकत्वपर्यवसितस्य हेतुविशेषणत्वा-न्नोक्तव्यभिचारः; अत एव विशये प्रायदर्शनादित्यत्र विशय इत्यु-क्तमिति—वाच्यम् ; वक्ष्यमाणरीत्या मनश्शब्दस्य 'सङ्कर्षणाच्च प्रद्यु-म्नो मनोभूतस्स उच्यते' इति मोक्षधर्मवचनानुसारेण प्रद्युम्नपरतया इन्द्रियत्वव्याप्यधर्मावच्छिन्नपरपदसमभिव्याहारस्यैवासिद्धेः ॥ एतेन—चरणशब्द आचारवचनः, 'रमणीयचरणा रमणीयां योनिमापद्यन्ते' इति श्रुतौ चरणशब्दस्याचारे प्रयोगदर्शनात्; अनुष्ठेयतपश्श्रद्धासाह-चर्याच्च ; न च—मनसा प्रायपाठबाधः ; अनुष्ठेयैकप्रवणसङ्कल्प-विकल्पात्मकमनस एव मनश्शब्देनाभिधानात्, एवं च—प्रायपाठानुरो-धाच्चरणशब्दस्यानुष्ठेयाचारपरत्वमेव युक्तं, न त्वननुष्ठेयसुदर्शनपर-त्वम्—इति निरस्तम् । चरणशब्दस्यानुष्ठेयपरानेकपदसाहचर्यरूपा-नुष्ठेयप्रायपाठासिद्धेः, अन्नत्यतपश्श्रद्धादिशब्दानामनुष्ठेयपरत्वाभावात् 'तपश्श्रद्धे येह्युपवसन्त्यरण्ये' इत्यत्र तपश्शब्दस्य ब्रह्मपरत्ववदत्रत्य-तपश्शब्दस्यापि ब्रह्मपरत्वात्;—

"येनेदं विश्वं परिभूतं यदस्ति प्रथमजं देवं हविषा विधेम,
स्वयंभु ब्रह्म परमं तपो यत्, स एव पुत्रस्स पिता स माता,
तपो ह विश्वं प्रथमं सम्बभूव ।"—

इत्येतत्प्रकरणगततपोविषयमन्त्रे ब्रह्मलिङ्गदर्शनात्; 'मेधा श्रद्धा सरस्वती' इति श्रीविष्णुपुराणे, 'अहं श्रद्धा च मेधा च' इति महाभारते च श्रद्धाशब्दस्य लक्ष्मीवाचकत्वदर्शनेनात्रत्यश्रद्धाशब्दस्यापि तत्परत्वात्;

"श्रद्धया देवो देवत्वमश्नुते, श्रद्धा प्रतिष्ठा लोकस्य देवी, सा नो जुषाणोपयज्ञमागात्, कामवत्साऽमृतं दुहाना, श्रद्धा देवी प्रथमजा ऋतस्य, विश्वस्य भर्त्री जगतःप्रतिष्ठा, तां श्रद्धां हविषा यजामहे, सा नो लोकममृतं दधातु, ईशाना देवी भुवनस्याधिपत्नी ॥"—

इत्येतत्प्रकरणस्थश्रद्धाविषयमन्त्रे लक्ष्मीलिङ्गदर्शनात्;

"आगात्सत्यं हविरिदं जुषाणं, यस्माद्देवा जज्ञिरे भुवनं च विश्वे, तस्मै विधेम हविषा घृतेन, यथा देवैस्सधमादम्मदेम, यस्य प्रतिष्ठोर्वन्तरिक्षं, यस्माद्देवा जज्ञिरे भुवनं च सर्वे"—

इत्यादिमन्त्रलिङ्गात्सत्यशब्दस्यापि ब्रह्मपरत्वात्; 'तस्य ह वा एतस्य ब्रह्मणो नाम सत्यम्' इति सत्यशब्दस्य छान्दोग्ये ब्रह्मनामत्वाभिधानात्;

"मनसो वशे सर्वमिदं बभूव, नान्यस्य मनो वशमन्वियाय, भीष्मो हि देवस्सहसस्सहीयान्, स नो जुषाण उपयज्ञमागात्, आकूतीनामधिपतिं चेतसां च, सङ्कल्पजूतिं देवं विपश्चितं, मनो राजानमिह वर्धयन्ते"—

इत्यादिमन्त्रलिङ्गेन मनश्शब्दस्य सङ्कर्षणपरत्वावगमात्। तथा चानुष्ठेयपरशब्दसाहचर्यासिद्धेश्चरणशब्दस्याचारपरत्वं न सम्भवति; अन्यथा अर्चिमदित्यादिविशेषणानामनुपपत्तेः ॥

महाभारते हरिवंशे त्र्यधिकद्विशततमाध्याये—

"एवं वदत्सु चक्रं वै ज्वालामालासमावृतम् ।
ज्वालामालादिदुष्प्रेक्ष्यमादित्यायुततेजसम् ॥"—

इत्यादिना ज्वालादीनां प्रतिपादितत्वेन सुदर्शनपरत्वे तादृशविशेषणानामुपपत्तेः ॥ न च—अत्र तपस्सत्यशब्दाभ्यां ब्रह्मणोऽभिधाने यागाभेदानुपपत्तिः, देवताभेदविरहात्, व्रीहियवयोरन्यतरस्य चोदकप्राप्तस्य द्रव्यस्यापि भेदाभावादिति—वाच्यम्; तपस्सत्यशब्दयोः रूढिशक्यतावच्छेदकस्य ब्रह्मत्वस्यैक्येऽपि योगार्थतावच्छेदकयोर्भेदेन तत्तद्धर्मपर्याप्तावच्छेदकताकयोस्त्यज्यमानहविरुद्देश्यत्वरूपदेवतात्वयोर्भेदेन यागभेदोपपत्तेः; 'इन्द्रियकामो वीर्यकामस्स्यात्तमेतया सर्वप्रष्ठया याजयेत्' इति विहितायां सर्वप्रष्ठायामिव ब्रह्मत्वस्य विशेष्यस्यैक्येऽपि रथन्तरेष्वित्यादिविशेषणभेदमात्रेण यागभेददर्शनात् ॥

यत्तु—तपश्श्रद्धादिशब्दानां पुरुषधर्मपरत्वमेवोचितं, न तु भगवल्लक्ष्म्यादिरूपधर्मिपरत्वं; अस्मिन्प्रकरणे तपश्श्रद्धासत्यमनश्चरणदेवताकेषु यागेषु कृतेषु—"अथ ते सत्यं तपो भविष्यति, अथ ते सत्या श्रद्धा भविष्यति, अथ ते सत्यं सत्यं भविष्यति, अथ ते सत्यं मनो भविष्यति, अथ ते सत्यं चरणं भविष्यति"—इति वाक्यैः प्रजापतिसम्बन्धितपःप्रभृतीनां यथायोगं सत्यत्वादिरूपं फलं प्रतिपाद्यते; तत्तद्यागे कृते 'ततो वै तस्य सत्यं तपोऽभवत्' इत्यादिभिस्तस्य तपस्सत्यत्वादिरूपं फलं जातमिति परकृतिन्यायेनोक्त्वा प्ररोचनया तत्तद्यष्टुरपि तत्तत्फलसम्बन्धः 'सत्यं ह वाऽस्य तपो भवति, अनु स्वर्गं लोकं विन्दति, य एतेन हविषा यजते' इति प्रतिपाद्यते। तथा च—तपश्श्रद्धादिशब्दानां भगवदादिपरत्वे भगवत्प्रभृतीनां सत्यत्वादेः प्रजापतिसम्बन्धयष्टृसम्बन्धयोश्चासम्भवात्पुरुषधर्मपरत्वमेव वक्तव्यम्—इति ॥ तन्न। पुरुषधर्मपरत्वे 'तं तपोऽब्रवीत्, तं श्रद्धाऽब्रवीत्' इत्यादेरनुपपत्तेः । न च—सत्यत्वं फलजनकत्वमेव, अत एव 'अनु स्वर्गं लोकं वेत्स्यसि, अनु स्वर्गं लोकं विन्दति' इति सत्यत्वाविर्भावानन्तरं स्वर्गलोकप्राप्तिश्श्रूयते; षष्ठ्यर्थसम्बन्धश्च तपो-

ऽधिष्ठानदेवतारूपतपःपदार्थैकदेशतपआदावन्वेतीति नानुपपत्तिरिति—वाच्यं ; सिद्धान्तेऽपि षष्ठ्यर्थसम्बन्धस्य सत्यपदार्थघटकफल एवान्वयः; न तु व्यवहिततपश्शब्दादिप्रतिपन्नार्थैरित्यङ्गीकारेणानुपपत्तिविरहात् ; उक्ताभिप्रायेणैव **धानुष्कयज्वना त्रिवेदीभाष्यकारेण** चरणशब्दस्सुदर्शनाभिधायीति व्याख्यानात्; **भट्टभास्करेण** च ज्ञानयज्ञे चरणशब्दो देवताविशेषपर इत्यभिधानाच्च ॥

यदपि—चरगतिभक्षणयोरिति धातोः करणवाचिल्युडन्तश्चरणशब्दस्सोमसूर्याग्न्यादितेजसां 'देव सवितुः प्रसुव', 'यज्ञं प्रसुव यज्ञपतिं', 'अग्ने नय सुपथा राये अस्मान्', 'इमं नो देवसवितर्यज्ञं प्रसुव'—इत्यादिमन्त्रप्रतिपन्नसदाचारप्रवर्तकतया सुगतिसाधनतया वा तमसि सञ्चरतः स्खलनदर्शनादस्खलितसञ्चरणहेतुतया वा तेषामग्न्यादीनामन्यतममभिधत्ते ; पवित्रशब्दोऽपि परिशुद्धिकरत्वेन प्रवृत्तिनिमित्तेन तेषामन्यतमपरामर्शकः—**इति । तदपि न ;** योगाद्रूढेर्बलीयस्त्वस्य रथकाराधिकरणसिद्धतया योगेन चरणशब्दस्य सोमसूर्यादिपरत्वापेक्षया रूढ्या सुदर्शनपरत्वस्य युक्तत्वात् ॥ न च—सुदर्शनस्य रूढ्यर्थत्वेऽपि तस्य वाक्यार्थे समन्वयाभावात्तत्समन्वयनिर्वाहाय रूढ्यर्थप्रतिकृतिलोहमुद्रायां लक्षणा वक्तव्या, तथा च लक्ष्यार्थबोधाङ्गीकारापेक्षया योगार्थस्य बोधोपगम एव युक्त इति—वाच्यम् ; भगवच्छास्त्रादौ सुदर्शनधारणप्रकरणे तदावाहनादिविधानेन स्वाश्रयमुद्रासंयोगसम्बन्धेन धृतत्वस्य तत्र सम्भवे वाक्यार्थे समन्वयसम्भवेन लक्षणानावश्यकत्वात्, लक्षणायामपि योगार्थबोधाङ्गीकारापेक्षया लक्ष्यार्थबोधस्यैव युक्तत्वात्, योगाद्रूढिपूर्वकलक्षणाया बलीयस्त्वात् । अत एवोदाहरिष्यमाणप्रोद्गात्रधिकरणे तथा सिद्धान्तितम् ॥

यत्तु—चरणपवित्रादिशब्दानां सुदर्शने क्वापि वैदिकप्रयोगस्य व्याकरणानुमतेर्वाऽनुपलम्भाद्रूढिर्न सिध्यति—**इति । तन्न ;** 'पवित्र-

मित्यग्निः, प्र ते विष्णो अब्जचक्रे पवित्रे' इत्यादिवैदिकप्रयोगस्य दर्शनात्; पुवस्संज्ञायां कर्तरि चर्षिदेवतयोरिति व्याकरणेन देवतायां पवित्रशब्दव्युत्पादनेन देवताविशेषे सुदर्शने पवित्रशब्दशक्ते-र्व्याकरणानुमतत्वात्; भूसत्तायां, वर्तमाने लट्–इत्यादिव्याकरणानां शक्तिग्राहकत्वदर्शनेन व्याकरणस्यापि तत्सम्भवात् ;

"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतस्सिद्धपदस्य वृद्धाः ॥"

इतिप्राचीनकारिकायां व्याकरणस्यापि शक्तिग्राहकमध्ये परिगण-नात्; 'चरणं प्राङ्गणे चक्रे' इतिकोशेन, 'पवित्रं चरणं चक्रं' इति श्री-शास्त्रेण च चरणशब्दस्यापि सुदर्शने शक्तिसिद्धेः वैदिकप्रयोगाभावेऽपि शक्तिग्राहकप्रमाणबलाच्छक्तिसिद्धेरप्रत्यूहत्वाच्च । अन्यथा हर्यादि-नानार्थकशब्दानामपि वैदिकप्रयोगाविषयेष्वर्थेषु शक्त्यपलापापत्तेः । किं च भगवच्छास्त्रे **परमेश्वरसंहितायां**—

"दक्षिणे तु भुजे विप्र इति प्राक्संस्थितेन तु ।
निचिक्षेप सुषणमिति वह्निगतेन तु ॥
प्र ते विष्णो अब्जचक्रे इति याम्यगतेन तु ।
एभिर्वयमुरुक्रमस्येति यातुधानीगतेन तु ॥
धृतोर्ध्वपुण्ड्ः कृतचक्रेति पश्चिमगतेन तु ।
पवित्रमित्यग्निरिति ततो वायुगतेन तु ॥
चरणं पवित्रं विततमिति सोमगतेन तु ।
लोकस्य द्वारमर्चिमत्पवित्रमिति रुद्रगतेन तु ॥
एतैर्मन्त्रैस्तु चाष्टाभिरन्यैस्सौदर्शनैस्तथा ।
संस्नाप्य मन्त्रकुम्भेन शुद्धोदैरभिषिच्य च ॥"

इत्यमीषां मन्त्राणां सौदर्शनत्वाभिधानेन चरणश्रुतेरपि सौदर्शन-त्वावगमात् ,

"चरणं पवित्रं विततं पुराणं वाङ्मयं शुभम् ।
तेन चक्रेण सन्तप्तास्तरेयुः पातकाम्बुधिम् ॥"

इति पाद्मोपबृंहणबलाच्च चरणश्रुतेस्सौदर्शनत्वसिद्धिः ॥

एतेन—उक्तश्रुतौ येन पूत इत्यत्र येनस्मृतेनार्चितेनेत्यादिबह्वर्थसम्भवान्नियमतो धृतपदाध्याहारे प्रमाणाभावान्न चरणश्रुतेस्सुदर्शनधारणपरत्वसिद्धिः—इति निरस्तम् । चरणश्रुतिसमानार्थके 'देवासः पितरो येन विधृतेन बाहुना सुदर्शनेन प्रयतास्स्वर्गं लोकमायन्' इति शतपथवाक्ये पूतार्थकप्रयतपदयुक्ते यच्छब्दयुक्ते विधृतपदस्य श्रवणात्तदनुरोधेन धृतेनेत्यध्याहारस्यैव युक्तत्वात्; प्रयतौ पूतसंस्कृताविति वैजयन्त्युक्त्या प्रयतशब्दस्य पूतार्थकत्वसिद्धेः उदाहृतपाद्मवचनबलेन तच्छ्रुतेस्सुदर्शनधारणपरत्वावगमाच्च । न च—एतादृशोपबृंहणानां लिङ्गाभासमूलतयाऽनाश्वसनीयत्वात्तद्धारणपरत्वं चरणश्रुतेरनुपपन्नं, पुराणादिषु परप्रलोभनार्थानां शब्दसाम्यमात्रोपजीवनेन प्रवृत्तानामुपबृंहणानां बहूनां दर्शनादिति—वाच्यम्; कस्य चिदुपबृंहणस्याप्रामाणिकत्वमात्रेण सर्वेषामुपबृंहणानां तथात्वे 'स प्रजापतिरात्मनो वपामुदक्खिदत्' इत्याद्यर्थवादानां स्वार्थेऽप्रामाण्यदर्शनादर्थवादसामान्यस्य तथात्वापत्तेः; एवं 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतेरप्रामाण्यदर्शनात्स्मृतिमात्रस्याप्रामाण्यापत्तेः; शुक्ताविदं रजतमिति प्रत्यक्षस्य ह्रदो वह्निमानित्यनुमितेश्चाप्रामाण्यदर्शनात्प्रत्यक्षानुमित्योरप्यप्रामाण्यापत्तेः। न च—प्रमाणान्तरबाधितविषयकाणां प्रत्यक्षादीनामप्रामाण्येऽप्यबाधितविषयाणां प्रामाण्यापलापो न युक्त इति—वाच्यम्; एवं सत्युपबृंहणानामपि प्रमाणान्तराविरुद्धार्थकानामप्रामाण्यायोगादुक्तोपबृंहणबलेन चरणश्रुतेस्सुदर्शनधारणपरत्वसिद्धेरप्रत्यूहत्वात् ॥

यदपि--न ह्यनेन प्रकारेणायं मन्त्रो योजनीय इति काचन श्रुतिरस्ति, येनास्योपबृंहणस्य श्रुतिमूलत्वं कल्प्येत, तथा चैतादृशपुराणवचनानां मन्त्रलिङ्गमूलतया स्वातन्त्र्यायोगादप्रयोजकत्वे स्थिते चरणमन्त्रस्य मन्त्रलिङ्गबलेन तप्तलिङ्गमुद्राधारणपरत्वमव्याहतप्रसरम्। तथा हि--चरत्यनेनेति चरणं, करणे ल्युट्, सर्वेषां स्वस्वानुरूपचरणसाधनमित्यर्थः, पवित्रं लिङ्गं--इत्यादि ॥ **तदपि न**; तादृशाप्रत्यक्षश्रुत्यभावेऽप्यनुमितश्रुतिमूलत्वसम्भवात्, पुराणकर्तॄणां स्वयोगमहिमसाक्षात्कृतवेदार्थतया तन्मूलत्वसम्भवात्, मन्त्रलिङ्गमूलत्वेऽपि तदुन्नीतसाधकबाधकाभावयोरस्माभिरल्पज्ञैरवगन्तुमशक्यतया तदुन्नीतार्थत्यागायोगाच्चरणपवित्रशब्दयोर्लिङ्गे रूढ्यभावेन तच्छ्रुतेर्लिङ्गमुद्राधारणपरत्वाभावाच्च ॥ न च--'ब्रह्मेति लिङ्गमाख्यातं ब्रह्मणस्पतिरीश्वरः, पवित्रं तद्धि विख्यातं' इतिशैवपुराणवचनात्पवित्रशब्दस्य लिङ्गे रूढिरस्तीति--वाच्यम्; शैवपुराणस्य तामसतया तदुक्तार्थस्याग्राह्यत्वात् ॥

यदाह **व्यासः**—

"सात्त्विकानि पुराणानि ग्राह्याणि द्विजसत्तमैः ।
तेषूक्तानाचरेद्धर्मान् श्रुतिमूलानि तानि वै ॥
राजसानि पुराणानि तामसानि तथैव च ।
न ग्राह्याणि द्विजश्रेष्ठैरत्र मे नास्ति संशयः ॥" —इति ॥

पाद्मे पुराणविभागप्रकरणे—

"सात्त्विका मोक्षदाः प्रोक्ता राजसास्स्वर्गदाश्शुभाः ।
तथैव तामसा देवि निरयप्राप्तिहेतवः ॥
सात्त्विकानेव गृह्णीयान्मोक्षार्थी नैव राजसान् ।
स्वर्गदांस्तामसान् देवि तथैव निरयप्रदान् ॥" —इति ॥

तस्माच्चरणश्रुतेस्सुदर्शनधारणपरत्वमव्याहतमिति दिक् ॥

इति चरणश्रुतिविचारः ॥

अथ चमूषच्छ्रुतिविचारः ॥

ऋचि साम्नि च श्रूयते—"चमूषच्छ्येनश्शकुनो भिभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत्, अपामूर्मिं सचमानस्समुद्रं तुरीयं धाम महिषो विवक्ति"—इति ॥

अयमर्थः । अपा मूर्मिं--भूतानां विकारभूतं, अप्छब्दस्य भूतत्वावच्छिन्ने लाक्षणिकत्वात् । तद्विकारत्वं च--तदभिन्नत्वे सति तत्कार्यत्वं, शरीरत्वावस्थाविशिष्टस्य भूताभिन्नत्वे सति भूतकार्यत्वात् । समुद्रं--संसारसागरं, शरीरमिति यावत् । सचमानः--अपृथक्सिद्ध्यात्मकसंयोगानुकूलव्यापाराश्रयः । 'ष च समवाये' इति धातुपाठेन तद्धातोरुक्तार्थकत्वावसायात्, द्रप्सः--ईश्वरांशभूतो जीवः; जीवस्य तदंशत्वं चापृथक्सिद्धिसम्बन्धेनेश्वरविशेषणत्वं, विशिष्टवस्तुनि विशेषणांशोऽयं विशेष्यांशोऽयमिति विशेषणस्यांशत्वव्यवहारात् । गाः विन्दतीति गोविन्दः, तृज्वद्भावश्छान्दसः, गोविन्दुरिति षष्ठी। एतेन--गोविन्दस्य तृज्वद्भावाश्रयणे तृजन्तस्य विदेर्यद्रूपं तद्रूपस्यैव प्राप्तेर्गोवेदितुरिति रूपं प्राप्नोतीति--निरस्तं; छान्दसत्वेन सर्वदोषपरिहारात् । न च--स्वेच्छया छान्दसत्वाश्रयणमयुक्तमिति--वाच्यम्;

"गोविन्दस्यायुधान्यङ्गे बिभ्रत् सुश्रोणि वै द्विजः ।
तुरीयं धाम तद्विष्णोर्महिष्ठःप्राप्नुयादिति ॥'
चमूषच्छ्येनश्शकुनो बिभृत्वेति ऋगब्रवीत् ॥"

इति स्कान्दवचनेनास्याः श्रुतेस्सुदर्शनपरताया गोविन्दुरित्यस्य षष्ठ्यन्ततायाश्च प्रतीतेः । गोविन्दस्येति षष्ठ्यर्थो न स्वत्वं, पदार्थसामान्यस्य भगवत्स्वामिकत्वेन भगवन्निरूपितस्वत्वाश्रयत्वस्य

शिवाद्यायुधसाधारण्येनाव्यावर्तकत्वापत्तेः; किं तु नित्यसङ्कल्पाधीननित्यविग्रहवत्त्वं, तस्य च शूलाद्यायुधसाधारण्यविरहात्। आयुधानि-चक्रशङ्खगदाखङ्गशार्ङ्गरूपाणि पञ्चायुधानि । न च--शत्रुहिंसानुकूलव्यापाराश्रयस्यैवायुधत्वाच्छङ्खस्य तत्त्वमसम्भवीति--वाच्यम्, शत्रुनाशानुकूलशब्दाश्रयत्वेन तस्याप्यायुधत्वात्। बिभ्रत्--सम्बन्धप्रयोजकव्यापाराश्रयः, स च सम्बन्धः स्वसंयुक्तभुजादिघटितदेहवत्त्वमेव। चमूषदित्यादिना फलनिर्देशः। न च--चक्रधारणस्याङ्गत्वेन फलवत्त्वं न सम्भवति, फलवत्सन्निधावफलं तदङ्गमिति न्यायादिति-वाच्यम्; अङ्गिभूतोपासनद्वारा तस्यापि फलवत्त्वसम्भवात् । अत्र चमूशब्देन नित्यसूरिपरिषद्विवक्षिता, तस्यां सीदतीति चमूषत्, नित्यसूरिभिरनुगम्यमान इति यावत्। श्येनः--प्रशस्ततमभगवत्समीपदेशसंयोगानुकूलव्यापाराश्रयः, शंसनीयं गच्छतीति श्येन इति निरुक्तात्। शकुनः--आत्मानं संसारादुद्धर्तुं शक्त इत्यर्थः, शक्नोत्यात्मानमुन्नेतुमिति निरुक्तात्; भक्तिप्रपत्त्यन्यतरजन्यसंसारनिवृत्त्युपधायकभगवत्प्रसादविषय इति फलितार्थः; शक्तेः प्रकृते भगवत्प्रसादरूपत्वात्। बिभृत्वा--भरणसमर्थः, स्वसम्बन्धिनामपि भरणसमर्थ इति यावत्। तादृशसामर्थ्यं च--मुक्त्युपधायकस्वसमाश्रयणको भूयादित्याकारकप्रसादविशेषविषयत्वम्। एवंविधस्सन्, तुरीयं--श्रेष्ठं, धाम--स्थानं, परमपदमिति यावत् । महिषः--महनीयस्सन्, विवक्ति--प्राप्नोति ॥

—इत्यर्थः ॥

अत्र--गोविन्दुरायुधानि बिभ्रत् शकुनो बिभृत्वा चमूषच्छ्येनो महिषस्तुरीयं धाम विवक्तीति योजनाङ्गीकारात् धनवान् सुखीत्यादिवदुद्देश्यतावच्छेदकस्य विधेये प्रयोज्यतासम्बन्धेन भानाद्भगवदायुधधारणस्य शकुनपदार्थं प्रति, तस्य च बिभ्रत्पदार्थं प्रति, तदुभयस्य च चमूषत्त्वविशिष्टश्येनत्वं प्रति, तस्य च महिषत्वविशिष्टतुरीय-

धामप्राप्तिं प्रति, प्रयोजकत्वं लभ्यते। तथा च चक्रधारणस्य स्वजन्यप्रसादद्वारा मोक्षोपधायकभक्तिप्रपत्त्यन्यतरजन्यप्रसादे, तादृशप्रसादस्य च सम्बन्धिमोक्षप्रयोजकप्रसादान्तरे, तादृशप्रसादद्वयस्य च नित्यसूरिपरिषदनुगम्यमानत्वविशिष्टार्चिरादिगमनरूपे चमूषच्छ्येन इत्यस्यार्थे, तादृशगमनस्य च 'तं ब्रह्मालङ्कारेणालङ्कुर्वन्ति' इति श्रुतिसिद्धब्रह्मालङ्कारविशिष्टभगवत्समीपगमनरूपे 'महिषस्तुरीयं धाम प्राप्नोति' इत्यस्यार्थे प्रयोजकत्वलाभादलौकिकश्रेयस्साधनत्वरूपं धर्मत्वं चक्रधारणस्योक्तश्रुत्या सिद्ध्यति॥

अत्र भास्करः—

चमूषन्मन्त्रस्यापि न चक्रधारणपरत्वं, तस्य सोमप्रशंसापरत्वात्; तथा चानुक्रम्यते—'प्रसेनानीश्चतुर्विंशतिर्दैवोदासिः प्रतर्दनः'—इति। तस्यायमर्थः-प्रसेनानीरिति चतुर्विंशत्यृचं सूक्तं दिवोदासपुत्रस्य प्रतर्दनस्य राजर्षेरिदं त्रैष्टुभं पवमानसोमदेवताकमिति। तथा चायमर्थः—चमूषत्—चमन्ति भक्षयन्त्यत्रेति चम्वः चमसाः, तेषु सीदन्; श्येनः—शंसनीयः, शकुनः शक्तः, बिभृत्वा—पात्रेषु विभरणशीलः, गोविन्दुः—गवां लम्भकः, विन्दुरिच्छुरित्युप्रत्ययान्तो निपातितः; द्रप्सः—द्रवणशीलः, आयुधानि—स्फ्यकपालादीनि, "स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानि" इति श्रुतौ स्फ्यादीनामायुधशब्देनोपादानात्; बिभ्रत्—धारयत्, अपामुदकानां, ऊर्मिं प्रेरकं समुद्रमिति यावत्, अन्तरिक्षलोकं वा। सचमानः, महिषो महान्। एवंविधस्सोमः, तुरीयं धाम—पृथिव्यन्तरिक्षद्युलोकापेक्षया तुरीयं चान्द्रमसस्थानं, चान्द्रमसलोकस्य तुरीयत्वं च—'यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणाम्' इत्यादिभिर्मन्त्रैरवगम्यते। एतादृशस्थानं विवक्ति—सेवते॥ —इति॥

तदसत्। यस्य मन्त्रस्य यद्देवताकत्वेनाभिधीयमानत्वं, तस्य तत्परत्वमिति न व्याप्तिः। इन्द्रदेवताकत्वेनाभिधीयमाने 'निवेशनस्संगमनो वसूनाम्' इतिमन्त्रे गार्हपत्यपरे इन्द्रपरत्वाभावेन व्यभिचारात्, ऐन्द्र्या गार्हपत्यमिति विनियोगेन तस्य मन्त्रस्य गार्हपत्यपरत्वस्य तार्तीयीकाधिकरणसिद्धत्वात्; किं तु यस्य मन्त्रस्य यद्देवताकत्वेनाभिधीयमानत्वे सति यदुद्देश्यककर्मकरणतया विनियुक्तत्वं, तस्य मन्त्रस्य तत्परत्वमित्येव व्याप्तिः, "पाठयेद्बह्वृचान्पश्चाच्छाकुनं सूक्तमेव च" इति पारमेश्वरसंहितायां चक्रप्रतिष्ठायां विनियुक्तस्य शाकुनसूक्तस्य सुदर्शनपरत्वाभावेन व्यभिचारवारणाय सत्यन्तम्, तथा चमूषन्मन्त्रस्य सोमदेवताकत्वेऽपि तदुद्देश्यककर्मविनियुक्तत्वाभावान्न सोमपरत्वसम्भवः। न च—सोमदेवताकत्वाभिधानं तत्कर्मणि विनियोगार्थमेवेति तद्देवताकत्वे सति तत्कर्मविनियुक्तत्वसत्त्वात्सोमपरत्वं दुर्वारमिति—वाच्यम्; तथासत्युक्तव्याप्तिबलात्सोमपरत्ववत्सुदर्शनपरत्वस्यापि दुर्वारत्वात्; तथा हि—भगवच्छास्त्रे पारमेश्वरसंहितायां चक्रप्रतिष्ठां प्रस्तुत्योक्तम्—

"तत्तत्स्थापनकाले तु तत्तत्संज्ञान् मनून् जपेत्।
विद्यां गदामित्याद्यं यत्पाठयेत्तद्विदो जनान्॥
चमूषच्छ्येन इति च प्र ते विष्णो इति त्वृचौ।
पाठयेद्बह्वृचान्पश्चाच्छाकुनं सूक्तमेव च॥
धृतोर्ध्वपुण्ड्रः कृतचक्रेति मन्त्रं कठान् परम्।
पवित्रं ते विततमित्येतन्मन्त्रं यजुर्मयान्॥
क्षुरो हरेति सामज्ञान् पवित्रमित्यग्निरित्यपि।
एभिर्वयमुरुक्रमस्येत्याथर्वणविदो जनान्॥
एवं संस्थाप्य विधिवन्नवभिः कलशैस्ततः।
स्नापयेद्ब्रह्मसूक्तस्थैर्मन्त्रैरष्टाभिरेव च॥" —इति॥

अत्र–'तत्तत्स्थापनकाले तु तत्तत्संज्ञान् मनून् जपेत्' इत्यत्र मनूनित्यस्य मनुपदप्रतिपाद्यानित्यर्थः ; तत्तत्संज्ञानित्यस्य तत्तत्संज्ञाव्यवहितोत्तरवृत्तीनित्यर्थः ; तेषां संज्ञा येषां त इत्यनेनाव्यवहितोत्तरत्वसम्बन्धेन सुदर्शनादिसंज्ञाविशिष्टस्य लाभात्; तस्य च मनुपदार्थैकदेशे मनुपदेऽन्वयः, 'हिरण्यपूर्वं कशिपुं प्रचक्षते' इत्यादिवत्। न च–केवलमनुपदप्रतिपाद्यत्वस्य तादृशमनुपदे सुदर्शनसंज्ञाव्यवहितोत्तरत्वस्य लाभेऽपि सुदर्शनपदोत्तरत्वविशिष्टं यन्मनुपदं सुदर्शनमनुरिति समुदायरूपं तत्प्रतिपाद्यत्वस्यालाभादिति–वाच्यम् ; मनूनित्यस्य मनुपदे प्रतिपाद्यत्वे च खण्डशो लक्षणायास्स्वीकारात् ; सुदर्शनपदोत्तरत्वस्य प्रथमतो मनुपदेऽन्वयं स्वीकृत्य तादृशमनुपदस्य प्रतिपाद्यत्वरूपापरपदार्थेऽन्वयाङ्गीकारेण समुदायप्रतिपाद्यत्वस्य लाभात् । ततश्च सुदर्शनदेवताकत्वेनाभिधीयमानत्वे सति तदुद्देश्यककर्मणि विनियुक्तत्वाच्च चमूषन्मन्त्रस्य तद्धारणपरत्वसिद्धिः ; सुदर्शनधारणविषयकमन्त्रान्तरविनियोगावसरे विनियुज्यमानत्वेन प्रायदर्शनस्यापि सत्त्वाच्च। न च–अस्य मन्त्रस्य सुदर्शनधारणपरत्वे गोविन्दुरित्यत्र छान्दसत्वकल्पनं दोष इति–वाच्यम् ; भगवच्छास्त्रस्कान्दपुराणाद्यनुरोधेन छान्दसत्वकल्पनेन तस्य दोषताविरहात् ; अन्यथा अदितिः पाशानित्यत्र बहुवचनस्य छान्दसताया नवमाधिकरणसिद्धाया अपि दोषताप्रसङ्गात् । एवं प्रशसाऽस्यभिधानमित्यधिकरणे–'प्रशसा बाहू कृणुतात्' इति श्रुतौ प्रशसेति तृतीयान्तमसिवाचकं, असिना बाहूच्छेत्तव्यावित्यर्थः—इति पूर्वपक्षं प्रापय्य ; प्रशसेति द्वितीयाद्विवचनस्याकारादेशे छान्दसे तकारलोपे च कृते प्रशंसावचनोऽयमिति प्रशस्तौ बाहू कृणुतादविकलावित्यर्थ इति सिद्धान्तस्याप्यसङ्गतिप्रसङ्गः ; भवन्मते सोमपरत्वेऽपि सोमपदाध्याहारस्य दोषत्वापत्तिश्च ॥

यत्तु—'चमूषच्छ्येन इति प्र ते विष्णो इति त्वृचौ', 'पाठये-त्तद्विदो जनान्'—इति चक्रप्रतिष्ठापकाचार्यादन्येषामेव तत्तन्मन्त्र-विदां केवलमुच्चारणमात्रविधानात् करणमन्त्रत्वाभावात्; 'तत्तत्संज्ञान्मनून् जपेत्' इति जपशब्दसमभिव्याहारेण जपमन्त्रतासिद्धेश्चमूषच्छ्येन इत्यादीनामदृष्टार्थतया समवेतार्थाभिधायित्वाभावान्न चक्रधारणपरत्वं कल्पनीयम्; जपमन्त्राणामदृष्टार्थतायाः पूर्वतन्त्रसिद्धत्वात्; अन्यथाऽत्रैव जपार्थतया विनियुक्तस्य शाकुनसूक्तस्यापि सुदर्शनपरत्वप्रसङ्गः— इति ॥

तन्न—तदुद्देश्यककर्मणि जपार्थतया यद्विनियुक्तत्वं, यच्च करणतया विनियुक्तत्वं, तदुभयसाधारणस्य तदुद्देश्यककर्मणि विनियुक्तत्वस्य तद्देवताकत्वविशिष्टस्य तत्परत्वव्याप्यत्वाङ्गीकारेणास्य मन्त्रस्य तत्परत्वावश्यम्भावात् । व्याप्यकोटौ तद्देवताकत्ववैशिष्ट्यनिवेशाच्च शाकुनसूक्ते न व्यभिचारः; पूर्वतन्त्रेऽपि जपार्थतया विनियुक्तानामपि मन्त्राणां दृष्टार्थत्वासम्भव एवादृष्टार्थत्वस्याङ्गीकारात्, चमूषन्मन्त्रे तत्परत्वरूपदृष्टार्थत्वस्य सम्भवेन तत्परित्यागायोगात्, 'गोविन्दस्यायुधान्यङ्गे' इति स्कान्दोपबृंहणबलेन सुदर्शनधारणपरत्वस्यावर्जनीयत्वाच्च ॥

यदपि—चमूषच्छ्येन इत्यस्यार्जवेनैव चक्रप्रतिष्ठाविनियोगानुसारिसुदर्शनपरत्वसम्भवे किमिति सुदर्शनधारणपरत्वमाश्रियते? तथा हि—चमूः असुरचमूः, सीदतीति चमूषत्, हिनस्तीति यावत्; श्येनः—शंसनीयः, यतोऽयं शकुनः शक्तः; अत एव लोककण्टकोद्धरणेन; भिभृत्वा—जगद्धरणशीलः, जगद्रक्षक इति यावत्; क्वनिबन्तो भृञ्धातुनिष्पन्नोऽयं शब्दः। गोविन्दुः—गोविन्दस्य; द्रप्सः—अंशभूतः, सुदर्शनस्य विष्णवंशत्वं च पुराणादिसिद्धम् । एवम्भूतसुदर्शनदेवः आयुधानि—स्वानि षोडशायुधानि, बिभ्रत्; अपामूर्मि- रसभूतं, ऊर्मि-

मन्तमेवैनं करोतीत्यादिवैदिकप्रयोगात्; एवम्भूतं, समुद्रं—क्षीरार्णवमिति यावत्; सचमानः—भजमानः, श्वेतद्वीपनिवासीति यावत्; न केवलं श्वेतद्वीपे वर्तते, किन्तु विष्णोस्तुरीयं धाम; महिषः—महनीयो भूत्वा; विवक्ति—विशेषेण वर्तत इति॥ चक्रधारणपरत्वे तु चमूषदित्यादिपदनियुक्तगुणयुक्तस्सन् तुरीयं धाम विवक्तीत्यर्थाङ्गीकारात् भाविवृत्त्याश्रयणदोषप्रसङ्गः—इति॥

तदपि न—प्रवृत्तिनिवृत्त्यन्यतरप्रयोजनकस्य वेदात्मकशास्त्रस्येष्टसाधनत्वादिप्रतिपादकत्वस्य पूर्वोक्तरीत्या सम्भवे तत्त्यागेन वैयर्थ्यापरपर्यायस्यानुवादरूपार्थपरत्वस्य कल्पनानौचित्यात्। एवं भवन्मते विशेष्यवाचकस्य सुदर्शनपदस्याभावेन तदध्याहारस्य कल्पनीयत्वात्। अस्माकं च विनैवाध्याहारं 'गोविन्दुरायुधानि' इति श्रुतपदैरेव सुदर्शनप्रकाशोपपत्तेरध्याहारकल्पनविरहात्। अत एव 'प्रतितिष्ठति ह वा य एता रात्रीरुपयन्ति' इत्यर्थवादश्रुतप्रतिष्ठारूपफलेनैव रात्रिनामकानां द्वादशाहादूर्ध्वभाविनां त्रयोदशरात्रचतुर्दशरात्रप्रभृतीनां सर्वेषां सत्रविशेषाणां फलाकाङ्क्षानिवृत्तेरत्यन्ताश्रुतत्वाद्विश्वजिन्न्यायप्राप्तमपि स्वर्गफलकत्वमयुक्तमिति **रात्रिसत्राधिकरणे** प्रपञ्चितम्॥ एवं पूर्वोक्तप्रायदर्शनात् 'गोविन्दस्यायुधान्यङ्गे' इति स्कान्दोपबृंहणबलाच्च तद्धारणपरत्वं युक्तम्॥

यत्तु—भाविवृत्त्याश्रयणं दोषः—इति। **तन्न**—वर्तमानकालार्थकलट्प्रत्ययस्य भविष्यत्काललाक्षणिकत्वरूपस्य भाविवृत्त्याश्रयणस्याभावात्, प्रकृतशब्दप्रयोगाधिकरणकालवृत्तित्वरूपलडर्थस्य परमपदप्राप्तावबाधेन लटा वर्तमानकालस्यैव बोधनात्, 'तुरीयं धाम महिषो विवक्ति' इति वाक्यस्य सर्वदा सत्त्वेन मोक्षप्राप्तिकालेऽपि सत्त्वात्। न च—एतत्कालीनवाक्यस्य बाधितार्थकत्वापत्तिर्दुर्वारा, एतद्वाक्याधिकरणकालवृत्तित्वस्य परमपदप्राप्तौ बाधादिति—वाच्यम्; एतत्कालेऽपि कस्य

चित्सुदर्शनधारिणो मुक्तिसम्भवेनाबाधात्। न च—यदा यदा तद्वाक्यप्रयोगः तदा तदा कस्य चिन्मुक्तिरित्यत्र प्रमाणाभावेन यदा सुदर्शनधारिणः कस्यापि न मुक्तिः, तत्काले उच्चरितस्य तद्वाक्यस्य बाधितार्थकत्वापत्तिरिति—वाच्यम्; तथा सति भवन्मतेऽपि बाधस्य दुर्वारत्वात्; यदा यदा एतद्वाक्यप्रयोगस्तदा तदा सुदर्शनस्य परमपदं प्रति गमनमित्यत्र मानाभावात्। तस्माल्लडर्थस्याविवक्षैव युक्ता॥

यदपि—गोविन्दुशब्दस्यांशवाचिना प्रतीतिपर्यवसानाय नित्यं प्रतिसम्बन्ध्यपेक्षिणा सन्निहितेन द्रप्सशब्देनान्वये सम्भवति न व्यवहितपर्यवसितप्रतीतिकायुधशब्देनान्वयो युक्तः—इति॥ तदपि न। हिंसाप्रयोजकव्यापाराश्रयत्वरूपायुधपदशक्यतावच्छेदकघटकहिंसायाः कर्तृसापेक्षत्वेनायुधपदस्यापि ससम्बन्धिशब्दतया पर्यवसितप्रतीतिकत्वाभावात्; 'यस्य येनार्थसम्बन्धो दूरस्थेनापि तेन सः'—इति वार्त्तिकोक्तरीत्या व्यवधानस्याप्रयोजकत्वात्; 'गोविन्दस्यायुधान्यङ्गे' इत्युपबृंहणेन गोविन्दुरित्यस्यायुधशब्देनान्वयप्रदर्शनाच्च। तस्मादुक्तश्रुतेर्भगवच्छास्त्रबलात्सुदर्शनधारणपरत्वसिद्धिरिति॥

अत्र यदुक्तं—

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥
आयुर्वेदो धनुर्वेदो गान्धर्वं चार्थशास्त्रकं।
इति विद्याश्चतस्रोऽतो विद्या ह्यष्टादश स्मृताः॥"—

इत्यादिना पञ्चरात्रस्य विद्यास्थानेषु परिगणनाभावान्न पञ्चरात्रविनियोगबलाच्चमूषदित्यादेश्चक्रधारणपरत्वम्—इति॥ तन्न; प्रामाण्यं प्रति शब्दनिष्ठप्रामाण्यं प्रति वा निरुक्तपरिगणितत्वस्य व्यापकत्वाभावेन परिगणितत्वाभावेन प्रामाण्याभावसाधनासम्भवात्, प्रामाण्यवति प्रत्यक्षादौ शब्दनिष्ठप्रामाण्यवति च प्रमाणभूतलौकिकवाक्यादौ

निरुक्तपरिगणितत्वाभावेन व्यभिचारात् । शब्दनिष्ठं धर्मांशे प्रामाण्यं प्रति निरुक्तपरिगणितत्वं व्यापकमित्यपि न सत् ; सन्ध्यावन्दनं धर्मं इति लौकिकवाक्ये व्यभिचारात् ; पञ्चरात्रस्योक्तव्याप्तिमवष्टभ्यानुमानेन धर्मांशे प्रामाण्यनिराकरणेऽपि विनियोगांशे प्रामाण्यानिराकरणेनोद्देश्यासिद्ध्याऽर्थान्तराच्च ॥

वेदतात्पर्यांशे प्रामाण्यं प्रति परिगणितत्वं व्यापकमित्यपि न युक्तं ; वेदतात्पर्यप्रमापके आचार्योच्चरितलौकिकवाक्ये व्यभिचारात् । न च—ग्रन्थगतं वेदतात्पर्यांशे प्रामाण्यं प्रति परिगणितत्वं व्यापकमिति न दोष इति—वाच्यम् ; एवमपि भारतरामायणादौ व्यभिचारात् ॥

यत्तु—भारतस्य विद्यास्थानेषु परिगणनाभावेऽपि ब्रह्मयज्ञविधिप्रकरणे 'यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान्' इति पुराणवदितिहासस्यापि विद्यास्थानप्रायपाठेन विद्यास्थानत्वनिश्चयात् भारतादौ 'इतिहासमनुत्तमम्' इत्यादिना भारतस्येतिहासत्वसमाख्यानादितिहासत्वानिश्चयात्तत्प्रामाण्यमाश्रियते ; न च पञ्चरात्रस्य क्वचिदपि ग्रन्थे इतिहासत्वसमाख्या निबद्धाऽस्ति, येन तत्प्रामाण्यमप्याश्रियेत—इति ॥ **तन्न** । तथा सति यत्र कुत्रचित्प्रमाणभूतशास्त्रेषु प्रमाणतया परिगणितत्वं ग्रन्थगतप्रामाण्यव्यापकमिति पर्यवसितं ; तथा च पञ्चरात्रस्यापि छान्दोग्ये 'वाको वाक्यमेकायनम्' इति परिगणनात्, उदाहरिष्यमाणमहाभारतादिवचनेषु परिगणनाच्च परिगणितत्वाभावासिद्धेः । एकायनपदस्य पञ्चरात्रपरत्वं च वक्ष्यते ॥

यदपि—असंज्ञायामपि वेदे छान्दसादिप्रत्ययसम्भवेन गोविन्दुशब्दस्य वृषभारूढपरमेश्वरपरत्वे तदायुधत्रिशूलादेरपि धारणविधिप्रसङ्गः—**इति** ॥

तन्न—यादृशबोधौपयिकाकाङ्क्षायोग्यतादिमत्त्वं यादृशवाक्यस्य तद्वाक्यस्य तादृशबोधपरत्वमिति न व्याप्तिः ; येन गोविन्दुपदस्य

वृषभारूढपरमेश्वरयोगवृत्त्या त्रिशूलधारणपरत्वं प्रसज्येत इति वाक्यस्य स्यात्, तादृशव्याप्त्यभ्युपगमे सदेव सोम्येदमित्यादि-सद्विद्यादीनां प्रकृत्यादिबोधौपयिकाकाङ्क्षादिमत्त्वेन तत्परत्वप्रसङ्गेन मीमांसामात्रोच्छेदापत्तेः। तथा च—यद्वाक्यस्य बोधद्वयौपयिकाकाङ्क्षा-दिमत्त्वं, तस्य लघुसामग्रीकबोधपरत्वमित्येव व्याप्तिः पूर्वोत्तर-मीमांसानुमता; सद्विद्यादिस्थले प्रकृत्यादिबोधस्येक्षतिधातुलक्षणामूलक-त्वेन शक्तिज्ञानापेक्षया शक्यसम्बन्धरूपलक्षणाज्ञानस्य गुरुशरीरतया गुरुसामग्रीकत्वात् सद्विद्यातात्पर्यविषयत्वाभावात्; एवं च गोविन्द-पदयोगशक्तिज्ञानजन्योपस्थितिद्वयघटितसामग्रीकत्रिशूलधारणविषयक-बोधापेक्षया रूढिशक्तिज्ञानजन्यैकोपस्थितिघटितसामग्रीकसुदर्शनधारण बोधस्य लघुसामग्रीकतया तद्वाक्यतात्पर्यविषयत्वौचित्यात्। अत एव--'रथकारोऽग्निमादधीत' इतिवाक्यस्य रूढ्यर्थयोगार्थोभयबोधौ-पयिकाङ्क्षादिमतोऽपि रूढ्यर्थतात्पर्यकत्वं व्यवस्थापितं पूर्वतन्त्रे। न च--अपशूद्राधिकरणे शूद्रपदस्य योगार्थतात्पर्यवर्णनं आकाशाद्यधि-करणेऽप्याकाशादिपदस्य तथा तात्पर्यवर्णनं च विरुध्यत इति—वाच्यम्; अपशूद्राधिकरणे क्षत्रियत्वगतेश्चेत्यादिना रूढ्यर्थबाधोप-पादनेन आकाशाद्यधिकरणेऽपि परायणत्वादिरूपब्रह्मलिङ्गानां भूता-काशे बाधेन तद्वाक्ये बोधद्वयौपयिकयोग्यताविरहाद्व्यभिचाराभावात्। न हि प्रकृते सुदर्शनधारणपरत्वे योग्यतादिविरहः। न च--गोविन्द-सम्बन्धप्रकारकायुधविशेष्यकबोधं प्रति ङसन्ताकारान्तगोविन्दपद-समभिव्याहृतायुधपरत्वज्ञानरूपाकाङ्क्षाज्ञानस्य कारणतायाः क्लृप्तत्वा-त्तादृशाकाङ्क्षायाश्च गोविन्दुरायुधानीत्यत्राभावेन बोधद्वयौपयिका-काङ्क्षादिमत्त्वमुक्तवाक्यस्यासिद्धमिति—वाच्यम्; बहुत्वादिप्रकारक-ब्राह्मणादिविशेष्यकवेदजन्यबोधं प्रति ब्राह्मणास इत्याद्यानुपूर्वीज्ञानस्य हेतुताकल्पनवत्, उक्तबोधं प्रति गोविन्दुरिति ङसन्ततृजन्तगोवि-

न्द्रपदसमभिव्याहृतायुधपदसमभिव्याहारज्ञानस्यापि कारणत्वात् । किञ्च त्रिशूलधारणे तात्पर्यग्राहकविनियोगवचनोपबृंहणाद्यभावान्न तत्परत्वम् ॥

यत्तु—चक्रप्रतिष्ठायां मन्त्रविनियोजकस्मृत्युपबृंहणादीनां दृष्टमन्त्रलिङ्गमूलत्वे सम्भवत्यदृष्टश्रुत्यन्तरमूलत्वकल्पनायोगेन विनियोजकपुराणादिवचनानामप्युपजीवनीयान्मन्त्रलिङ्गाच्चमूषदित्यस्य त्रिशूलधारणपरत्वमापतत् केन वार्यते—इति ॥

तन्न । रूढ्युत्थापितमन्त्रलिङ्गस्थले योगोत्थापितमन्त्रलिङ्गानुन्मेषात्; अन्यथा ऐन्द्रीमन्त्रस्यापि योगोत्थापितलिङ्गबलेन गार्हपत्योत्थापनपरत्वसम्भवेन 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति श्रुतेर्वैयर्थ्यापत्तेः । एतेन—अतत्परादपि वाक्यात्प्रतीयमानस्य त्रिशूलधारणस्यासति बाधके समाश्रयणीयत्वादिति—निरस्तम्; तथा सति—'आकाशादेव समुत्पद्यन्ते' इत्यादिवाक्यात्प्रतीयमानस्य भूताकाशगतजगत्कारणत्वस्य समाश्रयणीयत्वापत्त्या मीमांसावैयर्थ्यापत्तेः । न च—तत्र परायणत्वादिरूपलिङ्गबाधकस्य सत्त्वान्न तादृशस्य समाश्रयणीयत्वं, बाधकाविरह एव प्रतीयमानार्थस्य समाश्रयणीयत्वाङ्गीकारादिति—वाच्यम्; प्रकृतेऽपि तात्पर्यविरहरूपबाधकस्य सत्त्वात्, तस्य च 'अतत्परादपि वाक्यात्' इत्यनेन त्वयैवाङ्गीकारात्; तात्पर्यविरहरूपबाधकसत्त्वेऽपि वाक्यस्य प्रतीयमानार्थपरत्वाङ्गीकारे गायत्र्या पितृरेतोध्यानस्य प्रतीयमानतया तादृशार्थस्यापि समाश्रयणीयत्वापत्तेः । तथा हि—देवस्य, दीव्यति क्रीडति मात्रा सहेति देवः, तस्य देवस्य; सवितुः पितुः—'सविता सारथौ रुद्रे पितर्यर्केऽनुजानति' इति वैजयती । वरेण्यं—श्रेष्ठं; तत्—तादृशं, स्खलितमिति यावत्; भर्गः—रेतः, 'भर्गसी रेत आलोकौ' इति वैजयन्ती । धीमहि—ध्यायामः; नः—अस्माकं; धियः, यः—पिता; प्रचोदयात्—जनयेत्; पिता हि पुत्रस्याक्षराभ्यासवेदाध्ययनशास्त्र-

पाठादिभिर्बुद्धिं जनयतीति ॥ न च—देवस्य सवितुरित्यनेन प्रसिद्धिप्राचुर्येण प्रथमं सूर्यस्यैव प्रतीयमानत्वरूपबाधकसत्त्वान्न प्रतीयमानोक्तार्थपरत्वमिति—वाच्यम् ; इहापि गोविन्दपदप्रत्यभिज्ञानरूपबाधकस्य सत्त्वेनार्थान्तरपरत्वासम्भवात् —इति दिक् ॥

यदप्युक्तं—अयं मन्त्रस्तप्तमुद्राधारणनिषेधपर एव प्रतीयते । तुरीयं धाम सचमानः, अत एव—चमूषच्छ्येनश्शकुनो बिभृत्वा यो द्रप्सो गोविन्दुरायुधानि बिभ्रत्, स महिषो भूत्वा अपामूर्मिं समुद्रं विवक्तीत्यन्वयाङ्गीकारात् । तुरीयं धाम—परब्रह्म, सचमानः—परमात्मध्यानशील इत्यर्थः, अत एव चमूषत्—चम्वोः रोदसोर्निषीदतीति चमूषत्, 'चम्वौ रोदसी' इति वेदनिघण्टुः; तथा च—परमात्मध्यानवशादिहलोकपरलोकयोर्निषीदन्नित्यर्थः । श्येनः—शंसनीयं गच्छतीति निरुक्तम् । शकुनः—शक्नोत्यात्मानमुन्नेतुमिति निरुक्तम् । बिभृत्वा—न केवलमीश्वरध्यानेनात्मानमुत्तारयति, किन्तु स्वसम्बन्धिनोऽपीति भावः; द्रप्सः—परमात्मांशभूतो जीवः; गोविन्दुः—गोविन्दस्य, आयुधानि, बिभ्रत्—वहति, स महिषो भूत्वा—तिर्यग्योनिं गत्वा; महिषशब्दोऽत्र तिर्यग्योन्युपलक्षकः। अपामूर्मिं—अपां विकारभूतं । समुद्रं—संसारसागरमिति यावत्; विवक्ति—सेवते, 'विवक्तिसिषक्तिजुषते' इति अनुक्रमणिकायां विवक्तिस्सेवार्थ उक्तः ; तथा च—संसारसागरे मग्नो भवतीत्यर्थः । एवं च—परमेश्वरध्यानेनावाप्तसमस्तकामोऽपि वेदनिषिद्धार्थानुष्ठानेन तिर्यग्योनिं गत्वा संसारनिमग्नो भवतीत्युक्त्या केनापि पुरुषेण तप्तमुद्रा न धारणीयेति निषेधः फलति—इति ॥

तदयुक्तम्—तुरीयं धाम सचमानश्चमूषच्छ्येनश्शकुनो बिभृत्वेत्येतेषां पदानां ब्रह्मविद्यानिष्ठत्वपरत्वे तादृशस्य जीवस्य गोविन्दायुधधारणेन तिर्यग्योनिप्राप्तिपूर्वकं संसारप्राप्तेरसम्भवात्; चक्रादिधारणस्य पापत्वेऽपि ब्रह्मविद्यानिष्ठे तस्य फलजनकत्वासम्भवात् ;

,तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ' इति सूत्रे तथोक्तेः। न च–निष्पन्नब्रह्मविद्यस्योत्तराघाश्लेषेऽपि ब्रह्मविद्यायां यतमानस्योत्तराघं दुर्वारमिति तुरीयं धाम सचमान इत्यादिपदैर्यतमान एव विवक्षित इति–वाच्यम्; तस्मिन् चमूषच्छ्येनशकुनबिभृत्वापदार्थानामन्वयानुपपत्तेः, तदन्वयानुरोधेन निष्पन्नविद्यपरत्वस्यैव वक्तव्यत्वात्। किञ्च महिषो भूत्वा संसारसागरं विवक्तीत्यपि न युक्तम्; महिषभवनस्यापि संसाररूपतया संसारप्राप्तेस्तदुत्तरकालीनत्वाभावात्। न च–त्वाप्रत्ययस्य समानकालीनत्वपरत्वान्न विरोध इति–वाच्यम्; तथाऽपि प्रत्यक्षशतपथश्रुतिपञ्चरात्रादिविहितस्य चक्रधारणस्य निषेधानुपपत्तेः, निषेधवचनानां च रागप्राप्तविषयताया वक्ष्यमाणत्वात्॥

न च–अयमपि मन्त्रस्तथैवास्त्विति–वाच्यम्; महिषो विवक्तीत्यनयोस्समुद्र इत्यनेनान्वये, तथा सचमान इत्यस्य धामेत्यनेनान्वये च व्यवहितान्वयदोषप्रसङ्गात्। न च–महिषशब्दस्य रूढित्यागो भवन्मते दोष इति–वाच्यम्; महिषो भूत्वेति तिर्यग्योनिलक्षकत्वोक्त्या भवतामपि रूढित्यागस्य दुर्वारत्वात्; समुद्रमित्यस्य सचमान इत्यनेनैव साकाङ्क्षेण सन्निहितेन योग्येन च प्रथममेवान्विततया निराकाङ्क्षतया तुरीयं धामेत्यत्रान्वयासम्भवेन तुरीयं धाम महिषो विवक्तीत्यन्वयस्यैव वक्तव्यतया तत्र च महिषशब्दरूढ्यर्थान्वयबाधाद्योगार्थस्यैवाश्रयणीयत्वात्तस्य दोषत्वानापादकत्वात्, समुद्रसचमानपदान्वयस्य प्रथमावगतस्य बलीयस्त्वात्। अत एव–'श्रुतेर्जाताधिकारस्स्यात्' इत्यत्र त्रयो वेदा अजायन्तेति प्रथमावगतोपक्रमस्थवेदपदानुसारेण 'उच्चैरृचा क्रियते, उपांशु यजुषा, उच्चैस्साम्ना' इति विधिवाक्यगतचरमावगतोपसंहारस्थऋगादिपदानां ऋग्वेदादिविहितकर्माङ्गभूतमन्त्रलक्षणा स्वीकृता॥

यदि च—योगापेक्षया रूढिपूर्विका लक्षणाऽपि ज्यायसी, अत एव-'प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणाम्' इत्यत्र, 'व्यवहिताश्च' इति सूत्रेण उद्गातॄणां चमसः प्रैत्वित्यर्थके उद्गातृशब्दरूढ्यर्थस्य उद्गीथाख्यद्वितीयसामभक्त्युच्चरितुः परिग्रहे बहुवचनानुपपत्तिरिति उद्गायन्तीत्युद्गातार इति योगशक्त्या उद्गातृप्रस्तोतृप्रतिहर्तॄतत्त्रयपरत्वं युक्तं, प्रातिपदिकबहुवचनयोर्द्वयोरप्युपपत्तेः; तस्मात्सुब्रह्मण्याख्यऋत्विग्वर्जितानां त्रयाणां छन्दोगानां भक्ष इति—पूर्वपक्षं प्रापय्य; योगापेक्षया रूढेर्बलीयस्त्वात्प्रथमप्रतीतरूढ्यनुग्रहाय औद्गात्रप्रवचनरूपसामवेदसम्बन्धावच्छिन्नेषूद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्येषु रूढिपूर्वकलक्षणा युक्ता; तस्माच्चतुर्णां भक्ष इति—सिद्धान्तितं तृतीये। तथा च-प्रकृतेऽपि महिषशब्दस्य योगाङ्गीकारापेक्षया तिर्यग्योनित्वावच्छिन्ने रूढिपूर्वकलक्षणैवाश्रयितुं युक्तेति—विभाव्यते॥ तदा श्येनशकुनपदयोरपि रूढ्यर्थ एवाङ्गीक्रियतां; तयोरप्यध्याहृताभ्यां न हन्तव्य इति पदाभ्यामन्वयसम्भवात्। निरुक्तानुरोधात्तयोर्योगार्थस्वीकारे च महिष्ठः प्राप्नुयादित्युपबृंहणानुरोधान्महिषशब्दस्यापि योगार्थस्वीकारो युक्तः। तस्माद्व्यवहितान्वयदोषान्नोक्तार्थो युक्तः॥

वस्तुतस्तु—प्रोद्गात्रधिकरणे प्रोद्गातृशब्दरूढ्यर्थस्य बहुत्वासम्भवात्पाशमन्त्र इव वचनमविवक्षितार्थमिति पूर्वपक्षे; अदितिः पाशान् प्रमुमोक्त्विति पाशमन्त्रे पाशशब्दरूढ्यर्थस्य लक्ष्यार्थस्य वा बहुत्वासम्भवाद्बहुवचनस्याविवक्षितार्थत्वेऽप्युद्गातृपदे योगार्थस्य लक्ष्यार्थस्य वा बहुत्वसम्भवान्न बहुवचनस्याविवक्षा युक्तेत्येतावन्मात्रमेव व्युत्पादितम्; न तु योगस्य लक्षणापेक्षया दौर्बल्यमपि। तथा च रूढ्यर्थबोधसामग्र्या योगार्थबोधप्रतिबन्धिकाया अभावे योगार्थोन्मज्जनमेव युक्तं; न तु लक्ष्यार्थोपगमः। अत एवापशूद्राधिकरणे रूढ्यर्थानुपपत्तौ योगार्थ एवाश्रितो भगवता सूत्रकृता॥ भाष्यकृताऽप्यजा-

मन्त्रे न जायत इत्यजेति जगद्वाचित्वादित्यत्र यस्य चैतत्कर्मेति श्रुतिघटककर्मशब्दस्य क्रियत इति कर्मेति च योगार्थ एवाश्रितः, न तु रूढ्यर्थपूर्विका लक्षणा—इति । तस्माल्लक्षणापेक्षया योगस्य प्राबल्यमेव युक्तम् ॥

यत्तु—चक्रधारणनिषेधवचनान्तरपर्यालोचनया व्यवहितान्वयस्याप्यर्थवशेन समाश्रयणीयत्वम्—इति ॥ तन्न । सुदर्शनधारणविधायकवचनान्तरपर्यालोचनयाऽव्यवहितान्वयसम्भवे व्यवहितान्वयाश्रयणानौचित्यात् । किं च—एवं सुदर्शनस्य स्वधारणद्वारा संसारपतनहेतुत्वावगमेन निन्दावगमात् भगवच्छास्त्रे चक्रप्रतिष्ठायां विनियोगानुपपत्तिः ; यदीयनिन्दाविषयकबोधजनकमन्त्रत्वं यत्र तत्र तदीयकर्मणि विनियुक्तत्वाभाव इति व्याप्तेः ; तदीयप्रसादहेतुतया तत्प्रशंसापराणां तदीयकर्मणि विनियोगसम्भवेऽपि तन्निन्दापराणां तन्निग्रहजनकानां तदसम्भवात् ॥

यदपि—गोविन्दुरित्यस्य न षष्ठ्येकवचनान्तत्वं, तथा सति छान्दसतृज्वद्भावाश्रयणाद्यनेकप्रक्रियाकल्पनापत्तेः ; किं तु प्रथमैकवचनान्तो गोविन्दुशब्द इत्ययं मन्त्रो विष्णुपर एव । तस्य च परब्रह्मांशतया द्रप्सशब्देनाभिधानमुपपद्यते । तथा हि मैत्रेयोपनिषदि—'तमो वा एकमास' इत्यारभ्य, 'तत्परेणेरितं विषमत्वं प्रयाति, एतद्वै रजसो रूपम्' इत्यादिना तमोऽधिष्ठातुः परस्य सङ्कल्पेनाविद्याख्यस्य तमसो गुणविभागं निरूप्य ;

"तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरिति । अथ यो ह खलु वा वाऽस्य राजसोंऽशोऽसौ सः योऽयं ब्रह्मा ; अथ यो ह खलु वा वाऽस्य तामसोंऽशोऽसौ सः योऽयं रुद्रः ; अथ यो ह खलु वा वाऽस्य सात्त्विकोंऽशोऽसौ सः योऽयं विष्णुः ॥"—

इति तमोऽधिष्ठातुः परस्य ब्रह्मादयोंऽशभेदा इति प्रतिपादनात् ।

तथा च–ब्रह्मांशभूतो गोविन्द एव कौमोदकीनन्दकाद्यायुधभर्तृतया 'अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे' इति, 'अन्तस्समुद्रे मनसा चरन्तम्' इत्यादिश्रुतिप्रतिपन्नसमुद्रशायितया तुरीयधामाख्य-परमपदवृत्तितया च स्तूयते—इति ॥ तन्न। प्रवृत्तिनिवृत्त्यन्यतर-प्रयोजनकस्य वेदात्मकशास्त्रस्येष्टसाधनत्वादिप्रतिपादकत्वस्य पूर्वोक्त-रीत्या सम्भवे तत्त्यागेन वैयर्थ्यापरपर्यायस्यानुवादरूपार्थपरत्वस्य कल्पनानौचित्यात्। एवं भगवच्छास्त्रे चक्रप्रतिष्ठायां विनियुज्य-मानानां मन्त्राणां 'तत्तत्संज्ञान् मनून् जपेत्' इति सौदर्शनत्वाभि-धानात् भगवत्परत्वे चास्य मन्त्रस्य सौदर्शनत्वासिद्धेर्भगवच्छास्त्र-विरोधापत्त्याऽनन्यगतिकत्वेन गोविन्दुशब्दस्य तृज्वद्भावं छान्दस-मङ्गीकृत्य सुदर्शनपरत्वमङ्गीकरणीयम्। भगवत्परत्वे आयुधानीत्यनेन सुदर्शनप्रकाशेऽपि भगवत्येव मन्त्रस्य प्रधानतात्पर्यात्सुदर्शनस्य समुद्रपरमपदादिवदुपसर्जनतया तत्र तात्पर्यासिद्धेस्सौदर्शनत्वानिर्वा-हात्। किं च गोविन्दस्यायुधान्यङ्ग इति स्कान्दोपबृंहणबलात्पूर्वोक्त-प्रायपाठानुरोधाच्च चमूषन्मन्त्रस्सुदर्शनधारणपर एव ॥

न च–अस्य मन्त्रस्य सुदर्शनधारणपरत्वे सुदर्शने प्रधानतात्पर्या-सिद्ध्या भगवच्छास्त्रविरोधतादवस्थ्यम्—इति वाच्यम्; स्वधारणद्वारा सुदर्शनस्य मोक्षप्रयोजकत्वोक्त्या सुदर्शने प्रधानतात्पर्यानपायात्, द्वारद्वारिभावापन्नयोस्सुदर्शनतद्धारणयोर्द्वयोरपि मोक्षहेतुतया तत्प्र-कारकतात्पर्यविषयतारूपप्रधानतात्पर्यविषयताया उभयत्र सत्त्वात्। न च–एकस्य वाक्यस्योभयत्र प्रधानतात्पर्यं न सम्भवति, विरोधा-दिति–वाच्यम्; परस्पराविरुद्धार्थद्वये तात्पर्यसम्भवात्। अत एव–'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती' इत्यर्थवादस्य रात्रिसत्र-स्तुतिपरस्यापि फलसमर्पकत्वं स्वीकृतं पूर्वतन्त्रे—इति ॥

इति चमूषच्छ्रुतिविचारस्सम्पूर्णः ॥

अमीषां मन्त्राणां सुदर्शनधारणविधायकत्वं तावत्सिद्धान्तः ॥

अत्र यदुक्तं—अमीषां मन्त्राणां विधायकत्वमयुक्तं ; मन्त्राणां विधायकत्वाभावस्य विधिमन्त्राधिकरणे निर्णीतत्वात् । तथा हि—

"विलप्तविधिशक्तित्वात्सिद्धत्वद्योतनादिभिः ।
प्राप्तत्वादन्यतस्तेषां विधिशब्दाद्यभावतः ॥
ब्राह्मणैर्विनियुक्तत्वात्करणत्वेन कर्मणाम् ।
मन्त्रत्वादपि नैते स्युस्तप्तमुद्राविधायकाः ॥"

विधायकत्वं हि–मन्त्राणां विधिशक्तिमत्त्वेन, न त्वन्यथा । न चैतेषां मन्त्राणां तादृशशक्तिमत्त्वं, तद्विरुद्धार्थस्यैव प्रतीतेः । तथा हि प्रसिद्धास्तावद्विधिशक्तितिरोधायकाश्चतुर्था ; सिद्धत्वद्योतनवक्त्राभिमुख्यप्रतीतिस्वात्मनियोगनिमित्ताभिधानभेदात् । तत्र–'देवा नराश्च याभिर्यजन्ते ददाति च' इति गोस्तुत्यर्थे गोयागगोदानयोः याभिरिति यच्छब्देन सिद्धत्वद्योतनाद्गोयागगोदानविधिशक्तिविघातः, 'अग्नीदग्नीन्विहर, अहे बुध्न्य मन्त्रम्मे गोपाय' इत्यादावामन्त्रणविभक्त्याऽप्रवृत्तप्रवर्तनात्मकविधिशक्तिविघातः । आमन्त्रणविभक्तेस्सामान्यतो विहितार्थानुष्ठानाय प्रवृत्ताभिमुखपुरुषप्रवर्तकत्वात् । 'बर्हिर्देवसदनं दामि' इत्यादावस्मदर्थेनोत्तमपुरुषेण विधिशक्तिविघातः, स्वात्मनि स्वस्य प्रवर्तनानुपपत्तेः । 'यदि सोममपहरेयुः' इत्यादौ निमित्तवाचिना यदिशब्देन प्राप्तिबुद्धेर्विधिशक्तिविघातः, प्रकृते च 'येन पूतस्तरति दुष्कृतानि' इति मन्त्रस्य यच्छब्दादिना विधिशक्तिविघातान्न विधायकत्वम् ॥ —इति ॥

तदसत् । अमीषां मन्त्राणां विधायकत्वं हि–कृतिसाध्यत्वेष्टसाधनत्वादिबोधजनकत्वं ; तच्च कृतिसाध्यत्वादिवाचकपदघटितत्वे

सति साकाङ्क्षत्वे सति योग्यत्वं नियामकं, पवित्रमन्त्रे 'इद्धहन्त-स्तत्समाशत' इत्यनेन धनवान् सुखीत्यादाविवोद्देश्यतावच्छेदकस्य विधेये प्रयोज्यतासम्बन्धेन भानेनेष्टसाधनत्वस्य इद्धहन्त इत्यस्य पूर्वोपस्थिततापवहनानुकूलकृतिमानित्यर्थकतया तापवहनरूपतप्तमुद्रा-धारणे कृतिसाध्यत्वस्य च प्रत्ययेन तन्मन्त्रस्य विधायकतानिर्वाहात्। चरणमन्त्रचमूषन्मन्त्रयोरप्युक्तरीत्या कृतिसाध्यत्वेष्टसाधनत्वादि-बोधकत्वसम्भवाद्विधायकत्वोपपत्तेः ॥

न च—विधायकत्वप्रयोजकं विधिशक्तिमत्त्वं, तच्च मन्त्रेषु नास्तीति—वाच्यम् । विधिशक्तिमत्त्वं हि—कृतिसाध्यत्वाद्युपस्थितिजनकपदगत-शक्तिमत्त्वं वा, कृतिसाध्यत्वादिरूपविध्यर्थविषयकबोधजनकताव-च्छेदकवाक्यगतशक्तिमत्त्वं वा ? । नाद्यः—वहन्त इत्यनेन वहनसाध्यक-कृतेः प्रतीत्या साध्यतासम्बन्धेन धात्वर्थान्वयिकृतिवाचकशतृप्रत्यय-सत्त्वेन तादृशशक्त्यभावासिद्धेः । न द्वितीयः—कारणसामान्ये शक्ति-वादिनां मीमांसकादीनामपि मते साकाङ्क्षयोग्यपदसमुदाये तादृश-शक्तिस्वीकारेण मन्त्रे तादृशशक्त्यभावे बीजाभावात् । न च—उक्त-मन्त्रेषु कृतिसाध्यत्वबोधौपयिकशक्तिमत्त्वं न सम्भवति, कृतिसाध्य-त्वबोधं प्रति सिद्धत्वद्योतनद्वारा प्रतिबन्धकस्य यच्छब्दस्य येन पूत इत्यादौ सत्त्वेन तादृशशक्तेर्नाशात्, प्रतिबन्धकतायाः कार्यानुकूल-शक्तिविघटकत्वरूपत्वादिति—वाच्यम् ; वक्तृबुद्धिविषयतावच्छेदक-त्वोपलक्षितधर्मावच्छिन्नोपस्थापकस्य यच्छब्दस्य सिद्धत्वद्योतकत्वा-सिद्ध्या तस्य प्रतिबन्धकत्वासम्भवात् ; अन्यथा—यदाग्नेयोऽष्टाकपाल इत्यादेरपि विधायकत्वानुपपत्तेः ॥ न च—अप्राप्तार्थत्वाभावविशिष्ट-यच्छब्दादेस्तादृशबोधप्रतिबन्धकत्वाङ्गीकारान्नानुपपत्तिः, 'यदाग्नेयोऽ-ष्टाकपालः' इत्यादावप्राप्तार्थत्वस्यैव सत्त्वेन तदभावविशिष्टयच्छब्दा-देरभावात्, प्रकृते च पाञ्चरात्रादिवचनैस्सुदर्शनधारणस्य प्राप्ततयाऽ-

प्राप्तार्थत्वाभावेन तद्विशिष्टयच्छब्दरूपप्रतिबन्धकसत्त्वाद्विधिशक्ति-तिरोधानमिति—वाच्यम् । अप्राप्तार्थत्वं हि—न तावन्मानान्तराग्राह्यार्थत्वं, श्रुतेः स्मृतिनिरुक्तवेदभाष्यादिग्राह्यार्थत्वेनाप्राप्तार्थत्वानापत्तेः; किं तु स्वानुपजीविमानान्तराग्राह्यार्थत्वम् । यत्रापूर्वार्थत्वमुपपादनीयं तत्परं स्वपदं; तथा च स्मृतेरिव पञ्चरात्रस्यापि श्रुत्युपजीवित्वेन तदनुपजीविमानान्तराग्राह्यार्थत्वरूपमप्राप्तार्थत्वमुक्तमन्त्राणामक्षतमेव ॥

न चैवं—'ये पुरोदञ्चो दर्भास्तान् दक्षिणाग्रांस्तृणीयात्' इति मृताग्निहोत्रविषयश्रुतेः 'ये पुरा दर्भास्त उदञ्चः कार्याः' इत्येवं विधिवाचकपदाध्याहारेणोदक्त्वांशेऽपि विधायकत्वापत्तिः; 'अग्रवन्ति प्रागग्राण्युदग्राणि वा' इति सामान्यस्मृत्या उदगग्रत्वस्य प्राप्तत्वेऽपि स्वानुपजीविमानान्तराग्राह्यार्थत्वानपायेन तदभावविशिष्टयच्छब्दाभावात् । तथा च--मृताग्निहोत्राधिकरणविरोधः । तदधिकरणे--ये पुरोदञ्च इति श्रुतिवाक्ये—'किमुदगग्रता विधीयते, किं वाऽनूद्यते ?' इति सन्दिह्य; "यथोपवीतं विधेयं, एवमुदगग्रत्वमपि विधेयम्, अपूर्वत्वात्, यद्वृत्तयोगो विध्याद्यभावश्च यदाग्नेयादिवद्द्रष्टव्यः" इति उदक्त्वं चापूर्वत्वादिति सूत्रेण पूर्वपक्षयित्वा; "नोदगग्रत्वस्य विधिः, किं तु प्राप्तस्यानुवादः-कुतः प्राप्तिः? अग्रवन्ति प्रागग्राण्युदगग्राणि वेति स्मृतेः" इति यतो-वा लिङ्गदर्शनादिति सूत्रेण सिद्धान्तितत्वादिति—**वाच्यम्**। श्रुतेरग्निहोत्रमात्रविषयतया स्मृतेश्चाविशेषेण प्रवृत्तेर्मिथोमूलमूलिभावायोगेन तादृशस्मृतेस्स्वानुपजीविमानान्तरत्वानपायात्, तदग्राह्यार्थत्वाभावविशिष्टयच्छब्दादेरेव सत्त्वाद्विधायकत्वासम्भवात् । वस्तुतः—प्रागग्राण्युदगग्राणि वेति स्मृतेरित्यस्य स्मृतिमूलार्थभूताद्वेदादित्यर्थः । तथैव शास्त्रदीपिकाव्याख्यायां **मयूखावल्यां** व्याख्यानात् । तस्मादुदाहृतश्रुतीनां चक्रधारणविधायकत्वे न किञ्चिद्बाधकम् ॥

के चित्तु—

यदपि—चरणादिश्रुतीनां यच्छब्दाद्युपहितत्वेन तद्बृंहितपाञ्चरात्राद्यागमतदनुसारिपुराणवचनविहिततप्तधारणानुवादकत्वेन प्राप्तार्थत्वान्न विधायकत्वम्—इत्युक्तं ; तदयुक्तं ; तथा सति 'आत्मा वाऽरे-द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्यादिश्रुतीनामपि वक्त्राभिमुख्यप्रतीत्या "श्रोतव्यश्श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः । आत्मा च सततं ध्येयः" इत्यादितद्बृंहितपुराणवचनविहितश्रवणाद्यनुवादकत्वापत्तेः । तथा—

"त्रयो धर्मस्कन्धाः; यज्ञोऽध्ययनं दानमिति प्रथमः, तप इति द्वितीयः, ब्रह्मचार्याचार्यकुलवासी तृतीयः। अत्यन्तमात्मानमवसादयन् सर्वलोकेषु पुण्यलोको भवति, स ब्रह्मसंस्थोऽमृतत्वमेति; एतमेव प्रव्राजिनो लोकमिच्छन्ति"—

इत्यादिश्रुतीनां,

"वनेषु तु विहृत्यैवं तृतीयं भागमायुषः।
चतुर्थमायुषो भागं त्यक्त्वा सङ्गान्परिव्रजेत् ॥"

इत्यादिमन्वादिस्मृतिविहितपारिव्राज्यानुवादकत्वं स्यात्; तत्र श्रुतावेव पञ्चमलकारकल्पनया विधायकत्वस्योत्तरमीमांसासिद्धत्वात् । 'ऊर्ध्वरेतस्सु च शब्दे हि', 'विधिर्वा धारणवत्' इत्यादिसूत्रव्याख्यानावसरे शङ्कराचार्यैरपि तादृशश्रुतीनां विधायकत्वाभ्युपगमात्। श्रोतव्य इत्यादीनां विधायकत्वस्य विवरणकारादिभिरङ्गीकाराच्च । अत एव स्मृत्यधिकरणे—अष्टकाः कर्तव्याः, गुरुरनुगन्तव्यः, शिखाकर्म कर्तव्यं, प्रपा प्रवर्तयितव्या, तटाकं खनितव्यम्—इत्यादिस्मृतीनां 'श्रेयांसं पापीयान् पश्चादन्वेति', 'यत्र बाणास्सम्पतन्ति कुमारा विशिखा इव', 'धन्वन्निव प्रपा असि', 'स्थलयोदकं परिगृह्णन्ति' इति श्रुतय एव प्रमाणत्वेनोदाहृताः। अत एव माधवीये--तृप्तां जह्नुर्मातुलस्येव योषाभागस्ते

पैतृष्वसेयीवपामिवेति । तस्मात्समानादेवपुरुषादत्ताचाद्यश्च जायते, उत तृतीये सङ्गच्छावहै, चतुर्थे सङ्गच्छावहै इति श्रुत्योर्मन्त्रतयाऽर्थवादतया च कथं मातुलसुताविवाहकरणे प्रमाणत्वम्—इत्याशङ्क्य; उपरिधारणविधिवदपूर्वार्थत्वेन मातुलसुतां विवहेदिति विधिः कल्प्यते; मानान्तरविरोधाभावात्। विरोधिवचनानां गान्धर्वविवाहादौ मातृसपिण्डादिविषयत्वस्योक्तत्वात्—इत्युक्तम्। तस्माच्चरणादिश्रुतीनां विधिविभक्तिराहित्येऽपि यच्छब्दाद्युपस्थितत्वेऽप्यप्राप्तार्थतया चक्रधारणविधायकत्वं युक्तम् ॥ —इति वदन्ति ॥

यदपि—चरणादिश्रुतीनां विधिविभक्तिराहित्यान्न विधायकत्वम्—**इति। तन्न**; 'ब्रह्मविदाप्नोति परं', 'तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इत्यादिवाक्यानां विधिविभक्तिरहितानामप्यज्ञातज्ञापकत्वलक्षणविधायकत्वाङ्गीकारात्। सदेव सोम्येदमग्र आसीदित्यादिसाद्विद्यायां 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ सम्पत्स्ये' इति सदुपासनस्य मोक्षहेतुत्वश्रवणेन सदुपासीतेति विधेर्वेदान्तिभिः कल्पितत्वात्। अत एवोद्गीथविद्याविचारे **श्रीभाष्ये** उक्तं—'वेदनविषयविधिप्रत्ययाश्रवणेऽपि फलसाधनत्वश्रवणाद्वेदनविषयो विधिः कल्प्यते'—इति। किं च—विधिविभक्तेरपीष्टसाधनत्वबोधनमुखेनैव प्रवर्तकत्वं वाच्यं, न तु सक्षात्; तच्च प्रवर्तकत्वं श्रुतीनां तप्तचक्रधारणगतेष्टसाधनत्वबोधकत्वादस्त्येवेति नार्थो विधिविभक्त्या; न ह्याम्रफलं तृप्तिसाधनमिति वाक्यस्य विधिविभक्तिराहित्यमात्रेणेष्टसाधनत्वाबोधकत्वं प्रवर्तकत्वराहित्यं वा दृष्टं, अनुभवविरोधात्। यद्वा—विधिविभक्तिरहिताया अप्राप्तेस्सत्त्वाद्विधिविभक्तिः कल्प्यताम्। अत एव—पूर्वतन्त्रे विधिविभक्तिरहितानामुपांशुयाजमन्तरा यजतीत्यादीनां वचनानित्वपूर्वत्वादिति न्यायेन पञ्चमलकारकल्पनया विधायकत्वं समर्थितम् ॥

यदपि—पवित्रं त इत्यत्र बिभृयात् भर्तव्यमिति विधिपदं न कल्पयितुं शक्यं, तयोः प्रकृतवाक्यार्थेनान्वयात्; नापि भवेयुरिति पदाध्याहारेण शृता भवेयुरितिवाक्यार्थान्वयसम्भवः, शृतास इत्यस्य समाशतेति समभिव्याहृतक्रियापदान्वयेन निराकाङ्क्षस्याश्रुतक्रिया-पदान्तरेणान्वयायोगात्; अन्यथा ब्राह्मणो न हन्तव्य इत्यत्रापि ब्राह्मणो न पूजनीयः, किं तु हन्तव्य इत्यर्थस्स्यात्। तथा च पवित्रं त इत्यस्याध्याहृतविधिवाक्येनैकवाक्यतया चक्रधारणविधायकत्वमनु-पपन्नम्—इति॥ तन्न। उक्तरीत्या मन्त्राणां विधिघटितत्वाभावेन विधायकत्वासम्भवेऽपि मन्त्रलिङ्गाक्षिप्तविधिवाक्यानां तथात्वसम्भवात्; राणाके 'ये अश्वदास्सह ते सूर्येण' इत्यादिमन्त्रलिङ्गाक्षिप्ताश्वदानफल-विधेरङ्गीकारवत्, सूक्तवाकमन्त्रगतायुरादिफलकीर्तनैः प्रस्तरप्रहरण-स्यायुरादिफलकत्वबोधकविध्यङ्गीकारवच्च तप्तमुद्राधारणस्य विशिष्ट-लोकप्राप्त्यादिफलकत्वबोधकविधेः कल्पनसम्भवाच्च॥

यत्तु—मन्त्रार्थवादादिषु योऽर्थश्शब्दादर्थाद्वाऽवगम्यते, तद्विषयमेव विधिवाक्यं कल्पयितुमुचितम्; यथा—'तरति ब्रह्महत्यां योऽश्वमेधेन यजति' इत्यत्राश्वमेधब्रह्महत्यातरणयोस्सम्बन्धस्य शब्दात्प्रतीयमान-तया तद्विषयकं विधिवाक्यं, 'यदाग्नेयोऽष्टाकपालः' इत्यत्र यजमान-द्रव्यस्य त्यागमन्तरेण देवतासम्बन्धायोगात् शब्दप्रतिपन्नद्रव्यदेवतास-म्बन्धबलादर्थाक्षिप्ते यागे विधिः कल्प्यते। प्रकृते—चरणं पवित्रमित्यत्र चक्रधारणवाचकपदाभावेन वचनान्तरमनपेक्ष्य चक्रधारणोपस्थापकत्वा-योगेन तद्विधायकवाक्यानुमानायोगात्, पवित्रं त इत्येतन्मन्त्रगतस्य तप्तपदस्य चक्रत्रिशूलादिसाध्यतापसाधारण्येन नियमतश्चक्रतापोप-स्थापकत्वायोगाच्च न तयोर्मन्त्रयोश्चक्रधारणविधायकत्वम्। अत एव—हिरण्यं भार्यमित्यत्र हिरण्यपदस्य क्रत्वर्थदक्षिणाभूतहिरण्यतदितर-भोगार्थहिरण्यसाधारण्यात्तत्पदेन नियमतः क्रत्वर्थहिरण्योपस्थापनायो-

गान्न हिरण्यद्वारा तद्धरणं क्रत्वर्थं; किं तु पुरुषार्थमेवेत्युक्तम्। चमूषच्छ्येन इत्येतन्मन्त्रगतस्य बिभ्रत्पदस्य पूर्वोक्तरीत्या सुदर्शनकर्तृकाष्टादशायुधधारणवाचितया गोविन्दुशब्दस्योकारान्तप्रथमान्तत्वे ब्रह्मांशभूतविष्णुकर्तृकायुधचतुष्टयभरणवाचितया च पुरुषकर्तृकभरणाप्रतीतेर्न चमूषत्मन्त्रबलादपि पुरुषस्य भरणविषयविधिकल्पनं युक्तम्; वचनान्तरानुसारेण पवित्रं त इत्यादीनां तप्तचक्रधारणविधिपरत्वाभ्युपगमे नियमतो वचनान्तरस्योपजीवनवद्वचनान्तरप्राप्तानुवादित्वं दुर्वारमेव—इति ॥

तन्न। यद्वाक्यस्य यद्विषयकविधिवाक्यकल्पकत्वं तद्वाक्यस्य शब्दवृत्त्यर्थापत्त्यन्यतरप्रयोज्यतद्विषयकबोधजनकत्वमिति व्याप्त्या व्यापकाभावाद्विधिवाक्यकल्पकत्वं न सम्भवतीति हि विवक्षितं; तन्न युक्तं, तादृशव्याप्तेरसिद्धेः; 'यत्र बाणास्सम्पतन्ति कुमारा विशिखा इव' इत्यस्य शिखाकर्मविषयकविधिकल्पकस्य तद्विषयकबोधजनकत्वाभावेन व्यभिचारात्। न च—तत्र तत्तद्गृह्योक्तविविधशिखत्वस्य तत्करणमन्तरेणानिष्पत्तेरर्थापत्त्या तत्करणस्य तद्वाक्यजन्यबोधविषयत्वान्नोक्तव्यभिचार इति—वाच्यम्; तथा सति येन पूत इत्यस्य सुदर्शनेन पूतत्वस्य तद्धारणमन्तरेणानुपपत्तेरर्थापत्त्या तद्धारणबोधकत्वात्तद्विषयकविधिवाक्यकल्पकत्वस्य दुर्वारत्वात्। न च—चरणदेवताकयागस्य प्रस्तुतत्वात् तद्धारणं विनाऽपि यागद्वारा तेन पूतत्वमुपपन्नमिति—वाच्यम्। यागस्य 'अनु ह वै स्वर्गं लोकं विन्दति, कामचारोऽस्य स्वर्गे लोके भवति' इतिवाक्यशेषात्फलवत्त्वसिद्ध्या फलाकाङ्क्षाविरहाद्दुष्कृततरणरूपस्य च फलस्योदाहृतशतपथोदितश्रुत्यैकार्थ्यप्रत्यभिज्ञानुरोधेन झडिति सुदर्शनधारणसाध्यत्वोपस्थितेस्तस्यैवात्र द्वारतयाऽर्थापत्त्या बोधनात्। न चैवं—द्वारभूतक्रियाविशेषनिर्धारणार्थं श्रुत्यन्तरापेक्षायां तत्प्राप्तानुवादित्वमुक्तश्रुतेस्स्यादिति—

वाच्यम्। अनुवादकत्वं हि—स्वबोधनीयपुरुषगताज्ञानादिविरोधिना स्वानुपजीविमानान्तरेण ग्राह्यार्थकत्वम्। अत्र विरोधिनेत्यन्तोपादानात् 'अग्निहोत्रं जुहोति' इति नानाशाखागतवाक्यानां नानुवादकत्वापत्तिः; एकशाखास्थवाक्यस्य शाखान्तरस्थतादृशवाक्यग्राह्यार्थत्वेऽपि शाखान्तरस्थवाक्यस्यैतच्छाखाध्यायिपुरुषगताज्ञानादिविरोधित्वाभावात् ॥ स्पष्टं चेदं द्वितीयाध्यायचतुर्थपादे भाट्टदीपिकादौ । अत एव 'द्वयोः प्रणयति' इति वाक्यं चातुर्मास्यप्रकरणाम्नातमुदाहृत्य, किं प्राकृतं प्रणयनमिहविधीयते, उत सौमिकं, आहोस्विदपूर्वमिति विचार्य, प्राकृतं सौमिकं चेति पक्षद्वयं प्रापय्य सिद्धान्तितम्—

"न हि प्रणयतीत्येतत्सौमिकस्याभिधायकम् ।
प्राकृतस्यानुवादे च वचनं स्यादनर्थकम् ॥
तस्मात्प्रणयतीत्येतदप्राकृतमसौमिकम् ।
अपूर्वमग्नेर्नयनं वहत्याहवनीयतः ॥" —इति ॥

यद्यपि—प्रणयनमात्रमत्र श्रुतं; तथाऽपि—शाखान्तरे 'आहवनीयात् द्वावग्नी प्रणयते' इति वचनात् तदेकार्थत्वादनेन वचनेन प्राकृतप्रणयनोत्तरकालमाहवनीयादग्न्यन्तरस्य प्रणयनं पशुबन्धवद्विधीयत इति। तथा च द्वयोः प्रणयतीति वाक्यार्थनिर्णयाय 'आहवनीयात् द्वावग्नी प्रणयते' इति वचनान्तरानुरोधेऽपि पूर्ववाक्यस्य विधायकत्ववदिहापि विधायकत्वं नानुपपन्नमिति ॥

यद्यप्युक्तं—पवित्रमन्त्रगतस्य चक्रत्रिशूलादिसाध्यतापसाधारणस्य तप्तपदस्य हिरण्यभरणाधिकरणन्यायेन नियमतश्चक्रधारणोपस्थापकत्वायोगान्न तद्विधायकत्वम्—इति। तदप्ययुक्तम्; यद्वाक्यस्य यद्विषयकविधिवाक्यकल्पकत्वं तद्वाक्यस्य नियमतस्तदुपस्थापकत्वमिति व्याप्तिरुक्तसन्दर्भेण विवक्षिता; सा च न सम्भवति, वाजिनामुद्भिद्विद्यायां व्यभिचारात्; तत्र 'भवत्यात्मना परास्य भ्रातृव्यो भवति

य एवं वेद' इति वेदनसामान्यप्रतिपादकस्य नियमतो ध्यानानुपस्थापकस्यापि वाक्यस्योद्गातृविशेष्यकप्राणत्वप्रकारकध्यानविधिकल्पकत्वाङ्गीकारात्। प्रकृते हिरण्यभरणाधिकरणन्यायोदाहरणमपि न युक्तं; सङ्कोचकमानान्तरविरहस्थल एव तन्न्यायस्य प्रवृत्तेः; प्रकृते च तप्तपदस्य 'अग्निर्वै सहस्रारः' इति पूर्वोक्तश्रुत्या चक्रतापप्रतीतेस्तन्न्यायाप्रवृत्तेः। अन्यथा—'अक्ताश्शर्करा उपदधाति' इत्यस्याञ्जनसामान्यपरत्वं, तेजो वै घृतमित्यस्य द्रवद्रव्यसामान्योपलक्षकत्वं च स्यात्। तथा च—सन्दिग्धे तु वाक्यशेषादित्यधिकरणविरोधः; तदधिकरणे तेजो वै घृतमिति वाक्यशेषवशेनाक्तपदस्य घृताक्तत्वरूपविशेषपरत्वाङ्गीकारात्॥

यदपि—विवादास्पदानि पवित्रं त इत्यादयो मन्त्राः न विधायकाः, कर्मकरणतया ब्राह्मणेन विनियुक्तत्वात्, व्रीह्यादिवदित्यनुमानादेतेषां मन्त्राणामविधायकत्वसिद्धिः। अत्र स्वाध्यायोऽध्येतव्य इति वाक्यादध्ययनकर्मतया विनियुक्तस्य 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति ब्राह्मणवाक्यस्य विधायकत्वोपगमात्तत्र व्यभिचारस्स्यात्; तद्वारणार्थं करणतयेति॥

"विधायकं सदप्यर्थं ब्राह्मणं स्मारयत्यपि।
मन्त्रतस्तु विधिर्वा स्यादित्येतत्तद्वदिष्यते॥"—

इति वार्त्तिकोक्तन्यायेन समिधो यजतीत्यादिवाक्यानां कर्मकरणतया लिङ्गेन विनियोगेऽपि विधायकत्वोपगमात्। तथाविधानामेव 'वसन्ताय कपिञ्जलानालभेत' इत्यादीनां विधायकत्वोपगमात्तत्र व्यभिचारवारणाय ब्राह्मणेनेति। तदुक्तम्—

"तस्माद्व्रीह्यादिवन्मन्त्राः करणत्वेन कर्मणाम्।
ब्राह्मणेन नियुज्यन्ते तद्वत्ते न विधायकाः॥"—इति—इति॥

तदसत्। पवित्रं त इत्यादयो मन्त्रा इत्यत्र पवित्रन्त इति मन्त्रः आदिः प्रथमोपस्थितिविषयो येषामिति विग्रहवाक्याद्यदुपस्थिति-ध्वंसासमानकालीनोपस्थितिविषयत्वस्य लाभात्तस्य पक्षतावच्छेदकत्वे पवित्रमन्त्रस्य पक्षबहिर्भावप्रसङ्गः ॥

यदि च—तद्गुणसंविज्ञानबहुव्रीहिमङ्गीकृत्य 'सर्वादीनि सर्वनामानि' इत्यत्र सर्वशब्दस्य सर्वनामसंज्ञावत्, 'जन्माद्यस्य यतः' इत्यत्र जन्मनो लक्षणघटकत्ववत् पवित्रमन्त्रस्यापि पक्षान्तर्भावः—इत्युच्यते; तदाऽपि विवादास्पदानीति व्यर्थम्। एवं—कृतिसाध्यत्वादिविषयकबोधजनकत्व-रूपविधायकत्वाभावस्य साध्यत्वे बाधः, उक्तरीत्या तेषां मन्त्राणां तद्विषयकबोधजनकत्वात्। कृतिसाध्यत्वादिवाचकलिङादिविभक्तिघटि-तत्वाभावसाधने च सिद्धसाधनम्; विधिवाक्यकल्पकत्वाभावसाधने च करणतयेत्यादिपदानां व्यावृत्त्यसङ्गतिः; 'ज्योतिष्टोमेन स्वर्गकामो यजेत', 'समिधो यजति', 'वसन्ताय कपिञ्जलानालभेत' इत्यादेर्विधा-यकत्वेऽपि विधिवाक्यकल्पकत्वाभावरूपसाध्यस्याबाधेन व्यभिचारा-प्रसक्तेः। कर्मकरणतया ब्राह्मणेन विनियुक्तत्वादिति हेतुकथनमपि न सत्, असिद्धेः; मन्त्रं विनाऽपीच्छाविशेषरूपत्यागादेरुत्पत्त्या मन्त्रस्य तत्करणताया बाधितत्वात्, इष्टसाधनताज्ञानादिघटितक्लृप्तसामग्र्या-ऽन्यथासिद्धत्वाच्च मन्त्रस्य करणतां कथं ब्राह्मणं बोधयेत्; बोधयेद्वा कथं प्रमाणी भवेत् ॥

न च—मन्त्रस्य त्यागादिजन्यपरमापूर्वजनककलिकापूर्वजनकीभूतो-च्चारणकर्मत्वं, न तु जनकत्वमिति न दोष इति—वाच्यम्; तथा सति दृष्टान्ते व्रीह्यादौ साधनवैकल्यापत्तेः। किं च—धन्वन्निव प्रपा असि' इत्यादिमन्त्रस्य 'अग्नये प्र व ते पुरोडाशमष्टाकपालं निर्वपेत्' इत्यादिना विहितेष्विष्टिविशेषेषु करणमन्त्रतया ब्राह्मणे विनियुक्तत्वेऽपि प्रपाप्रवर्तनादिविधिकल्पकत्वोपगमात्तत्र व्यभिचारः।

'तृप्तां जहुर्मातुलस्येव योषा पैतृष्वसेयी वपाम्' इत्यादिमन्त्राणां तत्तत्कर्मकरणतया ब्राह्मणेन विनियोगेऽपि मातुलसुताविवाहविधिकल्पकत्वस्य माधवीयादावभ्युपगमात्; 'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य', 'चत्वारि वाक्परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः' इत्यादिमन्त्राणामन्यत्र विनियुक्तानामेव व्याकरणाध्ययनविधिकल्पकत्वस्य भगवता **पतञ्जलिना**ऽभ्युपगमाच्च; तत्र सर्वत्र व्यभिचारः॥

न च—मन्त्राः न तत्कर्मविधायकाः, तत्कर्मकरणतया ब्राह्मणेन विनियुक्तत्वादिति विवक्षितत्वान्नोक्तव्यभिचारः, उदाहृतमन्त्राणां यत्र कर्मणि विनियोगस्तत्कर्मविधायकत्वाभावात्, पवित्रं त इत्यादिमन्त्रस्य 'पवित्रं ते विततमिति मुद्रयेद्दक्षिणे भुजे' इति सनकस्मृतिवचनेन विधेयत्वाभिमते कर्मणि विनियोगसत्त्वान्नासिद्धिरिति—वाच्यम्। अत्र सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे एकस्य मन्त्रस्य विधायकत्वाभावेऽपि मन्त्रान्तरस्य तथात्वमादायार्थान्तरं; अवच्छेदकावच्छेदेन तथात्वे भागासिद्धिः, पवित्रमन्त्रे हेतुसत्त्वेऽपि चरणादिमन्त्रेषु तदभावात्; प्राप्तार्थत्वस्योपाधित्वादप्रयोजकत्वाच्च समिधो यजतीत्यादिवाक्यानां समिधादियागविधायकत्वलैङ्गिकतद्यागविनियुक्तत्वाभ्युपगमवदेकस्मिन् कर्मणि वचनविनियुक्तत्वविधायकत्वयोरभ्युपगमे दोषाभावात्॥

यत्तु—समिधो यजतीत्यादीनामध्ययनवेलायां विधायकानामेव सतामनुष्ठानवेलायां स्मारकत्वं युक्तं, विरोधाभावात्; पवित्रमन्त्रादीनां तु नाध्ययनवेलायां चक्रधारणविधायकत्वं, तेषां तत्प्रत्यायनासामर्थ्यस्य निषेधपरत्वस्य च प्राक् प्रपञ्चितत्वात्। एवं च—पवित्रं ते विततमित्यादिविनियोगवचनबलेन तेषां तत्प्रत्यायनसामर्थ्यमुपजनय्य तद्विधायकत्वमभ्युपगन्तव्यं; ततश्च चक्रधारणस्वरूपमवगमय्य तत्र

मन्त्रविनियोगानन्तरं तत्र विनियुक्तैश्च मन्त्रैः पूर्वप्राप्तमेव चक्रधारणं विधीयत इति वदन् बकबन्धोपायदेशिकवत्कथं न हास्यवचनः—इति ॥

तन्न। तेषां मन्त्राणां विधिवाक्यकल्पकत्वाभ्युपगमेऽपि विधायकत्वानङ्गीकारात्; विधायकत्वाङ्गीकारेऽपि न दोषः, शब्दसामर्थ्यादुपबृंहणानुरोधाच्च तेषां तत्प्रत्यायनसामर्थ्यस्य पूर्वमुपपादितत्वात्, निषेधपरत्वस्य च निरस्तत्वाच्च ॥

वस्तुतः—स्मारकत्वविधायकत्वयोर्विरोध एवासिद्धः, तद्विषयकस्मृतिजनकत्वतद्विशेष्यकेष्टसाधनत्वादिप्रकारकबोधजनकत्वयोर्घटमानयेत्यादीनां घटोपस्थितिजनकत्वघटविषयकशाब्दबोधजनकत्ववदविरोधात् ॥

इति पवित्रादिमन्त्राणां विधायकत्वसमर्थनप्रकारः सम्पूर्णः ॥

अथेदानीं खिलश्रुतीनां तप्तमुद्राधारणपरत्वं व्यवस्थाप्यते ॥

"निचिक्षेप सुषणं भिद्यमानं मध्येबाहुमदधत्सुदर्शनं। विष्णोरिदं भूरिदं भूरि तेजः प्रधर्षति दिवानक्तं बिभृयुस्तज्जनासः ॥"

—इति ॥

अस्यार्थः॥ मध्येबाहुं—बाह्वोर्मध्ये, वक्षसीत्यर्थः ; बाहुद्वयमध्यत्वं च—एतद्बाहुसंयुक्तसंयोगपर्याप्तसङ्ख्यासजातीयसङ्ख्यापर्याप्त्यधिकरणबाह्वन्तरसंयुक्तसंयोगवत्त्वं, वक्षस एकबाह्ववधिकयादृशसङ्ख्याश्रयसंयुक्तसंयोगवत्त्वं अपरबाह्ववधिकतादृशसङ्ख्याश्रयसंयुक्तसंयोगवत्त्वान्मध्यत्वोपपत्तेः ; साजात्यं च सङ्ख्याविभाजकरूपेण बोध्यम् ; मूले वृक्षस्संयोगीत्यादाविव सप्तम्या अवच्छेदकत्वार्थकतया मध्येबाहुमित्यस्य वक्षो-

ऽवच्छेदेनेत्यर्थः। न च—मूले बाह्वोर्दधत इति श्रुतौ बाहुमूले सुदर्शनधारणविधानात् तद्विरोधप्रसङ्ग इति—वाच्यम्; वक्षसोऽपि सुदर्शनस्थानत्वस्य वैकल्पिकस्य सम्भवात्। न च—अष्टदोषापत्त्या विकल्पो न युक्त इति—वाच्यम्; तथा सति व्रीहियवविकल्पस्याप्यष्टदोषदुष्टत्वेन परित्यागप्रसङ्गात्। वचनबलं च तुल्यं। वक्षोऽवच्छेदेन सुदर्शनमदधत् अदधानः, वह्निसन्तप्तस्वसंयोगजन्यकिणवत्त्वरूपसम्बन्धप्रयोजकव्यापाराभाववानित्यर्थः। भिद्यमानं—महापातकोपपातकादिरूपेण विभज्यमानं; सुषणं—अन्तकरं, मरणादिरूपनाशप्रयोजकं पापमितिसामर्थ्याल्लभ्यते; षो अन्तकर्मणीत्यस्य छान्दसाकारलोपे ल्युटि च रूपम्। निचिक्षेप—निहितवान्, निपूर्वस्य क्षिपतेः घटंनिक्षिपतीत्यादौ स्थापनवाचित्वदर्शनात्, स्थापनं चाधेयताप्रयोजकव्यापारः, आधेयतायाश्चाधिकरणसाकाङ्क्षत्वात् स्वात्मनीत्यध्याहारः। तथा च—वक्षोऽवच्छेदेन सुदर्शनधारणाभाववान् स्वात्मनिरूपितपापनिष्ठाधेयताप्रयोजकव्यापाराश्रय इत्युक्त्या धनवान् सुखीत्यादौ धनस्य सुखप्रयोजकत्ववदुक्ताभावस्य पापप्रयोजकत्वलाभात् पापप्रयोजकीभूताभावप्रतियोगित्वरूपनित्यत्वलाभः॥

न च—वक्षोऽवच्छेदेन सुदर्शनधारणाभावस्य पापप्रयोजकत्वे बाहुमूले सुदर्शनधारणवतोऽपि प्रत्यवायापत्तिरिति—वाच्यम्; बाहुमूलावच्छेदेन तदभावविशिष्टस्य वक्षोऽवच्छेदेन तदभावस्य प्रत्यवायप्रयोजकत्वाभ्युपगमात्, विशिष्टस्यानातिरिक्ततया वक्षोऽवच्छेदेन तदभावस्य प्रत्यवायप्रयोजकत्वानपायात्॥

सुदर्शनधारणाभावे दोषान्तरमप्याह--विष्णोरित्यादिना। तं पुरुषं, विष्णोरिदं विष्णुसम्बन्धि सुदर्शनं, दिवानक्तं प्रधर्षति सदा हिनस्तीत्यर्थः। तादृशपुरुषाधिकरणकालत्वव्यापकत्वमेव प्रधर्षणे विवक्षितं, केवलकालत्वव्यापकत्वस्य बाधात्। तादृशशरीरोपलक्षितात्मप्रधर्षण-

परत्वे च केवलकालत्वव्यापकत्वस्यापि सम्भवः; प्रघर्षतीति वर्तमानत्वस्य चाविवक्षैव, प्रयोजनविरहात्—इति ध्येयम् ॥

तत्र हेतुमाह—भूरिदमिति, भूरि द्यति खण्डयति, दो अवखण्डन इति धातोः। तत्रापि हेतुमाह—भूरि तेज इति; भूरि तेजो बलं यस्य तद्भूरितेजः; 'तेजो बले प्रभावेऽग्नौ रोचिष्यर्चिषि रेतसि'—इति वैजयन्ती। तत्—तस्मात्, उक्तहेतुद्वयात्; जनासः—जनाः, आज्जसेरसुगित्यसुगागमः। सुदर्शनमित्यनुषङ्गः; बिभृयुरिति—वह्निसन्तप्तस्वसंयोगजन्यकिणवत्त्वरूपसम्बन्धप्रयोजको य इष्टसाधनत्वकृतिसाध्यत्वाश्रयव्यापारः तदाश्रयाः ॥—इत्यर्थः ॥

एतच्छ्रुतेर्व्याख्यानान्तरं **सच्चरित्ररक्षायां वेदान्ताचार्यैः** कृतं; तच्च तत्रैव द्रष्टव्यम् ॥

अत्र भास्करः—निचिक्षेप सुषणमिति श्रुतिर्न सुदर्शनधारणे प्रमाणं, निचिक्षेप सुषणमित्यनेन चक्रधारणनिषेधस्यैव प्रतीतेः। मध्येबाहुं—बाहु; मूले, चक्रं, योऽदधत्—न दधाति, दधातेश्शत्रन्तस्य नञ्समासे रूपं सः—चक्रधारणरहितः पुमान्, चक्रधारणविरोधिसङ्कल्पेन, भिद्यमानं सुषणं—अन्तकरं पापं, निचिक्षेप—अतिशयेन क्षिप्तवान्, तिरस्कृतवान् —इत्यर्थः ॥ **यद्वा**—वसुसुषणनानि सन्त्वित्यत्र सुषणशब्दस्य षणसम्भक्ताविति धातुनिष्पन्नस्य सम्भजनीयशोभनवाचित्वदर्शनेन निपूर्वकस्य क्षिप प्रेरण इति धातोस्स्थापनरूपनिधानवाचितया भिद्यमानं अनेकविधं शोभनं स्वात्मनि निचिक्षेप निहितवानित्यर्थो ग्राह्यः ॥ **यद्वा**—अदधदिति न सुबन्तः, किन्तु तिङन्तः। तथा च—यस्सुदर्शनमदधत् दधार, असौ सुषणं शोभनानि, निचिक्षेप—नितरां तिरस्कृतवान्। एवं प्राथमिकव्याख्याद्वयानुसारेण तद्धारणाभावे फलमुक्त्वा तद्धारणे अनिष्टफलमाह—तृतीयपादेन। तृतीयव्याख्याने तु सुदर्शनधारणे शोभनतिरस्कार उक्तः। तत्र हेतुरुच्यते—'विष्णोरिदं भूरिदं

भूरि तेजः प्रधर्षति दिवानक्तम्' इति। प्रधर्षति--हिनस्तीत्यर्थः। कान् हिनस्तीत्यत आह–बिभृयुस्तज्जनास इति। तदित्यव्ययं तानित्यर्थे। ये जनाः बिभृयुस्तानित्यर्थः॥ यद्वा–पादत्रये सुदर्शनं न धार्यमित्युक्तं, तत्किं सर्वैर्न धार्यमिति; नेत्याह--'दिवानक्तं बिभृयुस्तज्जनासः' इति। तज्जनाः–विष्णुजनाः दासीदासादयो बिभृयुरित्यर्थः। तथा च–सुदर्शनं विष्ण्वालयानियुक्तपुरुषधार्यं सदपि तदितरपुरुषैर्न धार्यमित्यर्थः फलतीति न वाक्यभेदशङ्काऽपि॥" —इति॥

तत्र। उक्तश्रुतेस्सुदर्शनधारणनिषेधकत्वं हि–सुदर्शनधारणप्रवृत्तिप्रतिबन्धकतद्विशेष्यकानिष्टसाधनत्वप्रकारकबोधजनकत्वं; यथा—न कळञ्जं भक्षयेदिति श्रुतेः कळञ्जभक्षणे बलवदनिष्टाननुबन्धित्वाभावरूपबलवदनिष्टानुबन्धित्वप्रकारकबोधजनकत्वं तन्निषेधकत्वं, न तु तदभावविशेष्यकेष्टसाधनत्वादिप्रकारकबोधजनकत्वं तत्। तथा सति 'नातिरात्रे षोडशिनं गृह्णाति' इत्यस्य षोडशिग्रहणाभावे इष्टसाधनत्वबोधकस्य तन्निषेधकत्वापत्तेः। तदभावस्येष्टसाधनत्वेऽपि तस्यानिष्टसाधनत्वाप्रतीतौ तद्विषयकप्रवृत्त्यप्रतिबन्धाच्च। तथा च–प्रथमद्वितीयव्याख्ययोश्चक्रधारणाभावस्य पापनिरासकत्वशोभनसम्पादकत्वयोः प्रतीतावपि तस्यानिष्टसाधनत्वाप्रतीत्या तन्निषेधकत्वानुपपत्तिः। न च–प्रथमद्वितीयव्याख्ययोरपि तद्धारणस्य विष्णोरिदमित्यादिनाऽनिष्टसाधनत्वं प्रतीयते। ये बिभृयुस्तानिति तच्छब्दस्य सुदर्शनधारणविशिष्टपरतया तानिति द्वितीयान्तार्थविशिष्टवृत्तित्वस्य हिनस्तिधात्वर्थतावच्छेदके मरणेऽन्वये तद्धारणस्यापि प्रयोज्यतासम्बन्धेन धर्मिपारतन्त्र्येण भानोपगमादिति–वाच्यम्। यत्तत्पदाध्याहारदोषात्, तदित्यस्य तानित्यर्थाङ्गीकारे स्वारस्यभङ्गात्, बिभृयुरिति विध्यर्थानन्वयप्रसङ्गात्; एतावतैव प्रवृत्तिप्रतिबन्धोपपत्तौ पूर्वार्धेन चक्रधारणाभावस्येष्टसाधनत्वादिबोधनवैयर्थ्याच्च; निपूर्वकक्षिपेः स्थापनार्थतयैव प्रसिद्धेस्तस्य

तिरस्कारार्थकत्वकल्पनं प्रथमतृतीयव्याख्ययोरयुक्तम् ॥

यत्तु—तज्जनाः विष्णुजनाः दासीदासादयो बिभृयुरित्यर्थः—इति। **तन्न**—तत्पदस्य भरणकर्मसुदर्शनपरतया भिन्नपदत्वात्, सुदर्शनमित्यस्यानुषङ्गे तच्छब्दस्य हेतुपरत्वात्। ऐकपद्येऽपि—तज्जनाः विष्णुजनाः, तद्भक्ताः—इत्यसङ्कोचेन भगवद्भक्तानां सुदर्शनधारणविधौ विरोधाभावाच्च। किं च—अस्यामेव श्रुतौ बिभृयुस्तज्जनास इति चक्रधारणविधानान्निचिक्षेपेत्यादेर्न तन्निषेधपरत्वम्, विध्यपेक्षितस्तुत्यादिसमर्पकत्वस्यैवोचितत्वात्। अपि च—चक्रधारणस्य प्रत्यक्षशतपथश्रुतिविहितत्वाद्रागादिभिरप्राप्तत्वाच्च कथमस्य मन्त्रस्य तन्निषेधपरत्वम् ॥

यत्तु—पञ्चरात्रप्रामाण्यभ्रमवतस्तद्विहितचक्रधारणस्यापि प्राप्तत्वेन तन्निषेधोपपत्तिः, 'तद्धैक आहुरसदेवेदमग्र आसीत्' इति शाक्यागमप्राप्तासत्त्वानुवादेन 'कथमसतस्सज्जायेत' इति निषेधदर्शनात् ॥ यद्वा-पञ्चरात्रागमप्रामाण्येऽपि तद्विहितचक्रधारणस्य देवलकादिविषयतया सर्वत्रैवर्णिकविषयत्वाभावेन भ्रमात्सर्वत्रैवर्णिकविषयतया प्रसक्तस्य चक्रधारणस्य निषेधोऽस्तु। यद्वा—वक्ष्यमाणप्रकारेणास्य मन्त्रस्य भूर्जपत्रादिलिखितशङ्खचक्रादिधारणविषयत्वमस्तु—इति। **तन्न**; भगवच्छास्त्रप्रामाण्यस्य स्थापयिष्यमाणतया प्रमाणसार्वभौमेन तच्छास्त्रेण प्राप्तस्य निषेधायोगात्, शतपथे तप्तं चक्रं द्विभुजे धार्यमित्यधिकारिविशेषानादरेण विहितस्य तस्य सर्वत्रैवर्णिकविषयत्वावश्यंभावात्, देवलकादिमात्रविषयत्वाभावात्; 'दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्' इतिसर्वत्रैवर्णिकविषयत्वश्रवणाच्च। तत्रत्यविप्रशब्दस्य 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते' इतिश्रुतिगतब्राह्मणशब्दवत् सर्वत्रैवर्णिकपरत्वात्; 'न कळञ्जं भक्षयेत्', 'न परदारान् गच्छेत्' 'सत्यान्न प्रमदितव्यम्' इत्यादिष्वधिकारिविशेषानादरेण विहितेषु सर्वधर्मत्वदर्शनात्; स्वाराज्यकामो राजा राजसूयेन यजेतेत्यादौ प्रनिय-

तत्कर्मविधायकेऽधिकारिविशेषोपादानदर्शनाच्च ; वक्ष्यमाणस्मृतिशतैस्सर्वत्रैवर्णिकविषयत्वसिद्धेश्चेति ॥

एवमस्य मन्त्रस्य भूर्जपत्रादिलिखितचक्रादिधारणपरत्वमपि न युक्तम्;

"हरिचर्यासु युक्तस्य विघ्नं कुर्वन्ति राक्षसाः ।
तद्विघ्नशमनार्थं तु पूजावेलास्वतन्द्रितः ॥
हेमपद्मेऽथवा भूर्जपत्रे वाऽपि सुदर्शनम् ।
विलिख्य पट्टं संवेष्ट्य बिभृयाद्दक्षिणे भुजे ॥"

इति सुदर्शनाध्यायगतवक्ष्यमाणवचने रेखासुदर्शनाश्रयभूर्जपत्रधारणस्य प्रतिपादनेन तस्य सुदर्शनधारणरूपत्वाभावेनास्याः श्रुतेस्तत्परत्वासम्भववत् रेखाघटादेर्घटादिपदमुख्यार्थत्वाभावाद्रेखासुदर्शनस्यापि तत्पदमुख्यार्थत्वाभावात् । अस्तु वा तादृशपत्रधारणस्यापि परम्परया सुदर्शनधारणरूपत्वं, तथाऽप्युक्तश्रुतिप्रतिपाद्यसुदर्शनधारणस्य नोक्तवचनप्रतिपाद्येन तेनाभेदसम्भवः; श्रुतौ वक्षसि उक्तवचने च दक्षिणभुजे विधानेन स्थानभेदात्, श्रुतौ पापनिवृत्त्यात्मकफलस्य वचने च भगवदाराधनप्रतिबन्धकीभूतविघ्ननिवारणरूपफलस्यावगमेन फलभेदाच्च। गुणोपसंहारपादे **न वाऽविशेषादि**त्यत्र 'तद्यत्सत्यमसौ स आदित्यो य एष एतस्मिन्पुरुषो यश्चायं दक्षिणेऽक्षिन्' इत्यारभ्योक्ताया बृहदारण्यकगतायास्सत्यविद्याया आदित्यमण्डलाक्षिरूपस्थानभेदेन भेदस्य व्यवस्थापनेन स्थानभेदस्य भेदकत्वावगमात्; 'एकं वा संयोगचोदनाख्याविशेषात्' इति शाखान्तराधिकरणसूत्रे फलसंयोगाविशेषस्य कर्मैकत्वोपपादकत्वोक्त्या तद्भेदस्य तद्भेदव्याप्यत्वावगमात् ॥ एवं— रक्षोघ्नान्वा मनून् जपेदिति भूर्जपत्रलिखितसुदर्शनधारणस्य रक्षोघ्नमन्त्रपाठेन सह विकल्पस्य वक्ष्यमाणतया श्रुतेस्तादृशसुदर्शनधारणपरत्वे नित्यवच्छ्रवणानुपपत्तिरिति ॥

साम्नि मैत्रायणीयशाखायां श्रूयते—"पवित्रमित्यग्निः,
अग्निर्वै सहस्रारः, सहस्रारो नेमिः, नेमिना तप्ततनूः, ब्रह्मण
स्सायुज्यं सलोकतामाप्नोति ॥" —इति ॥

अयमर्थः—अस्याः श्रुतेः पवित्रं त इति श्रुतिव्याख्यानरूपत्वात्पवित्रमित्यग्निरित्यस्य पवित्रं त इत्यत्र यत्पवित्रपदं तत्तात्पर्यविषयोऽग्निसंसृष्टं सुदर्शनमित्यर्थः। अनेन च पवित्रं त इत्यत्र तापहेतुत्वेन विवक्षितोऽग्निसंयोग उक्तो भवति। 'अग्निर्वै सहस्रारः'—अग्निरिति तदेकतापन्नं चक्रमुच्यते, सहस्रार इति सहस्रारपदवाच्यत्वं, सहस्रारो नेमिरिति सहस्रारपदवाच्यस्य नेमिपदवाच्यत्वं चोच्यते; 'चक्रश्चाक्रः पविर्नेमिः पृथक्चक्रस्य वाचकाः' इति नामानुक्रमण्यां माधवाचार्येण नेमिशब्दस्यापि चक्रवाचकत्वाभिधानात्। अत्र—यद्यप्यग्निसंसृष्टस्य चक्रस्य सहस्रारपदवाच्यत्वाभावात् केवलचक्रस्यैव तत्पदवाच्यत्वादग्निर्वैसहस्रार इति न युज्यते; तथाऽप्यग्निसंसृष्टचक्रस्यापि चक्रत्वेन सहस्रारपदवाच्यत्वान्न दोषः॥ ब्रह्मणस्सायुज्यमिति। सायुज्यं—समानभोगादियुक्तत्वं; परमं साम्यमुपैतीतिश्रुतेः, "मम साधर्म्यमागताः। सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" इति स्मृतेः, भोगमात्रसाम्यलिङ्गाच्चेति सूत्राच्च। सालोक्यादित्रयस्यापि ब्रह्मसायुज्यान्तर्भावज्ञापनायात्र सालोक्याभिधानं; देवतान्तरप्राप्तौ सालोक्यादिभेदसम्भवेऽपि मुक्तानां तारतम्याभावेन ब्रह्मप्राप्तौ तदसम्भवात्। यद्वा—भगवत्प्राप्तावपि श्रीविष्णुलोकादिषु द्वारकादिष्विव तथाविधभेदसम्भवात्तत्प्राप्तीच्छावतां तादृशफलभेदद्योतनाय सालोक्यस्य पृथङ्निर्देशः। यथाऽऽहुः——

"लोकेषु विष्णोर्निवसन्ति केचित्समीपमिच्छन्ति च केचिदन्ये।
अन्ये तु रूपं सदृशं भजन्ते सायुज्यमन्ये स तु मोक्ष उक्तः॥"

—इति॥ यथाभिलषितं ब्रह्मप्राप्तिकामश्चक्रेण तप्ततनूर्भवेदित्युक्तं भवति॥

अत्र भास्करः—अयं मन्त्रो न सुदर्शनधारणपरः, किन्तु मृतशरीरसंस्कारपरः। तथा हि—अत्र हीतिशब्दः प्रसिद्धावद्योती सन् 'अग्निः पवित्रं स मा पुनातु' इत्यादिश्रुत्यन्तरप्रसिद्धमनुवदति; तथा च 'पवित्रमित्यग्निः' पवित्रमितिश्रुत्यन्तरप्रसिद्धोऽग्निरित्यर्थः। वैशब्दोऽपि 'सोमो वा ओषधीनां राजा' इत्यादाविव प्रसिद्धावद्योती। अरशब्दस्य 'सहस्रारे पद्मे सह रहसि पत्या विहरसे' इत्यादौ दलवाचित्वदर्शनादत्र अरशब्देन दलसदृशज्वाला लक्षणयाऽभिधीयते; तथा च—सहस्रारः सहस्रज्वाल इत्यर्थः। णीञ्प्रापण इतिधातुनिपन्नो नेमिशब्दोऽपि 'नेमिं नमन्ति चक्षसे' इत्यादाविव नेत्रवचनः। तथा च—एवम्भूताग्निसंस्कृततनूः ब्रह्मणस्सायुज्यं गच्छतीत्युपपन्नतरं; एवं चाग्निशब्दो मुख्यवृत्तो भवति। त्वत्पक्षे तु—प्रथमश्रुतस्याग्निशब्दस्याप्रतीतसम्बन्धपुरस्कारेण सुदर्शने लाक्षणिकत्वप्रसङ्गः॥ यद्वा—अस्य मन्त्रस्य सुदर्शनपरत्वेऽप्यकारप्रश्लेषेण नेमिना अतप्ततनूरित्यर्थो ग्राह्यः॥ —इति॥

तन्न॥ अग्निः पवित्रमितिश्रुत्यन्तरेऽपि पवित्रपदार्थस्याग्नित्वोक्त्या पुनरत्र श्रुतावग्नित्वविधाने प्रयोजनविरहात्; मन्मते च पवित्रं त इतिश्रुतौ पवित्रपदार्थस्याग्निसंसृष्टत्वानुक्त्या तत्संसर्गबोधनाय तदावश्यकत्वात्; अग्निशब्दस्य प्रसिद्धाग्निमात्रपरत्वे 'अग्निर्वै सहस्रारः, सहस्रारो नेमिः' इति क्रमेणाग्निशब्दार्थविवरणानुपपत्तेः; सहस्रारादिशब्दापेक्षयाऽग्निशब्दस्याप्रसिद्धार्थकत्वात्, विवरणविवरणिभावविरहे चाग्न्यादिशब्दस्य द्विधोपादानवैयर्थ्यात्, दले अरशब्दप्रयोगमात्रस्य तत्र शक्त्यसाधकत्वात् गङ्गायां घोष इत्यादिप्रयोगवल्लक्षणयाऽपि सहस्रारे पद्म इत्यादिप्रयोगोपपत्तेः। नेमिशब्दरूढिपरित्यागश्च दोषः। न च—भवन्मतेऽपि नेमिपदस्य तत्पदवाच्ये लक्षणास्वीकाराद्रूढिपरित्यागोऽस्त्येवेति—वाच्यम्; पदानां तत्तत्पदवाच्यत्वावच्छिन्ने लक्ष-

णाया निरूढलक्षणात्वेनादोषात्। उक्तं च **लघुचन्द्रिकायां ब्रह्मानन्देन**—

"मिथ्याशब्दार्थत्वेन रूपेण मिथ्याशब्देन मिथ्यात्वस्य बोधने तु निरूढलक्षणैव, वृक्षो महीरुह इत्यादिकोशवाक्ये व्याख्यानवाक्ये च महीरुहादिपदस्य तत्तत्पदार्थपरत्वेन भूरिप्रयोगात्॥" —इति॥

किं च अस्य मन्त्रस्य मृतशरीरसंस्कारपरत्वे भगवच्छास्त्रविनियोगानुपपत्तिः। **पारमेश्वरसंहितायां** चक्रप्रतिष्ठायां विनियुज्यमानमन्त्राणां 'तत्तत्स्थापनकाले तु तत्तत्संज्ञान्मनून् जपेत्' इति सौदर्शनत्वमभिधाय 'क्षुरो हरेति सामज्ञान्पवित्रमित्यग्निरित्यपि' इत्यस्य मन्त्रस्य विनियोगाभिधानात्। एवं **हारीतस्मृतिविरोधश्च**। यथोक्तं **हारीतस्मृतौ**—

"प्रतप्तशङ्खचक्रादिहेतिभिर्मनुमुच्चरन्।
दक्षिणे तु भुजे चक्रं वामांसे शङ्खमेव च॥
गदां च बाहुमध्ये तु हृदये नन्दकं तथा।
मस्तके तु तथा शार्ङ्गमङ्कयेद्विमलं तथा॥
एवं तापक्रिया कार्या वैष्णवी कलुषापहा।
अनङ्कयित्वा चक्रेण यत्किञ्चित्कर्म सञ्चरेत्॥
तत्सर्वं याति विफलमिष्टापूर्तादिकं नृप।
अचक्रधारणो विप्रस्सर्वकर्मसु गर्हितः॥
अवैष्णवत्वमापन्नो नरकं चैव गच्छति।
चक्रादिचिह्नरहितं प्राकृतं कलुषान्वितम्॥
अवैष्णवं तु तं दूरात् श्वपाकमिव सन्त्यजेत्।
तस्माच्चक्रं विधानेन तप्तं वै धारयेद्द्विजः॥
सर्वाश्रमेषु वसतां स्त्रीणां च श्रुतिबोधनात्।
पवित्रमिति चैवाग्निरग्निर्वै चक्रमुच्यते॥

अग्निरेव सहस्रारस्सहस्रारो नेमिरुच्यते ।
नेमितप्ततनूस्सूर्यो ब्रह्मणस्समतां व्रजेत् ॥
यत्ते पवित्रमर्चिष्मदग्ने तेन पुनीहि नः ।
दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् ॥
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः ।
इत्यादिश्रुतिभिः प्रोक्तं विष्णोश्चक्रस्य धारणम् ॥
पुराणेष्वितिहासेषु सात्त्विकेषु स्मृतिष्वपि ।" —इति ॥

यत्तु—प्रथमश्रुतस्याग्निशब्दस्याप्रतीतसम्बन्धपुरस्कारेण सुदर्शने लक्षणाप्रसङ्गः—इति । तन्न; "सोमसूर्यदहनप्रभोज्वलं चक्रमेतदुदितं महामुने" इत्यादिवचनशतैस्तापकालीनप्रत्यक्षेण चाग्निमयत्वसिद्ध्या अग्निसुदर्शनयोस्सम्बन्धस्याप्रतीतत्वाभावात्, तात्पर्यानुपपत्तिवशेन प्राथमिकस्याप्यग्निशब्दस्याग्निर्वै ब्राह्मण इत्यादाविव लक्षणास्वीकारे बाधकाभावात्, तात्पर्यानुपपत्तितदभावयोरेव लक्षणातदभावयोर्बीजतया तत्र प्रथमचरमश्रुतत्वयोरप्रयोजकत्वात् । अग्निपरत्वपक्षे प्राथमिकस्य पवित्रशब्दस्य रूढित्यागो दोषः, पवित्रशब्दस्याग्नौ रूढत्वविरहात् । सुदर्शने रूढिश्च प्रागेव प्रपञ्चिता । अकारप्रश्लेषकल्पनमपि न युक्तं; सुदर्शनधारणाभावस्य मोक्षप्रयोजकत्वेऽपि नातिरात्रे षोडशिनं गृह्णातीत्यादाविव प्रतियोगिनोऽनिष्टसाधनत्वाबोधेन तन्निषेधकत्वायोगात् ॥ तस्मादियं श्रुतिस्सुदर्शनधारणपरेति सिद्धम् ॥

ऋग्वेदे खिले श्रूयते—"चक्रं बिभर्ति वपुषाऽभितप्तं बलं देवानाममितस्य विष्णोः । स एति नाकं दुरिता विधूय प्रयान्ति यद्यतयो वीतरागाः ॥" —इति ॥

अयमर्थः ॥ देवानां बलं—देवानां रक्षकं; इष्टप्राप्त्यनिष्टनिवृत्त्यन्यतरसाधनत्वरूपरक्षकपदार्थैकदेशेऽन्यतरस्मिन्देवसम्बन्धित्वस्य षष्ठ्य-

न्तार्थस्यान्वयः । देवानामित्यस्य वक्ष्यमाणरीत्याऽमितस्येत्यत्रान्वयपक्षे तु सर्वेषामित्यर्थाल्लभ्यते । देवानामित्यस्यैव वा उभयत्रान्वयः । अमितस्य—परिमाणसामान्यशून्यस्य ; अस्थूलमनण्वह्रस्वमदीर्घमित्यनेन ब्रह्मणि चतुर्विधपरिमाणनिषेधात्, परिमाणसामान्याभावविशिष्टद्रव्यत्वमेव विभुत्वमित्यागमप्रामाण्ये स्पष्टत्वात् । यद्वा—परममहत्परिमाणवत्त्वरूपविभुत्वमेवामितत्वं, परिमाणरूपगुणान्तरास्वीकारपक्षे द्रव्यत्वसमानाधिकरणभेदप्रतियोगितानिरूपितसंयोगसम्बन्धावच्छिन्नावच्छेदकताशून्यत्वरूपसर्वद्रव्यसंयुक्तत्वमेवामितत्वं ; विभूनामपि परस्परसंयोगाङ्गीकारेण कालादिसंयोगस्यापि विष्णौ सत्त्वात् ॥

यद्यप्यत्र—विष्णोरित्यनेनापि निरुक्तव्यापकत्वस्य प्रतीत्या पौनरुक्त्यम् । तथाऽपि—विशिष्टवाचकानामिति न्यायेन विष्णोरित्यस्य श्रीपतित्वावच्छिन्ने रूढ्यर्थे तात्पर्याङ्गीकारेऽपि व्यापकत्वरूपयोगार्थे तात्पर्यानङ्गीकारान्न दोषः ; अथवा—देवानाममितस्य देवानामपि सङ्ख्यातुमयोग्यगुणसमुदायाश्रयस्य अमितपदस्यार्शआद्यजन्तस्यामिताश्रयपरत्वात्, देवसमवेतापेक्षाबुद्धिजन्यसङ्ख्यापर्याप्त्यनुयोगितावच्छेदकत्वाभाववत्स्वसमवेतगुणत्वव्यापकसमुदायत्वकस्येति यावत्; तेन दशादिगुणेषु देवाद्यपेक्षाबुद्धिजन्यदशत्वादिसङ्ख्यासत्त्वेऽपि न क्षतिः ॥ तादृशस्य विष्णोस्सम्बन्धि ; अभितप्तं—वह्नितप्तं, चक्रं ; वपुषा बाहुमूलेन ; यो बिभर्ति—स्वसंयोगजन्यकिणवत्त्वरूपसम्बन्धप्रयोजकव्यापाराश्रयः । सः—तादृशसुदर्शनधारणविशिष्टः; दुरिता—पुण्यपापे, न सुकृतं न दुष्कृतमित्युक्त्वा 'सर्वे पाप्मानोऽतो निवर्तन्ते' इति दहरविद्यायां पाप्मशब्देनोभयोर्ग्रहणवदत्रापि दुरितशब्देन बन्धहेतुत्वेनोभयोर्ग्रहणात् । स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसम्बन्धेन दुरितविशिष्टान्यस्तद्ध्वंसोऽवधूननं, प्रतियोगित्वं द्वितीयार्थः ; तथा च दुरितप्रतियोगिकतादृशध्वंसोत्तरकालमित्यर्थः ; तस्य च नाकमेतीत्य-

स्यार्थे परमपदप्राप्तावन्वयात् चक्रधारणविशिष्टस्तादृशदुरितध्वंसोत्तर-कालीनपरमपदप्राप्तिमानित्यर्थे उद्देश्यतावच्छेदकस्य चक्रधारणस्य धन-वान् सुखीत्यादाविव विधेयभूतपरमपदप्राप्तौ प्रयोज्यतासम्बन्धेन मानात् अलौकिकश्रेयस्साधनत्वरूपं धर्मत्वं चक्रधारणस्योक्तश्रुत्या प्रतीयते। तदेव परमपदं विशिनष्टि प्रयान्तीत्यादिना। नाकपदस्य परमपद-परत्वं, परमपदस्य यतिप्राप्यत्वं च—'परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति' इति तैत्तिरीयश्रुतिसिद्धम्। अत्र यद्यपि परमपदस्थस्य ब्रह्मणो यतिप्राप्यत्वमुक्तं; तथाऽपि तद्गतस्य प्राप्य-तायास्तस्य प्राप्यतामन्तरेणासम्भवात्परमपदस्य प्राप्यत्वमप्युक्तश्रुत्या आक्षेपात्प्रतीयत इति बोध्यम्। वीतरागत्वं च—भगवत्प्राप्तितत्प्रयोज्य-कैङ्कर्याद्यतिरिक्तविषयकेच्छासामान्याभाववत्त्वं, तेन मुक्तेष्वपि भग-वत्कैङ्कर्यादिकामनायाः 'स यदि पितृलोककामो भवति' इत्यादिश्रुति-सिद्धायाः पितृलोकादिकामनायाश्च सत्त्वेऽपि न क्षतिः; तादृशकामन-योर्भगवत्प्राप्तिप्रयोज्यविषयकत्वेन तदतिरिक्तविषयकत्वाभावात्॥

अत्र भास्करः—असौ श्रुतिर्न सुदर्शनधारणपरा। तथा हि—

"सुदर्शनमयं रूपं धृत्वा स्वर्गापवर्गदम्।
ग्रहज्वरादिसन्तप्तान्बिभर्ति भगवान् हरिः॥"—

इत्याद्युपबृंहणानुसारेण। देवानां बलं विष्णोर्वपुषा वपुरित्यर्थः, आकारादेशश्छान्दसः; एवम्भूतं चक्रं कर्तृकारकं; ज्वरादिभिरभितप्तं सन्तप्तं नरं बिभर्ति रक्षतीत्यर्थः। **यद्वा**—वपुषा देहेनाभितप्तं सन्तप्तं, केवलदेहस्यात्मसन्तापहेतुत्वाभावात्सन्तप्तेन देहेनेति; अक्ष्णा काण इत्यादौ विकृतेनाक्ष्णेतिवत्सामर्थ्याल्लभ्यते; एवम्भूतमात्मानं बिभर्ति रक्षतीत्यर्थः। सः चक्रेण रक्षितः पुमान् दुरितानि विधूय नाकमेति, यत्र यतयो वीतरागाः प्रयान्तीत्यर्थपरत्वात्। तथा चैहिकामुष्मिक-फलकामस्सुदर्शनं पूजयेदिति विध्यर्थः फलति॥ —इति॥

तन्न—यद्वाक्यस्य यद्विषयकविधिवाक्यकल्पकत्वं तद्वाक्यस्य तद्विषयकशब्दवृत्त्यर्थापत्त्यन्यतरप्रयोज्यबोधजनकत्वमिति व्याप्तेः पूर्वं स्वयमुक्ततया चक्रं बिभर्तीत्यादिश्रुतेश्चक्रपूजाविषयकबोधजनकत्वाभावेन पूजाविषयकविधिवाक्यकल्पकत्वायोगात् । न च—उक्तश्रुतेरर्थापत्त्या पूजाविषयकबोधजनकत्वं, पूजां विना तस्य फलप्रदत्वासम्भवादिति—वाच्यम्; पूजाया अभावेऽपि ध्यानेन धारणेन योगेन स्तुत्या वा फलप्रदत्वसम्भवेन फलदानस्य पूजाक्षेपकत्वायोगात् । भवदुदाहृतोपबृंहणे सुदर्शनस्य ज्वरादिसन्तापनिवर्तकत्वमात्रबोधेऽपि पूजाध्यानधारणादिरूपद्वारविशेषानुक्त्या कस्यचित् द्वारत्वे कल्पनीये 'न व्याधिदोषस्तस्यास्ति धृतं येन सुदर्शनम्' इत्युपबृंहणान्तरे धारणस्यैव द्वारत्वोक्त्या भवदुदाहृतोपबृंहणस्यापि तत्परत्वकल्पनस्यैव युक्तत्वात् ।

"अग्निनैव तु संयुक्तं चक्रमादाय वै द्विजः ।
धारयेत्सर्ववर्णानां हरिसालोक्यसिद्धये ॥"—

इति वृद्धपराशरवचनानुसारेणैतच्छ्रुतिगतस्य बिभर्तीत्यस्य लेट्कल्पनया एतच्छ्रुतेरेव विधायकत्वोपपत्तौ विधिवाक्यान्तरकल्पनाया अयुक्तत्वात्, धर्मिकल्पनान्यायात्; मन्मते यच्छब्दाध्याहारेऽप्यनेकपदघटितवाक्यकल्पनाविरहेण लाघवानपायात् । विष्णोर्वपुषेत्यस्य चक्रविशेषणत्वमपि न युक्तं, वपुषेत्यस्य विष्णोरित्यनेनान्वये व्यवहितान्वयप्रसङ्गात्, आकारस्य छान्दसत्वकल्पनाप्रसङ्गात्, तादृशविशेषणोपादानस्य व्यर्थत्वाच्च । विशेष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगिवाचकस्य नीलो घट इत्यादौ घटान्तरव्यावृत्त्यर्थमुपात्तस्य नीलादिविशेषणस्य, ज्ञानरूपं ब्रह्मेत्यादौ ज्ञानस्वरूपत्वज्ञापनार्थमुपात्तस्य ज्ञानस्वरूपादिविशेषणस्य, चैत्रः पण्डित इत्यादौ उत्कर्षापादकस्य च विशेषणस्य दर्शनेऽपि 'यस्य पृथिवी शरीरं' 'यस्यात्मा-

शरीरं' 'जगत्सर्वं शरीरं ते' 'तानि सर्वाणि तद्वपुः' इत्यादिश्रुति-स्मृतिसिद्धस्य सर्वसाधारणस्याव्यावर्तकत्वाज्ज्ञातत्वादुत्कर्षानापादकत्वाच्च ॥

न च—सुदर्शनमयं रूपं भूत्वेत्युपबृंहणे जीवाद्वारकधारणस्य विवक्षितत्वाज्जीवानधिष्ठितत्वविशिष्टशरीरत्वं रामकृष्णाद्यवतारेष्विवात्रापि सुदर्शने विवक्षितमिति तादृशविशेषणस्योत्कर्षापादकत्वमिति—वाच्यम्; जीवानधिष्ठितत्वविशिष्टशरीरत्वस्यापि घटादिसाधारण्येनोत्कर्षानापादकत्वात् । न च—जीवानधिष्ठितत्वविशिष्टसाधुपरित्राणादिविषयकसङ्कल्पजन्यशरीरत्वमुत्कर्षप्रयोजकमत्र वपुश्शब्देन विवक्षितमिति—वाच्यम्; तथा सति भवन्मतेऽपि वपुश्शब्दस्य लक्षणापत्त्या अस्मन्मत एव वपुश्शब्दलक्षणादोषोद्भावनस्यानुचितत्वात् । न च—वपुषा सन्तप्तमिति द्वितीयव्याख्याने वपुश्शब्दलक्षणा नेति—वाच्यम्; तत्कल्पे ज्वरादिभिरिति करणाध्याहारावश्यकतया वपुषेत्यस्य वैयर्थ्यस्यैव प्रसङ्गात्, वैयर्थ्यापेक्षया लक्षणाकल्पनस्य ज्यायस्त्वात् । न च—वपुश्शब्दस्य ज्वरादितप्तदेहपरत्वान्न वैयर्थ्यमिति—वाच्यम्; तथा सति लक्षणाया दुर्वारत्वात्; चक्रपदस्य प्रतिकृतौ लक्षणा च प्रागेव निरस्तेति ॥

अथर्वणि श्रूयते—

"एभिर्वयमुरुक्रमस्य चिह्नैरङ्किता लोके सुभगा भवाम, तद्विष्णोः
परमं पदं ये गच्छन्ति हि लाञ्छिताः ॥" —इति ॥

अयमर्थः—ये यादृशास्तादृशा अपि ब्राह्मणत्वतदभावान्यतरवन्त इति यावत्; उरुक्रमस्य, उरुः—अधोभागत्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वरूपाधोलोकव्यापकत्वाधोलोकस्थसर्वप्राणिपापनिवर्तकत्वादिरूपप्रभाववान्, क्रमः—पादसंयोगात्मकपादविक्षेपो यस्य

तस्य त्रिविक्रमस्य विष्णोरिति यावत्; तस्य चिह्नैः—विष्णुत्वानुमापकलिङ्गैः। 'राजा निदेशकृदभूदिति धातृसूनोरन्तर्मुदो निरवधेरिदमास चिह्नम्', राजचिह्नमिदमित्यादौ चिह्नशब्दस्य लिङ्गे प्रयोगदर्शनात् ॥

यद्यपि—चक्रादीनां मुक्तादिसाधारण्याद्विष्णुत्वव्याप्यत्वरूपविष्णुत्वानुमापकलिङ्गत्वं न सम्भवति। **तथाऽपि**--स्वाश्रयत्वस्वाश्रयसमानभोगवत्त्वान्यतरसम्बन्धेन विष्णुत्वस्य चक्रादिव्यापकत्वसत्त्वान्नानुपपत्तिः। अङ्किताः—वह्निसन्तप्ततत्संयोगजन्यकिणवन्तः, तद्विष्णोः परमं पदं गच्छन्ति; ज्ञानानन्दात्मकलोकत्वं नाशाप्रतियोगित्वादिरूपोत्कर्षवत्त्वं—परमशब्देन विवक्षितं, तथा च—अङ्किता गच्छन्तीत्युद्देश्यविधेयभावमहिम्ना धनवान् सुखीत्यादिवत् प्रयोज्यप्रयोजकभावलाभादलौकिकश्रेयस्साधनत्वरूपं धर्मत्वमुक्तं भवति। अतो वयमप्युरुक्रमस्य चिह्नैरङ्कितास्सन्तो लोके वैकुण्ठलोके सुभगाः शोभनैश्वर्यशालिनः भवाम; शोभनैश्वर्याश्रयनिष्ठमदिच्छाविषयीभूतासाधारणधर्मवन्त इत्यर्थः ॥

"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसश्श्रियः।
ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा ॥"—

इति विष्णुपुराणवचनेन भगशब्दस्यैश्वर्यवाचकत्वाद्भूधात्वर्थासाधारणधर्मे सुभगपदार्थस्याधेयतासम्बन्धेन लोडर्थस्येच्छाविषयत्वस्य च स्वरूपसम्बन्धेनान्वयेनोक्तार्थलाभात् ॥

महाचार्यास्तु—य इति तृतीयार्थे व्यत्ययेन प्रथमा, यैश्चिह्नितास्तद्विष्णोः परमं पदं स्थानं गच्छन्ति, एभिरुरुक्रमस्य चिह्नैरङ्किता वयं तस्मिन् लोके सुभगा भवामेति मुमुक्षूणामनुसन्धानमनेन मन्त्रेण प्रतिपाद्यते—**इत्याहुः** ॥

न च—मुमुक्षूणामस्मच्छब्देन परामर्शो न सम्भवति, तस्य स्वतन्त्रोच्चारणकर्तृतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने शक्तेः, स्वातन्त्र्यस्य च स्वार्थतात्पर्यकान्यदीयोच्चारणानधीनोच्चारणत्वरूपत्वात्, अहं गच्छामीति स्वतन्त्रोच्चारणस्यापि क्वचित् को गच्छतीत्यादिप्रश्नवाक्योच्चारणाधीनतया तत्सङ्ग्रहाय स्वार्थपरत्वमुच्चारणविशेषणम्। प्रश्नवाक्यस्य चाहं गच्छामीत्यादिप्रकृतवाक्यतात्पर्यविषयपरत्वाभावान्नानुपपत्तिः। प्रकृते वयमिति मुमुक्षूच्चारणस्य चाध्यापकोच्चारणाधीनत्वेन निरुक्तस्वातन्त्र्याभावादिति—**वाच्यम्**। स्वातन्त्र्यस्य निरुक्तरूपत्वे, यत्र चैत्रेणान्यदीयाच्चैत्रस्सुन्दर इति वाक्यादर्थप्रतीत्याऽहं सुन्दर इति प्रयुज्यते, तत्र समानार्थकवाक्यान्तरोच्चारणसापेक्षत्वात्स्वातन्त्र्यानुपपत्तेः; एवं स्वपाण्डित्याभिमानिमौनिपुरुषज्ञानपरस्य—अयमहं पण्डित इति जानातीत्युच्चारणस्य स्वातन्त्र्यापत्तेश्च। अतो वाक्यान्तरस्थक्रियाकर्मतापन्नवाक्यार्थघटकतया स्वार्थप्रत्यायनेच्छानधीनोच्चारणमेव स्वतन्त्रोच्चारणम्। अहमागच्छामीति चैत्र उवाचेति मैत्रवाक्ये—इत्युवाचेति वाक्यान्तरस्थक्रियाकर्मतया तदर्थघटितवाक्यार्थं प्रतिपादयितुमेव मैत्रेण तद्वाक्यप्रयोगान्मैत्रोच्चारणे स्वातन्त्र्याभावान्मैत्रस्य नाहंपदाद्बोधः। निरुक्तस्वतन्त्रोच्चारणं च वेदस्थास्मच्छब्दस्योपपद्यत इति॥

अथैवमपि—वयमिति बहुवचनानुपपत्तिः; चैत्रोच्चरितादस्मत्पदात्पदान्तरोच्चारयितुर्मैत्रादेः प्रतीतिप्रसङ्गवारणाय स्वीयस्वतन्त्रोच्चारणकर्तृतावच्छेदकावच्छिन्नेऽस्मच्छब्दस्य शक्तेस्स्वीकरणीयतया वयमित्येकपदस्य बहुभिरुच्चारणासम्भवात्तेन पदेन स्वोच्चारयितुरेकस्यैव बोधात्। न च—तत्पदोच्चारयितुरेकत्वेऽपि 'अस्मदो द्वयोश्च' इत्यनुशासनेन बहुवचनविधानादेकव्यक्तिपरस्यापि वयमित्यस्य साधुत्वोपपत्तिः—इति वाच्यम्; 'सविशेषणस्य प्रतिषेधः' इति विशेषणपूरित-

स्यास्मच्छब्दस्यैकत्वे बहुवचननिषेधात्, 'एभिर्वयमुरुक्रमस्य चिह्नैरङ्किताः' इति श्रुतावस्मच्छब्दस्य सविशेषणत्वात्–इति चेन्न। वयमित्यस्य स्वघटितसमुदायत्वाश्रयेषु मुमुक्षुषु लाक्षणिकत्वात्तत्र बहुवचनार्थबहुत्वान्वयोपपत्तेः; अत एव–'त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः', 'वयमनातङ्का बिशङ्कामहे'–इत्यादयः कविप्रयोगा उपपन्नाः॥

यदपि—सविशेषणस्येति प्रतीकमुपादाय 'इदं मुख्यार्थे बहुवचननिषेधाय; यदा त्वस्मच्छब्दस्य स्वघटिते उद्भूतावयवभेदे समुदाये लक्षणा, तदा बहुवचनं भवत्येव; तेन त्वं राजा वयमपीत्यादि सिद्धम्'–**इत्युक्तं शेखरे । तन्न;** लक्षणाङ्गीकारे बहुत्वान्वययोग्यार्थ एव लक्षणाङ्गीकारसम्भवेन तत्रास्मदो द्वयोश्चेत्यनुशासनाप्रवृत्त्या सविशेषणस्येत्यस्य सुतरामप्रवृत्तेः, मुख्यार्थ एवेदमिति सङ्कोचकल्पनाया अयुक्तत्वात्–इत्यलमप्रस्तुतविचारेण॥

अत्र भास्करः—मन्त्रार्थवादेतिहासपुराणादिषु भगवतो रूपं तच्चिह्नानि श्रीवत्सकौस्तुभवनमालादीन्युपश्रुत्य तद्रूपध्याने कृतनिश्चयवतां—

"यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति; स क्रतुं कुर्वीत, तं यथा यथोपासते तथैव भवति।"

"यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कलेबरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः॥"—

इत्यादिश्रुतिस्मृतिभिः प्रयाणानन्तरममुष्मिन् लोके स्वेषामपि भगवच्चिह्नादिप्राप्तिं तादृशदिव्यविग्रहलाभं च भाविनं निश्चिन्वतां मुमुक्षूणामनुसन्धानमनेन मन्त्रेण निबध्यते । तथा चायमर्थः–सुभगाः, भगशब्देन मोक्षार्था बुद्धिरुच्यते; मोक्षार्थज्ञानवन्त इत्यर्थः।

"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसश्श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥"

इति स्मरणात्। अत्र स्मृतौ ज्ञानशब्देन मोक्षार्था बुद्धिरुच्यते; 'मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः' इत्यमरकोशाभिधानात्। तथा च सुभगाः—मुमुक्षवो वयं, एभिः—मन्त्रार्थवादादिप्रतिपन्नैः, उरुक्रमस्य चिह्नैः—श्रीवत्सकौस्तुभादिभिः, अङ्किताः—लाञ्छिताः, लोके—वक्ष्यमाण-परमपदाख्ये, भवेमेति—मुमुक्षूणां प्रयाणानन्तरभाविभगवत्सारूप्यानु-सन्धानम्। कोऽयं लोक इत्यत्राह—'तद्विष्णोः परमं पदम्' इति। तच्छ-ब्देन लोकः परामृश्यते; स लोक इत्यर्थः; लोकशब्दसमानाधिकरण-स्यापि तच्छब्दस्य पदशब्दापेक्षया नपुंसकलिङ्गनिर्देशः; स लोको विष्णोः परमं स्थानं; तत्स्थानं विशेषयति 'येऽनुगच्छन्ति लाञ्छिताः' इति। लाञ्छिताः भगवल्लाञ्छनयुक्ताः भगवत्सारूप्यमापन्नाः विष्वक्से-नादयो ये विष्णुमनुगच्छन्ति, तैरतिशोभितमिति योग्यक्रियाध्याहा-रेण—"यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा। यश्चैनं गन्धमाल्याद्यै-स्सर्वत्र कटुरेव सः ॥" इत्यत्र वृश्चति सिञ्चत्यर्चयतीति योग्यक्रिया-ध्याहारेणेव पूरणीयम्—इति॥

तन्न—तथा सति सुभगा इत्यस्य श्रीवत्सकौस्तुभादिप्रकारकध्यान-वन्त इत्यर्थो वाच्यः; अन्यथा यथाक्रतुन्यायविरोधात्, तत्पुरुष-प्राप्यत्वव्यापकं तत्पुरुषोपास्यत्वमिति न्यायार्थात्। स्पष्टं चेदं **तत्क्रतुन्यायवादार्थे** ॥ भगवच्छब्दस्य तादृशध्यानवाचकत्वं चा-प्रामाणिकं; उदाहृतविष्णुपुराणवचने ज्ञानशब्दस्य मोक्षहेतुभूत-श्रीवत्सकौस्तुभादिप्रकारकध्यानपरत्वे परमात्मनो भगवच्छब्दमुख्या-र्थत्वानुपपत्तेः, तत्र तादृशध्यानाभावात्। न चेष्टापत्तिः;

"तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।
शब्दोऽयं नोपचारेण ह्यन्यत्र ह्युपचारतः ॥"

इति योगार्थतावच्छेदकरूढ्यर्थतावच्छेदकयोः परमात्मनि सत्त्वात्तत्र भगवच्छब्दस्य मुख्यत्वमित्यस्य वक्ष्यमाणत्वात्; पूज्यपदार्थोक्तिः— अवयवार्थनिष्ठा शक्तिः, योग इति यावत्; परिभाषा—रूढिः, ताभ्यां समन्वित इत्यर्थात्। एवं वक्ष्यमाणयोगरूढिशक्तिप्रतिपादनोपयोगितया प्रवृत्ते भगवच्छब्दार्थविवरणरूपे भवदुदाहृतवचने भगवच्छब्दस्य परमात्मावृत्तिध्यानार्थकत्वकथनस्यात्यन्तमयुक्तत्वात्। किं चात्र लाञ्छिताः सुभगा इत्यनयोर्मध्ये कस्यचिद्धेतुपरत्वं कस्यचित्फलपरत्वं च युक्तं; उभयोरपि फलपरत्व हेतुवाचकपदाध्याहारस्य, हेतुपरत्वे च फलवाचकपदाध्याहारस्य प्रसङ्गात्; तत्र च क्रियापदासन्निहितस्याङ्किता इत्यस्यैव वयंपदसन्निहिततया हेतुसमर्पकतायास्सुभगपदस्य क्रियापदसन्निधानेन फलसमर्पकतायाश्च युक्तत्वात्; एवं च—नाविहितस्य फलमिति न्यायेन चक्राद्यङ्कनविधिसिद्धेः ॥

यत्तूक्तं—तद्विशिनष्टि 'येऽनुगच्छन्ति लाञ्छिताः' इति। लाञ्छिताः— भगवल्लाञ्छनयुक्ता विष्वक्सेनादयो ये विष्णुमनुगच्छन्ति तैरतिशोभितमिति पूरणीयम्—इति। तन्न; द्वितीयान्तस्य विष्णुपदस्य अतिशोभितपदस्य चाध्याहारप्रसङ्गात्। न च—अनुगच्छन्तीति पदमहिम्ना उक्ताध्याहारद्वयं न दोषायेति—वाच्यम्; अनुगच्छन्तीति पाठासिद्धेः, गच्छन्तीत्येव पाठात्, **सच्चरित्ररक्षासुदर्शनमीमांसादौ** तथैवोदाहृतत्वाद्व्याख्यातत्वाच्च। अनुगच्छन्तीति पाठस्य प्रामाणिकत्वेऽपि गच्छन्तीतिपाठ इव पदमित्यनेनैवान्वयोपपत्तेरध्याहारस्यायुक्तत्वात्। न च—अनुपूर्वकगमिधातोर्गमनान्वयव्यतिरेकानुविधायिगमनपरतायाः—

"स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्॥"

इत्यादौ दृष्टत्वात् विष्णुमिति पदाध्याहार आवश्यकः, विष्णुगमनान्वयव्यतिरेकानुविधायिगमनानुकूलकृतिमन्त इत्यर्थात्; तत्र

विष्णोर्धात्वर्थतावच्छेदकफलशालित्वाभावेन कर्मणि द्वितीयेत्यनेन द्वितीयाया अप्राप्तावपि कर्मप्रचनीययुक्त इत्यनेनैव तदुपपत्तेरनोः कर्मप्रवचनीयसंज्ञावत्त्वादिति—वाच्यम् । 'अनु स्वर्गं विन्दति, य एतेन हविषा यजते' इत्यादौ हविर्योगजन्यस्वर्गप्राप्तिमानिति बोधवदत्रापि लाञ्छिता अनुगच्छन्तीत्यनेन लाञ्छनजन्यपरमपदप्राप्तिमन्त इति बोधात् । यज्ञमनुप्रावर्षदित्यादावनुपदस्य जन्यत्वार्थकताया दृष्टत्वात् । अत्र निरूपितत्वरूपद्वितीयार्थस्य यज्ञान्वितस्यान्वर्थे जन्यत्वे तस्य चाश्रयतया वृष्टावन्वयेन यज्ञनिरूपितजन्यतावद्वृष्टचनुकूलव्यापारवानिति बोधात् ॥

ऋचि बाष्कलाम्नायां श्रूयते—

"प्र ते विष्णो अब्जचक्रे पवित्रे जन्माम्भोधिं ततवे चर्षणीन्द्राः ।
मूले बाह्वोर्दधतेऽन्ये पुराणा लिङ्गान्यङ्गे तावकान्यर्पयन्ति ॥"
—इति ॥

अयमर्थः ॥ हे विष्णो, पवित्रे—प्रत्यवायाभावप्रकारकभगवत्सङ्कल्पहेतुभूते । ते अब्जचक्रे—त्वत्सम्बन्धिशङ्खचक्रे, अब्जचक्रपदार्थयोर्द्वयोरेव त इति षष्ठ्यर्थान्वयात् ॥

ननु—एवमब्जपदस्य चक्रपदेन साकं समासानुपपत्तिः ; तस्य वृत्त्यघटकपदार्थानन्वितस्वार्थपरत्वरूपसामर्थ्याभावात् षष्ठ्यर्थेनाब्जपदार्थस्यान्वयात् । न च—चैत्रस्य दासभार्या, शरैश्शातितपत्रः इत्याद्युपपत्तये वृत्त्यघटकपदार्थानन्वितेत्यत्राभेदान्वयस्य विवक्षणीयत्वान्नानुपपत्तिरिति—वाच्यम् ; तथा सति चैत्रपुत्रदेवदत्तोभयानयनतात्पर्येण चैत्रस्य पुत्रदेवदत्तावानयेति प्रयोगापत्तेः अभेदान्वयनिवेशासम्भवात् ; तन्निवेशेऽपि वृत्त्यघटकपवित्रपदार्थेनाभेदान्वयस्यैव सत्त्वेन समासासाधुतापत्तेर्दुर्वारत्वाच्च ॥ **मैवं**—समासजन्यबोधे

प्रकारभूतो योऽर्थस्तदुपस्थापकपदे सामर्थ्यापेक्षणेऽपि विशेष्यभूतार्थो-पस्थापकपदे तदनपेक्षणात्; चैत्रस्य पुत्त्रदेवदत्तावित्यादिप्रयोगाभावे तादृशसमभिव्याहारस्य तादृशबोधौपयिकाकाङ्क्षात्वाकल्पनादेव तादृश-प्रयोगस्य वारणात्। तादृशे अब्जचक्रे; चर्षणीन्द्राः--ज्ञानिश्रेष्ठाः, मूले बाह्वोः--बाहुमूलावच्छेदेन, प्रदधते–प्रकृष्टवह्निसन्तप्तस्वसंयोग-जन्यकिणवत्त्वरूपसम्बन्धप्रयोजकव्यापाराश्रया इत्यर्थः; व्यवहिता-श्चेत्यनुशासनात् प्रशब्दस्य दधत इत्यनेनान्वयात्। धारणघटक-सम्बन्धे प्रकर्षश्च शरीराधिकरणकालत्वव्यापकत्वरूपयावद्देहभावित्वम्। धारणस्य फलमाह–जन्माम्भोधिं तर्तव इति। अत्त्र जन्मशब्देन जन्म-जरामरणादिप्रयोजकं प्रकृतिमण्डलं लक्षणयाऽभिधीयते, तस्य दुस्त-रत्वातिविशालत्वादिना समुद्रसाम्यात्तत्त्वेन रूपणं; तरणं च तीर-संयोगानुकूलव्यापारः, नदीं तरतीत्यादौ स्वाश्रयसंयोगसम्बन्धेन नदी-निष्ठो यस्तीरसंयोगस्तदनुकूलव्यापारकर्तेति बोधात्। उक्तसम्बन्धेन तादृशसंयोगरूपधात्वर्थतावच्छेदकफलवत्त्वाच्च नद्याः कर्मत्वं–जन्मा-म्भोधेस्तीरं च वैकुण्ठलोक एवेति तत्प्राप्तेरेव सुदर्शनधारणेऽन्वयात्तरणे-च्छाधीनेच्छाविषयत्वस्य तरणहेतुत्वव्याप्यत्वादाक्षेपात्तरणहेतुत्व-लाभः; उपायेच्छां प्रति फलेच्छायाः कारणत्वात्। एवं शङ्खचक्रे केचिद्धारयन्ति; अपरे तु पुनः परिपूर्णानुष्ठायिनो धर्मप्रवर्तकाः पुरा-तनाः परमर्षयः पञ्चाप्यायुधरूपाणि तावकानि लिङ्गानि तद्व्याप्यानि पञ्चस्वपि भुजशिखरयुगललाटमध्यहृदयाख्येषु स्वावयवेषु धारयन्ती-त्याह—अन्ये पुराणा इति। अत्त्रायुधं प्रति भगवतो व्यापकत्वं तादात्म्यसमानभोगवत्त्वान्यतरसम्बन्धेन विवक्षितं; अतो मुक्तेषु चक्रा-द्यायुधसत्त्वेऽपि न क्षतिः, तथा च विकल्पतः पञ्चानामायुधानां शङ्खचक्रयोश्च धारणविधिः॥

अत्र भास्करः–अस्य मन्त्रस्य हरिपूजावसरे अङ्गुलिविन्यासरचितशङ्खचक्राभिनयधारणविधिपरतया भूर्जादिपत्रलिखितयन्त्रधारणविधिपरतया वोपपत्तेस्तत्किणधारणविधिपरत्वमसिद्धम् । इत्थं हि सुदर्शनाध्यायेऽनुक्रम्यते––

"हरिचर्यासु युक्तस्य विघ्नं कुर्वन्ति राक्षसाः ।
तद्विघ्नशमनार्थं तु पूजावेलास्वतन्द्रितः ॥
हेमपट्टेऽथवा भूर्जपत्रे वाऽपि सुदर्शनम् ।
विलिख्य पट्टं संवेष्ट्य बिभृयाद्दक्षिणे भुजे ॥
शङ्खरेखाङ्कितं चापि पट्टं सव्यस्य मूलतः ।
अथवाऽङ्गुलिमुद्राभिस्सव्यदक्षांसदेशयोः ॥
दर्शयेच्छङ्खचक्रे द्वे रक्षोघ्नान्वा मनून् जपेत् ।" ––इति ॥

तथा चायामर्थः । हे विष्णो चर्षणीन्द्राः–ज्ञानवन्तः, अब्जचक्रे प्रदधते–यन्त्ररूपेण प्रकर्षेण धारयन्ति ; अन्ये पुराणाः–पुरातना मुनयः, तावकानि लिङ्गानि–तुलसीमाल्यादीन्यपि, स्वाङ्गे अर्पयन्ति–बिभ्रतीत्यर्थः । किणधारणपरत्वे साक्षाद्विष्णुचक्रस्यास्माभिर्धारणासम्भवात् प्रतिकृतिलोहमुद्रायाश्च दाहकाले बाहुमुले संयोगसत्त्वेऽपि धारणाभावात्प्रतिकृतिसिद्धकिणे चक्रादिपदस्य लक्षणा कर्तव्या। मदुक्तार्थस्वीकारे तु तदभिनयादौ लक्षणामात्रमिति मदुक्तार्थपरतैव युक्ता ॥––इति ॥

तन्न। अभिनयधारणपरत्वे अब्जचक्रे इत्यस्य शङ्खचक्रप्रतीतिजनकचेष्टारूपशङ्खचक्राभिनये लक्षणाप्रसङ्गस्य तादृशलक्ष्यार्थैकदेशयोश्शङ्खचक्रयोस्त इत्यस्यान्वयापत्तेश्च दुर्वारत्वात् ; एवं सिद्धपदार्थप्रतियोगिकसम्बन्धानुकूलव्यापारस्यैव दधात्यर्थतया तादृशाभिनयस्य चासिद्धत्वेन दधातेरुत्पत्त्यनुकूलव्यापारे लक्षणापत्तेश्च ; द्वितीयकल्पे अब्जचक्रपदयोस्तद्व्यञ्जकरेखालाक्षणिकत्वस्य त इति षष्ठ्यर्थस्यैकदेशान्वयस्य च प्रसङ्गात् । सिद्धान्ते अब्जचक्रपदयोर्लक्षणाविरहश्च

पवित्रमन्त्रार्थविचार एव प्रपञ्चितः ॥ किञ्च—उक्तवचनेषु भूर्जादिपत्र-लिखितचक्रधारणस्य रक्षोघ्नमन्त्रपाठेन सह विकल्पतो विहितत्वाच्छ्रुतौ शङ्खचक्रधारणस्य पञ्चायुधधारणेन साकं विकल्पतो विहितत्वात्तयोरैक्यासम्भवः; भूर्जादिपत्रलिखितचक्रधारणे विघ्नध्वंसकामस्याधिकारित्वाच्छ्रुतिविहिते च चर्षणीन्द्रपदाभिधेयस्य विदुषोऽधिकारित्वेन अधिकारिभेदाद्विघ्ननिवृत्तिजन्माम्भोधितरणरूपफलभेदाद्वचनविहितस्य पूजाकालमात्रावच्छेद्यत्वेन श्रुतिविहितस्य तथात्वाभावेन रूपभेदाच्चाभिनयपरताकल्पे श्रुतौ धारणविधानेन 'दर्शयेच्छङ्खचक्रे द्वे' इति वचने च प्रदर्शनस्य विधानेन चोदनाभेदात् ॥

यदपि—विष्णुपूजाप्रतिबन्धकदुरितनिवर्तनद्वारा पूजाङ्गस्यापि पूजाफलभूतजन्माम्भोधितरणसाधनत्वं सम्भवति; अङ्गिफलस्याङ्गे सम्भवात्। सन्न्यासस्य श्रवणाङ्गत्वपक्षे 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इति वाक्ये श्रवणफलस्य ब्रह्मलोकश्रवणाङ्गे सन्न्यासे प्रतिपादनदर्शनात्—इति। **तन्न;** भक्तिप्रपत्त्यन्यतरस्यैव जन्माम्भोधितरणहेतुतया विष्णुपूजाया अपि तत्फलकत्वाभावेन पूजाङ्गे तत्फलस्य प्रतिपादनमित्यस्यासम्भवात्, पूजाङ्गकभक्त्यादिफलस्य पूजाफलत्वात्तस्य तदङ्गप्रतिपादनमिति परम्पराकल्पने च क्लेशाधिक्यात्, अस्माकं चर्षणीन्द्रा इति मोक्षहेतुभूतोपासनस्योक्ततया तद्द्वारा जन्माम्भोधितरणसाधनत्वस्य चक्रादिधारणे सम्भवात् ॥

अपि च--अस्याश्श्रुतेः पाद्मपुराणे तप्तसुदर्शनधारणपरतयोपबृंहणान्न भवदुक्तार्थपरत्वसम्भवः। तथा हि **पाद्मे** —

"सर्वाश्रमेषु वसतां ब्राह्मणानां विशेषतः।
विधिना वैष्णवं चक्रं धार्यं हि श्रुतिचोदनात् ॥
दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्।
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः ॥

एवं महोपनिषदि प्रोक्तं चक्रादिधारणम् ।
तथैव साम्नि यजुषि ऋचि प्रोक्तं शुभानने ॥
प्र ते विष्णो अब्जचक्रे पवित्रे जन्माम्भोधिं ततैवे चर्षणीन्द्राः ।
मूले बाह्वोर्दधतेऽन्ये पुराणा लिङ्गान्यङ्गे तावकान्यर्पयन्ति ॥
चरणं पवित्रं विततं पुराणं वाङ्मयं शुभम् ।
तेन चक्रेण सन्तप्ता स्तरेयुः पातकाम्बुधिम् ॥
पवित्रं ब्राह्मणस्पत्यं जगद्व्याप्तं हरेस्सदा ।
तेनातप्ता तनूर्येषां न ते यान्ति परं पदम् ॥
तेन तप्ता तनूर्येषां ते प्रयान्ति हरेः पदम् ॥"

—इत्यादि ॥

एतेन–हे विष्णो अब्जचक्रे ते बाह्वोर्मूले दधते धारयन्तीति णिजर्थलक्षणया विष्णुप्रतिमाया बाहुमूले चक्रादिधारणं विधीयते–इति परास्तम्। उक्तपाद्मवचनविरोधात्; पाचयतीत्यादौ पाककर्तृता-प्रयोजकव्यापारबोधेन कर्तृताप्रयोजकव्यापारस्यैव णिजर्थतया विष्णु-प्रतिमायां धारणानुकूलकृतिमत्त्वरूपधारणकर्तृत्वासम्भवेन णिजर्थ-लक्षणाकथनस्यायुक्तत्वाच्च ॥ न च--आधेयताप्रयोजकव्यापार एव दधात्यर्थः, त्वत्सम्बन्धिबाहुमूलनिरूपिताब्जचक्रनिष्ठाधेयताप्रयोजक-व्यापारबोधादिति–वाच्यम्; तथाऽपि दधातेर्लक्षणादोषात् ॥

यत्तु––त्वन्मते चर्षणीन्द्रास्स्वस्वबाहुमूले दधत इत्यर्थाङ्गीकारा-त्स्वस्वेति पदद्वयाध्याहारकल्पनापत्तेरश्रुतपदाध्याहाराच्छ्रुतपदलक्षणा ज्यायसी––इति। **तन्न**; देवदत्तश्चक्षुषा पश्यतीत्यादौ स्वीयसाक्षात्कार-जनकत्वस्यान्यचक्षुष्यसम्भवात् चक्षुष्ट्वेन स्वचक्षुष एव बोधवत्, अब्ज-चक्रे बाहुमूले दधत इत्यनेन बाहुमूलावच्छेद्यधारणानुकूलकृतिमत्त्वबोधा-त्स्वकृतिजन्यधारणावच्छेदकत्वस्यान्यबाहावसम्भवेन बाहुत्वेन स्वबाहो-रेव बोधात्, स्वस्वेतिपदाध्याहारासिद्धेः अध्याहाराल्लक्षणाया ज्याय-

स्त्वे पिधेहीत्यादेरपि द्वारकर्मकपिधाने लक्षणासम्भवाद्द्वारपदाध्याहारानापत्त्याऽध्याहारमात्रोच्छेदापत्तेः ; तेशब्दस्याब्जचक्राभ्यां प्रथममन्वितस्य जन्माम्भोधिमित्याद्यसम्बन्धिवाचकपदेन व्यवहितस्य 'व्यवायान्नानुषज्यते' इति न्यायेनानुषङ्गासम्भवे त्वन्मतेऽपि बाह्वोरित्यत्रान्वयार्थं तेपदाध्याहारदोषस्यावर्जनीयत्वात् । उत्तरार्धात्स्विष्टकृते समवद्यतीत्यादिपूत्तरार्धादिशब्दानामिव बाहुशब्दस्यापि ससम्बन्धिकत्वेन सन्निहितचर्षणीन्द्रान्वयस्यैवावश्याभ्युपेयत्वाच्चेति ॥

यजुषि कठशाखायां श्रूयते—

"धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम् ॥"
—इति ॥

अयमर्थः—धृतोर्ध्वपुण्ड्रः—धारणजन्यसम्बन्धप्रतियोग्यूर्ध्वपुण्ड्राश्रयः । क्तप्रत्ययस्यातीतत्ववाचकत्वेऽपि तस्याविवक्षितत्वान्न बोधः । तथा च—तिलकी कर्म कुर्वीतेत्यादौ कर्मकरणे तिलकसमानकालीनत्वभानवदुद्देश्यतावच्छेदकीभूतस्योर्ध्वपुण्ड्रस्य समानकालीनत्वसम्बन्धेन ध्याने भानाद्ध्यानकाले ऊर्ध्वपुण्ड्रस्यावश्यकतालाभः । कृतचक्रधारी—कृतिसाध्यचक्रधारणाश्रयः, कृतश्चासौ चक्रधारश्च सोऽस्यास्तीति कृतचक्रधारीति व्युत्पत्तेः । न च—'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः' इत्यनुशासनविरोध इति—वाच्यम् ; मन्त्रपूतत्वस्वाधिकरणकालत्वव्यापकत्वरूपयावद्देहभावित्वादिरूपप्राशस्त्यस्य विवक्षिततया तादृशप्राशस्त्यस्य च मतुपा बोधसम्भवेऽपि बहुव्रीहिणा तदबोधाद्बहुव्रीहेस्तदर्थप्रतिपत्तिकरत्वाभावात् । अत्र चक्रशब्दस्य चक्रशङ्खोभयस्मिन् लक्षणा, वचनान्तरानुरोधात् । परं—बद्धाचेतनोभयव्यावृत्तं, परात्परं—मुक्तसमुदायाद्व्यावृत्तं, महतो महान्तं—स्वरूपतो

गुणतो वा ये पदार्था उत्कर्षवन्तस्तेभ्यस्सर्वेभ्योऽप्यतिशयोत्कर्षवन्तं, स्वव्यधिकरणसङ्कल्पाप्रयोज्यसंसारसामान्याभावनिरूपितनिरवच्छिन्नाधिकरणतावच्छिन्नमिति यावत्, तेन च नित्यव्यावृत्तिः। जगत्कारणत्वादिरूपोत्कर्षस्य महतो महान्तमित्यनेन विवक्षणे च परं परात्परमिति पदयोर्वैयर्थ्यपत्तिः; सत्यं ज्ञानमित्यत्रेवात्रापि बद्धाचेतनमुक्तनित्यव्यावर्तकतया विशेषणत्रयसार्थक्यात्। सत्यं ज्ञानमिति श्रुत्यर्थविचारश्च लक्षणवादार्थे स्पष्टः। एतादृशं स्वरेण मन्त्रेण सदा हृदि स्थितं—प्रणवाख्येन मन्त्रेण सदा उपस्थितं, प्रणवस्य सर्वकर्माङ्गत्वेन सर्वदा ज्ञायमानत्वात्, ज्ञायमानेन तेन प्रतिपाद्यतया सर्वदा ज्ञातमित्यर्थः। स्वरशब्दस्य प्रणवपरत्वं च—'यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः' इति तैत्तिरीयेऽभिधानात्, एकायनब्राह्मणे च 'ओङ्कारस्स्वरः, मकारो व्यञ्जनं, यस्स्वरस्सा प्रकृतिः' इत्युक्तत्वाच्च सिद्धम्॥ स्वरेण मन्त्रेण ध्यायतीति योजनामङ्गीकृत्य प्रतिपाद्यतासम्बन्धेन प्रणवप्रकारकध्यानस्य विवक्षणं तु न युक्तं, तथा सति प्रणवप्रकारकध्यानमात्राङ्गत्वसिद्धावपि सुदर्शनधारणस्योपासनसामान्याङ्गत्वासिद्धिप्रसङ्गात्। तथा च—तेन मन्त्रेण सदोपस्थितं विष्णुं यो ध्यायति स महात्मा भवति। महात्मत्वं च—परमं साम्यमुपैतीति श्रुतिसिद्धमोक्षकालीनपरब्रह्मसाम्यवत्त्वं विवक्षितं, तेन न फलाकथनप्रयुक्तन्यूनता। अत्र यद्धर्मावच्छिन्नविशिष्टपुरुषकर्तव्यत्वप्रकारकयद्धर्मावच्छिन्नविषयकबोधजनकवाक्यत्वं यत्र तत्र तद्धर्मावच्छिन्नाङ्गकतद्धर्मावच्छिन्नपरत्वमिति नियमात्, "शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वा आत्मन्येवात्मानं पश्येत्" इत्यादेश्शमादिविशिष्टकर्तव्यताप्रकारकध्यानविशेष्यकबोधजनकस्य शमाद्यङ्गकध्यानपरतावदूर्ध्वपुण्ड्रचक्रधारणविशिष्टकर्तव्यताप्रकारकतादृशध्यानविशेष्यकबोधजनकस्य धृतोर्ध्वपुण्ड्र इत्यादिकस्योर्ध्वपुण्ड्रचक्रधारणा-

ङ्गकध्यानपरत्वावश्यकत्वात्, ध्यायतीत्यादेस्तदङ्गकध्याने लक्षणयोदीच्यमानसम्बोधेनैव तादृशतात्पर्यस्य निर्वाह्यत्वाच्चक्रधारणादेर्मोक्षहेतुभूतोपासनसामान्याङ्गत्वसिद्धिः । न च—परत्वादिप्रकारके विष्णुं परं ध्यायतीत्याद्युक्तोपासने चक्रधारणादेरङ्गत्वसिद्धावपि न ध्यानसामान्याङ्गत्वमिति सद्विद्यादिनिष्ठानां न तद्धारणापेक्षेति--वाच्यम् । **आनन्दादयः प्रधानस्य**—इत्यधिकरणे मोक्षहेतुभूतोपासनसामान्ये सत्यत्वज्ञानत्वानन्तत्वप्रकारकत्वोक्त्या--परं परात्परं महतो महान्तम्—इति विशेषणत्रयस्य सत्यत्वादिधर्मत्रयार्थकतया परत्वादिप्रकारकोपासनसामान्याङ्गत्वस्य परविद्यासामान्याङ्गत्वरूपत्वात्सद्विद्यादिनिष्ठैरप्यनुष्ठेयत्वसिद्धेः। **यद्वा**—स्वरेण मन्त्रेण विष्णुं ध्यायतीति योजनाङ्गीकारात् 'यत्पुनरेतं त्रिमात्रेणोम्' इयनेन परमपुरुषमभिध्यायीतेत्याद्युक्तोपासनविशेषाङ्गत्वमेव चक्रादिधारणस्य बोध्यते; तथाऽपि सद्विद्यादिनिष्ठैरप्यनुष्ठेयमेव तद्धारणं, उपवीतादिवदङ्गत्वप्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वरूपनित्यत्वात्मकप्राधान्ययोर्द्वयोरेव सत्त्वात् । 'विशिखोऽनुपवीतश्च यत्करोति न तत्कृतम्' इत्यनेनोपवीतादेस्सर्वकर्माङ्गत्वस्य, 'सदोपवीतिना भाव्यं सदा बद्धशिखेन च' इत्यनेन नित्यत्वस्य च प्रतिपादनवच्चक्रादिधारणस्यापि धृतोर्ध्वपुण्ड्र इत्यादिनोपासनाङ्गत्वस्य, 'अतप्ततनूर्न तदामो अश्नुते' इत्यनेन प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वरूपनित्यत्वस्य च सिध्या सर्वेषामप्यावश्यकतासिद्धेः ॥ एतेनास्य मन्त्रस्य भूर्जादिपत्रलिखितचक्रधारणपरत्वमिति निरस्तं; तस्य पूजाङ्गत्वादेतस्य परविद्याङ्गत्वात्, तत्र विघ्नध्वंसकामस्यात्रोपासकस्याधिकारित्वेनाधिकारिभेदात्फलभेदात्, अस्य मन्त्रस्य तप्तमुद्राधारणपरत्वप्रतिपादकपूर्वोदाहृतपाद्मोपबृंहणविरोधाच्च ॥

यदपि—कृतश्चक्रधारी येन सः कृतचक्रधारीति बहुव्रीहिसमासा-श्रयणादस्य मन्त्रस्य विष्णुप्रतिमानिर्माणविधिपरत्वम्—**इति। तन्न**—लक्षणावतो बहुव्रीहिसमासात्तच्छून्यस्य कर्मधारयस्य ज्यायस्त्वात्, निषादस्थपत्यधिकरणे लक्षणावतस्तत्पुरुषात्कर्मधारयस्य तद्विरहेण समाश्रयणीयताया व्यवस्थापनात्; स्वरेण मन्त्रेणेति श्रुत्या प्रणवसं-युक्तस्य ब्राह्मणस्यैव प्रतीत्या तस्य शूद्रकर्तृके प्रतिमानिर्माणेऽधि-काराभावाच्च। न च—अस्याश्श्रुतेस्सुवर्णादिभिर्विष्णुप्रतिमां कारयित्वा तद्ध्यानादिविधिपरत्वान्न ब्राह्मणाधिकारिकत्वानुपपत्तिः, कृतचक्रधारी-त्यस्य कारितचक्रधारीत्यर्थात्;

"सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणाम्।
कृत्वाऽऽत्मनः प्रीतिकरीं सुवर्णरजतादिभिः॥
तामर्चयेत्तां प्रणमेत्तां जपेत्तां विचिन्तयेत्।
विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम्॥"—

इति **विष्णुधर्मे** विष्णुप्रतिमानिर्मापणपूर्वकं तद्ध्यानविधानात्तत्रापि कृत्वेत्यस्य कारयित्वेत्यर्थादिति—वाच्यम्। तथा सति कृतपदस्यापि लक्षणाप्रसङ्गात्। **शतपथे**—'तप्तं चक्रं द्विभुजे धार्यमित्यूर्ध्वपुण्ड्र-मालिखेत्' इति तप्तचक्रधारणोर्ध्वपुण्ड्रयोस्सहविधानादिहापि तत्सह-चरितस्योर्ध्वपुण्ड्रस्य विधानेन तत्प्रत्यभिज्ञानाच्चक्रधारशब्देन तप्त-चक्रधारणस्यैव ग्राह्यताया उचितत्वात्॥

अथर्वणि महोपनिषदि ब्रह्मसूक्ते श्रूयते—

"दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्।
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः॥" —इति॥

अयमर्थः—विप्रो ब्राह्मणः, भगवच्चिह्नभूतं सुदर्शनं शङ्खं च, बिभृ-यात्—प्रत्यवायप्रयोजकीभूताभावप्रतियोगिचक्रादिकर्मकभरणानुकूल-

कृतिमानित्यर्थः। अत्र च धनवान् सुखीतिवद्विप्रो बिभृयादित्यनेन विप्रत्वप्रयुक्तं तद्धारणमिति प्रतीयते; विप्रत्वं हि सर्वान्तरात्मत्वसर्वशेषित्वप्रकारकवासुदेवविशेष्यकज्ञानवत्त्वं, तादृशज्ञानस्य स्वात्मगतशेषत्वानुरूपे शेषिभूतवासुदेवलाञ्छनशङ्खचक्रधारणे प्रयोजकत्वसम्भवात्। अस्य च मन्त्रस्य भूर्जपत्रादिलिखितचक्रधारणपरत्वं तूपबृंहणविरोधादिभिः पूर्ववन्निरसनीयम्॥

यत्तु—'तथा चक्राङ्कितो विप्रस्सर्वकर्मसु गर्हितः' इति चक्राङ्कितस्य सर्वकर्मनिषेधसामर्थ्यात् 'दक्षिणे तु भुजे विप्रः' इत्यत्र विप्रपदं पतितविप्रविषयं विज्ञायते—इति। तन्न; तथाचक्राङ्कित इत्यत्र तथा अचक्राङ्कित इति पदच्छेदात्, अन्यथा एतच्छ्रुतिविरोधेन स्मृतेरेवाप्रामाण्यप्रसङ्गात्॥

यदपि—'दक्षिणे तु भुजे विप्रः' इत्यस्यागमिकमन्त्रत्वेन श्रुतित्वासिद्धेर्न तद्विहितचक्रधारणस्य श्रौतत्वम्—इति। तन्न; पाद्मे—

"सर्वाश्रमेषु वसतां ब्राह्मणानां विशेषतः।
विधिना वैष्णवं चक्रं धार्यं हि श्रुतिचोदनात्॥
दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्।
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः॥
एवं महोपनिषदि प्रोक्तं चक्रादिधारणम्॥"—

इत्यस्य मन्त्रस्य महोपनिषद्गतत्वाभिधानाच्छ्रुतित्वस्य दुर्वारत्वात्।

"दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्।
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः॥
इत्यादिश्रुतिभिः प्रोक्तं विष्णोश्चक्रस्य धारणम्॥"—

इति हारीतस्मृतौ तन्मन्त्रस्य कण्ठत एव श्रुतित्वाभिधानाच्च॥

यदपि—पाद्मवचनस्थमहोपनिषत्पदेन पञ्चरात्रस्यैव परामर्शः। महाभारते—'इदं महोपनिषदं चतुर्वेदसमन्वितम्।
साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम्॥'—

इति पञ्चरात्रस्य महोपनिषत्संज्ञया व्यवहारदर्शनात्तत्प्रक्रियानुवादि-पाञ्चवचनस्थितमहोपनिषत्पदेन तत्संहिताविशेषपरामर्शस्योचितत्वात्, चक्रादिधारणस्य पाञ्चरात्रविहितत्वमुभयसम्प्रतिपन्नमिति तत्प्रोक्तत्वस्यैव दृष्टान्तीकर्तुं युक्तत्वाच्च, प्रसिद्धमहोपनिषदि दक्षिणे तु भुजे विप्र इत्यस्यादर्शनाच्च। तथा च-यथा चक्रादिधारणं पञ्चरात्रविहितं तथैव सामवेदादिविहितमिति सदृष्टान्तं श्रुतिचोदितत्वं समर्थितमिति न पाञ्चवचनबलात् दक्षिणे तु भुज इत्यस्य श्रुतित्वसिद्धिः--इति ॥

तन्न। महाभारते हि मोक्षधर्मे द्विषष्टिशततमेऽध्याये उपरिचरवसुवृत्तान्तं पाञ्चरात्रप्रामाण्यप्रकाशकमभिधाय त्रिषष्टिशततमेऽध्याये—

"तमुवाच न तं मूर्धा देवानामादिरव्ययः।
एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः ॥
इमं देशमनुप्राप्ता मम दर्शनलालसाः।
न च मां ते ददृशिरे न च द्रक्ष्यति कश्चन ॥
ऋते ह्येकान्तिनश्श्रेष्ठात्त्वं चैवैकान्तिनो मतः।"--

इत्यादिना ऐकान्त्यप्रभावं व्यूहजगत्कारणत्वं चाभिधाय, चतुष्षष्टिशततमे--

"इदं महोपनिषदं चतुर्वेदसमन्वितम्।
साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम्॥
नारायणमुखोद्गीतं नारदोऽश्रावयत्पुनः।
ब्रह्मणस्सदने तात यथादृष्टं यथाश्रुतम् ॥
श्रुत्वा ब्रह्ममुखाद्रुद्रस्स देव्यै कथयत्पुनः।

युधिष्ठिरः—

एतदाश्चर्यभूतं हि माहात्म्यं तस्य धीमतः।
किं ब्रह्मा न विजानीते यतश्शुश्राव नारदात् ॥

पितामहोऽपि भगवान् तस्माद्देवादनन्तरः ।
कथं स न विजानीयात्प्रभावममितौजसः ॥

भीष्मः—

सर्वस्यादौ स्मृतो ब्रह्मा प्रजासर्गकरः प्रभुः ।
जानाति देवप्रवरं भूयश्चातोऽधिकं नृप ॥
येऽप्यन्ये ब्रह्मसदने सिद्धसङ्घास्समाहिताः ।
तेभ्यस्तच्छ्रावयामास पुराणं वेदसम्मितम् ॥"—

इत्यादिका फक्किका दृश्यते ॥ तत्र 'इदं महोपनिषदम्' इत्यत्रेदंपदेनाव्यवहितपूर्वपूर्वस्तुतभगवन्माहात्म्यस्यैव परामर्शो युक्तः, न तु पञ्चरात्रस्य; वसुवृत्तान्तप्रस्तावस्य विच्छिन्नत्वेन तद्घटकपञ्चरात्रस्याप्यनुपस्थितेः। इदं—प्रस्तुतं भगवन्माहात्म्यं, महोपनिषदं—अतिरहस्यं, चतुर्वेदसमन्वितं—चतुर्वेदतात्पर्यविषयीभूतं, पञ्चरात्रानुशब्दितं—पाञ्चरात्रप्रोक्तमित्यर्थात् । इदंमहोपनिषदमित्यस्य पाञ्चरात्रपरत्वे यथादृष्टं यथाश्रुतमित्यस्यासङ्गतिः; पाञ्चरात्रे दृष्टत्वश्रुतत्वयोरसम्भवत्, तयोश्च चाक्षुषज्ञानविषयत्वशाब्दबोधविषयत्वरूपत्वात्, भगवन्माहात्म्ये च तयोस्सम्भवात्; इदंमहोपनिषदमित्यादिना नारदस्य भगवन्माहात्म्यश्रावयितृत्वानुक्तौ—ब्रह्मणः कथं श्रोतृकोटिप्रवेशः, तस्य भगवन्माहात्म्यज्ञानवत्त्वादित्येवंरूपस्य युधिष्ठिरचोद्यस्य 'एतदाश्चर्यभूतं हि माहात्म्यं तस्य धीमतः' इत्यादिनोक्तस्यासङ्गतेः। तथा च—भारतस्थमहोपनिषच्छब्दस्य पाञ्चरात्रपरत्वाभावान्न पाद्मवचनस्थतत्पदस्यापि तत्परत्वमिति ॥

यदि च—वसुवृत्तान्ते पञ्चरात्रस्य प्रस्तुतत्वात्तत्प्रधानार्थस्यैकान्त्यस्य व्यूहजगत्कारणत्वादेश्चैतावत्पर्यन्तमनुवृत्तत्वाच्च इदं महोपनिषदमित्यत्र इदमिति पञ्चरात्रस्यैव परामर्शः, ऐकान्त्यस्य श्वेतद्वीप-

निवासिषु दर्शनात्, व्यूहजगत्कारणत्वादेर्भगवतोपदिष्टत्वेन श्रुतत्वाच्च; दृष्टार्थकत्वश्रुतार्थकत्वाभिप्रायेण यथादृष्टं यथाश्रुतमित्यस्योपपत्तेः, पाञ्चरात्रप्रतिपाद्यभगवन्माहात्म्यज्ञानवत्त्वात्कथं पाञ्चरात्राध्येतृत्वं ब्रह्मण इत्यभिप्रायेण युधिष्ठिरचोद्यस्यान्येषां तदर्थापरिज्ञातॄणां सिद्धानामध्येतृत्वप्रतिपादनेन तत्परिहारस्य च सङ्गतेः। अत एव—'तेभ्यस्तच्छ्रावयामास पुराणं वेदसम्मितम्' इति सङ्गच्छते; पाञ्चरात्रस्य वेदसाम्यवत्त्वेऽपि माहात्म्यस्य तथात्वविरहात्। अत एव च **महाचार्यैः परिकरविजये** इदं महोपनिषदमित्यादिकं पाञ्चरात्रपरं व्याख्यातम्—**इति विभाव्यते । तदाऽपि न दोषः,** पाञ्चरात्रानुशब्दितमिति पदसमभिव्याहाररूपबाधकबलेन महाभारतगतस्य महोपनिषत्पदस्य उपनिषदातिब्रह्मण्यव्यवधानेन वर्तत इत्यव्यवधानेन ब्रह्मप्रतिपादकत्वे सति महत्त्वरूपयोगार्थमादाय लक्षणया वा पाञ्चरात्रपरत्वेऽपि पाञ्चवचने बाधकानुपलम्भेन रूढ्यर्थत्यागायोगात्॥ न च—तन्मन्त्रस्येदानीन्तनमहोपनिषत्कोशेष्वनुपलम्भेन श्रुतित्वाभाव एव बाधक इति—वाच्यम्; इषेत्वेत्यादेरपि महोपनिषत्कोशेष्वनुपलभ्यमानतया श्रुतित्वाभावप्रसङ्गात्॥

न च—महोपनिषद्घटकश्रुतित्वाभावं प्रति महोपनिषत्कोशेष्वनुपलभ्यमानत्वव्याप्यतया न दोष इति—वाच्यम्; महोपनिषत्कोशेष्वनुपलभ्यमानत्वं हि यत्किञ्चित्कोशेष्वनुपलभ्यमानत्वं कोशसामान्ये वा? । नाद्यः, लेखकप्रमादादिदुष्टकोशेष्वनुपलभ्यमानत्वस्य तद्घटकमन्त्रेष्वेव सत्त्वेन व्यभिचारात्। न द्वितीयः, अस्मदादीनां कोशसामान्यज्ञानाभावेन हेतोर्दुर्ज्ञेयत्वात्। प्रत्यक्षविषयीभूतकोशसामान्येऽनुपलभ्यमानत्वस्य हेत्वर्थत्वेऽपि न निस्तारः; तादृशहेतोः सर्वस्य वशिन इत्याद्यष्टर्चात्मकब्रह्मसूक्तघटकेऽस्मिन्मन्त्र इव तत्सूक्तेऽपि सत्त्वेन

तस्यापि महोपनिषद्घटकश्रुतित्वाभावप्रसङ्गात् । न चेष्टापत्तिः; **पारमेश्वरसंहितायां** प्रतिष्ठाध्याये—

"एवं संस्थाप्य विधिवन्नवभिः कलशैस्ततः ।
स्नापयेद्ब्रह्मसूक्तस्थैर्मन्त्रैरष्टाभिरेव च ॥"   —इति ;

तथा स्नापनाध्याये—

"पौरुषेण तु सूक्तेन समस्तेन शनैश्शनैः ।
स्नापयेद्देवदेवेशं मध्यस्थनवकेन तु ॥
यद्वा सर्वस्य वशिन इत्याद्यैर्मनुभिः क्रमात् ।
महोपनिषदन्तस्थैर्दिक्स्थितैः कलशाष्टकैः ॥
एक एव नारायण इति मध्यगतेन तु ।"—

इत्यादिवचनेन तत्सूक्तस्य तदन्तर्गतत्वनिश्चयात् । अत्र महोपनिषन्मध्यगता हि सहस्रशीर्षेत्याद्या एकोनविंशतिर्मन्त्राः, तत्रोपरितना अष्टौ मन्त्रास्सर्वस्य वशिन इत्याद्या ब्रह्मसूक्तम्, तत्र दक्षिणे तु भुजे विप्र इति पञ्चमो मन्त्रः, एक एव नारायण इति महोपनिषदाद्यो मन्त्र इति बोध्यम् । किं च महोपनिषत्कोशेष्वनुपलभ्यमानत्वान्महोपनिषद्घटकत्वाभावे पाञ्चरात्रेषु तन्मन्त्रपाठस्य क्वाप्यनुपलम्भेनागमिकमन्त्रत्वस्याप्यभावप्रसङ्गात् । अपि च 'विधिना वैष्णवं चक्रं धार्यं हि श्रुतिचोदनात्' इत्युक्ते केयं श्रुतिरित्याकाङ्क्षायां, 'दक्षिणे तु भुजे विप्रः' इत्यस्य तन्निवर्तकत्वेन पाठनान्नागमिकमन्त्रत्वं ; अन्यथा आकाङ्क्षाया अनिवृत्तेरिति ॥

यदपि—'तेन पवित्रेण शुद्धेन पूताः' 'गोविन्दुर्द्रप्स आयुधानि बिभ्रत्' 'मध्ये बाहुमदधत्सुदर्शनं' 'मूले बाह्वोर्दधतेऽन्ये पुराणाः' 'बिभृयाद्वै सुदर्शनं' 'धृतोर्ध्वपुण्ड्रः कृतचक्रधारी' इत्यादिषु सुवर्णं धार्यमित्यादाविवाभरणरूपेणैव बालग्रहनिवारणार्थं सुदर्शनादिधारणं विधी-

यते। तथाऽऽह बृहस्पतिः—

"जातस्य तु कुमारस्य धारयेत्पञ्चमे दिने।
चक्रं कृत्वा सुवर्णेन षडरं मन्त्रसंयुतम् ॥" —इति ;

शाण्डिल्योऽपि—

"कारयित्वा सुवर्णेन पञ्चायुधगणं हरेः।
बध्नीयात्कण्ठदेशेषु बालानां सूतिकागृहे ॥
मुक्तामणिसुवर्णाद्यैः कृत्वा चक्रादिभूषणम् ।
यथार्हं बिभृयुस्सर्वे पुमांसस्त्रीजनोऽपि वा ॥" —इति ।

एवं स्मृतिपुराणादिष्वपि द्रष्टव्यम्—इति॥ **तदपि न सत्**; तेन पवित्रेण शुद्धेनु पूताः, गोविन्दुर्द्रप्स आयुधानि बिभ्रत्, मध्ये बाहुमदधत्सुदर्शनं, मूले बाह्वोर्दधतेऽन्ये पुराणाः, धृतोर्ध्वपुण्ड्रः कृतचक्रधारी—इत्यादिषु प्रतिपन्नं चक्रधारणं 'जातस्य तु कुमारस्य' इत्याद्युक्तसुवर्णाभरणरूपचक्रधारणाद्भिन्नं; फलभेदात्, वचनोक्तस्य बालग्रहनिवारणफलकत्वात्, श्रुत्युक्तस्य च पापनिवृत्तिद्वारा ब्रह्मप्राप्तिफलकत्वात्; अधिकारिभेदाच्च, वचनोक्ते बालस्य श्रुत्युक्ते च मुमुक्षोरधिकारित्वात्। एवं तादृशश्रुतिप्रतिपन्नचक्रधारणं तप्तमुद्राधारणाभिन्नं; तत्समानफलकत्वात्। फलैक्ये कर्मैक्यं, फलभेदे भेदश्च सर्वशाखाप्रत्ययसर्ववेदान्तप्रत्ययन्यायाभ्यां सिद्धः; समानफलकानां नानाशाखोक्तानामग्निहोत्राणामैक्यस्य सर्वशाखाप्रत्ययन्यायेन पूर्वतन्त्रे व्यवस्थापनात्, उत्तरतन्त्रेऽपि समानफलकानां छान्दोग्यबृहदारण्यकोक्तानां वैश्वानरविद्यानामैक्यस्य व्यवस्थापनात्। न चैवमपि—'दक्षिणे तु भुजे विप्रः' 'धृतोर्ध्वपुण्ड्रः कृतचक्रधारी' इति श्रुत्युक्तधारणयोस्तप्तमुद्राधारणरूपत्वं न सिध्यति, तयोः फलाश्रवणादिति--वाच्यम्; प्रागुदाहृतपाद्मवचनेन हारीतस्मृतिवचनेन च 'दक्षिणे तु भुजे विप्रः' इत्यस्य तप्तचक्रधारणपरतयोपबृंहितत्वात्तत्परत्वस्य, धृतोर्ध्वपुण्ड्र

इत्यस्य च 'तप्तं चक्रं द्विभुजे धार्यमित्यूर्ध्वपुण्ड्रमालिखेत्' इति शतपथश्रुत्यनुसारेण तप्तमुद्राधारणपरत्वस्य सिद्धेरिति ॥

यत्तु—'निचिक्षेप सुपर्णं भिद्यमानं' 'पवित्रमित्यग्निः' 'एभिर्वयमुरुक्रमस्य चिह्नैः' 'प्र ते विष्णो' 'धृतोर्ध्वपुण्ड्रः'—इत्यादिमन्त्राणां प्रचरदवस्थशाखास्वनधीयमानतया श्रुतित्वसन्देहात्कथं चक्रधारणे प्रामाण्यम्—इति । तन्न; प्रचरदवस्थशाखास्वनधीयमानत्वस्य श्रुतित्वतदभावसहचरितत्वेन साधारणधर्मतया श्रुतित्वसन्देहप्रयोजकत्वेऽपि तादृशसन्देहविशेष्यत्वस्याप्रामाण्यव्याप्यत्वाभावात्; महाभारते सारस्वतोपाख्याने तैत्तिरीयशाखायाश्श्रुतित्वसन्देहस्य प्रतिपादनेन तादृशसन्देहविशेष्यस्यापि प्रामाण्यदर्शनात् ॥

न च—सारस्वतोपाख्याने चतुष्षष्टिमुनिगणसहस्रेषु चतुष्षष्टिसहस्रवेदानध्यापितेषु साकल्येन तैत्तिरीयशाखामधीतवतां केषांचिन्मुनीनामनुष्ठानक्रमानुगुणपाठक्रमाभावेन शाखान्तरविलक्षणायां तैत्तिरीयशाखायां श्रुतित्वसन्देहवतां सनत्कुमारप्रभृतिभिर्ब्रह्मर्षिभिरपि तच्छाखायां वेदत्वस्य निश्चेतुमशक्यतया चतुर्मुखनिकटं गतानां तद्वचनेन तच्छाखायां वेदत्वनिश्चयस्य जातत्वान्नानुपपत्तिः। वेदत्वनिश्चयाभावे तज्जन्यबोधे प्रामाण्यनिश्चयाभावेनाप्रामाण्यशङ्कासद्भावादप्रामाण्यज्ञानानास्कन्दितप्रमात्मकबोधजनकत्वरूपप्रामाण्यासद्भावाद्वेदत्वप्रकारकनिश्चयाविशेष्यत्वस्याप्रामाण्यव्याप्यताया विवक्षितत्वादिति—वाच्यम्। तथा सति स्मृत्यादेरप्यप्रामाण्यापत्तेः, तस्यापि वेदत्वप्रकारकनिश्चयाविशेष्यत्वात् । वेदत्वतन्मूलकत्वान्यतरप्रकारकनिश्चयाविशेष्यत्वस्य शब्दगतप्रामाण्याभावव्याप्यत्वमित्यपि न सम्भवति; 'यज्ञोपवीतं परमं पवित्रं', 'प्रसुग्मन्ता धियसानस्य सक्षणि' इत्यादिमन्त्राणां प्रचरदवस्थशाखास्वनधीयमानत्वेन श्रुतित्वनिश्चयाभावेन प्रामाण्यानापत्तेः ॥

न च—कल्पसूत्रकारोपात्तत्वाद्यज्ञोपवीतादिमन्त्राणां श्रुतित्वनिश्चयसम्भव इति—वाच्यम्; तथा सति परमाप्तप्रणीतभगवच्छास्त्रोपात्तत्वादमीषामपि मन्त्राणां श्रुतित्वसिद्धेर्निष्प्रत्यूहत्वात् । तथा हि **पारमेश्वरसंहितायामुत्सवाध्याये**—

"दक्षिणे तु भुजे विप्र इति प्राक्संस्थितेन तु ।
निचिक्षेप सुषणमिति वह्निगतेन तु ॥
प्र ते विष्णो अब्जचक्रे इति याम्यगतेन तु ।
एभिर्वयमुरुक्रमस्येति यातुधानगतेन तु ॥
धृतोर्ध्वपुण्ड्रः कृतचक्रेति पश्चिमगेन तु ।
पवित्रमित्यग्निरिति ततो वायुगतेन तु ॥
चरणं पवित्रं विततमिति सोमगतेन तु ।
लोकस्य द्वारमर्चिमदिति रुद्रगतेन तु ॥
मन्त्रैरेतैस्तु चाष्टाभिरन्यैस्सौदर्शनैस्तथा ।
संस्नाप्य मन्त्रकुम्भेन शुद्धोदैरभिषिच्य तु ॥" —इति,

तथा **कालोत्तरसंहितायां** सुदर्शनसमाराधनाध्याये—

"एवं प्रासादशिखरे चक्रं संस्थापयेद्बुधः ।
द्वादशारमथाष्टारं षडरं वा महामते ॥
संस्थाप्य विधिवत्कुम्भे मन्त्रैर्द्वादशभिः क्रमात् ।
दक्षिणे तु भुजे विप्र इति क्षीरेण सेचयेत् ॥
निचिक्षेप सुषणमिति दधिना स्नापयेत्ततः ।
प्र ते विष्णो इत्यनेन घृतेनैवाभिषेचयेत् ॥
एभिर्वयमुरुक्रमस्येति मधुना स्नापयेद्बुधः ।
धृतोर्ध्वपुण्ड्रः कृतचक्रेतीति इक्षुरसेन तु ॥
पवित्रमित्यग्निरिति पञ्चगव्येन सेचयेत् ।"

इति नानाप्रदेशेष्वेतेषां मन्त्राणामुपादानसत्त्वात्, कल्पसूत्रोपात्तमन्त्रवदमीषामपि श्रुतित्वस्य दुर्वारत्वात् ॥

यत्तु—सत्यमेते पाञ्चरात्रोपात्ताः, नैतावतैतेषां मन्त्राणां श्रुतित्वं सिध्यति, तान्त्रिकमन्त्रत्वेनाप्युपपत्तेः । तान्त्रिकमन्त्राणामपि 'अलाभे वेदमन्त्राणां पाञ्चरात्रोदितेन वा'—इतिवाराहवचनेन तत्तत्कर्मसु विनियोगदर्शनात्—इति—तन्न; उक्तमन्त्राणां पाञ्चरात्रवचनत्वे प्रतीकग्रहणपूर्वकविनियोगानुपपत्तेः । न च—आश्वमेधिकादौ 'नमो ब्रह्मण्यदेवायेत्यभिवादनमाचरेत्' इत्यादिना

"नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥"

इत्यादीनां प्रतीकग्रहणपूर्वकविनियोगाच्छ्रुतित्वापत्तिरिति—वाच्यम्; इष्टत्वात्, 'सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात्'—इत्यादीनां श्रीविष्णुपुराणे पाठसत्त्वेऽपि श्रुतित्ववत्तस्य श्रीविष्णुधर्मादौ पाठसत्त्वेऽपि श्रुतित्वाविरोधात् । छान्दसशब्दबाहुल्यविशिष्टप्रतीकग्रहणपूर्वकविनियोगवत्त्वस्य श्रुतित्वव्याप्यत्वाङ्गीकारेण नमो ब्रह्मण्यदेवायेत्यादेः श्रुतित्वविरहेऽपि बाधकाभावात् । एवं तादृशप्रतीकग्रहणपूर्वकविनियोगस्य श्रुतित्वासाधकत्वे यज्ञोपवीतादिमन्त्राणामपि श्रुतित्वानुपपत्तिः; स्मृत्युपात्तस्य स्मार्तमन्त्रत्वेनाप्युपपत्तेः, स्मृतिवाक्यानामपि 'यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान्' इत्यादिना ब्रह्मयज्ञे विनियोगदर्शनात् । किं च पारमेश्वरसंहितायामेव चक्रप्रतिष्ठाध्याये—

"तत्तत्स्थापनकाले तु तत्तत्संज्ञान् मनून् जपेत् ।
विद्यां गदामित्याद्यं यत्पाठयेत्तद्विदो जनान् ॥
चमूषच्छयेन इति प्र ते विष्णो इति त्वृचौ ।
पाठयेद्बह्वृचान्पश्चाच्छाकुनं सूक्तमेव च ॥
धृतोर्ध्वपुण्ड्रः कृतचक्रेति मन्त्रं कठान् परम् ।
पवित्रं ते विततमित्येतन्मन्त्रं यजुर्मयान् ।
क्षुरो हरेति सामज्ञान्पवित्रमित्यग्निरित्यपि ॥

एभिर्वयमुरुक्रमस्येत्याथर्वणविदो जनान् ।
एवं संस्थाप्य विधिवन्नवभिः कलशैस्ततः ॥"

इत्यादिना तत्तच्छाखाध्यायिपुरुषजप्यत्वेन तन्मन्त्राणां विधानं दृश्यते । तद्विधानं च तत्तच्छाखिनां तत्तच्छाखास्थमन्त्राध्ययनसम्भवेन जपशैघ्रचरूपदृष्टप्रयोजनार्थम् ; तच्च दृष्टं फलं तेषां मन्त्राणां तत्तच्छाखागतत्वमन्तरेणानुपपन्नमिति तेषां तत्तच्छाखागतत्वं सिध्यति॥

यदपि—चमूषन्मन्त्रशाकुनसूक्तपवित्रादिमन्त्राणां जपशैघ्रचप्रत्यायनायैव तत्तच्छाखिपुरुषविशेषाणामुपादानात्, तथाऽऽनुषङ्गिकतया 'प्र ते विष्णो' इत्याद्यागमिकमन्त्राणामप्युपादानम्—इति ॥

तन्न—विकल्पासहत्वात् । तथा हि--आनुषङ्गिकतया आगमिकमन्त्राणामुपादानमित्यस्य कोऽर्थः ? । जपशैघ्रचप्रत्यायनरूपफलमनुद्दिश्यैव पुरुषविशेषजप्यत्वेन विधानमित्यर्थः, उत पुरुषविशेषजप्यत्वे तात्पर्यमेव नास्तीत्यर्थो वा ? नाद्यः—तादृशफलोद्देशाभावे सामान्यतो जपविधानस्यैव युक्तत्वेन पुरुषविशेषकर्तृकजपविधानानुपपत्तेः ; न चादृष्टार्थं तथाविधानमिति वाच्यम् ; चमूषन्मन्त्रादौ दृष्टप्रयोजनमत्रादृष्टप्रयोजनमित्यर्धजरतीयन्यायापत्तेः । न द्वितीयः—पुरुषविशेषजप्यत्वेन स्फुटतरविधानसत्त्वे तथा तात्पर्यं नास्तीत्यस्य वक्तुमशक्यत्वात्, चमूषन्मन्त्रादौ पुरुषविशेषजप्यत्वे तात्पर्यं, प्र ते विष्णो इत्यादौ तथा तात्पर्यं नास्तीति वैषम्याङ्गीकारे बीजाभावात्, विनिगमनाविरहेण वैपरीत्यप्रसङ्गाच्च ॥

यत्तु—एते नैकस्मिन्नेव संहिताविशेषे पठिताः, किं तु कस्मिंश्चित्संहिताविशेषे कश्चिन्मन्त्रः, ते च संहिताविशेषा आपस्तम्बादिकल्पा इव तत्तच्छाखिनः प्रतिव्यवस्थिता एव । तथा च—अनेकसंहिताविशेषयुक्तस्य पाञ्चरात्रस्य य एव कश्चित्संहिताविशेषः केनचिच्छाखिना नियमेन परिगृहीतः, तच्छाखिनस्तत्संहिताविशेषगतो

मन्त्र आगमिकोऽपि स्वभ्यस्तो भवतीत्यनेनाभिप्रायेण तत्तच्छाखाध्यायिपुरुषजप्यत्वविधानं भवति सुतरां दृष्टार्थम्। यथा हि गौतमधर्मशास्त्रस्य च्छन्दोगैरेव परिगृहीतत्वात्तद्घटकसूत्रवाक्यान्यपि छन्दोगानामेव स्वभ्यस्तानि भवन्तीति तत्सूत्रवाक्यपरिज्ञानाय छन्दोगा एवान्विष्यन्ते; तथा धृतोर्ध्वपुण्ड्र इति मन्त्रः कठशाखिपरिगृहीतपञ्चरात्रसंहिताविशेषगत इति तन्मन्त्रजपाय कठान्वेषणमुपपद्यते। कथं पुनरवगम्यते—पञ्चरात्रसंहिताविशेषेषु कश्चित्संहिताविशेषः कस्य चिदेव शाखिनो नियत इति? पारमेश्वरसंहितादिवचनैरिति वदामः। इत्थं हि पारमेश्वरसंहितावचनम्—

"समेत्य मुनयस्सर्वे भगवन्तमथाब्रुवन्।
भगवंस्त्वत्कृतं शास्त्रं त्वत्कृतत्वेन नित्यशः॥
न शक्ता वयमध्येतुमुपायं त्वत्र नो वद।
इति विज्ञापितस्तैस्तु वासुदेवस्सनातनः॥
अनेकसंहिताभेदैः पञ्चरात्रं विभज्य तु।
एकैकं संहिताभेदं प्रादादेकैकशाखिने॥
ते तु तत्संहिताभेदस्थितैर्मन्त्रैः पृथक्पृथक्।
आराध्य समनुप्राप्ता वैष्णवं परमं पदम्॥" —इति॥

तस्मात्सिद्धमेतेषां मन्त्राणामागमिकत्वेऽपि तत्तच्छाखाध्यायिपुरुषजप्यत्वविधानं दृष्टार्थमुपपन्नमिति न तद्बलादेतेषां मन्त्राणां श्रुतित्वसिद्धिः॥ —इति॥

अत्रोच्यते—तत्तच्छाखिपुरुषजप्यत्वविधानस्य तत्तच्छाखिकर्तृकशीघ्रजपकर्मत्वकल्पकतया तस्य च तत्तच्छाखिपुरुषाभ्यस्तमन्त्रत्वव्याप्यतया तदनुमापकत्वमेव, न तु तत्तच्छाखाघटकमन्त्रत्वानुमापकत्वं; तत्तच्छाखिपुरुषाभ्यस्तसंहिताघटकमन्त्रस्यापि तत्तच्छाखिपुरुषकर्तृकशीघ्रजपकर्मत्वसम्भवात्तद्व्याप्यताविरहात्—इति हि भवदभिप्रायः।

स चायुक्तः; तत्तच्छाखिपुरुषकर्तृकशिष्यजपकर्मत्वस्य, तत्तच्छाखाघटक मन्त्रत्वाव्याप्यत्वेऽपि छान्दसशब्दबाहुल्यविशिष्टस्यागमाघटकत्वविशिष्टस्य वा तस्यै तत्तच्छाखाघटकत्वव्याप्यतया तत्तच्छाखाघटकत्वसिद्धेर्दुर्वारत्वात् । आगमाघटकत्वं च पारमेश्वरसंहितायामन्यस्यां वा एतेषां मन्त्राणां पाठाभावादेव सिद्धम् । पारमेश्वरसंहितायां प्रतीकग्रहणेऽपि नागमिकमन्त्रत्वं, तथात्वे पवित्रमन्त्रादेरपि तथात्वप्रसङ्गादिति बोध्यम् ॥

एवमेतेषां मन्त्राणामभियुक्तोपदेशादपि तत्तच्छाखागतत्वं श्रुतित्वं च सिध्यति ॥

यत्तु—यो हि यमर्थं दृढतरप्रमाणेन निश्चित्य परस्मै वाक्यं प्रयुङ्क्ते स तस्मिन्नर्थेऽभियुक्तो भवति; न चाधुनिकानां त्वदीयानां बाष्कलशाखादिपरिज्ञानं सम्भवति, तासां प्रचरदवस्थत्वाभावेन ब्राह्मणोक्ता विधयस्तेषामुत्सन्नाःपाठाः प्रयोगादनुमीयन्त इत्यापस्तम्बादिवचनैश्चिरकालमेवोच्छिन्नत्वावगमात्; विप्रकीर्णशाखापक्षेऽप्यर्वाचीनानां तावच्छाखापरिज्ञाने सामर्थ्याभावात्—इति । तत्रोच्यते; दृढतरप्रमाणजन्ययादृशार्थविषयकनिश्चयप्रयोज्ययादृशार्थविषयकबोधेच्छाधीनवाक्यप्रयोक्तृत्वं यस्य तस्य तादृशार्थेऽभियुक्तत्वमिति हि भवता विवक्षितम्; तन्न युक्तम्; गीतोपदेष्टुर्भगवतः प्रमाणजन्यनिश्चयाभावेन तस्य तदर्थेऽभियुक्तत्वाभावापत्तेः । न च—निश्चये प्रमाणजन्यत्वमनिवेश्य प्रमाणाजन्यत्वजन्यत्वोभयाभाववत्त्वं विवक्षितं, भगवत्साक्षात्कारस्य जन्यत्वे प्रमाणजन्यत्वस्य सत्त्वात्, अजन्यत्वपक्षे च जन्यत्वस्यैवासत्त्वेनोभयाभाववत्त्वसत्त्वान्नानुपपत्तिरिति—वाच्यम्; तथाऽपि निरुक्ताभियुक्तत्वस्यास्मदाचार्यव्यावृत्तत्वाभावात्, अस्मदाचार्याणामुक्तश्रुतिषु तत्तच्छाखागतत्वस्य श्रुतित्वस्य चाप्तोपदेशादिभिर्ज्ञातत्वात्, आप्तोपदेशस्य च प्रमागतायास्सर्वैरङ्गीकार्य

स्वात् ; अन्यथा भवतां ब्राह्मण्यगोत्रविशेषशाखाविशेषादीनामसिद्धिप्रसङ्गात् ; अयं ब्राह्मणः अयममुकगोत्रः अयमेतच्छाखावानित्यादेरुपदेशपरम्परयैव ज्ञातत्वात्, बाष्कलशाखादीनां प्रचरदवस्थत्वाभावेन तच्छाखाया अपरिज्ञानेऽप्युदाहृतमन्त्रविशेष्यकतच्छाखात्वप्रकारकज्ञाने सम्पूर्णशाखापरिज्ञानस्यानुपयोगात् । न हि—इषेत्वेत्यादिमन्त्रे यजुर्वेदत्वज्ञानं सम्पूर्णयजुर्वेदज्ञानाधीनं ; किं तु यादृशश्रुतौ यजुष्ट्वादिकं ज्ञातव्यं तादृशश्रुतिज्ञानाधीनम् ; प्रकृते च सम्पूर्णबाष्कलशाखापरिज्ञानाभावे श्रुतिव्यक्तिविशेषे तच्छाखात्वज्ञानमाप्तोपदेशादेर्दुरपह्नवम् ॥

यदपि—कल्पसूत्रकारादिपरिग्रह एव वेदत्वसाधको नाधुनिकपरिग्रहमात्रं ; अन्यथा महाव्रतस्य पञ्चविंशतिसामिधेन्य इति बह्वृचशाखागतपञ्चमारण्यके आश्वलायनसूत्रेऽध्येतॄणां वेदत्वव्यवहाराद्वेदत्वं स्यात् । न चेष्टापत्तिः ; भाट्टसारादौ विद्यारण्यश्रीचरणैः पञ्चमारण्यकगतकर्मचोदनास्वर्थवादभागानुपलम्भेन प्रसिद्धवेदवैलक्षण्याद्वेदत्वाभावस्य समर्थितत्वात् ; तरणिर्विश्वदर्शित इति यजुर्वेदारण्यकगतानुवाकपञ्चकस्य द्रविडव्यतिरिक्ताध्येतृभिर्यजुस्संहितामध्येऽधीयमानत्वेऽपि तदारण्यकगतत्वस्य यजुर्वेदसर्वानुक्रमणिकालक्षणग्रन्थैरेव निश्चेतव्यत्वाच्च सामगानामूहग्रन्थेऽध्यायानध्यायपुरस्सरगुरुशुश्रूषापूर्वकनियमाध्ययनसत्त्वेऽपि सर्वाध्येतॄणामविगानेन तत्र वेदव्यवहारसत्त्वेऽपि वेदत्वाभावस्य ऊहत्वसमाख्यानात् ; 'यद्योन्यां गायति तदुत्तरयोर्गायति' इति योनिऋग्गानस्य उत्तरयो ऋचोरतिदेशसामर्थ्याच्च सिद्धत्वात्, उक्तातिदेशेन योनावध्ययनसिद्धस्य उत्तरयोरनुष्ठानावगमात्, पौरुषेयतायास्स्पष्टत्वात् । न हि—तिसृष्वप्यधीतस्य यद्योन्यां तदुत्तरयोरिति वादो घटत इत्यादिन्यायैर्नैवम ऊहस्य वेदत्वाभावसमर्थनात्; तस्मादुक्तमन्त्राणां भवदीये-

राधुनिकैर्वेदत्वेन व्यवहारेऽपि न वेदत्वादिसिद्धिः---इति ॥

तदयुक्तं---असति बाधके आधुनिकव्यवहारस्याप्यर्थसाधकत्वात् ; अन्यथा शाखागोत्रब्राह्मण्याद्यसिद्धेरुक्तत्वात्, सति बाधके कल्पसूत्रकारादिवचनानामप्यर्थसाधकत्वाभावात्, अङ्गं वा समभिव्याहारादविशेषादुभौ वेत्यादिकल्पसूत्राणामप्रामाण्यस्य पूर्वतन्त्रसिद्धत्वात्। तथा हि—पिण्डपितृयज्ञो दर्शकर्मणोऽङ्गं अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति दर्शकर्मवाचकामावास्याशब्दसमभिव्याहारादिति प्रथमसूत्रार्थः। चतुर्थे पितृयज्ञस्स्वकालत्वादनङ्गं स्यादित्यत्रामावास्याशब्दस्य कालवाचित्वमेव, तादृशापराह्णशब्दसमभिव्याहारात्। तथा च दर्शकर्मसमभिव्याहाराभावान्न तदङ्गं पिण्डपितृयज्ञः; किं तु स्वतन्त्र इति व्यवस्थापितम्। दर्शपूर्णमासयोराग्नेयं चतुर्धा करोतीत्युक्तचतुर्धाकरणे कल्पसूत्रमविशेषादुभौ वेति, अग्निसम्बन्धाविशेषादाग्नेयाग्नीषोमीयावुभावपि चतुर्धा कुर्यात्—इति तदर्थः। सत्यप्यग्नीषोमीयस्याग्निसम्बन्धेनासावाग्नेयशब्दो नाभिधातुं शक्यः, तत्र केवलस्याग्नेर्देवतात्वाभावेन तद्धितानुपपत्तेः ; ततः केवलाग्नेयस्यैव कल्पसूत्रस्यार्थसाधकत्वे तादृशस्याभियुक्ताधुनिकवचनस्याप्यर्थसाधकत्वादुक्तमन्त्राणां श्रुतित्वं दुर्वारम्, उक्तमन्त्राणां श्रुतित्वे बाधकप्रमाणानुपलम्भात्, प्रत्युत पाञ्चरात्राद्युपादानरूपस्य साधकस्यैव सत्त्वात्; 'महाव्रतस्य पञ्चविंशतिसामिधेन्यः' इत्यादौ बाधकसत्त्वात्साधकाभावाच्च केवलाधुनिकव्यवहाराद्वेदत्वासिद्धेर्युक्तत्वात्। किं च—स्मृतिकल्पसूत्रकाराद्युदाहृतानामेव श्रुतित्वमिति नियमे 'ऊर्जाय पशूनाप्नोत्यूर्जैवावरुध्य' इत्यादिशाबरभाष्योदाहृतानां, तथा विरोधाधिकरणे औदुम्बरी सर्वा वेष्टयितव्येति स्मृतिमूलतया वार्त्तिककारोदितानामूर्ध्वदशेन वाससा परिवेष्टयन्तीत्यादीनां, यथाह्ययं ज्योतिरात्मा विवस्वानित्यादिशङ्करभाष्योदाहृतानां च वाक्यानां श्रुतित्वानिश्चयापत्तिः।

अबाधितवैदिकपरिग्रहात्तेषां श्रुतित्वे चोक्तमन्त्राणामपि श्रुतित्वं दुरपह्नवम् ॥

यदपि–उक्तवाक्यानां श्रुतित्वविप्रतिपत्तौ 'औदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनवरुन्धे' इत्यादिपठ्यमानतैत्तिरीयशाखागतमेव वाक्यं तत्रोदाहरणमस्तु, न्यायनिष्ठत्वादाचार्यस्य नोदाहरणमादर्तव्यमिति न्यायेन तदुदाहरणस्यानादरणीयत्वात्; तत्समानार्थकप्रत्यक्षवेदवाक्यालाभे तथाविधकल्पसूत्रस्मृत्याद्युदाहृततत्समानार्थकस्मृतिपुराणादिभ्यो वा तदर्थनिर्णयोऽस्तु, तथाविधस्मृत्यादीनामलाभे तदर्थनिर्णयासिद्धेरिष्टत्वात् । सुदर्शनधारणे तु त्वदुदाहृतखिलमन्त्राणां श्रुतित्वानिश्चयात्तत्समानार्थकप्रत्यक्षवेदवाक्यानुपलम्भाच्च केवलस्मृतिपुराणाद्युपन्यासे च तस्य स्मार्तत्वसिद्धावपि न श्रौतत्वसिद्धिः–इति ॥ **तदपि न**; वार्त्तिककारोदाहृतश्रुतिसमानार्थकश्रुत्यन्तरानुपलम्भेन तदभिमतार्थासिद्धिप्रसङ्गात्; सुदर्शनधारणे खिलश्रुतिसमानार्थकानां बहूनां शतपथब्राह्मणादिगतानां पठ्यमानश्रुतिवाक्यानामुदाहृतत्वेन तस्य धर्मत्वसिद्धेरप्रत्यूहत्वात्; केवलस्मृतिपुराणादिभिस्स्मार्तत्वसिद्धावपि धर्मत्वसिद्ध्या श्रौतत्वासिद्धावपि क्षतिविरहात्; तप्तमुद्राधारणं धर्म इत्यत्र न तावत्प्रत्यक्षं प्रमाणमित्युपक्रममाणेन भवता तस्य श्रौतत्वखण्डनस्यानवसरग्रस्तत्वाच्चेति दिक् ॥

इदं तु बोध्यं—तप्तमुद्राधारणे पूर्वोदाहृतानि शतपथवाक्यानि खिलश्रुतिवाक्यानि च मूलप्रमाणानि; तत्रापि खिलश्रुतिवाक्यापेक्षया शतपथवाक्यानि प्रबलानि; पठ्यमानत्वाद्विधिविभक्तिमत्त्वाच्च । अत एव तान्येव प्रथममुदाहृतानि परिकरविजये महाचार्यैः । पवित्रचरणचमूपन्मन्त्रास्त्वभ्युच्चयप्रमाणानि; पवित्रादिमन्त्रापेक्षया खिलश्रुतीनां प्राबल्यसूचनायैव प्रथमं खिलश्रुतय एवोपात्तास्सच्चरित्ररक्षायां, अनन्तरं च पवित्रादिमन्त्राः; तेषामपि सम्भवमात्रेण तत्र प्रमाणतयो-

दाहरणमिति ॥ एवं बहुश्रुतिविहिते तप्तमुद्राधारणे कानि चित्पर-दृष्टानि पौरुषेयवाक्यानि दृश्यन्ते ॥

अत्र भास्करः—सुदर्शनधारणे निषेधवचनान्यपि बहूनि **सदाचारसङ्ग्रहे** समुदाहृतानि दृश्यन्ते; तथा हि श्वेताश्वतराणां **संहितोपनिषदि** तावच्छ्रूयते—

"अग्ने यो वै ब्राह्मणो देवतया तस्माद्ब्राह्मणेनाग्निचिह्नं धार्यम्, ऐन्द्रो राजन्यस्तस्माद्राजन्येनेन्द्रचिह्नं धार्यं, मारुतो वैश्य-स्तस्माद्वैश्येन मरुच्चिह्नं धार्यं, सूर्य आत्मा जगतस्तस्थुषश्च तस्माज्जगता सूर्यचिह्नं धार्यं, प्रजापतिर्वै प्रजानामधिपति-स्तस्मात्प्रजाभिः प्रजापतिचिह्नं धार्यं, विष्णुर्वै सर्वान्धर्मा-नभिपाति, तस्माद्धार्मिकेण विष्णुचिह्नं धार्यं; सर्वो वै रुद्रस्त-स्मात्सर्वेण रुद्रचिह्नं धार्यम् इति ॥ तदाहुर्ब्रह्मवादिनो नैव चिह्नं बिभृयात् । यदि कस्यै चिद्देवतायै चिह्नं बिभृयात्, प्रान्यस्यै देवतायै च्यवते पापीयान् स्यात्; सर्वदेवतासमाश्रयो हि ब्राह्मणः, तस्माद्ब्राह्मणेन न कस्यापि चिह्नं धार्यम्। श्रद्धा-यजनाभ्यां हि तद्देवतो भवति, तस्माच्छ्रद्धया सा सा देवता यष्टव्या पूजनीया च तावता तद्देवतो भवति । यदि राजन्यो बिभृयात्प्रलक्ष्मीः पलायेत नैनं राज्येऽभिषेचयेयुः, न ह्यस्य पुत्रा राज्यं लभेरन्, प्र प्रतिष्ठायाश्च्यवेत; तस्माद्राजन्येन न कस्यापि चिह्नं धार्यम्। यदि वैश्यो बिभृयात्सामिदग्धकण्ठ-पटवन्नैनमन्ये निरीक्षेरन्, नाप्यनेन ब्राह्मणास्सम्बन्धं कुर्युः; तस्माद्वैश्येन न कस्यापि चिह्नं धार्यम्। यदि शूद्रो बिभृयान्न ब्राह्मणशुश्रूषामर्हेत्, नैनं ग्रामे वासयेत्प्रतिलोमजातिसधर्माणं कुर्यात्; तस्माच्छूद्रेण न कस्यापि चिह्नं धार्यम्। कामं तु

प्रतिलोमजा यथा दैवतं बिभृयुरिति तथा नैव सुदर्शनं धारयेन्नो वा शङ्खं, पाषण्डपतितानां हि तद्भवति ॥" —इति ॥

तथा छन्दोगानां सात्यमुद्गलशाखायां श्रूयते—

"पतिता ये च पाषण्डा नास्तिका वेदनिन्दकाः ।

तेषां सुदर्शनं धार्यं नानूचानैः कदाचन ॥" —इति ॥

एवमन्यान्यपि निषेधवचनानि तत्रैव द्रष्टव्यानि, विस्तरभयान्न लिख्यन्ते ॥ —इति ॥

अत्रोच्यते—आप्तपरिग्रहादिरूपश्रुतित्वसाधकमानाभावेन त्वयोपन्यस्तवाक्यानां श्रुतित्वासिद्धेस्सदाचारसङ्ग्रहस्य क्वाप्यनुपलब्धत्वादुपलम्भेऽपि तत्कर्तुराप्तत्वासिद्धेः; निषेधवचनान्युदाहृत्यान्यपरतां वर्णितवद्भिरस्मदीयैस्तप्तमुद्राधारणखण्डनदुरभिनिवेशदूषितचित्ततया प्रतिक्षणं निषेधवचनानि मार्गमाणैर्भवदीयैश्चानुदाहृतत्वेनोक्तवाक्यानां श्रुतित्वासिद्धेः; अस्तु वा श्रुतित्वं, तथाऽपि न क्षतिः; यद्रूपव्याप्यधर्मावच्छेदेन बलवदनिष्टानुबन्धित्वतात्पर्यकविधिवाक्यकत्वे सति यद्रूपावच्छेदेन बलवदनिष्टानुबन्धित्वबोधकनिषेधवाक्यत्वं यत्र, तत्र व्याप्यधर्मावच्छिन्नभेदविशिष्टव्यापकधर्मावच्छेदेन बलवदनिष्टानुबन्धित्वतात्पर्यकत्वमिति व्याप्तेः; 'न हिंस्यात्सर्वा भूतानि' 'अग्नीषोमीयं पशुमालभेत' इत्यादौ दृष्टत्वात् । तत्र हिंसात्वव्याप्ययागीयहिंसात्वावच्छेदेन बलवदनिष्टाननुबन्धित्वबोधकविधिवाक्यकत्वे सति हिंसात्वावच्छेदेन बलवदनिष्टानुबन्धित्वबोधकनिषेधवाक्यत्वस्य यागीयहिंसातिरिक्तहिंसात्वावच्छेदेन तद्बोधतात्पर्यकत्वस्य च सत्त्वात् । अत्र वाक्यद्वयेऽपि श्रुतित्वं निवेश्यं; विधिनिषेधयोश्श्रुतित्व एवोत्सर्गापवादन्यायस्य निरुक्तव्याप्तिरूपस्य प्रवृत्तेः । बलवदनिष्टानुबन्धित्वबोधकत्वं च तादृशबोधौपयिकाकाङ्क्षावत्त्वं; तेन तात्पर्यविरहेण न हिंस्यादित्यादिवाक्यात् हिंसात्वावच्छेदेन तत्प्रकारक-

बोधानुपपत्तावपि न क्षतिः ; तद्धर्मावच्छेदेन बलवदनिष्टाननुबन्धित्वतात्पर्यकविधिवाक्यकत्वे सति तद्धर्मावच्छेदेन बलवदनिष्टानुबन्धित्वबोधकवाक्यत्वं यत्र, तत्र तद्धर्मावच्छिन्नाभावविषयकेष्टसाधनत्वादितात्पर्यकत्वमिति व्याप्तेः; अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णातीत्यादौ दृष्टत्वात्तत्र षोडशिग्रहणत्वावच्छेदेन बलवदनिष्टाननुबन्धित्वबोधकविधिवाक्यकत्वे सति तदवच्छेदेन बलवदनिष्टानुबन्धित्वबोधकस्वरूपयोग्यवाक्यत्वस्य षोडशिग्रहणाभावे इष्टसाधनत्वादितात्पर्यकत्वस्य च सत्त्वात् ; प्रकृते सुदर्शनधारणविधायकशतपथादिवाक्यानां बहूनामुदाहृतत्वेन व्याप्यव्यापकभावापन्नधर्मभेदेन विधिनिषेधयोः प्रवृत्तावुत्सर्गापवादन्यायस्य एकधर्मावच्छेदेन तयोः प्रवृत्तौ विकल्पस्य च प्राप्त्या सर्वेषां सुदर्शनधारणस्य धर्मत्वाप्रतिषेधात्; विधायकश्रुतिसद्भावस्थले निषेधोदाहरणस्याकिञ्चित्करत्वात् । किं च—प्रकृते तप्तं चक्रं द्विभुजे धार्यमिति तप्तचक्रधारणत्वरूपव्याप्यधर्मावच्छेदेन विधेर्नैव सुदर्शनं धारयेदिति निषेधस्य तप्तातप्तोभयसाधारणसामान्यधर्मावच्छेदेन प्रवृत्तेरुत्सर्गापवादन्यायस्यैव प्रवृत्तेर्न तप्तमुद्राधारणनिषेधसिद्धिः ॥

केचित्तु—'विष्णुर्वै सर्वान्धर्मान्पाति, तस्माद्धार्मिकेण विष्णुचिह्नं धार्यं' इत्यनेन परमैकान्तिनां तप्तमुद्राधारणं विधाय तादृशतप्तमुद्राधारणस्य लोकोत्तरधर्मत्वेन तस्यायोग्येष्वप्रवर्तनीयत्वमुच्यते—तदाहुरित्यादिना । भगवद्गीतायां सारतमार्थं भक्तिप्रपत्त्यादिरूपं विधाय—

"इदं ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥"—

इति तस्यानधिकारिष्वप्रवर्तनीयत्वाभिधानदर्शनात् । सर्वदेवतासमाश्रयो हि ब्राह्मणस्तस्माद्ब्राह्मणेन न कस्यापि चिह्नं धार्यमिति निषेध-

वाक्ये सर्वदेवतासमाश्रयत्वस्य पारमैकान्त्यविरुद्धस्याभिधानेन निषेधस्यापरमैकान्तिविषयत्वावगमात्। धार्मिकेण विष्णुचिह्नं धार्यमिति विधिवाक्ये सर्वदेवतासमाश्रयत्वप्रतिकोटिभूतैकदेवतासमाश्रयत्वगर्भपारमैकान्त्यरूपधर्माश्रयस्य धार्मिकशाब्दितत्वात्। एकस्मिन्नन्तो निश्चयः एकविशेष्यकप्राप्यत्वप्रापकत्वोभयप्रकारकनिश्चय एकान्तः। तत्र पारम्यं चान्यविशेष्यकोपायत्वप्राप्यत्वदेवतात्वप्रकारकनिश्चयाभावसामानाधिकरण्यं ; प्राप्यत्वं चेतरप्राप्तीच्छानधीनप्राप्तिकर्मत्वम्। तेन परमैकान्तिनामप्यर्चिरादौ प्राप्तिकर्मत्वप्रकारकनिश्चयसत्त्वेऽपि न क्षतिः। निरुक्तप्राप्यत्वस्य ब्रह्ममात्रनिष्ठाभिप्रायेणैव मुक्तोपसृप्यव्यपदेशादिति सूत्रितं ; अन्यथा मुक्तप्राप्यत्वस्यार्चिरादिसाधारण्येन व्यभिचारात्; परमात्मत्वे साध्ये तस्य हेतुत्वानुपपत्तेः। पारमैकान्त्यमनन्यदेवताकत्वघटितमिति च—

"चतुर्विधा मम जना भक्ता एव हि ते श्रुताः।
तेषामेकान्तिनश्श्रेष्ठास्ते चैवानन्यदेवताः॥
अनन्यदेवता भक्ता ये मद्भक्तजनप्रियाः।
मामेव शरणं प्राप्तास्ते मद्भक्ताः प्रकीर्तिताः॥"—

इत्यादिशास्त्रसिद्धम्॥ तथा च निषेधश्रुतेः प्रामाण्येऽपि न विरोधः॥

—इति वदन्ति॥

अन्ये तु—अस्तु वा परोक्तानां वाक्यानां श्रुतित्वं ; तथाऽपि न सुदर्शनधारणनिषेधसिद्धिः। तथा हि—आग्नेयो वै ब्राह्मण इत्यादिना तत्तद्देवताचिह्नधारणविधानाद्यो यद्देवतामाश्रितस्तस्य तद्देवतापेक्षया अन्यस्यादेवतायाश्चिह्नं न धार्यमिति तदाहुरित्यादिना निषिध्यते ; कस्यै चिद्देवतायै इत्यस्य स्वानुपास्यदेवताप्रसादोद्देशेनेत्यर्थात्, अन्यस्यै देवतायै च्यवत इत्यस्य स्वानुपास्यदेवताभिन्नस्वोपास्यदेवताप्रसादाविषयो भवतीत्यर्थात्। तत्र देवतान्तराश्रितस्य देवतान्तर-

च्चिह्नधारणे कथं प्रवृत्तिः, प्राप्त्यभावादित्यत आह—सर्वदेवतासमाश्रयो हि ब्राह्मण इति। तथा च देवतान्तराश्रितस्यापि पुरुषस्य सर्वदेवतासमाश्रयत्वात्पक्षपातं विना देवतान्तरचिह्नमपि धार्यमिति भ्रमात्प्रसक्तिरिति भावः। आग्नेयो वा इत्यादेर्यद्देवताचिह्नधारणविधिपरत्वं तदाहुरित्यादेस्तद्देवताचिह्ननिषेधपरत्वे विरोधादुक्तार्थस्यैवाङ्गीकार्यत्वान्न विरोधः। न च—आग्नेयो वा इत्यादेर्न विधिपरत्वं, किं तु तदाहुरित्यादिना विधीयमानस्य निषेधस्य प्रतियोगिप्राप्तिप्रदर्शकत्वमिति—वाच्यम्; तथा सति अग्निचिह्नं धार्यमिन्द्रचिह्नं धार्यम्मरुच्चिह्नं धार्यमित्यादीनामप्रामाण्यापत्तेः, तस्य विधिप्रत्ययबोध्यस्य बलवदनिष्टाननुबन्धित्वस्य धारणे बाधात्। न च—'तद्धैक आङ्गिरसदेवेदमग्र आसीत्' इत्यादेरिव तादृशविधिवाक्यानामपि परमतानुवादपरत्वान्नानुपपत्तिरिति—वाच्यम्; तत्र एक आहुरित्यनेन मतान्तरत्वस्य स्फुटमवगमेऽपि प्रकृते तादृशगमकाभावेन मतान्तरत्वकल्पनायोगात्; किं च सुदर्शनधारणस्येष्टसाधनत्वाभावाद्रागतः प्राप्त्यभावान्मण्डलीकरणादिवद्दुसच्छास्त्रतः प्राप्त्यभावाद्यथाकथंचित्प्राप्तावपि येन रूपेण प्राप्तिस्तद्रूपेणैव निषेधापत्तेः। तप्तं चक्रं द्विभुजे धार्यमित्यादिप्रत्यक्षश्रुत्या, 'दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्' इति खिलश्रुत्या च विहितस्य सुदर्शनधारणस्य निषेधासम्भवाच्च नानया श्रुत्या सुदर्शनादिधारणनिषेधः। न च—सुदर्शनधारणविधायकानां पाञ्चरात्रिकविषयत्वं, तथा च भ्रमात्सर्वत्रैवर्णिकविषयत्वप्रसक्तेस्तन्निषेधोपपत्तिरिति—वाच्यम्; तप्तं चक्रं द्विभुजे धार्यमित्यविशेषेण सर्वाधिकारिकत्वप्रतीतेर्दक्षिणे तु भुजे विप्र इति विप्रमात्रस्याधिकारित्वप्रतीतेश्च सङ्कोचस्याप्रामाणिकत्वात्—इत्याहुः॥

भागवतपरिहासार्थं जीवनार्थं वा यत् सुदर्शनधारणं क्रियते तन्निषेधपरं 'नैव सुदर्शनं धारयेन्नो एव शङ्खम्' इत्यादिकं श्रुतिवचनम्।

अत एव–तच्छ्रुतौ 'पाषण्डपतितानां हि तद्भवति' 'पतिता ये च पाषण्डा नास्तिका वेदनिन्दकाः, तेषां सुदर्शनं धार्यम्' इत्युक्तं ; नास्तिकादयो हि साधुपरिहासाद्यर्थं चक्रधारणं कुर्वन्ति। तथा च–नैव सुदर्शनं धारयेदित्यस्य साधुपरिहासादिप्रयोजनकसुदर्शनधारणं न कार्यमित्यर्थः ; अन्यथा उक्तशतपथादिश्रुतिविरोधात्––इत्यपि वदन्ति ॥

वस्तुतः–पतिता ये च पाषण्डा इति वचनस्य पतितादिसम्बन्धि-सुदर्शनमनूचानैः न धार्यमित्यर्थः। पतितादिसम्बन्धश्च तदाराधितत्वादिः ; तेषां सुदर्शनं नानूचानैर्धार्यमित्येकवाक्यतयैव बोधात्, सम्भवत्येकवाक्यत्वे वाक्यभेदकल्पनस्यान्याय्यत्वात्। अन्यथा–तेषां सुदर्शनं धार्यमित्यत्र तृतीयार्थे षष्ठीकल्पनस्य नानूचानैरित्यत्र सुदर्शनं धार्यमितिपदयोरनुषङ्गस्य चापत्त्या गौरवादिति दिक् ॥

इति
श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य
श्रीमदनन्तार्यवर्यस्य कृतिषु
सुदर्शनसुरद्रुमे
प्रथमपरिच्छेदः ॥

अथ द्वितीयपरिच्छेदः ॥

अथेदानीं पाञ्चरात्रविहितसुदर्शनधारणस्य पराभिमतं देवलकमात्रविषयत्वं निरस्यते ॥

पाञ्चरात्रागमे हि सुदर्शनाद्यङ्कनमधिकारिविशेषानादरेण विधीयमानत्वात्सर्वपुरुषधर्मः । तथा हि विहगेश्वरसंहितायां तावत्सुदर्शनधारणं विधीयते—

"तद्धारणविधिं वक्ष्ये महापातकनाशनम् ।
चक्रं शङ्खं समाराध्य गन्धपुष्पादिभिश्शुभैः ॥
ततः पावकमभ्यर्च्य जुहुयाद्वैष्णवाहुतीः ।
वेदादिभिस्तथा मन्त्रैस्स्रुचैव जुहुयाद्घृतम् ॥
चक्रं च पाञ्चजन्यं च तस्मिन्नग्नौ विनिक्षिपेत् ।
अग्निनैव तु संयुक्तं चक्रमादाय मामकम् ॥
दक्षिणं बाहुमूलं स्वं दहेद्विगतसाध्वसः ।
अथवाऽन्येन केनापि वैष्णवेन महात्मना ॥
लाञ्छितं बिभृयाच्चक्रं पाञ्चजन्यं तथैव च ।
उच्चारयन्निमं मन्त्रं भूदेवो मां विचिन्तयेत् ॥
'सुदर्शन महाज्वाल कोटिसूर्यसमप्रभ ।
अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय ॥'
इति मन्त्रं समुच्चार्य दक्षिणं बाहुमङ्कयेत् ।
'पाञ्चजन्य निजध्वानध्वस्तपातकसञ्चय ॥
पाहि मां पापिनं घोरसंसारार्णवतारण ।'
इति मन्त्रं समुच्चार्य दहेत्सव्यं भुजं तथा ॥" —इति ॥

एवं पारमेश्वरसनत्कुमारादिसंहिताभेदेष्वपि सुदर्शनधारणविधानानि द्रष्टव्यानि ॥

ननु—पाञ्चरात्रस्यैवाप्रमाणत्वात्कथं तद्विहितसुदर्शनधारणं धर्मः—इति चेत्। **मैवम्**; न तावत्पाञ्चरात्रस्य भ्रान्तपुरुषप्रणीतत्वेनाप्रामाण्यं, तत्प्रणेतुर्नारायणस्य मोहाद्यभावस्य सार्वज्ञ्यस्य च 'कारणरूपमेकाकारं परब्रह्म शोकमोहविनिर्मुक्तं विष्णुं ध्यायन्न सीदति' इति,

'वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥"—

इत्यादि श्रुतिस्मृतिसिद्धत्वात् ॥ न च—पाञ्चरात्रं नारायणप्रणीतमित्यत्र मानाभावः, 'पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्' इत्यादिवचनात् ॥

न चैवं—

"एकाग्रमनसश्शान्ता ऋषयस्संशये रताः ।
नारायणानुशिष्टा हि तथा देवी सरस्वती ॥
विवेश तानृषीन् सर्वान् लोकानां हितकाम्यया ।
तैरेकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तमम् ॥"—

इत्यादिमोक्षधर्मगतमुनिप्रोक्तत्वप्रतिपादकवचनविरोधः, तथा—

"वासुदेवेन यत्प्रोक्तं शास्त्रं भगवता स्वयम् ।
तद्दिव्यं ब्रह्मरुद्राद्यैः ऋषिभिश्च तपोधनैः ॥
स्वयं प्रणीतं यच्छास्त्रं तद्विद्धि मुनिभाषितम् ।"—

इत्यादिपाञ्चरात्रवचनविरोधश्चेति—वाच्यम् । नित्येऽपि वेदे काठकादिव्यवहारवत्, व्यासप्रोक्त एव महाभारते संहिताविशेषे वैशम्पायनसंहितादिव्यवहारवच्च—कार्त्स्न्येन भगवत्प्रणीत एव पाञ्चरात्रे ब्रह्मादिप्रवक्तृकत्वमादाय तत्प्रणीतत्वव्यवहारसम्भवेनाविरोधात् ॥

न च—भगवत्प्रणीतत्वोक्तिरेव तत्प्रवक्तृकत्वाभिप्राया, ब्रह्मादिप्रणीतत्वोक्तिस्तु तत्कर्तृकत्वाभिप्रायैवेति कुतो न वैपरीत्यमिति—वाच्यम्। साङ्ख्यं योगः पाञ्चरात्रमित्यत्रास्य साङ्ख्यादिभिस्सह पाठनिमित्तसादृश्यभ्रमं निरसितुं भगवता बादरायणेन साङ्ख्यस्य वक्ता कपिल इत्यादिना साङ्ख्यादीनां सम्भावितभ्रमकपिलादिकर्तृकत्वेनाप्रामाण्यमभिधाय, 'पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्' इति साङ्ख्यादिभ्योऽतिशयेन प्रामाण्यसिद्ध्यौपयिकतया निरस्तविभ्रमाशङ्कभगवदभिमतत्वस्योक्ततया, साङ्ख्यादौ कपिलाद्यभिहितत्वोक्तेरिव पाञ्चरात्रे भगवदभिहितत्वोक्तेरपि तत्कर्तृकत्वाभिप्रायस्यैव स्वयमिति विशेषमहिम्ना वक्तुं युक्तत्वात्; तत्प्रवक्तृकत्वमात्रेण साङ्ख्यादिभ्योऽतिशयासिद्धेः;

'तैरेकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तमम्।
स्वयं प्रणीतं यच्छास्त्रं तद्विद्धि मुनिभाषितम्॥'—

इत्युदाहृतमोक्षधर्मपाञ्चरात्रवचनाभ्यां प्रेत्युपसर्गमहिम्ना ब्रह्मादीनां प्रवक्तृत्वस्यैवोक्तेश्च। प्रवचनं च व्याख्यानमेव; 'स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्' इत्यादौ तेन प्रोक्तमित्यादिपाणिनिसूत्रे च प्रवचनशब्दस्य व्याख्याने प्रयोगात्॥ तस्मान्न भ्रान्तपुरुषप्रणीतत्वेनाप्रामाण्यम्॥

ननु—तथाऽपि श्रुत्यादिविरुद्धजीवोत्पत्तिप्रतिपादकत्वात्पाञ्चरात्रमप्रमाणम्। तत्र हि—'वासुदेवात्सङ्कर्षणो नाम जीवो जायते, सङ्कर्षणात्प्रद्युम्नसंज्ञं मनः, मनसश्चानिरुद्धाख्योऽहङ्कारः' इति जीवोत्पत्तिः प्रतिपाद्यते। सा च—'न जायते म्रियते वा विपश्चित्', 'ज्ञाज्ञौ द्वावजावीशनीशौ' इत्यादिश्रुतिविरुद्धा। न च—सङ्कर्षणो नाम जीवो जायत इति जीवत्वसामानाधिकरण्येनोत्पत्तिप्रतिपादकस्यागमस्याज्ञत्वविशिष्टरूपजीवत्वव्याप्यधर्मावच्छेदेनोत्पत्त्यभावप्रतिपादकश्रुत्या

कथं विरोधः, जीवत्वसामानाधिकरण्येनोत्पत्तितदभावयोरविरोधादिति–वाच्यम्; न जायते म्रियते वेति श्रुतेर्गीतायां जीवसामान्यनित्यत्वप्रतिपादकतयोपबृंहणाज्जीवत्वावच्छेदेन तादृशश्रुतेरुत्पत्त्यभावप्रतिपादकत्वसिद्धेः। तत्र द्वितीयाध्याये जीवसामान्यस्य नित्यत्वं प्रस्तुत्येयं श्रुतिस्तत्र प्रमाणतया स्मारिता 'न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः' इति। अत्र विपश्चित्पदस्थाने कदाचिदिति निर्देशात्केवलजीवस्यैवोत्पत्त्यभावावच्छेदकत्वं; अयमित्यस्य पूर्वनिर्दिष्टजीवसामान्यपरत्वात्। तथा च वेदविरुद्धार्थप्रतिपादकत्वादप्रामाण्यम्। एवं कर्तुर्जीवात्करणस्य मनस उत्पत्तिरपि न सम्भवति; 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' इति परस्मादेव ब्रह्मणो मनस उत्पत्तिश्रवणात्। न च–परब्रह्मजन्यस्यापि जीवजन्यत्वसम्भवः, घटादौ दण्डचक्रकुलालादीनामिवैकस्मिन्कार्ये बहूनां जनकत्वसम्भवादिति–वाच्यम्; श्रुतिपुराणादौ क्वापि मनसो जीवजन्यत्वानुक्तेस्तत्र तज्जन्यत्वस्याप्रामाणिकत्वात्तादृशार्थप्रतिपादकस्य प्रामाण्यायोगात्। सङ्कर्षणात्प्रद्युम्नसंज्ञं मन इत्यस्य श्रुतिविरुद्धार्थप्रतिपादकत्वकथनं श्रीभाष्यादौ श्रुत्यनभिमतार्थप्रतिपादकत्वपरं, न तु जीवोत्पत्तिप्रतिपादकवाक्यस्येव श्रुतिजन्यबोधप्रतिबध्यतावच्छेदकविषयताशालिबोधजनकत्वपरं; ब्रह्मजन्यत्वज्ञानस्य जीवजन्यत्वज्ञाने प्रतिबन्धकताविरहात्॥ —इति चेत्॥

अत्रोच्यते—जीवस्य स्वरूपत उत्पत्त्यसम्भवेऽपि सङ्कर्षणशरीरविशिष्टस्य तत्सम्भवात्, स्वाधिकरणक्षणध्वंसानधिकरणक्षणसम्बन्धरूपोत्पत्तिशरीरे तादृशशरीरविशिष्टनिरूपिताधिकरणतानिवेशात्, चैत्रो जात इत्यादौ तादृशोत्पत्तेरेव प्रतीतेः। स्पष्टश्चेदं बौद्धाधिकारगादाधर्याम्। श्रुतौ च विशेष्यनिरूपिताधिकरणताघटितोत्पत्तेरेव निषेधात्तदवगाहिज्ञानप्रतिबध्याया विशिष्टाधिकरणताघटितोत्पत्त्यवगाह्युक्तग-

मजन्येज्ञानेऽभावात् । अन्यथा---'तोयेन जीवान्व्यससर्ज भूम्यां' 'सर्व एत आत्मानो व्युच्चरन्ति' इत्यादि श्रुतीनामपि 'न जायते म्रियते वा विपश्चित्' इत्यादिश्रुतिबाध्यता दुर्वारा स्यात् ॥

वस्तुतस्तु—पाञ्चरात्रे वासुदेवाज्जीवस्य जीवादिभ्यो मन आदीनामुत्पत्तिश्च नोक्ता, किं तु जीवमनोऽहङ्काराधिष्ठातॄणां सङ्कर्षणप्रद्युम्नानिरुद्धाख्यभगवद्व्यूहानां प्रादुर्भाव एव 'अजायमानो बहुधा विजायते' इति श्रुतिसिद्ध उक्तः। जनीप्रादुर्भाव इति जनिधातोः प्रादुर्भावार्थत्वाज्जीवादिशब्दानां नियाम्यवाचिनां तन्नियन्तृव्यूहविशेषपरत्वात्, पाञ्चरात्र एव जीवं प्रकृत्य 'स ह्यनादिरनन्तश्च परमार्थेन निश्चितः' इति जीवस्योत्पत्तिप्रतिषेधाच्च न जीवोत्पत्तिप्रतिपादकत्वम् । न च—'चतुर्षु वेदेषु पुरुषार्थमलभमानश्शाण्डिल्य इमां विद्यामधीतवान्' इति वेदानादरवचनेन वेदनिन्दावगमात्पाञ्चरात्रस्याप्रामाण्यमिति—वाच्यम् ; नहिनिन्दान्यायेन तद्वचनस्य पाञ्चरात्रस्तुत्यर्थत्वेनोपपत्तेः ; 'ऋग्वेदं भगवोऽध्येमि यजुर्वेदम्' इत्यारभ्य, 'मन्त्रविदेवास्मि नात्मवित्' इति श्रुतिवाक्ये भूमविद्याप्रशंसार्थत्वस्य,

"चत्वार एकतो वेदा भारतं त्वेकमेकतः ।
समागतैस्तु ऋषिभिस्तुलामारोपितं पुरा ॥
महत्त्वाद्भारवत्त्वाच्च महाभारतमीरितम् ।"—

इत्यादौ वेदनिन्दाया महाभारतप्रशंसार्थत्वस्य च दर्शनात्। तस्मात्पाञ्चरात्रस्तुतेर्निन्दापरत्वाभावान्नाप्रामाण्यम् ॥

यद्यपि—पाञ्चरात्रागमस्येश्वरप्रत्यक्षमूलतया प्रामाण्यं न सम्भवति। पूर्वतन्त्रे 'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्मतत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्' इति सूत्रेण धर्मस्य प्रत्यक्षगम्यत्वनिराकरणात्। तथाऽपि---तत्सूत्रे इन्द्रियजन्यप्रत्यक्षस्य धर्ममूलत्वनिराकरणेऽपि भगवत्प्रत्यक्षस्यातीतानागतसर्वपदार्थविषयकत्वाद्धर्मविषयकत्वं सम्भ-

वत्येवेति तन्मूलकतयैव भगवच्छास्त्रस्य प्रामाण्यम् । यद्वा—एकायन-शाखामूलकत्वेनास्य प्रामाण्यमभ्युपगम्यते ; न चैकायनशाखासद्भावे मानाभावः; भूमविद्यायामेकायनशाखाया अपि—

"अधीहि भगव इति होपससाद सनत्कुमारं नारदः, तं होवाच यद्वेत्थ तेन मोपसीद, ततस्त ऊर्ध्वं वक्ष्यामीति । स होवाच—ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहास-पुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्य-मेकायनं देवविद्यां ब्रह्मविद्याम् ॥"—

इत्यादिना विद्यास्थानेषु परिगणनात् ॥

इदं च पाञ्चरात्रप्रामाण्यं स्मृतीतिहासपुराणसिद्धम् । तथा हि याज्ञवल्क्यस्तावद्योगशास्त्रे स्वोक्तार्थे भगवच्छास्त्रं साक्षीकुर्वंस्तस्य प्रमाणमूर्धन्यतां दर्शयति—

"ओङ्काररथमारुह्य मनः कृत्वा तु सारथिम् ।
ब्रह्मलोकपदान्वेषी याति विष्णोः परं पदम् ॥
पाञ्चरात्रे तथा ह्येष भगवद्वाजकस्स्मृतः ।
बलं वीर्यं तथा तेजस्त्रिमात्रेति च संज्ञितः ॥
ज्ञानैश्वर्ये तथा शक्तिस्त्रिस्वभाव इति स्मृतः ।
सङ्कर्षणोऽथ प्रद्युम्नो ह्यनिरुद्धस्तथैव च ॥
ते व्यूह इति निर्दिष्ट ओङ्कारो विष्णुरव्ययः ।" —इति ॥

जमदग्निस्मृतौ—

'वैदिकेन विधानेन पूजां कुर्याद्धरेस्ततः ।
अलाभे वेदमन्त्राणां पाञ्चरात्रोदितेन वा ॥" —इति ॥

अत्र वेदमन्त्रप्रतिनिधितया पाञ्चरात्रोपादानात्प्रामाण्यं स्फुटम् ॥

उत्तररामायणे—

"पुराणैश्चैव वेदैश्च पाञ्चरात्रैस्तथैव च।
ध्यायन्ति योगिनो नित्यं क्रतुभिश्च यजन्ति तम् ॥"–इति ॥

महाभारते भीष्मपर्वणि तावद्देवगुह्ये भगवन्तं प्रकृत्य पठ्यते—

"ब्राह्मणैः क्षत्रियैर्वैश्यैश्शूद्रैश्च कृतलक्षणैः।
अर्चनीयश्च सेव्यश्च नित्ययुक्तैस्स्वकर्मसु ॥
सात्त्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः ॥" —इति ॥

शान्तिपर्वणि—

"अवश्यं वैष्णवो दीक्षां प्रविशेत्सर्वयत्नतः।
दीक्षिताय विशेषेण प्रसीदेन्नान्यथा हरिः ॥
वसन्ते दीक्षयेद्विप्रं ग्रीष्मे राजन्यमेव च।
शरदस्समये वैश्यं हेमन्ते शूद्रमेव च ॥
स्त्रियं च वर्षाकाले तु पाञ्चरात्रविधानतः ॥"— इति ॥

तथा **मोक्षधर्मे ज्ञानकाण्डे**—

"गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः।
य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः ॥"—

इत्यारभ्य महता प्रबन्धेन पाञ्चरात्रशास्त्रप्रक्रियां प्रतिपाद्य,

"इदं शतसहस्राद्धि भारताख्यानविस्तरात्।
आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतम् ॥
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा।
आरण्यकं च वेदेभ्य ओषधीभ्यो यथाऽमृतम् ॥
इदं महोपनिषदं चतुर्वेदसमन्वितम्।
साङ्ख्ययोगकृतान्तेन पाञ्चरात्रानुशब्दितम् ॥
इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम्।
ऋग्यजुस्सामभिर्जुष्टमथर्वाङ्गिरसैस्तथा ॥
भविष्यति प्रमाणं वै एतदेवानुशासनम्।" —इति ॥

श्रीविष्णुपुराणे पञ्चमांशे अक्रूरः—

"यज्वभिर्यज्ञपुरुषो वासुदेवश्च सात्वतैः ।
वेदान्तवेदिभिर्विष्णुः प्रोच्यते यो नतोऽस्मि तम् ॥"—इति ॥

श्रीवाराहे—

"यदिदं पाञ्चरात्राख्यं शास्त्रं परमदुर्लभम् ।
तद्भवान्वेत्स्यते सर्वं मत्प्रसादान्न संशयः ॥
वेदेन पाञ्चरात्रेण भक्त्या यज्ञेन च द्विज ।
प्राप्योऽहं नान्यथा प्राप्यो वर्षलक्षैरपि द्विज ॥" —इति ॥

श्रीवाराह एव धरणिद्वादशीव्रते कार्त्तिकद्वादशीव्रते एकपञ्चाशेऽध्याये—

"योगेश्वरं तु सौवर्णं दापयेत्प्रयतो नरः ।
वेदाग्रचे तु समं दत्तं द्विगुणं त्वर्थवित्तमे ॥
आचार्ये पञ्चरात्राणां सहस्रगुणितं भवेत् ॥" —इति ॥

अत्र वेदविदपेक्षया पाञ्चरात्रविद उत्कर्षप्रतिपादनात्तस्य वेदापेक्षयाऽप्युत्कर्षस्सूचितः ।

श्रीभागवते प्रथमस्कन्धे—

"तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः ।
तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मिणां यतः ॥" —इति ॥

एकादशस्कन्धे—

"य आशु हृदयग्रन्थिं निर्जिहीर्षुरिहात्मनः ।
विधिनोपचरेद्देवतन्त्रोक्तेन च केशवम् ॥" —इति ॥

ब्रह्माण्डेऽपि—

"ऋगाद्या भारतं चैव पाञ्चरात्रमथाखिलम् ।
मूलरामायणं चैव पुराणं चैतदात्मकम् ॥

येचानुयायिनस्तेषां सर्वे ते च सदागमाः ।
दुरागमास्तदन्ये ये न तैर्ज्ञेयो जनार्दनः ॥" —इति ॥

कौर्मे एकादशेऽध्याये—

"वेदेन पाञ्चरात्रेण भक्त्या यज्ञेन च द्विज ।
प्राप्योऽहं नान्यथा प्राप्यो वर्षलक्षशतैरपि ॥
पाञ्चरात्रं सहस्राणां यदि कश्चिद्ग्रहिष्यति ।
कर्मक्षये च मद्भक्तो यदि कश्चिद्भविष्यति ॥
तस्य वेदाः पाञ्चरात्रं नित्यं हृदि वसिष्यति ।" —इति ॥

स्कान्दे वैशाखमाहात्म्ये अष्टादशेऽध्याये व्याधं प्रति शङ्खः—

"शास्त्रं च वेदास्स्मृतयः पुराणं च तदात्मकम् ।
इतिहासः पञ्चरात्रं भारतं च महामते ॥
एतैरेव महाविष्णुर्ज्ञेयो नान्यैः कथञ्चन ।" —इति ॥

तथा च—उक्तस्मृतीतिहासपुराणेषु पाञ्चरात्रप्रामाण्यस्य सिद्धत्वात्तद्विहितं सुदर्शनधारणं सर्वेषां धर्म इति सिध्यति ॥

अत्र भास्करः—भवतु पञ्चरात्रागमः प्रमाणं, तथाऽपि तद्विहितं सुदर्शनधारणं त्रैवर्णिकाश्शूद्रादयो वा ये तन्त्रमार्गे प्रवृत्तास्तेषामेव धर्मः, स च तन्त्रमार्गो वैदिकप्रस्थानान्तरत्वेन स्मृतिपुराणादिप्रसिद्धः । महाभारते—

"साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ॥"—

इति वचनेन पाशुपतागमवत् पाञ्चरात्रस्य वैदिकप्रस्थानात्प्रस्थानान्तरत्वप्रतिपादनात्; भागवते अक्रूरस्तुतौ—'त्रय्या च विद्यया केचित्' इत्युपक्रम्य,

"त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ।
बह्वाचार्यविभेदेन भगवन् समुपासते ॥

अन्ये च संस्कृतात्मानो विधिनाऽभिहितेन ते ।
यजन्ति त्वन्मयास्त्वां वै बहुमूर्त्येकमूर्तिकम् ॥"—

इत्यादिना तन्त्रमार्गस्य वैदिकमार्गान्मार्गान्तरत्वप्रतिपादनाच्च । पाञ्चरात्र एव तन्त्रमार्गप्रविष्टानवैदिकान्प्रति 'वैदिकं तु पुरा कृत्वा पश्चात्तन्त्रं सामाचरेत्' इति क्रमं विधाय श्रुतिकल्पसूत्रादिविहिततत्तत्कर्मानुष्ठानानन्तरं वैष्णवसन्ध्यावन्दनाङ्कुरप्रतिसरबन्धपुण्याहवाचनादीनां विधानदर्शनात्; एवं सीमन्तोन्नयनादिसंस्कारकर्मानुष्ठानानन्तरं कुण्डार्चनसहितेन वैष्णवीकरणाख्यसंस्कारेणाग्नेर्वैष्णवत्वं सम्पाद्य तस्मिन्नेव वैष्णवाग्नौ मूलमन्त्रप्रमुखैरागमिकमन्त्रैर्होमविधानपूर्वकं सीमन्तोन्नयनादिषोडशकर्मणां विलक्षणप्रकारेण विधानदर्शनाच्च । तथा च तादृशतन्त्रमार्गप्रविष्टानामेव तप्तमुद्राधारणं धर्मो न केवलं वैदिकानाम् ॥ —इति ॥

तन्न । साङ्ख्यं योगः पाञ्चरात्रमिति महाभारतवचनस्य वेदपाञ्चरात्रयोर्भिन्नमतत्वप्रतिपादनपरत्वाभावात् । अनन्तरमेव 'साङ्ख्यस्य वक्ता कपिलः' इत्यारभ्य, 'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्' इति कर्तारं प्रख्याप्य, 'साङ्ख्यं योगः पाञ्चरात्रम्' इतिश्लोकप्रतिपन्नस्य नानामतत्वस्य पाञ्चरात्रेऽप्यन्वयभ्रमं निरसितुं 'सर्वेष्वेतेषु राजेन्द्र ज्ञानेष्वेतद्विशिष्यते' इत्यनेन पाशुपतादिभ्य उत्कर्षप्रतिपादनेन वेदपाञ्चरात्रयोर्भिन्नमतत्वाभावप्रतिपादनात् । अत्र ज्ञायतेऽनेनेति व्युत्पत्त्या ज्ञानशब्दस्य ज्ञानसाधनशास्त्रपरत्वात्, एतच्छब्दस्य साङ्ख्यं योगः पाञ्चरात्रमिति प्रस्तुतसाङ्ख्यादिपरामर्शकत्वात्, तदनन्तरं च----

"पाञ्चरात्रविदो ये तु यथाकामपरा नृप ।
एकान्तिभावोपगतास्ते हरिं प्रविशन्ति वै ॥"—

इति तस्य मोक्षसाधनत्वप्रतिपादनाच्च । भागवतेऽक्रूरस्तुतावपि तन्त्रमार्गस्य नावैदिकत्वं प्रतिपाद्यते ; वेदात्पृथङ्निर्देशमात्रेणावैदिकत्वासिद्धेः । अन्यथा

"श्रौतं कर्तुमशक्तश्चेत्स्मार्तं कर्म समाचरेत् ।
पितामहेन विप्राणामादाय च हितः परः ॥
धर्मो विमुक्तये साक्षाच्छ्रौतस्मार्तो द्विधा पुनः ।"---

इत्यादिषु श्रौतस्मार्तयोः पृथक्परिगणनेन स्मार्तस्यावैदिकत्वप्रसङ्गात् । तान्त्रिकमार्गस्य वैदिकमार्गेण सह समुच्चयाङ्गीकारेण तान्त्रिकस्यापि वैदिकत्वेनैव तप्तमुद्राधारणाधिकारितया पाञ्चरात्रतन्त्रे तान्त्रिकं प्रति तस्य विधानोपपत्तेः ॥

न च---'यावत्कर्म स्वगृह्योक्तं न्यूनं वाऽधिकमेव वा ।
तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत् ॥"---

इति वचनात्तन्त्रोक्तप्रकारस्य वैदिककर्ममध्येऽन्वयासम्भवाद्वैष्णवाग्नौ कर्तव्यानां स्वगृह्योक्ताग्निषु होमासम्भवाच्च न तयोस्समुच्चयसम्भव इति--वाच्यम् ; वैदिककर्मसमाप्त्यनन्तरं वैष्णवाग्निसम्पादनपूर्वकं तान्त्रिककर्मणां प्रयोगभेदेनानुष्ठानसम्भवात् ॥

यत्तु----एवमपि तान्त्रिकमार्गस्य वैदिकमार्गेण नित्यवदनुष्ठाननियमः, वैदिकानां तान्त्रिककर्माननुष्ठाने प्रत्यवायाभावात् । यस्तन्त्रमार्गेण श्रेयः प्राप्तुमिच्छति तस्य स्वेच्छया तन्त्रमार्गे प्रवेशसम्भवात्तन्त्रमार्गस्य वैदिकमार्गेण सहान्वाचय इत्येव युक्तम् । तथा च---एतादृशतन्त्रमार्गप्रविष्टान्प्रत्येव शङ्खचक्राङ्कनं शिखायज्ञोपवीतादिवत्तान्त्रिककर्मकर्तृसंस्कारतया सुदर्शनधारणं विधीयते ; न तु स्वतन्त्रफलसाधनतया । तथा च पाद्मे पुराणे विंशेऽध्याये ब्रह्माणं

प्रति भगवता तापपुण्ड्रयोर्दीक्षाङ्गत्वं प्रतिपादितम्—

"'शृणु वत्स प्रवक्ष्यामि मन्त्रदीक्षाविधिं परम् ।
सुदर्शनं पाञ्चजन्यं सौवर्णेन प्रकारयेत् ॥
रौप्येण वाऽपि ताम्रेण कांस्येनापि प्रकारयेत् ।
स्नाप्य पञ्चामृतैर्मन्त्रैरर्चयेत्पुरतो मम ॥
अर्चयेद्गन्धपुष्पाद्यैस्तन्मन्त्रेण विधानतः ।
तस्मिन्नग्नौ क्षिपेच्चक्रं बाह्वोर्दक्षिणसव्ययोः ॥
ऊर्ध्वपुण्ड्रधरं शिष्यं मन्त्रमध्यापयेद्गुरुः ।'

नारदः—

'एवमुक्त्वा विधातारं देवदेवो हरिः पिता ।
स्वचक्रेणाङ्कयित्वा तं तस्य मन्त्रमदात्स्वयम् ॥
सर्वलोकेश्वरो देवो ब्रह्मा मम पिता प्रभुः ।
ममापि विधिवन्मन्त्रं प्रददौ मुनिसत्तमाः ॥'" —इति ॥

तथा सुदर्शनधारणस्य दीक्षार्थत्वं वचनान्तरेणाप्यवगम्यते—

"वैष्णवत्वस्य सिद्ध्यर्थं ज्ञानसिद्ध्यै विशेषतः ।
प्रतपेच्छङ्खचक्राभ्यां होमं कृत्वा विधानतः ॥" —इति ॥

अत्र वैष्णवशब्देन तान्त्रिकदीक्षासंस्कृत एव परामृश्यते, न तु विष्णुभक्तमात्रं, कालनिर्णयादौ वैखानसागमोक्तदीक्षां प्राप्तो हि वैष्णव इति तान्त्रिकदीक्षाया एव वैष्णवपदप्रवृत्तिनिमित्तत्वेन प्रतिपादनात् ॥ —इति ॥

तत्र—

"शङ्खं वा शङ्खचक्रे वा तथा पञ्चायुधानि वा ।
धारयित्वैव विधिवद्ब्रह्मकर्म समारभेत् ॥
सुदर्शनं धारयित्वा वह्नितप्तं द्विजोत्तमः ।
उपनीय विधानेन पश्चात्कर्मसु योजयेत् ॥

उपवीती शिखी विप्रश्चक्रलाञ्छनसंयुतः ।
चक्रलाञ्छनहीनस्य विप्रस्य विफला क्रिया ॥"

'धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा ।'--- इत्यादिश्रुतिस्मृतिभिर्भगवदुपासनकर्माङ्गत्वयोः प्रतिपन्नत्वेऽप्याधानवत्प्राधान्यनित्यत्वयोरपि चक्रधारणे प्रतिपन्नत्वात् । 'येन पूतस्तरति दुष्कृतानि' 'निचिक्षेप सुपर्णं भिद्यमानम्' इत्यादिश्रुतिभिः---

"ऊर्ध्वपुण्ड्रं तथा चक्रं नित्यं धारयते नरः ।
तेन तस्याशुभं नश्येच्छुभमस्य विवर्धते ॥
शरीरं दृश्यते यस्य विष्णुचक्रेण लाञ्छितम् ।
गङ्गाजलमयं मन्ये देहं तत्पापवर्जितम् ॥"---

इत्यादिभिस्तस्य प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वरूपनित्यत्वस्यावगमात् ॥ न च--उक्तवचनं सर्वं तान्त्रिकविषयमेवेति--वाच्यम्;

"अङ्कयेच्छङ्खचक्राभ्यां दक्षिणेतरपार्श्वयोः ।
विप्राणां वेदविदुषां वैष्णवानां विशेषतः ॥
उपवीतादिवद्धार्याश्शङ्खचक्रगदादयः ।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ॥"---

इति ब्राह्मणवैष्णवयोः पृथक्कृत्य विधानेन केवलवैदिकानामपि सुदर्शनधारणविधानसिद्धेः ॥

यदपि---अत्र ब्राह्मणग्रहणमेकवाक्यताबलेन ब्राह्मणमात्रेणापि सुदर्शनं धार्यं, किं पुनर्वैष्णवेनेति वैष्णवकर्तृकसुदर्शनधारणस्तुत्यर्थम् । अन्यथा ब्राह्मणानामपि सुदर्शनधारणविधाने वाक्यभेदापत्तेः---इति ॥ तन्न; अत्र वाक्यभेदस्यागत्या स्वीकरणीयत्वात् । अन्यथा तद्वचनस्य वैष्णवेनापि निर्धूतपापेन सुदर्शनं धार्यं, किमुत ब्राह्मणेनेति ब्राह्मणकर्तृकसुदर्शनधारणस्तुत्यर्थत्वापत्तेः । किं च----

'लीलयाऽपि लिखेद्यस्तु बाहुमूले सुदर्शनम् ।
कुलकोटिं समुद्धृत्य स गच्छेद्वैष्णवं पदम् ॥'---

इति वामनपुराणवचने फलार्थत्वेनावगतस्याङ्गपरत्वासम्भवात् तादृशसुदर्शनधारणस्य तान्त्रिकव्यतिरिक्तविषयत्वं दुर्वारम् ॥

यत्तु—कर्षणादिपूजान्तभगवदाराधनफलस्य वैष्णवपदप्राप्त्यादेस्तदङ्गे सुदर्शनधारणे उपचर्यमाणत्वान्न सुदर्शनधारणस्य फलार्थत्वसिद्धिः ; 'ता वा एताः पञ्च स्वर्गस्य लोकस्य द्वारः, अपाद्या अनुवित्तयो नाम' इत्यादौ चातुर्होत्रचयनादिफलस्य स्वर्गस्य तदङ्गभूतापाद्याख्येष्टिषूपचारदर्शनात्, 'वैष्णवागमनिष्ठानां वैष्णवाग्निर्विधीयते' इति वचनेन तान्त्रिकव्यतिरिक्तानां वैष्णवाग्न्युपसंहारसामर्थ्याभावेन वैष्णवाग्निसाध्यस्य सुदर्शनधारणस्य फलार्थत्वेऽपि केवलवैदिकविषयत्वायोगाच्च—इति ॥

तन्न । लीलयाऽपिलिखेद्यस्त्वित्यसङ्कोचेन प्रवृत्तस्य यच्छब्दस्य तान्त्रिकपरत्वात्मकसङ्कोचकल्पनाया अयुक्तत्वात्, स्वस्वाग्निसाध्यस्य सुदर्शनधारणस्य वैष्णवाग्निसाध्यत्वासिद्धेः । सिद्धावपि सर्वेषां तदुपसंहारसम्भवात्, 'वैष्णवागमनिष्ठानां वैष्णवाग्निर्विधीयते' इति वचनस्य वैष्णवागमनिष्ठानां वैष्णवाग्निरेवेति नियमपरतया वैदिकानामपि तादृशाग्निसम्बन्धे विरोधाभावात् ॥ अपि च--पाञ्चरात्रविहितं सुदर्शनधारणं दीक्षापूर्वकमालयस्थविष्णुपूजकानामेव धर्म इति तावन्न युक्तं; व्यवस्थापकाभावात्, शतपथादौ सुदर्शनधारणस्य भगवदुपासकमात्रधर्मत्वाभिधानेन सङ्कोचासम्भवात्; भारद्वाजसंहितायां परिशिष्टे प्रथमेऽध्याये----

'विद्याविभूषणं पुंसस्तस्या वृत्तं विभूषणम् ।
विष्णुभक्तिर्विभूषाऽस्य सा चक्राद्यङ्कभूषणा ॥"---

इति कथनात्, भगवच्छास्त्रेऽप्युपासकमात्रधर्मत्वस्यैवाभिधानात्, वैदिकानामपि तन्त्राधिकारस्य निष्प्रत्यूहत्वात् ॥

अत्राह भास्करः—वैदिकानां तन्त्राधिकारो नास्त्येव; तथा हि वामनपुराणे—

"स्वतन्त्रा आगमास्सर्वे निर्मूलाः परिकीर्तिताः ।
अधिकारिविभेदेन प्रवृत्ता न हि संशयः ॥"—

इति वेदाधिकारिव्यतिरिक्तानामेव तन्त्राधिकारः प्रदर्शितः । कूर्मपुराणेऽपि चतुर्दशेऽध्याये पाञ्चरात्राद्यागमानां कुमार्गव्यामोहनसम्पादकपापसहकारेण वेदाधिकारिविषये व्यामोहनार्थत्वं महापुरुषशापादितवैदिकमार्गबहिर्भावानां तन्त्रमार्गाधिकारश्च—

"स तेषां मायया जातं गोवधं गौतमो मुनिः ।
केनापि हेतुना ज्ञात्वा शशापातीव कोपनः ॥
भविष्यथ त्रयीबाह्या महापातकिभिस्समाः ।
बभूवुस्तेन ते शप्ता ध्यायमानाः पुनः पुनः ॥
सर्वे सम्प्राप्य देवेशं शङ्करं विष्णुमव्ययम् ।
अस्तुवन्लौकिकैः स्तोत्रैरुच्छिष्टा इव सेवतः ॥
देवदेवौ महादेवौ भक्तानामार्तिनाशनौ ।
का नो वृत्तिर्महाभाग शापान्नस्त्रातुमर्हथः ॥
तदा पार्श्वे स्थितं विष्णुं सम्प्रेक्ष्य वृषभध्वजः ।
किमेतेषां भवेत्कार्यं प्राह पुण्येषिणामिति ॥
ततस्स भगवान्विष्णुश्शरण्यो भक्तवत्सलः ।
गोपतिं प्राह विप्रेन्द्रानालोक्य प्रणतान् हरिः ॥
वेदबाह्ये तु पुरुषे पुण्यलेशोऽत्र शङ्कर ।
न विद्यते महादेव धर्मो वेदाद्विनिर्बभौ ॥
तथाऽपि भक्तवात्सल्याद्रक्षितव्या महेश्वर ।
तस्माद्धि वेदबाह्यानां रक्षणार्थं च पापिनां ॥
विमोहनाय शास्त्राणि करिष्यावो वृषध्वज ।

एवं सञ्चोदितो रुद्रो माधवेन मुरारिणा ॥
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ।
कापालं लागुडं शाक्तं भैरवं पूर्वपश्चिमम् ॥
पाञ्चरात्रं पाशुपतं तथाऽन्यानि सहस्रशः ।"----

इत्यादिना तेषां कथञ्चिद्गतिप्राप्तये शिवकेशवाभ्यां पाशुपतपाञ्चरात्रादयः प्रणीता इति वर्णनेन दर्शितः ॥-- इति ॥

तन्न; भवदुदाहृतवामनपुराणवचने स्वतन्त्राणां पाशुपताद्यागमानां निर्मूलत्ववेदानधिकारिविषयत्वयोः प्रतिपादनेऽप्येकायनशाखामूलकतयाऽस्वतन्त्रस्य पाञ्चरात्रस्य निर्मूलत्वादिप्रतिपादनपरत्वासिद्धेः । **श्रीवाराहे** रुद्रगीतासु--

"एवमुक्तस्ततो देवैर्मामुवाच जनार्दनः ।
त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥
अल्पायासं दर्शयित्वा फलं शीघ्रं प्रदर्शय ।
एवमुक्तस्ततस्तेन देवेन परमेष्ठिना ॥
आत्मा तु गोपितस्सद्यः प्रकाशं गमितस्त्वहम् ।
ये वेदमार्गनिर्मुक्तास्तेषां मोहार्थमेव च ॥
नयसिद्धान्तमार्गेण मया शास्त्रं प्रदर्शितम् ।
पाशोऽयं पशुभावस्तु यदा प्रपतितो भवेत् ॥
तदा पाशुपतं शास्त्रं जायते वेदवर्जितम् ॥"--

इत्यगस्त्यं प्रति रुद्रवचनैः, भविष्यत्पुराणे द्विचत्वारिंशेऽध्याये--

"दृष्टप्रत्ययमात्राणि शास्त्राणि कृतवानहम् ।
यस्मात्पशुपतिश्चाहं मत्कृतास्शास्त्रविस्तराः ॥
सर्वे पाशुपता ज्ञेया वेदमार्गविरोधिनः ।
शिवश्चाहं यतस्तस्माच्छैवशास्त्राणि कानि चित् ॥
मया कृताश्च विज्ञेयास्ते च वैदिकनिन्दकाः ।"--

इत्यादिभिर्महेश्वरवचनैश्च पाशुपततन्त्रस्य मोहनार्थत्ववेदानधिकारिविषयत्वयोरिव तत्र वा पुराणान्तरेषु वा भगवच्छास्त्रस्य मोहनार्थत्ववेदानधिकारिविषयत्वयोर्व्यवस्थापनाभावात्। शारीरके उत्पत्त्यसम्भवादित्यधिकरणे भगवच्छास्त्राप्रामाण्यं व्याचक्षाणैः **कल्पतरुकारादिभिः** पाञ्चरात्रस्य पुराणेषु बुद्धादिदर्शनवद्व्यामोहनार्थमीश्वरप्रणीतत्वाश्रवणादित्युक्तत्वात्तथैव सर्वैरप्यस्मद्देशिकैः सर्वशास्त्रपारदर्शिभिरुक्तत्वात्, विज्ञानेश्वरादिभिर्धर्मशास्त्रकारैः—

"शैवान् पाशुपतान् स्पृष्ट्वा लौकायतिकनास्तिकान्।
विकर्मस्थान् द्विजांश्चैव सवासा जलमाविशेत्॥"—

इत्यादित्यपुराणगतपाशुपतनिन्दावचनान्युदाहरद्भिरुक्तपाञ्चरात्रनिन्दावचनानामनुदाहृतत्वाच्च। भगवच्छास्त्रनिन्दापरभवदुदाहृतकौर्मवचनानां प्रक्षिप्तत्वावधारणात्, कौर्मादिपुराणानामल्पप्रचारत्वेन तत्र प्रक्षेपादिशङ्काया दुर्वारत्वाच्च। अन्यथा वेदापेक्षयाऽभ्यर्हितत्वप्रतिपादकमहाभारतादिवचनानामप्रामाण्यप्रसङ्गात्॥

न च—विनिगमनाविरहेण कौर्मादिवचनविरोधान्महाभारतवचनानामेवाप्रामाण्यमिति—वाच्यम्; कौर्मादीनां तामसानां प्रचाररहितानां प्रक्षेपादिशङ्कास्पदानां प्रचरदवस्थपरमाप्तवेदाचार्यप्रणीतपञ्चमवेदसमाख्यातमहाभारतादिना तुल्यत्वशङ्काया एवानुपपत्तेः। अस्तु वा कौर्मवचनानामप्रक्षिप्तत्वं; तथाऽपि तैर्भगवच्छास्त्रस्य वेदानधिकारिविषयत्वं मोहनार्थत्वं च न सिध्यति। तथा हि—

"तस्माद्वै वेदबाह्यानां रक्षणार्थाय पापिनाम्।
विमोहनाय शास्त्राणि करिष्यावो वृषध्वज॥"—

इत्यनेन क्रियमाणशास्त्राणां रक्षणार्थत्वं मोहनार्थत्वं चावगम्यते। तयोश्च परस्परं विरोधेन द्वयोरवच्छेदेनान्वयासम्भवात् शास्त्रत्वसामानाधिकरण्येनान्वयो वाच्यः। तथा च—परिगणितशास्त्रेषु कस्य-

चिद्रक्षणार्थत्वे कल्पनीये 'ततस्स भगवान्विष्णुश्शरण्यो भक्तवत्सलः' इति रक्षणोपयुक्तशरण्यत्वभक्तवत्सलत्वरूपविशेषणद्वयस्य भगवत्यभिधानात्, 'तथाऽपि भक्तवात्सल्याद्रक्षितव्या महेश्वर' इति रक्षणैकप्रवृत्तेन भगवता तेषां रक्षितव्यत्वाभिधानाच्च तत्प्रोक्तं भगवच्छास्त्रमेव रक्षणार्थमिति प्रतीयते; वाराहपुराणभविष्यत्पुराणादित्यपुराणादिभिर्मोहनार्थत्वेन प्रसिद्धेषु पाशुपतादिषु रक्षणार्थत्वकल्पनाया असम्भवात् ॥

न च—पाञ्चरात्रस्य रक्षणार्थत्वे गौतमशापस्य वैफल्यं स्यादिति—वाच्यम्; शापस्य पाशुपताद्यसच्छास्त्रप्रवृत्तिद्वारा तदुक्तकर्मानुष्ठानेन चिरकालनरकानुभवफलकत्वेन साफल्यात्। न चैवं--पाञ्चरात्रस्य कथं रक्षणार्थत्वमिति--वाच्यम्; तादृशनरकानुभवानन्तरमिह लोके जातानां भगवदाराधनादिप्रवर्तनद्वारा भगवत्प्राप्तिहेतुत्वे पाञ्चरात्रस्य रक्षणार्थत्वोपपत्तेः। उक्तं चैतत्कौर्म एव—

"कृत्वा तानूचतुर्देवौ कुर्वाणाश्शास्त्रचोदितम्।
पतन्तो निरये घोरे बहून् कल्पान् पुनः पुनः॥
जायन्ते मानुषे लोके क्षीणपुण्यचयास्ततः।
ईश्वराराधनबलाद्गच्छध्वं सुकृतां गतिम्॥" —इति।

अत्रेश्वरशब्देन भगवानेवाभिधीयते;

"ईश्वरं सर्वभूतानां जगतः प्रभवाप्ययम्।
भक्त्या नारायणं देवं दुर्गाण्यतितरन्ति ते॥"—

इति महाभारतादौ तस्यैव निरुपाधिकेश्वरत्वेन प्रसिद्धेः॥ न च—ईश्वरश्शर्व ईशान इत्यादिकोशलौकिकप्रसिध्यनुरोधादीश्वरशब्दस्य शिवपरत्वं युक्तमिति—वाच्यम्; भगवदाराधनस्य गौतमशापमुक्तिहेतुतायाः कूर्मपुराण एव प्रतिपाद्यमानाया अनुपपत्तेः। उक्तं च कौर्मे

एव षड्विंशेऽध्याये—

"ये चान्ये शापनिर्दग्धा गौतमस्य महात्मनः ।
सर्वे ते च जनिष्यन्ति ब्राह्मणाद्यासु योनिषु ॥
निन्दन्ति च हृषीकेशं ब्राह्मणान् ब्रह्मवादिनः ।
वेदबाह्यव्रताचारा दुराचारा दुरागमाः ॥
मोहयन्ति जनान् सर्वान् दर्शयित्वा फलानि तु ।
तमसाऽऽविष्टमनसो बैडालव्रतिकाधमाः ॥
पाञ्चरात्रविदो ये तु यथाकामं परं नृप ।
एकान्तिभावोपगतास्तं हरिं प्रविशन्ति तु ॥
पञ्चकालविधानज्ञाः पूजयन्ति जनार्दनम् ।
पूजां तु तेषां द्विगुणां स तु देवः प्रयच्छति ॥"—इति ॥

परं—अनन्तरमित्यर्थः । तथा च—असच्छास्त्रप्रवृत्तिप्रयुक्तनरकाद्यनुभवानन्तरं पाञ्चरात्रानुरोधेन भगवन्तमाराध्य मुक्तिं गच्छतीत्यखण्डार्थः । तस्मात्कौर्मवचनैर्भगवच्छास्त्रे वैदिकाधिकारिकत्वं रक्षणार्थत्वं च सिध्यति, न तु मोहनार्थत्वादिकमिति ॥

यदपि—दुष्करप्रायश्चित्तपापापादितवैदिकमार्गबहिर्भावानां तन्त्राधिकारस्साम्बपुराणे दर्शितः—

"श्रुतिभ्रष्टः श्रुतिप्रोक्तप्रायश्चित्ते भयं गतः ।
क्रमेण श्रुतिसिद्ध्यर्थं वैदिकस्तन्त्रमाश्रयेत् ॥
धर्मशास्त्रे पुराणे च प्रोक्तं हि मरणान्तिकम् ।
प्रायश्चित्तं मनुष्याणां पापिष्ठानां सुदारुणम् ॥
भयदुर्बलचित्तानां मरणे जायते भयम् ।
तेषामेव हि रक्षार्थं खल्वहं तन्त्रमुक्तवान् ॥"—इति—इति ॥

तन्न ; उक्तसाम्बपुराणवचनेन तन्त्रस्य वेदाधिकारसिद्ध्यौपयिकप्रायश्चित्तप्रतिपादकतालाभेऽपि वेदभ्रष्टानामधिकाराकथनात्, तन्त्र

माश्रयेदित्यस्य तन्त्रोक्तप्रायश्चित्तं कुर्यादित्यर्थात्, तन्त्रोक्तकर्माधिकारं भजेदिति भवदभिमतार्थस्य प्रायश्चित्तविधानप्रकरणाननुगुणत्वात्, तादृशार्थाङ्गीकारेऽपि वैदिकानामधिकारानिषेधेन तेषामप्यधिकारस्य दुर्वारत्वात् ॥

न च—'तेषामेव हि रक्षार्थं खल्वहं तन्त्रमुक्तवान्' इत्येवकारेण तदतिरिक्तानामधिकारनिषेधः क्रियत इति—वाच्यम् ; वैदिकानामधिकारप्रतिपादकोदाहरिष्यमाणवचनबलादेवकारस्याप्यर्थकत्वनिश्चयात्, 'समवायितया वाच्यत्वाभावो घट एव प्रसिद्धः' इत्यादावेवकारस्याप्यर्थकताया नैयायिकैरङ्गीकारात् ॥

यदपि—कौर्म एव—

"अथांशोस्सात्त्वतो नाम विष्णुभक्तः प्रतापवान् ।
महात्मा दाननिरतो धनुर्वेदविदां वरः ॥
स नारदस्य वचनाद्वासुदेवार्चने रतः ।
शास्त्रं प्रवर्तयामास कुण्डगोलादिभिश्श्रितम् ॥
तस्य नाम्ना तु विख्यातं सात्त्वतं नाम शोभनम् ।
प्रवर्तते महाशास्त्रं कुण्डादीनां हितावहम् ॥"—

इति सङ्करयोनिजानां तन्त्राधिकारो दर्शितः— इति ।

तन्न ; 'यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः' इत्यत्र ब्रह्मक्षत्रपदयोश्चराचरसामान्यलक्षकत्ववदत्रत्य कुण्डगोलादिपदस्य त्रैवर्णिकसामान्यलाक्षणिकत्वात् । 'परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्' 'जायमानो वै ब्राह्मणस्त्रिभि ऋणवा जायते' इत्यादौ ब्राह्मणपदस्य त्रैवर्णिकसामान्यपरतायाश्शास्त्रसिद्धत्वात् । तस्येतरपर्युदासार्थत्वे—

"ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः ।
अर्चनीयश्च सेव्यश्च नित्ययुक्तैः स्वकर्मसु ॥
सात्त्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः ।"—

इति महाभारतवचनविरोधापत्तेः । कुण्डगोलादीनामपि भगवच्छास्त्रे पाञ्चकालिकानुष्ठानादेः प्रतिपादनाद्वैदिककर्मस्वनधिकृतानां कुण्डादीनामपि हितावहमिति प्रशंसोपपत्तेः ॥ एतेन--

"तेनोक्तं सात्त्वतं तन्त्रं यज्ज्ञात्वा मुक्तिभाग्भवेत् ।
यत्र स्त्रीशूद्रदासानां संस्कारो वैष्णवस्स्मृतः ॥"---

इति भागवतदशमस्कन्धवचनमपि निर्व्यूढम् ॥

यदपि---वाराहे तान्त्रिकभूयिष्ठम्लेच्छदेशवासादिना भ्रष्टवेदानां ब्राह्मणादीनां तन्त्रमार्गाधिकारो दर्शितः---

पौरुषं सूक्तमास्थाय ये यजन्ति द्विजास्तु माम् ।
संहिताजपमास्थाय ते मां पश्यन्ति ब्राह्मणाः ॥
अलाभे वेदमन्त्राणां पाञ्चरात्रोदितेन वा ।
मार्गेण ये प्रपद्यन्ते ते मां पश्यन्ति मानवाः ॥
ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते ।
शूद्रादीनां न तच्छ्रोत्रपदवीमुपयास्यति ॥
एवं मयोक्तं विप्रेन्द्र पुरा कल्पे पुरातनम् ।
पाञ्चरात्रं सहस्राणां यदि कश्चिद्ग्रहिष्यति ॥
कर्मक्षये च मां कश्चिद्यदि सम्यग्भजिष्यति ।
तस्य वेदाः पञ्चरात्रं नित्यं हृदि वसिष्यति ॥
वेदेन पाञ्चरात्रेण भक्त्या यज्ञेन च द्विजैः ।
प्राप्योऽहं नान्यथा प्राप्यो वर्षलक्षैरपि द्विज ॥" ----इति ॥

अत्र शूद्रादीनां न तच्छ्रोत्रपदवीमुपयास्यतीत्यनेन तन्त्रमार्गे स्त्रीशूद्रादीनामधिकारपर्युदासो न विवक्षितः, भागवतादौ तेषामपि तन्त्राधिकारप्रतिपादनात्; महाभारतेऽपि "शूद्रैश्च कृतलक्षणैः । अर्चनीयश्च सेव्यश्च" इति शूद्राणां तत्राधिकारप्रतिपादनाच्च । किं तु--शूद्रादीनां सकाशादिदं शास्त्रं न श्रोतव्यमिति शूद्रादीनामुपदेष्टृत्वं निषिध्यते ।

"स्त्रियश्शूद्रादयश्चापि बोधयेयुर्हिताहितम् ।
यथार्हं माननीयाश्च नार्हन्त्याचार्यतां क्वचित् ॥"—

इति शूद्रादीनामाचार्यत्वनिषेधात् ॥ —इति ॥

तन्न; उक्तवचनानां भ्रष्टवेदानां ब्राह्मणादीनां तन्त्रमार्गाधिकारप्रदर्शनपरत्वे 'वेदेन पाञ्चरात्रेण भक्त्या यज्ञेन च द्विज' इत्यनेन वेदपाञ्चरात्रयोस्समुच्चयप्रतिपादनविरोधात्, वेदपाञ्चरात्रोक्तकर्मानुगृहीतया वेदपाञ्चरात्रोक्तया भक्त्या अहं प्राप्य इति तदर्थात्, केवलवेदस्य—

"नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
भक्त्या त्वनन्यया शक्यः अहमेवं विधोऽर्जुन ॥"—

इति भगवत्प्राप्तिहेतुत्वप्रतिषेधात् । यद्वा--वेदेन वेदानुवचनेन, पाञ्चरात्रेण पाञ्चरात्रपाठेनेत्यर्थः । अलाभे वेदमन्त्राणामिति शूद्रादीनां वेदानधिकारित्वप्रयुक्तवेदमन्त्रालाभे पाञ्चरात्रोदितेन तान्त्रिकमार्गेण भगवदाराधनविधानपरं, न तु भ्रष्टवेदानां ब्राह्मणानां तद्विधानपरम् ॥ तथा हि--'कथमाराध्यसे देव वर्णैर्विप्रादिभिर्विभो ।' इति ब्राह्मणादीनां सर्वेषामपि भगवदाराधनप्रकारं नारदः पप्रच्छ; अनन्तरं च भगवता तस्मै 'पौरुषं सूक्तमास्थाय ये यजन्ति द्विजोत्तमाः ।' इत्यादिना वेदाधिकारिणां स्वाराधनप्रकारो दर्शितः ; पश्चात्तु अवसरप्राप्तशूद्रादिकर्तृकतदाराधनप्रकारजिज्ञासायां अलाभे वेदमन्त्राणामित्यादिना तत्कथनस्यैवौचित्यप्राप्तत्वात् । एतेन—

"वैदिकेन विधानेन पूजां कुर्याद्धरेस्ततः ।
अलाभे वेदमन्त्राणां पाञ्चरात्रोदितेन वा ॥"—

इति जमदग्निस्मृतिवचनमपि व्याख्यातम्; तस्य वाराहवचनतुल्याकारत्वात् ।

उक्तं हि विष्वक्सेनसंहितायामुपरिभागे—

"वैदिकं तान्त्रिकं चेति तथा वैदिकतान्त्रिकम् ।
त्रिविधं कर्म सम्प्रोक्तं पाञ्चरात्रार्णवामृते ॥
वैदिकं ब्राह्मणानां तु राज्ञां वैदिकतान्त्रिकम् ।
तान्त्रिकं वैश्यशूद्राणाम्" —इति ॥

तस्मात् अलाभे वेदमन्त्राणामित्यन्योक्तार्थ एव युक्तः । शूद्राणां तु न तच्छ्रोत्रपदवीमुपयास्यतीत्यस्य कुसृष्टिकल्पनमपि न युक्तम्; शूद्रादीनां वेदवत्पाञ्चरात्रस्यापि श्रवणनिषेधरूपार्थे स्वरसतः प्रतीयमाने बाधकविरहात्; भारतादावपि शूद्रादीनां पाञ्चरात्रश्रवणाप्रतिपादनेन तद्विरोधाभावात्; तत्र तेषां तन्त्रमार्गेऽधिकारमात्रप्रतिपादनात् ॥ न चैवं—शूद्रादीनां तन्त्रोक्तकर्माधिकारोऽपि न सिद्ध्यति, पाञ्चरात्रश्रवणाभावे तदर्थपरिज्ञानाभावादिति—वाच्यम्; तथा सति श्रुतिस्मृतीतिहासपुराणश्रवणेऽधिकाराभावेन तत्प्रतिपादितधर्मेष्वपि तेषामनधिकारप्रसङ्गात् ॥ न च—श्रुत्यादिश्रवणेऽनधिकारेऽपि तदधिकारिब्राह्मणसकाशात्तदर्थपरिज्ञानेन तदुक्तकर्मानुष्ठानोपपत्तिरिति--वाच्यम्; शूद्रादीनां पाञ्चरात्रश्रवणपठनयोरनधिकारेऽपि ब्राह्मणसकाशात्तदर्थपरिज्ञानेन तदुक्तकर्मानुष्ठानोपपत्तेरिति तुल्यम् ॥

यदपि कौर्मे—

"पाञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम् ।
वेदभ्रष्टान् समुद्दिश्य कमलापतिरुक्तवान् ॥"----

इति वेदभ्रष्टानां पाञ्चरात्राधिकारो दर्शितः । तथा तत्रैव—'चक्राङ्कितधराः केचित्कुले विष्णुपरिग्रहे ।' इति विष्णुपरिगृहीतकुलोत्पन्नानामनादिवैष्णवानां देवलकानां तन्त्रमार्गाधिकारो दर्शितः—इति ।

तन्न; वेदार्थस्य दुरधिगमत्वेन ज्ञानतो भ्रष्टान् अनधिकारित्वेन भ्रष्टान् गौतमशापेन च भ्रष्टांश्च रक्षितुं पाञ्चरात्रमुक्तवानिति प्रथमश्लोकार्थात्; तेन वेदभ्रष्टानां तन्त्राधिकार इत्यस्या-

सिद्धेः । अस्तु वा तथा; तथाऽप्यहिंसासत्यवचनादिष्विव तान्त्रिकमार्गे वेदभ्रष्टानामधिकारेऽपि वैदिकानामप्यधिकारस्य दुर्वारत्वात्, चक्राङ्कितधराः केचिदित्यस्यानादिवैष्णवानामधिकारप्रतिपादकत्वेऽपि देवलकानामेव तन्त्राधिकार इत्यर्थपरत्वाभावात् ॥

यदपि--वैदिकानां तन्त्राधिकारो न सम्भवति, 'विमोहनाय शास्त्राणि करिष्यावो वृषध्वज' इति कौर्मवचनेन पाञ्चरात्राद्यागमस्य वैदिकजनव्यामोहनार्थत्वावगमेन,

"बुद्धश्रावकनिर्ग्रन्धाः पाञ्चरात्रविदो जनाः ।
कापालिकाः पाशुपताः पाषण्डा ये हि ते द्विधा ॥
यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तामसाः ।
न तस्य तद्भवेच्छ्राद्धं प्रेत्य चेह न तत्फलम् ॥
वामाः पाशुपताचारास्तथा वै पाञ्चरात्रिकाः ।
भविष्यन्ति कलौ तस्मिन् ब्राह्मणाः क्षत्रियास्तथा ॥
शैवान् पाशुपतान् जैनान् लौकायतिकनास्तिकान् ।
पाञ्चरात्रमतान् दृष्ट्वा सवासा जलमाविशेत् ॥"--

इति तान्त्रिकमार्गप्रवेशननिन्दावचनैर्वैदिकानां तन्त्राधिकारनिषेधप्रतीतेस्तान्त्रिकमार्गस्यैकजातिमात्रविषयत्वपर्यवसानात् ॥--इति ॥

तन्न; पाञ्चरात्रस्य न मोहनार्थत्वं, किं तु रक्षणार्थत्वमित्यस्य प्राक् प्रतिपादनात्, उदाहृतनिन्दावचनानां महाभारतादिविरोधेनानादरणीयत्वात्; आदरणीयत्वेऽपि पाञ्चरात्रविद इत्यादेः पाञ्चरात्रमात्रविदो वेदविद्वेषिण इत्यर्थाङ्गीकारेण वैदिकानां तन्त्राधिकारे बाधकाभावात्,

'अपाञ्चरात्रिका ये च ये च वेदविनिन्दकाः ।'
"ये नास्तिकमता ये च पाञ्चरात्रविनिन्दकाः ।
तान् दृष्ट्वाऽप्यथवा श्रुत्वा पातित्यं याति तत्क्षणात् ॥

वेदांश्च पाञ्चरात्रं च धर्मशास्त्रं च मानवम् ।
दूषयन्ति कुतर्कैर्ये तान्नरान्नावलोकयेत् ॥
तान् दृष्ट्वाऽप्यथवा श्रुत्वा पातित्यं याति तत्क्षणात् ।
व्रजेच्च नरकान् घोरान्यावदाभूतसम्प्लवम् ॥
निन्दन्ति चतुरो वेदान् पाञ्चरात्रं च मानवाः ।
तमसा भ्रष्टविज्ञानास्सम्प्राप्ते तु कलौ युगे ॥
तद्दर्शनात्तदालापात्सद्यः पातित्यमाप्नुयात् ।
अज्ञानाद्यदि वा मोहात्तैरालापं समाचरेत् ॥
चान्द्रायणत्रयं कृत्वा दद्याद्गाश्च पयस्विनीम् ।
मासं तैस्सह सङ्गम्य ब्रह्महत्याव्रतं चरेत् ॥"—

इत्यादिवचनानां पाञ्चरात्रिकादिनिन्दकनिन्दापराणां बहूनामुपलम्भा-द्वैदिकानां तन्त्राधिकारस्यावश्याङ्गीकरणीयत्वात् ॥

किं च **महाभारते मोक्षधर्मे** नारायणीये षष्टिशततमेऽध्याये—

"राजोपरिचरो नाम बभूवाधिपतिर्भुवः ।
अखण्डलसखः ख्यातो भक्तो नारायणं हरिम् ॥
सात्वतं विधिमास्थाय नारायणमुखोद्भवम् ।
पूजयामास देवेशं तच्छेषेण पितामहान् ॥
पितॄनृषींश्च विप्रांश्च संविभज्याश्रितांश्च सः ।
पञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः ॥
प्रापणं भगवद्भक्तं भुञ्जते चाग्रभोजनम् ।
काम्यनैमित्तिकाजस्रं याज्ञीयाः परमक्रियाः ॥
सर्वं सात्वतमास्थाय विधिं चक्रे समाहितः ।"—

इत्यादिना वैदिकमार्गनिष्ठस्यैवोपरिचरवसोस्तान्त्रिकमार्गानुवर्तनप्रति-पादनात् कथं तान्त्रिकधर्मस्यैकजातिमात्रविषयत्वम् ॥

यत्तु—उपरिचरवसूपाख्यानस्य नाधिकारिविशेषव्यवस्थापकत्वम्, राजा राजसूयेन यजेतेत्यादाविव विध्युद्देशे द्विजातीनामधिकाराश्रवणात्; आर्थवादिकपुरुषप्रतीतेश्चाधिकारिविशेषव्यवस्थापकत्वायोगात्। अन्यथा देवा वै सत्रमासतेत्यार्थवादिकपुरुषप्रतीत्या देवादीनामपि यागाधिकारप्रसङ्गः—इति। तन्न;

"गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः।
य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः॥
विधिना केन जुहुयात्।"—

इति युधिष्ठिरप्रश्नस्य पाञ्चरात्रविधिनेत्युत्तरं मनसि निधाय उपरिचरवसूपाख्यानावतारेण प्रश्नोत्तरपर्यालोचनया गृहस्थादीनां वेदमार्गनिष्ठानां द्विजातीनामधिकारसिद्धेः। उपरिचरवसूपाख्यानस्यार्थवादत्वेऽपि निरर्थकार्थवादासम्भवादर्थवादमात्रस्य विधिनियतत्वेन युधिष्ठिरप्रश्नेन भीष्मोत्तरेण च वैदिकानां द्विजानां पाञ्चरात्रमार्गाधिकारविध्युन्नयनात्। देवानां यागाद्यधिकारश्चेष्ट एव; महाभारते रामायणादौ चेन्द्रादीनां यागाद्यधिकारस्य बहुशः प्रपञ्चितत्वात्, मीमांसकैर्देवानां यागाद्यधिकारानङ्गीकारेऽपि वेदान्तिभिस्तदङ्गीकारात्, 'तदुपर्यपि बादरायणस्सम्भवात्' इत्यधिकरणे देवानामप्यधिकारव्यवस्थापनात्, 'फलार्थत्वात्तु कर्मणश्शास्त्रं सर्वाधिकारं स्यात्' इति पूर्वतन्त्रषष्ठाध्यायगतसूत्रस्य तिरश्चामन्धादीनां चाधिकारनिरासपरत्वेन तद्विरोधाभावात्। एवं भीष्मपर्वणि देवगुह्ये—

"ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः।
अर्चनीयश्च सेव्यश्च नित्ययुक्तैस्स्वकर्मसु॥
सात्त्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः।
द्वापरस्य युगस्यान्त आदौ कलियुगस्य च॥"—

इति चतुर्णामपि वर्णानां पाञ्चरात्राधिकारप्रतिपादनात्तत्सिद्धिः। अपि च एकायनशाखाविहितानां तान्त्रिककर्मणां कथमेकजातिमात्रविषयत्वं, वेदोक्तकर्मणां प्रायशस्त्रैवर्णिकाधिकारिकत्वात् ॥

यत्तु—'एतया निषादं स्थपतिं याजयेत्' 'वर्षासु रथकार आदधीत' इत्यादिवेदविहितानां स्थपतीष्टिरथकाराधानादीनां शूद्रसङ्करजातिधर्मत्ववदेकायनशाखाविहिततन्त्रमार्गस्य शूद्रसङ्करजातिधर्मत्वोपपत्तिः, निषादस्थपतीष्टचङ्गयजमानमन्त्राध्ययनवच्छूद्रस्यापि तन्त्रमार्गविनियुक्तमन्त्राध्ययनोपपत्तेश्च। आथर्वणिकमार्गस्य त्रयीबाह्यविषयत्ववदेकायनशाखामार्गस्यापि त्रयीबाह्यविषयत्वस्य स्मृतिपुराणादिसिद्धत्वाच्च—इति ॥

तन्न। यस्य कर्मणो यदधिकारिकत्वं विधिवाक्यावगतं तस्य कर्मणस्तदधिकारिकत्वमवश्यमङ्गीकरणीयं; तथा च स्थपतीष्ट्यादाविव तन्त्रोक्तकर्मसु विधिवाक्याच्छूद्राधिकारिकत्वानवगमात् कथं तेषां तदधिकारिकत्वं; प्रत्युत पाञ्चरात्रतन्त्रे द्विजानामेव तन्त्रमार्गाधिकारप्रतिपादनात्, 'वैदिकं तु पुरा कृत्वा पश्चात्तन्त्रं समाचरेत्' इति वैदिकतान्त्रिकमार्गयोस्समुच्चयप्रतिपादनाच्च तन्त्रोक्तकर्मणां द्विजात्यधिकारिकत्वमावश्यकम् ॥

यत्तु—तथाङ्गीकारे वामागमेषु वामाचारस्यापि वैदिकाचारेण सह समुच्चयप्रतिपादनाद्वैदिकानामपि वाममार्गाधिकारप्रसङ्गः—इति ॥

तन्न; सद्यस्तुष्टिकरसुरापानादिविधानप्रचुराणां वामाचारोपदेशानामतिक्लेशसाध्यवैदिककर्मत्याजनार्थत्वात् गुडजिह्विकान्यायेन वैदिकमार्गश्रद्धालुश्रोत्रियजनवञ्चनायैव वामागमेषु वैदिकमार्गानुवर्तनाभ्युपगमात्तेषां वैदिककर्मानुवर्तने तात्पर्यविरहात् ॥

यच्चोक्तं—

"मत्तन्त्रदीक्षितास्सर्वे मत्पुत्राः परिकीर्तिताः ।
अतो मदीयसर्वस्वहरणार्हास्तु ते मताः ॥"—

इति तन्त्रदीक्षितानां देवालयस्वहरणे दोषाभावस्य तन्त्र एव प्रतिपादनेन, तन्त्रमार्गानुवर्तिशौनकग्रन्थे च—

"विष्णोर्गानं च गेयं च नटनं च विशेषतः ।
ब्रह्मन् ब्राह्मणजातीनां कर्तव्यं नित्यकर्मवत् ॥"—

इति नृत्तगीतादीनां धर्मत्वोपदेशेन च निर्विशङ्कदेवस्वहरणनिमित्ततन्त्रदीक्षोपज्ञस्य सद्यस्तुष्टिकरनृत्तगीतादिशिक्षकशैलूषदासीजनसहवासरुचिरस्य तन्त्रमार्गस्योपदेशोऽग्नीन्धनस्वाध्यायजपप्रमुखक्लेशात्मकवैदिककर्मत्याजनार्थोऽपि वैदिकच्छद्मार्थमेव वैदिकमार्गमनुरुन्धान इव वर्तत इति पौरुषेयागमानां वैदिकजनव्यामोहनार्थत्वावेदकस्मृतिपुराणादिहृदयज्ञैरभ्युपगन्तव्यमिति वैदिकमार्गप्रद्वेषनिबन्धनपाञ्चरात्रागमो वैदिकानुद्दिश्यप्रवर्तते—इति । तन्न ; पाञ्चरात्र एव बहुशस्तन्त्रदीक्षितानां देवस्वहरणस्य प्रसिद्धतया 'मत्तन्त्रदीक्षिताः' इतिश्लोकस्य 'वैसर्जनहोमीयं वासोऽध्वर्युःप्रतिगृह्णाति' इत्यादिस्मृतिवद्देवस्वापहरणलोभेन कल्पितत्वात्, भगवच्छास्त्रप्रसिद्धभगवद्दिव्याभरणाद्यतिरिक्तभगवदुपभुक्तस्रक्चन्दनहविरादिग्रहणे भागवतानां प्राथम्यप्रतिपादनपरत्वाद्वा, "अपि पापेष्वभिरता मद्भक्ताः पाण्डुनन्दन । मुच्यन्ते पातकैस्सर्वैः" इत्यादिभगवद्भक्तप्रशंसापरमहाभारतादिवचनवदस्यापि तत्प्रशंसापरत्वाद्वा विरोधाभावात् ॥

यदपि—ब्राह्मणानां शैलूषादिसहवाससाध्यगीतादिधर्मत्वप्रतिपादकशौनकवचनमूलतया भगवच्छास्त्रस्यावैदिकत्वकल्पनम् । तदपि न ; शौनकवचने गीतादेश्शैलूषादिसहवाससाध्यत्वाप्रतिपादनात्, गीतादेरष्टादशविद्यास्थानान्तर्गतगान्धर्वशास्त्राध्ययनसाध्यत्वात्, गीतादि-

निषेधशास्त्रस्य च कल्पसूत्रकृता आश्वलायनेन नमश्शौनकायेति गुरुत्वेन नमस्कृतस्य शौनकस्य वचनेनाविरोधाय शैलूषादिवज्जीवनौपयिक-त्रैवर्णिककर्तृकगीतादिनिषेधपरत्वात् । अन्यथा–'एतत्सामगायन्नास्ते' इति श्रुतेः, 'बृहत्षष्ठं भवति' 'रथन्तरं षष्ठं भवति' 'क्रतुषु रथन्तरं गायति' इत्यादिक्रत्वङ्गगीतिविधायकश्रुतीनां,

"वीणावादनतत्त्वज्ञश्श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छति ॥
गीतिज्ञो यदि गीतेन नाप्नोति परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥"––

इति याज्ञवल्क्यस्मृतेः,

"नारायणे तिष्ठति च नारदः प्रत्यदृश्यत ।
महर्षिर्विग्रहरुचिर्विद्वान् गान्धर्ववेदवित् ॥
गाता चतुर्णां वेदानामुद्गाताप्रथमर्त्विजाम् ।
स नारदोऽथ ब्रह्मर्षिर्ब्रह्मलोकचरोऽव्ययः ॥
स्वरैश्च सप्तभिर्विष्णुं जगौ विप्रस्सनारदः ।
षड्जमध्यममाविध्य ऋषभं च ततः परम् ॥
मिश्रयित्वा च गान्धारं तथा धैवतमध्यमम् ।
पञ्चमं च ततः कुर्वन्निषादं तदनन्तरम् ॥
काकलीं पञ्चमात्रान्तु ततो वेदश्रुतिप्रभौ ।
तिस्रस्तिस्रस्तथा राजन् वयैश्च सह सर्वशः ॥
तानातानगणानां च विविच्य क्रमशः प्रभुः ।
तैश्चापि सप्तभिर्वाच्यैर्वाचकैश्चापि सर्वशः ॥
अनन्तमीड्यं देवेशं जगौ ब्रह्मपुरस्सरम् ।
एतैस्सप्तभिराद्येशं विचिन्वन्प्रणवं तथा ॥"—

इत्यादिमहाभारतवचनजातस्य,

"पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् ।
जातिभिस्सप्तभिर्बद्धं तन्त्रीलयसमन्वितम् ॥
शृङ्गारहास्यकारुण्यवीररौद्रभयानकैः ।
भीभत्सादिरसैर्युक्तं काव्यमेतदगायताम् ॥
तौ तु गान्धर्वतत्त्वज्ञौ मूर्छनास्थानकोविदौ ।
भ्रातरौ स्वरसम्पन्नौ गन्धर्वाविव रूपिणौ ॥"—

इत्यादिश्रीरामायणवचनजातस्य,

"हरिगीतं विना नान्यद्ब्राह्मणेन नरोत्तम ।
भाषागानं न गातव्यं तस्मात्पापं त्वया कृतम् ॥"—

इति मात्स्यवचनस्य,

"नृत्यतां श्रीपतेरग्रे करसंस्फोटनादिभिः ।
उड्डीयन्ते शरीरस्था महापातकपक्षिणः ॥"—

इत्यादिस्मृतेश्चाप्रामाण्यप्रसङ्गात् ॥

यदपि सूतगीतायां—

"राजा तु वैदिकान् सर्वांस्तान्त्रिकानखिलानपि ।
अनुकर्णतया नित्यं स्थापयेन्मतिमत्तमः ॥
तन्त्राणि तन्त्रनिष्ठानां साधकान्यपि च क्रमात् ।
बाधकानविशेषेण वेदमार्गेण वर्तिनाम् ॥
वर्णाश्रमपरिभ्रष्टः प्रायश्चित्तपराङ्मुखः ।
वेदेतरागमं गत्वा तदुक्तं धर्ममाचरेत् ॥
तन्त्रेषु दीक्षितो मर्त्यो वैदिकं न स्पृशेत्सदा ।
वैदिकश्चापि तन्त्रेषु दीक्षितं न स्पृशेत्सदा ॥"—

इति स्पष्टमेव वैदिकानां तन्त्रमार्गानधिकारः प्रतिपादितः—इति ॥

तन्न; वैदिकानामपि वेदाधिकारप्रतिपादकमहाभारतवचनविरोधेनोक्तवचनानामनुपादेयत्वात् । न च त्रिनिगमनाविरहः; हरिवंशे—

"भारतं सर्वशास्त्राणामुत्तमं भरतर्षभ।",

भविष्यत्पुराणे—

"त्रिदशानां यथा विष्णुर्द्विपदां ब्राह्मणो यथा।
भूषणानां च सर्वेषां यथा चूडामणिर्वरः।
यथाऽऽयुधानां कुलिशमिन्द्रियाणां यथा मनः।
तथैव सर्वशास्त्राणां महाभारतमुत्तमम्॥"—

इत्यादिभिर्महाभारतस्योत्कर्षावगमात्। ब्रह्माण्डे च—

"ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम्।
मूलरामायणं चैव पुराणं चैतदात्मकम्॥
ये चानुयायिनस्तेषां सर्वे ते च सदागमाः।
दुरागमास्तदन्ये ये न तैर्ज्ञेयो जनार्दनः॥"—

इति महाभारतविरुद्धानामनुपादेयत्वाभिधानात्; पाशुपताद्यागमविषयतया उक्तवचनानामविरुद्धत्वाच्च॥

यदपि—वैदिकानां प्रयोजनाभावादपि न तान्त्रिककर्मानुष्ठानसम्भवः; न हि वैदिककर्मानवाप्यस्तान्त्रिकमार्गलभ्यः कश्चित्पुरुषार्थोऽस्ति, येन तादृशपुरुषार्थलाभाय तान्त्रिकमार्गे प्रवर्तेत;

"यज्ञानां तपसां चैव शुभानां चैव कर्मणाम्।
वेद एव द्विजातीनां निश्श्रेयसकरः परः॥"—

इति वेदस्यैव निश्श्रेयसकरत्वप्रतिपादनात्—इति। **तन्न;** वैदिककर्मानवाप्य पुरुषार्थशून्यत्वस्य वैदिकान्प्रत्यनुपादेयताप्रयोजकत्वे स्मृतिपुराणादेरप्यनुपादेयत्वापत्तेः, वेदाविरुद्धार्थप्रतिपादकत्वस्यैव तान् प्रत्यनुपादेयताप्रयोजकत्वात्, तस्य च पाञ्चरात्रेऽभावात्। उक्तयाज्ञवल्क्यवचने च वेदशब्दो न तन्मात्रपरः, तथा सतीतिहासपुरा-

णादीनामपि निश्श्रेयसकरत्वानापत्त्या 'अजिह्मो भारतः पन्था निर्वाणपथगामिनाम्' इत्यादिमात्स्यवचनविरोधापत्तेः, वेदनिष्ठस्य निश्श्रेयसकरत्वस्य मोक्षजनकध्यानहेतुभूततत्समानाकारशाब्दबोधजनकत्वरूपस्य पुराणादावपि सत्त्वेन तन्निषेधानुपपत्तेश्च । किं तु वेदतदुपजीविप्रमाणोभयपर इति वेदानुसारिपाञ्चरात्रस्याप्युपादेयत्वमवर्जनीयम् ॥

यदपि भारते—

"संस्थिते तु नृपे तस्मिन् शास्त्रमेतत्सनातनम् ।
अन्तर्धास्यति तत्सर्वमेतद्वः कथितं मया ॥"—

इत्युपरिचरवसुप्रमाणकाल एव प्रणष्टकोशस्तान्त्रिकमार्गः कथमाधुनिकैरनुवर्तयितुं शक्यः—इति । तन्न; संस्थिते तु नृप इत्यनेन नृपमरणोत्तरकालीनान्तर्धानाश्रयत्वस्य शास्त्रे बोधनेऽपि प्रणष्टकोशत्वाबोधात् । अन्तर्धानं हि स्वनिष्ठो योऽन्यकर्तृकदर्शनविषयताविरहः तदुद्देश्यकव्यापारः, उपाध्यायादन्तर्धत्ते छात्र इत्यादावुपाध्यायकर्तृकदर्शनविषयताया यस्स्वनिष्ठोऽभावस्तदुद्देश्यकव्यापारकर्ता छात्र इति बोधात् । तथा च तादृशनृपनाशे विष्णुविद्वेषिणां बहूनामुत्पत्तेस्तेभ्यश्शास्त्रस्यान्तर्धानोपपत्तिः । शास्त्रमन्तर्धास्यतीत्यस्य कोशं नङ्क्ष्यतीत्यर्थाङ्गीकारे च पुरुषार्थप्रयोजकतावच्छेदकविषयताशालिबोधजनकवाक्यसमुदायशक्तस्य शास्त्रपदस्य कोशे निरुक्तव्यापारे शक्तस्य धातोश्च नाशे लक्षणाप्रसङ्गः; घटो नश्यतीत्यादौ यत्किञ्चिद्घटनाशबोधवत् शास्त्रमन्तर्धास्यतीत्यस्य कतिपयकोशनाशेऽप्युपपत्त्या कोशसामान्यनाशाप्रतीतेः; तावता तस्य मन्दप्रचारत्वमेवावगम्यते । यथोक्तमानुशासनिके अष्टत्रिंशेऽध्याये—

"जातो मन्दप्रचारो हि धर्मः कलियुगे नृप ।"—इति ॥

श्रीविष्णुपुराणेऽपि कलिधर्मे—

"कलौ जगत्पतिं विष्णुं सर्वस्रष्टारमीश्वरम् ।
नार्चयिष्यन्ति मैत्रेय पाषण्डोपहता जनाः ॥" —इति ॥

यदि च—अन्तर्धानप्रतिपादनस्य प्रायिकत्वाभिप्रायकत्वं नाङ्गीक्रियते, तदा श्रीविष्णुपुराणादौ कलिधर्मे—

"वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणाम् ।
न सामयजुऋग्धर्मविनिष्पादनहैतुकी ॥
न दाम्पत्यक्रमो नैव वह्निदैवात्मकः क्रमः ।
देवताश्च कलौ सर्वास्सर्वस्सर्वस्य चाश्रमः ॥
स्त्रियः कलौ भविष्यन्ति स्वैरिण्यो ललितस्पृहाः ।
न स्वाध्यायवषट्कारौ स्वधास्वाहाविवर्जितः ॥"—

इत्यादिना कलौ वर्णाश्रमाचाराभावप्रतिपादनात्तेषामप्यनुवृत्त्यनुपपत्तेः। तत्र प्रायिकत्वाभिप्रायकत्वे च समं प्रकृतेऽपि ॥

यदपि—पाञ्चरात्रस्य न तावदीश्वरप्रत्यक्षमूलकतया प्रामाण्यम्, सत्सूत्र एव धर्मप्रामाण्यस्य प्रत्यक्षमूलत्वनिराकरणात्; नाप्येकायनशाखामूलत्वेन प्रामाण्यम्, तत्सद्भावे मानाभावात्; भूमविद्यास्थैकायनशब्दस्य नीतिशास्त्रपरत्वेन, 'सर्वेषां रूपाणां चक्षुरेकायनं, सर्वेषां स्पर्शानां त्वगेकायनम्' इत्यादिबृहदारण्योपनिषदन्तर्गतैकायनब्राह्मणपरत्वेन वा विलक्षणप्रस्थानैकायनशाखापरत्वासिद्धेः; विलक्षणैकायनशास्त्राभ्युपगमेऽपि तस्य पौरुषेयागमरूपत्वेन वेदत्वासिद्धेः। एकायनशास्त्रे शाखात्वव्यवहारस्य सनत्कुमारसंहितादिषु संहितात्वव्यवहारवद्वेदत्वासाधकत्वात् क्वचिद्वेदत्वव्यवहारस्य भारतादिषु वेदत्वव्यवहारवद्गौणत्वेनोपपादनीयत्वात्। अन्यथा—एकायनशास्त्रस्य वेदत्वे तन्मूलतया पञ्चरात्रस्य वैदिकत्वापत्तौ—

"आग्नेयं पाञ्चरात्रं तु दीक्षायुक्तं च तान्त्रिकम् ।
अवैदिकत्वात्तत्त्यक्त्वा तथा वैखानसेन तु ॥
सौम्येन वैदिकेनैव देवदेवं समर्चयेत् ।"—

इति वैखानसाद्यागमेषु पाञ्चरात्रस्य वैदिकत्वाभावप्रतिपादनं, 'स्वतन्त्रा आगमास्सर्वे निर्मूलाः परिकीर्तिताः ।' इति वामनपुराणे निर्मूलत्वप्रतिपादनं च विरुध्यते—इति ॥

तन्न; प्रमाणलक्षणे धर्मस्य प्रत्यक्षविषयतानिराकरणस्यास्मदादिप्रत्यक्षविषयत्वेन पाञ्चरात्रस्य भगवत्साक्षात्कारमूलकतया प्रामाण्यसम्भवात् ॥ उक्तं च **वेदान्ताचार्यैस्सेश्वरमीमांसायाम् सत्सूत्रभाष्ये**—

"प्रत्यक्षमस्मदादीनां पक्षोऽत्राभिमतस्ततः ।
न भागासिद्धता नापि बाधो हेत्वोरिहोक्तयोः ॥"—इति ॥

आगमप्रामाण्येऽपि भगवच्छास्त्रस्येश्वरप्रत्यक्षमूलकत्वमुक्तम्—

"श्रुतिप्रत्यक्षयोस्तत्र यतो मूलत्वनिश्चयः ॥" —इति ॥

एवमेकायनशाखामूलकतयाऽपि तस्य प्रामाण्यम् । एकायनशाखा च भूमविद्यायामुक्ता; तत्रत्यैकायनशब्दस्य नीतिशास्त्रपरत्वासिद्धेः, तस्य नीतिशास्त्रे प्रसिद्ध्यभावात्; सर्वेषां रूपाणां चक्षुरेकायनमित्यादिवाक्यघटितवाक्यस्यापि मैत्रेयीब्राह्मणसमाख्यावत्त्वेन एकायनसमाख्यावत्त्वाभावात् । एकायनशब्दस्य शाखाविशेषे प्रसिद्धेः, अस्मर्यमाणकर्तृकत्वाच्च तस्याश्श्रुतित्वसिद्धेर्न पौरुषेयत्वाशङ्का । पौरुषेयत्वकल्पने हि तस्य मूलभूतवाक्यान्तरस्य तादृशवाक्येऽपौरुषेयत्वस्य कल्पनीयतया गौरवात्;

"आद्यमेकायनं वेदं सद्ब्रह्मप्रतिपादकम् ।
एकायनीयशाखोक्तान् मन्त्रान् सर्वासु दिक्षु च ॥"—

इत्यादिना पाद्मसंहितादौ वेदत्वादेरभिधानाच्च । महाभारतादौ दृढकर्तृस्मरणरूपबाधकबलेन तस्य गौणत्वेऽपि प्रकृते बाधकाभावेन गौणत्वायोगात् । न च—अत्राप्यवैदिकत्वादिप्रतिपादकवचनविरोधो बाधक इति—वाच्यम्; तेषां वचनानां महाभारतादिविरोधेनानुपादेयत्वात्; नहिनिन्दान्यायेन वैखानसागमप्रशंसापरत्वाद्वा ॥

यदपि—स्मृतिपुराणादिष्वेवाङ्कननिषेधो बहुधा दृश्यते; 'स्वशरीरेऽन्यदेहे वा भवेदत्रिकिणी द्विजः'—इति मनुवचनम् । इदं हि—द्विजशब्दार्थानां ब्राह्मणक्षत्रियवैश्यानां सामान्यतस्त्रिकिणानिषेधपरं, त्रिकिणाश्च ब्रह्मविष्णुरुद्रचिह्नाङ्कनरूपाः; 'न ब्रह्मविष्णुरुद्राणां चिह्नमेकस्य धारयेत्।' इति वचनान्तरानुसारात्, दाहच्छेदप्रहाररूपनिमित्तत्रयजनिता वा लोके तथादर्शनात्। न तु ज्याघातयुद्धद्यूतार्थनिरन्तरासिकानिमित्ताः, ज्याघातादिनिमित्तकिणस्य क्षत्रियधर्मत्वेन तन्निषेधायोगात्; द्विजशब्दस्य क्षत्रियव्यतिरिक्तपरत्वे सङ्कोचापत्तेः; अन्यदेहे द्यूतादिनिमित्तस्य किणस्याप्रसक्तेश्च । अतो द्विजशब्दार्थानुसारेण किणशब्दार्थो वर्णनीय इति सामान्यतश्शङ्खचक्राद्यङ्कननिषेधो दुर्वारः—इति। तन्न; उक्तवचने कर्तृतासम्बन्धावच्छिन्नकिणनिष्ठात्रित्वावच्छिन्नावच्छेदकताकभेदरूपस्य भूधात्वर्थासाधारणधर्मस्येष्टसाधनत्वादिबोधेऽपि किणत्रयस्यानिष्टसाधनत्वाबोधेन तन्निषेधकत्वानुपपत्तेः ॥

न च—तादृशभेदरूपासाधारणधर्मे प्रत्यवायप्रयोजकीभूताभावप्रतियोगित्वस्य लिङा बोधनात्तादृशभेदाभावस्य किणत्रयात्मकस्य प्रत्यवायप्रयोजकत्वलाभान्निषेधोपपत्तिरिति—वाच्यम्; घटवति घटपटोभयाभावो नास्तीति प्रतीत्यनुदयेनोभयत्वावच्छिन्ननिरूपिताधिकरणताया एवोभयाभावाभावत्ववत्तादृशभेदाभावत्वस्यापि त्रित्वावच्छिन्ननिरूपक-

ताकाधिकरणतायामेव कल्पनात् । तथा चोक्तवचनस्य किणत्रयसमुच्चयनिषेधपरत्वेऽपि विष्णुचिह्ननिषेधपरत्वाभावान्न दोषः ॥ यद्वा—उक्तवचनं त्रिशूलशिखात्रयनिमित्तककिणत्रयनिषेधपरम् ॥

तद्व्याख्यातारस्तु—किणत्रयं च ज्याघातयुद्धद्यूतार्थनिरन्तरासिकानिमित्तं; द्विजशब्दश्चात्र ब्राह्मणपरः । न चैवं—त्रैवर्णिकसाधारणस्य द्विजशब्दस्य ब्राह्मणत्वावच्छिन्नपरत्वे सामान्यवाचिशब्दस्य विशेषधर्मावच्छिन्नलाक्षणिकत्वरूपसङ्कोचापत्तिरिति—वाच्यम्; 'दन्तविप्राण्डजा द्विजाः' इत्यमरकोशनानार्थवर्गे द्विजशब्दस्य ब्राह्मणत्वावच्छिन्न एव शक्तेः प्रतिपादनात्सामान्यवाचितया विशेषलाक्षणिकतायाश्चासिद्धेः ;

"विप्रक्षत्रियविट्छूद्राश्चातुर्वर्ण्यमिति स्मृतम् ।
आश्रमोस्त्री द्विजात्यग्रजन्मभूदेवबाडबाः ॥
विप्रश्च ब्राह्मणः"—

इति तत्रैव विप्रशब्दस्य ब्राह्मणवाचित्वोक्तेः ॥ —इति वदन्ति ॥

'न ब्रह्मविष्णुरुद्राणां चिह्नमेकस्य धारयेत्'—इति वचनं च मूलस्मृतिषु क्वापि न दृश्यते; दृश्यते चेदेकस्य शरीरे समुदितं न धार्यमित्येवं परं व्याख्येयम् ॥

यदप्युक्तम्—देवतायुधलाञ्छननिषेधोऽपि स्मृतिषु दृश्यते; तदाह शातातपः—

"अङ्गेषु नाङ्कयेद्विप्रो देवतायुधलाञ्छनैः ।
अङ्कयेद्यदि वा मोहात्पतत्येव न संशयः ॥" —इति;

यमोऽपि—

"नाङ्कयेन्न दहेद्गात्रं दहेच्चेत्कामकारतः ।
नाधिकुर्वन्ति दग्धाङ्गा श्रौतस्मार्तेषु कर्मसु ॥" —इति;

हारीतोऽपि—

"रागसम्भिन्नगात्राणां न स्यात्पारत्रिकं सुखम् ।
सङ्ग्रामभयरोगाद्यैर्बलाच्चिह्नैश्च दुष्यति ॥" —इति ॥

अत्र कामो रागः, रागश्च भक्तिरित्यत्र भक्तिमात्रेण तत्तद्देवताभक्तैस्तत्तच्चिह्नधारणानिषेधः क्रियते —इति ॥

तन्न ; वृद्धमनुः—

"ऊर्ध्वपुण्ड्रं तथा चक्रं नित्यं धारयते नरः ।
तेन तस्याशुभं नश्येच्छुभमस्य विवर्धते ॥" —इति ;

वृद्धपराशरः—

"अग्निनैव तु संयुक्तं चक्रमादाय वै द्विजः ।
धारयेत्सर्ववर्णानां हरिसालोक्यसिद्धये ॥" —इति ;

यमः—

'उपवीती शिखायुक्तश्चक्रलाञ्छनसंयुतः ।'
'चक्रलाञ्छनहीनस्य विप्रस्य विफला क्रिया ॥' —इति ;

शङ्खः—

"उपवीतादिवद्धार्याश्शङ्खचक्रगदादयः ।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ॥" —इति ;

व्यासः—

"ब्राह्मणः क्षत्रियो वैश्यश्शूद्रश्च श्रद्धयाऽन्वितः ।
चक्रं च पाञ्चजन्यं च बिभृयादग्निसंयुतम् ॥" —इति ;

विष्णुः—

"ब्राह्मणः क्षत्रियो वैश्यश्शूद्रश्च श्रद्धयाऽन्वितः ।
चक्रं च पाञ्चजन्यं च बिभृयादग्निसंयुतम् ॥"—

इत्यादिस्मृतिवचनैर्विष्णुचक्रादिलाञ्छनस्य विहिततया तन्निषेधायोगेनोक्तवचनानां देवतान्तरायुधलाञ्छननिषेधपरत्वावसायात् । 'अन्यैर्न

दाहयेद्गात्रं ब्राह्मणैर्हरिलाञ्छनात् ।' इति वचनेन देवतासामान्यवाचकपदघटितानां विषयव्यवस्थासिद्धेश्च। उक्तवचनेषु देवताशब्दस्य देवतासामान्यपरत्वेऽपि ख्यातिलाभादिरूपार्वाचीनफलेच्छाधीनाङ्कनस्यैव निषेधप्रतीत्या विरोधविरहात्। प्रथमवचने मोहपदेन द्वितीयवचने कामकारपदेन तृतीयवचने रागपदेन तादृशेच्छाबोधनात्। कामपदस्य भक्तिपरतायाः क्वाप्यदर्शनात् ॥

यदपि—विशिष्य तन्निषेधो निन्दा च दृश्यते; यथाऽऽह हारीतः—

"तप्तचक्रधराश्चैव ये चायुधधरा अपि ।
शिरोलिङ्गधराश्चैव कण्ठलिङ्गधरास्तथा ॥
पाषण्डास्सर्व एवैते सर्वकर्मबहिष्कृताः ।" —इति ॥

तथा स्मृतिसारसङ्ग्रहे—

"पाषण्डं पतितं व्यङ्गं तप्तचक्रधरं द्विजम् ।
सूतिकामग्निदं स्पृष्ट्वा सवासा जलमाविशेत् ॥
शैवान् पाशुपतान् जैनान् लौकायतिकनास्तिकान् ।
तप्तचक्रधरान् दृष्ट्वा सवासा जलमाविशेत् ॥
शिवलिङ्गधरा ये तु ये जटामुण्डधारिणः ।
तप्तचक्रधरा ये च तान् द्विजान्नावलोकयेत् ॥" —इति ॥

ग्रन्थान्तरे—

"कुक्कुटश्च वराहश्च तप्तचक्रधरस्तथा ।
रजस्वला च षण्डश्च पञ्चैते श्राद्धदूषकाः ॥
जटिनश्चैव मुण्डांश्च लूनकेशान् कपालिनः ।
तप्तचक्रधरांश्चैव रौद्रचिह्नविधारकान् ॥
देवतान्तरचिह्नांश्च वेदनिन्दापरांस्तथा ।
स्पृष्ट्वैतानशुचिर्भूत्वा घृतं प्राश्य विशुध्यति ॥

चक्राङ्किताय दत्तानि हव्यकव्यानि यानि वै ।
रक्षांसि तानि गच्छन्ति न पितॄन् न च देवताः ॥
पाषाण्डिनश्च पतिता ये च चक्राङ्किता जनाः ।
पुण्यकर्मणि तेषां वै सन्निधिर्नेष्यते क्वचित् ॥
तप्तचक्राङ्कितं विप्रं न पश्येत्पुण्यकर्मणि ।
तं स्पृष्ट्वा च द्विजो भूमावशुद्धिं सहसाऽऽप्नुयात् ॥"—इति ॥

बृहदाह्निके—
"श्रौतस्मार्तक्रियो नित्यं नाङ्कयेदङ्गमङ्कनैः ।
अपि विष्ण्वादिसम्बन्धैस्तप्तैर्वा पतितो भवेत् ॥
अज्ञानादथवा लोभाद्रागतो वा सुदर्शनम् ।
धत्ते कुलघ्नं तं दृष्ट्वा सवासा जलमाविशेत् ॥
भुजाग्रे सलिलेनैव विलिखेद्यस्सुदर्शनम् ।
वेदशास्त्रविनीतोऽपि दहत्यासप्तमं कुलम् ॥
चक्राङ्किततनुर्वाऽपि राजन् लिङ्गाङ्कितोऽपि वा ।
नाधिकारी परिज्ञेयश्श्रौतस्मार्तेषु कर्मसु ॥
शङ्खं चक्रं च लिङ्गं च यो मूढो धारयत्यसौ ।
पाषण्डस्स हि विज्ञेयस्सर्वकर्मबहिष्कृतः ॥
पाषण्डिनं पाशुपतं विकर्मस्थं निरीश्वरम् ।
विवासयेत्स्वराष्ट्रात्तु सर्वानेतानवैदिकान् ॥" —इति ॥

तन्न; उक्तवचनानां मोक्षातिरिक्तफलेच्छाधीनस्य परिहासार्थस्य जीवनार्थस्य वा सुदर्शनधारणस्य निषेधपरत्वेनाविरोधात्; अन्यथा सुदर्शनधारणसामान्यनिषेधपरत्वे अप्रामाण्यप्रसङ्गात्, उदाहृतशतपथश्रुतिभिस्सुदर्शनधारणस्य विहितत्वात्, श्रुतिविरुद्धस्मृतेरप्रामाण्यस्य विरोधाधिकरणन्यायसिद्धत्वात् ॥ यद्वा—सुदर्शनधारणविषय-

समस्तनिषेधवचनानां मृदायसादिनिर्मितचक्रादिधारणनिषेधपरत्वान्नानुपपत्तिः;

"शङ्खं चक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिष्कार्यस्सर्वस्माद्द्विजकर्मणः ॥"---

इति विष्णुवचनैकार्थ्यात् ॥

यत्तु---विधेस्सुवर्णादिनिर्मितचक्रादिधारणविषयत्वं निषेधस्य मृदायसादिनिर्मितचक्रादिधारणविषयत्वमिति विषयभेदकल्पनं तावदयुक्तं, ब्राह्मणानां सुवर्णादिकृतचक्रादिधारणस्यापि निषेधदर्शनात्; यथाऽऽह नारदः---

"ताम्ररूप्यसुवर्णादिकृतचक्रादिलाञ्छनम् ।
विधीयते हि शूद्राणां न द्विजानां कथञ्चन ॥"---इति;

किं तु निषेधस्य ब्राह्मणादिविषयतया विधेश्च शूद्रादिविषयतया व्यवस्थापनं युक्तम्। तथा च आदित्यपुराणे---

"वेदेषु यज्ञभागेषु यस्य नास्त्यधिकारिता ।
स तापयित्वा चक्रादि धारयेत्स्वभुजद्वये ॥" ---इति;

विष्णुरपि---

"शङ्खचक्राद्यङ्कनं च नृत्तगीतादिकं तथा ।
एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥
यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु ।
तथा चक्राङ्कितो विप्रस्सर्वकर्मसु गर्हितः ॥
शङ्खचक्रे मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिष्कार्यस्सर्वस्माद्द्विजकर्मणः ॥" ---इति ॥

अत्र च विष्णुस्मृतौ मृदायसादिपदं स्थालीपुलाकन्यायेन हेमरूप्यादिसकलप्रकृतिद्रव्योपलक्षणपरं, पूर्वोदाहृतनारदवचनैकार्थ्यात्। किं च--प्रथमश्लोके मृदायसादिप्रकृतिद्रव्यविशेषानादरेण द्विजातीनां सामा-

न्यतो हेमरूप्यादिसाधारणशङ्खचक्रादिधारणनिषेधप्रतीतेः तृतीयेऽपि श्लोके मृदायसादिपदस्य हेमरूप्यादिसकलप्रकृतिद्रव्योपलक्षणपरत्वमाश्रित्य सामान्यतो हेमरूप्यादिनिर्मितसुदर्शनधारणस्य दोषहेतुत्वप्रतिपादनपरत्वमेव वक्तुमुचितम्; वेदोपक्रमाधिकरणन्यायेनैकस्मिन्वाक्ये निश्चितोपक्रमानुसारेणोपसंहारस्य नेतव्यत्वात्—इति ॥

तन्न—

"धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा।
स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम्॥"—

इति श्रुतेः प्रणवानुसन्धानपूर्वकविष्णुध्यानाङ्गतया चक्रादिधारणस्य विधानात्तस्य ब्राह्मणविषयतासिद्धेः, शूद्राणां प्रणवानुसन्धाने अधिकाराभावात्, गायत्रीं प्रणवं यजुर्लक्ष्मीं शूद्राय नेच्छन्तीति शूद्राणां प्रणवजपप्रतिषेधात्। दक्षिणे तु भुजे विप्र इति श्रुत्या,

"ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः।
अवश्यं धारयेच्चक्रमग्नितप्तमतन्द्रितः॥"—

इति स्मृत्या च सर्वाश्रमिणां तद्विधानेन;

"सुदर्शनं धारयित्वा वह्नितप्तं द्विजोत्तमः।
उपनीयविधानेन पश्चात्कर्मसु योजयेत्॥"—

इत्युपनयनात्प्राग्धारणविधानेन च तत्सिद्धेः। शूद्राणामाश्रमविभागस्य उपनयनस्य चाभावात्; ताम्ररूप्यसुवर्णादीति नारदवचने च ताम्ररूप्यसुवर्णानि आदिर्यस्य आयसं तत्ताम्ररूप्यसुवर्णादीत्यतद्गुणसंविज्ञानबहुव्रीहिराश्रयणीयः, शङ्खचक्रे मृदा यस्त्विति विष्णुवचनैकार्थ्यात्; अन्यथा—

"सुवर्णरूप्यताम्राद्यैः कृत्वा शङ्खं सुदर्शनम्।
द्विजातिरेकजातिश्च बिभृयादग्निसंयुतम्॥"—

इति नारदेनैवोक्तत्वेन स्वव्याघातापत्तेः। न चैवं तद्वचने ताम्राद्युपादानं व्यर्थम्; तदुपादानस्य द्विजातीनां तत्कृतधारणानुमत्यर्थत्वात् ॥

यद्यपि—सुवर्णरूप्यताम्राद्यैः कृत्वा शङ्खमिति श्लोकेनैव तदनुमतिस्सिद्धा ; तथाऽपि—दार्ढ्यार्थं तच्छ्लोके तदुपादानमिति न वैयर्थ्यं; वेदेषु यज्ञभागेष्वित्यादित्यपुराणवचने सतापयित्वेत्यस्य सोऽपि तापयित्वेत्यर्थाद्वचनस्याशूद्रविषयतया चक्रधारणव्यवस्थापकत्वायोगात्। यथा दर्शपूर्णमासप्रकरणे—

"तस्मादाहिताग्निः श्रद्धादेयः स्वकृत इरिणेनावद्येत्तस्मान्मलवद्वाससा न संवदेत न सहासीत नास्या अन्नमद्यात् केशश्मश्रु वपते नखानि निकृन्तते तीर्थे स्नाति ।"—

इत्यादिवाक्यविहितानामूषरवासत्यागादीनामाहिताग्निकर्तृकत्वेन विहितानामप्याहिताग्नितदितरसाधारण्यं, अवधारणाभावात्; तद्वत्। न च–ऊषरवासादीनामुभयसाधारण्येन प्राप्तत्वात्तत्त्यागस्याप्युभयसाधारण्यं युक्तं, प्रकृते च सतापयित्वेत्यस्य तदितरसाधारण्येमानाभाव इति—वाच्यम्;

"चक्रादिधारयेद्विप्रो ललाटे मस्तके भुजे।
पातकादिविशुद्ध्यर्थं भवक्लेशविनाशनम् ॥"—

इत्यादित्यपुराण एवोक्तत्वेन तदनुरोधेन सतापयित्वेत्यस्य सोऽपि तापयित्वेत्यर्थावश्यकत्वात् ॥

शङ्खचक्राद्यङ्कनमिति विष्णुवचनस्यायमर्थः। एकजातेः–शूद्रात्; ब्राह्मणक्षत्रियवैश्यानां चक्राद्यङ्कनादिकं कदाचिदपि न स्यादिति। तथा च–द्विजातीनां शूद्रशिष्यत्वनिषेधपरत्वान्न दोषः;

"ब्राह्मणः क्षत्रियो वैश्यश्शूद्रश्च श्रद्धयाऽन्वितः।
चक्रं च पाञ्चजन्यं च बिभृयादग्निसंयुतम् ॥"—

इति विष्णुनैव चक्राङ्कनस्य ब्राह्मणधर्मत्वप्रतिपादनेनोक्तार्थस्यैव युक्तत्वात् ॥

एतेनोपक्रमाधिकरणन्यायानुसारो निरस्तः; गीतादेर्ब्राह्मणधर्मत्वस्य प्राक्प्रपञ्चितत्वात्, दक्षिणे तु भुजे विप्र इत्यादिश्रुतिविरोधात् भगवच्छास्त्रादिवचनविरोधाच्च ब्राह्मणादीनां सुदर्शनधारणनिषेधासम्भवात्; तथाचक्राङ्कित इत्यत्र तथा अचक्राङ्कित इति पदच्छेदाङ्गीकारान्न विरोधः ॥

यत्तु—सुदर्शनधारणगोचरनिषेधवचनानां यदि धात्वर्थोपरञ्जकमृदायसादिनिषेधविधिपरत्वं कल्प्यते, तदा वामागमेषु—

'रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति ।'
"तस्मात्सुरारसस्सेव्यो वैदिकैश्श्रुतिचोदनात् ।
हेमरूप्यादिपात्रेषु सेव्य एव सुरारसः ॥
दार्वायसादिपात्रेषु न सेव्यो मोक्षकामिभिः ।"—

इति सुरापाननिषेधात्। न सुरां पिबेदित्यादिनिषेधवचनानामपि दार्वायसादिपात्रपाननिषेधपरत्वं स्यात् । एवमेव—द्वासप्ततिर्जटा धार्या इत्यादिसङ्ख्याविशेषयुक्तजटाधारणविधानानुसारेण तन्निषेधवचनानामपि चोदितसङ्ख्यान्यूनाधिकसङ्ख्याकजटाधारणनिषेधपरत्वं स्यात्। एवमेव—लिङ्गधारणाविधायकवचनेष्वपि धार्यलिङ्गपरिमाणनियमप्रतिपादनात् तन्निषेधवचनानामपि लिङ्गधारणवाक्यचोदितलिङ्गपरिमाणव्यतिरिक्तपरिमाणनिषेधपरत्वं स्यात्। तथैवार्हतागमेषु केशोल्लुञ्छनादीनां पर्वकालादिनियमविधानात् तन्निषेधवचनामामपि पर्वकालव्यतिरिक्तकालपरत्वं स्यात्। किं बहुना--सर्वेऽपि बाह्यागमाः कर्तृदेशकालद्रव्यगुणसङ्ख्यापरिमाणादिनियमयुक्तानेव दुराचारान् विदधत इति तत्तद्बाह्यागमविहितदुराचारनिषेधवचनानामपि तत्तद्दुरागमविहि-

तत्कर्तृदेशकालादिव्यतिरिक्तकर्त्रादिविषयत्वं स्यादिति सर्वोऽपि पाषण्डमार्गो बहुमानितस्स्यात्—इति ॥

अत्रोच्यते—विशेषविषयविधिशास्त्रविशिष्टत्वे सति तच्छास्त्रापेक्षयाऽधिकबलत्वाभाववत्त्वे सति विशेषान्तरविषयनिषेधशास्त्रविशिष्टस्य सामान्यनिषेधशास्त्रस्य विहितातिरिक्तविशेषनिषेधपरत्वमिति नियमः ; पशुमालभेतेति विशेषविधिविशिष्टस्य तदपेक्षयाऽधिकबलशून्यस्य अहिंसन्नन्यत्र तीर्थेभ्य इति विशेषनिषेधशास्त्रविशिष्टस्य न हिंस्यादिति सामान्यनिषेधस्य विहितातिरिक्तनिषेधपरत्वदर्शनात्, सत्यकामस्सत्यसङ्कल्प इत्यादिगुणविशेषविधिवाक्यविशिष्टस्य 'अपहतपाप्मा विजरो विमृत्युर्विशोकः' इत्यादिविशेषनिषेधविशिष्टस्य निर्गुणमित्यादिसामान्यनिषेधस्य विहितातिरिक्तनिषेधपरत्वदर्शनाच्च । प्रथमसत्यन्तोपादानाच्च नानृतं वदेदिति सामान्यनिषेधस्य विशेषनिषेधपरत्वाभावेऽपि न क्षतिः, द्वितीयसत्यन्तोपादानाच्च 'हेमरूप्यादिपात्रेषु सेव्य एव सुरारसः' इति वामागमविधिविशिष्टस्य न सुरां पिबेदिति श्रौतनिषेधस्य विशेषपरत्वाभावेऽपि न क्षतिः ; विध्यपेक्षया निषेधस्याधिकबलवत्त्वात् । तथा च—नोक्तप्रतिबन्दीनामवकाशः । प्रकृते च—

"सुवर्णरूप्यताम्राद्यैः कृत्वा शङ्खं सुदर्शनम् ।
द्विजातिरेकजातिश्च बिभृयादग्निसंयुतम् ॥"—

इति विधिविशिष्टस्य तदपेक्षयाऽधिकबलशून्यस्य,

"शङ्खचक्रे मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिष्कार्यस्सर्वस्माद्द्विजकर्मणः ॥"—

इति विशेषनिषेधयुक्तस्य,

'श्रौतस्मार्तक्रियो नित्यं नाङ्कयेदङ्गमङ्कनैः'—

इति सामान्यनिषेधस्य तप्तायसादिकृतसुदर्शनादिधारणनिषेधपरत्वमिति न विरोधगन्धः ॥

न च--विधिशास्त्रविशिष्टस्य सामान्यनिषेधस्य सति विशेषनिषेधे तत्परत्वमिति नियमात्तस्यायसादिनिर्मितसुदर्शनादिधारणनिषेधपरत्वमिति न युक्तं, ब्राह्मणकर्तृकसुदर्शनधारणनिषेधरूपविशेषनिषेधस्यापि सत्त्वेन विनिगमनाविरहेण सामान्यनिषेधस्य तत्परताया अपि दुर्वारत्वादिति--वाच्यम्; ब्राह्मणकर्तृकसुदर्शनधारणनिषेधस्यानुपलम्भात्, एकजातेरयं धर्म इत्यस्यार्थान्तरपरताया वर्णितत्वात्;

"दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्।
ऊर्ध्वपुण्ड्रं तथा चक्रं नित्यं धारयते द्विजः॥
उपवीतादिवद्धार्याः शङ्खचक्रगदादयः।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः॥
चक्रादीन् धारयेद्विप्रो ललाटे मस्तके भुजे।"—

इत्यादिश्रुतिस्मृतिपुराणवचनेषु ब्राह्मणानामपि सुदर्शनधारणविधानेन तन्निषेधानुपपत्तेश्च ॥

यत्तु--'देवा वै सत्रमासत, गावो वा एतत्सत्रमासत' इत्यादिवदुदाहृतवचनानामर्थवादरूपतया शूद्राधिकारिकचक्रधारणस्तुत्यर्थत्वान्न विरोधः; जर्तिलयवाग्वा वा जुहुयादित्येवमादीनां पयोविधिस्तुत्यर्थत्ववदुदाहृतवचनानामपि शूद्रकर्तृकधारणस्तुत्यर्थत्वोपपत्तेः —इति॥

तन्न; 'देवा वै सत्रमासत' इत्यादेरर्थवादतया तत्राविवक्षितार्थताया युक्तत्वेऽपि विधिवाक्यगतानां विप्रादिपदानामविवक्षितार्थत्वायोगात्; स्वर्गकामो यजेतेत्यादिविधिवाक्यगतलिङ्गार्थस्य पुंस्त्वादेरविवक्षितत्वस्य दर्शनेऽपि विधिवाक्यगतप्रातिपदिकार्थस्याधिकारिणो विवक्षाविरहस्य क्वाप्यसिद्धेः। न च—अपि वायसश्चण्डालश्शिव इति वाक्यं वदेत् तेन सह भुञ्जीतेत्यादौ विधिवाक्येऽपि चण्डाल-

पदस्याविवक्षितार्थत्वं दृश्यत इति—वाच्यम्; उक्तवाक्ये तेन सह भुञ्जीतेत्यस्य सत्त्वेनाविवक्षोपपत्तेः, 'अपि वा मातरं गच्छेत्तुलाद्रव्यं तु न स्पृशेत्' इत्यादौ अपिवेत्यस्य तथात्वदर्शनात्; दक्षिणे तु भुजे बिप्र इत्यादावविवक्षासूचकस्यादर्शनेनाविवक्षाया वक्तुमशक्यत्वात्; द्विजातिषु तद्धारणविधायकवचनानां शूद्रोद्देश्यकचक्रादिधारणविधायकविष्णुस्मृत्यसमभिव्याहृतत्वेन तदेकवाक्यत्वाभावाज्जर्तिलन्यायाप्रवृत्तेश्च। न च—शाखान्तरीयज्योतिष्टोमाङ्गवाक्यानां शाखान्तरीयज्योतिष्टोमप्रधानवाक्यस्य च सम्भूयोच्चारणरूपसमभिव्याहाराभावेऽपि 'विषयैकत्ववदिहापि सुदर्शनधारणरूपविषयैक्यादेकवाक्यत्वस्य तन्निबन्धनस्तुत्यर्थत्वस्य च कल्पनोपपत्तिरिति—वाच्यम्; तथाऽपि शूद्रकर्तृकसुदर्शनधारणविधायकानामेव ब्राह्मणकर्तृकतद्विधिस्तुत्यर्थत्वस्य विनिगमनाविरहेणापत्तेः, शूद्रस्यापि सुदर्शनधारणे पापनिवृत्तिर्भवति किं पुनर्ब्राह्मणस्येति स्तुतिसम्भवात्, ब्राह्मणकर्तृकतद्विधिवचनानां शूद्रकर्तृकतद्विधिस्तुत्यर्थत्वे उपवीतशिखाबन्धादीनां सहविधानानुपपत्तेश्च ॥

तस्मादुदाहृतश्रुतिस्मृतीतिहासपुराणमण्डलानुमोदितं सुदर्शनधारणं चतुर्णां वर्णानां धर्म इति सिद्धम् ॥

यदप्युक्तं—अस्तु वा सुदर्शनधारणं द्विजातीनामपि धर्मः, तथाऽपि देवलकानां सात्वतपदाभिधेयानां वैष्णवानामेव धर्मः। तथा च **विष्णुयामले**—

"कृष्णो लोकहितार्थाय पाञ्चरात्रं महोदयम्।
विधाय तस्य रक्षार्थं सात्वतान् समकल्पयत् ॥
स्वीयत्वज्ञापनायैषां लाञ्छनं कृतवान् विभुः।"—इति;

स्कान्दे—

"वैष्णवा द्विविधाः प्रोक्तास्सादयोऽनादयस्तथा।
कुलधर्मो भवेद्येषां तन्त्रदीक्षा तु वैष्णवी ॥

तेऽनादिवैष्णवाः प्रोक्तास्सात्वता इति च श्रुताः ॥
वेदमार्गपरिभ्रष्टा ये महापातकादिभिः।
तन्त्रदीक्षां ततः प्राप्तास्सादियो वैष्णवास्तु ते ॥
उभयेषाममीषां च शङ्खचक्रादिधारणम् ।
धर्मः प्रकल्पितो ब्रह्मन्नेतरेषामिति स्थितिः ॥" --इति ;

बृहदाह्निकेऽपि—

"काम्यं नैमित्तिकमिति यद्धवेल्लञ्छनं द्विधा ।
सर्वमेतद्भवेद्धर्मस्सात्वतानामिति स्थितिः ॥
येऽनादिवैष्णवाः प्रोक्तास्ते स्युस्तान्त्रिकवैदिकाः ।
तेषां तूपनयात्पूर्वं कार्यं चक्रादिलाञ्छनम् ॥
तन्त्रदीक्षां विना यस्तु शङ्खचक्रादिलाञ्छनम् ।
बिभर्ति स तु पाषण्डो विज्ञेयस्तत्त्वदर्शिभिः ॥"--इति ॥

एवमन्यान्यपि तन्त्रदीक्षितानामेव शङ्खचक्रादिधारणाधिकारव्यवस्थापकानि परस्सहस्रवचनानि ग्रन्थान्तरेषु द्रष्टव्यानि ---इति ॥

तन्न--पाञ्चरात्राधिकारिव्यवस्थापनावसर एव सुदर्शनधारणस्य केवलकमात्रविषयताया निराकरणात्; किञ्च भवदुदाहृतवचने 'काम्यं नैमित्तिकमिति यद्धवेल्लाञ्छनं द्विधा' इति द्विविधस्य लाञ्छनस्य देवलकमात्रविषयत्वावगमेऽपि 'येन पूतस्तरति दुष्कृतानि' इत्यादिश्रुतिसिद्धस्य नित्यस्य चक्रधारणस्य तन्मात्रविषयत्वासिद्धेः ; उदाहृतस्कान्दादिवचनामप्युक्तवचनैकार्थ्येन काम्यनैमित्तिकपरत्वात् ॥

यदपि—तप्तमुद्राधारणं द्विजातिभिर्नानुष्ठेयं, धारणे महाफलवन्महादोषस्यापि श्रवणात्, फलापेक्षया दोषस्यैव प्रबलत्वात्। तदुक्तं मनुना—-

"श्रूयते च महान् दोषश्श्रूयते च महत्फलम् ।
फलं तत्र परित्याज्यं दोषो हि बलवत्तरः ॥" —-इति ॥

इत्यादिना विधवानियोजनस्य विहितप्रतिषिद्धत्वे विकल्पो नास्ति; किन्तु निषेधस्य प्रबलत्वाद्विहिताननुष्ठानमित्युक्तम् । —इति ॥

तदयुक्तम्। विधवानियोगस्यापि कृतयुगादौ विहितत्वात्, अनुष्ठानस्य 'देवरेण सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्' इति कलौ निषिद्धत्वात्तदानीमननुष्ठानस्य चोपपत्तेः, नान्यस्मिन्विधवा नारीति वचनस्य देवरादन्यस्मिन्न नियोक्तव्येत्यर्थपरत्वेन नियोगसामान्यनिषेधपरत्वाभावाच्च; अन्यथा–देवराद्वा सपिण्डाद्वेत्यादेस्सर्वथा वैयर्थ्यापत्तेः। निषेधस्य प्राबल्यं चासिद्धं; न हिंस्यादिति निषेधस्यापि प्राबल्यापत्त्या यागाननुष्ठानापत्तेः। न च--विधिविषयतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकस्य निषेधस्य प्राबल्याङ्गीकारान्न दोषः, न हिंस्यादिति निषेधस्य यागीयहिंसात्वपर्याप्तावच्छेदकताकविषयताकत्वाभावादिति–वाच्यम्; तथाऽपि---अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति निषेधस्य प्राबल्यापत्त्या विकल्पानुपपत्तेः, तादृशस्यापि निषेधस्य प्राबल्यासम्भवात्; प्रकृते निषेधस्यायसादिनिर्मितसुदर्शनादिधारणविषयत्वेन विधिविषयतावच्छेदकसुवर्णादिनिर्मितसुदर्शनधारणत्वपर्याप्तावच्छेदकताकविषयताकत्वाभावेन तादृशनिषेधस्य प्राबल्येऽपि क्षतिविरहाच्च। तदेवं श्रुतिस्मृतिपुराणभगवच्छास्त्रादिभिस्सुदर्शनधारणं चतुर्णामपि वर्णानां धर्म इति सिद्धम्। एवं विशिष्टाचारेणापि चक्रधारणस्य धर्मत्वं सिध्यति; विष्णुस्वामिनिम्बादित्यसम्प्रदायानुवर्तिभिर्माध्वैश्च शिष्टैस्स्यानुष्ठीयमानत्वात्, केषांचिदननुष्ठानस्याधर्मत्वानापादकत्वाच्च। शिष्टाचारप्रमाणस्य च—

"अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्,
ये तत्र ब्राह्मणास्सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामास्स्युः, यथा ते तत्र वर्तेरन्, तथा तत्र वर्तेथाः।"—

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥
श्रुतिस्स्मृतिस्सदाचारः"—

इत्यादिश्रुतिस्मृतिसिद्धत्वात् ॥

यत्तु—व्योमशिवाचार्यशिवादित्यमतानुवर्तिभिश्शिवलिङ्गधारणस्यानुष्ठीयमानतया तस्यापि धर्मत्वं स्यात्। किं च–'ये तत्र ब्राह्मणास्सम्मर्शिनः' इत्यनेन धर्मशास्त्रदृढपरिचयेन धर्मशास्त्रार्थतत्त्वं विमृशतामाचारः प्रमाणमित्युक्तम् । न च त्वदीयानां चक्रधारणविषयशास्त्रार्थविमर्शोऽस्तीति प्राक्प्रतिपादितमिति कथं तदाचारः प्रमाणम् ॥ —इति ॥

अत्र ब्रूमः । शिष्टाचारस्य धर्मप्रमाणत्वं हि–लिङ्गविधया धर्मत्वविषयकानुमितिजनकत्वम्; सुवर्णादिकृतचक्रादिधारणं वेदबोधितश्रेयस्साधनताकत्वरूपधर्मत्ववत्, शिष्टसमवेतकृतिसाध्यत्वात्, सन्ध्यावन्दनादिवत्–इत्यनुमानसम्भवात्। न च शिवलिङ्गधारणे व्यभिचारः, व्योमशिवाचार्यमतानुवर्तिनां शिष्टत्वाभावात्, अनिषिद्धत्वस्यापि हेतुकोटौ विशेषणेन तेनापि तद्धारणाच्च, शिवलिङ्गधारणस्य निषिद्धत्वात्। न चैवमसिद्धिः, सुदर्शनधारणस्यापि निषिद्धत्वादिति वाच्यम्; निषेधस्यायसादिकृतसुदर्शनधारणादिविषयत्वेन सुवर्णादिकृततद्धारणस्यानिषिद्धत्वात्। किञ्चेत्यादिकमपि न युक्तं; तत्र हि यद्विषयकशिष्टाचारः तद्विषये तेषां शास्त्रार्थविमर्शोऽपेक्षितः, विषयान्तरसाधारण्येन वा ?। नाद्यः–शिष्टाचारप्रामाण्यस्यैव वैयर्थ्यापत्तेः, यद्विषये शास्त्रसत्त्वं तद्विषये शिष्टाचारानपेक्षणात्, यद्विषये च शास्त्राभावः तस्याप्रमाणत्वात्। न द्वितीयः–अस्मदीयानां तादृशविमर्शस्योभयानुमतत्वात् ॥

वस्तुतस्तु—अस्मदीयानां चक्रादिधारणविषयेऽपि शास्त्रार्थविमर्शोऽस्तीति प्राक्प्रतिपादितमिति दिक् ॥

इति

श्रीशेषार्यवंशमुक्ताफलस्य श्रीयादवाद्रिनिवासरसिकस्य

श्रीमदनन्तार्यवर्यस्य कृतिषु

सुदर्शनसुरद्रुमे

द्वितीयपरिच्छेदः ॥

सुदर्शनसुरद्रुमस्सम्पूर्णः ॥

॥ श्रीः ॥
